CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13

Coll. No. 751

Title Dronaparvan with Bhārata bhāpradīpikā

No.: 751 Subject: Kāvya.

Title: Mahābhārata. Dronaparvan with Bhāratārtha pradīpikā

Author: Vedavyāsa – Arjuna Miśra. Scribe: Rāmacandra

Date of the work: – Date of the Ms.: V.S. १९८९

Place of the work: – Place of the Ms.: –

Size: 13.5" by 5.5" Extent: 340 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: ——

द्रोण

।।र्द:।। ॐ नमः श्रीगुरुगोपालगौरीगणपतिभ्यः।। ।।नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव
ततो जयमुदीरयेत्।। ।।जनमेजय उवाच।। ।।तमप्रतिमसत्वौजोबलवीर्यपराक्रमं। हतं देवव्रतं श्रुत्वा पांचाल्येन शि
खंडिना। धृतराष्ट्रस्ततो राजा शोकव्याकुललोचनः। किमचेष्टत विप्रर्षे हते पितरि वीर्यवान्। तस्य पुत्रो हि भगवन्भीष्मद्रोण
मुखै रथैः। पराजित्य महेष्वासान्पांडवान्राज्यमिच्छति। तस्मिन्हते तु भगवन्केतौ सर्वधनुष्मतां। यदचेष्टत कौरव्यस्तन्मे ब्रू
हि द्विजोत्तम।। ।।वैशंपायन उवाच।। ।।निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः। लेभे न शांतिं कौरव्यश्चिंताशोकप
रायणः। तस्य चिंतयतो दुःखमनिशं पार्थिवस्य तत्। आजगाम विशुद्धात्मा पुनर्गावल्गणिस्तदा। शिबिरात्संजयं प्राप्तं
निशि नागाह्वयं पुरं। आंबिकेयो महाराज धृतराष्ट्रोन्वपृच्छत। श्रुत्वा भीष्मस्य निधनमप्रहृष्टमना भृशं। पुत्राणां जयम

ाकांक्षन्विललापातुरो यथा।। ।।धृतराष्ट्र उवाच।। ।।संशोच्य तं महात्मानं भीष्मं भीमपराक्रमं। किमकार्षुः परं तात कुरव
ः कालचोदिताः। तस्मिन्विनिहते शूरे दुराधर्षेमितौजसि। किं नु स्वित्कुरवोकार्षुर्निमग्नाः शोकसागरे। तदुदीर्णं महत्सैन्यं
त्रैलोक्यस्यापि संजय। भयमुत्पादयेत्तीव्रं पांडवानां महात्मनां। देवव्रते तु निहते कुरूणामृषभे तदा। यदकार्षुर्नृपतयस्तन्म
माचक्ष्व संजय।। ।।संजय उवाच।। ।।शृणु राजन्नेकमना ब्रुवतो वचनं मम। यत्ते पुत्रास्तदाकुर्वन्हते देवव्रते मृधे। निह
ते तु तदा भीष्मे राजन्सत्यपराक्रमे। तावकाः पांडवेयाश्च प्राध्यायंत पृथक्पृथक्। विस्मिताश्च प्रहृष्टाश्च क्षत्रधर्मं वि
शांपते। जुगुप्समानाः परमं प्रणिपत्य महात्मने। शाययन्कल्पयामासुर्भीष्मायामिततेजसे। सोपधानं नरव्याघ्राः शरैः सन्नत
पर्वभिः। विधाय रक्षां भीष्मस्य समाभाष्य परस्परं। अनुमान्य च गांगेयं कृत्वा चापि प्रदक्षिणं। क्रोधसंरक्तनयनाः समवेक्ष्य प
रस्परं। पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालचोदिताः। ततस्तूर्यनिनादैश्च भेरीणां च महास्वनैः। तावकानामनीकानि परे
षां चापि निर्ययुः। व्यावृत्तेहनि राजेंद्र पतिते जाह्नवीसुते। अमर्षवशमापन्नाः कालोपहतचेतसः। अनादृत्य वचः पथ्यं गां

द्रोण

गांगेयस्य महात्मनः॥ निर्ययुर्भरतश्रेष्ठ द्रष्ट्वास्त्राणपादाय सर्वशः॥ मोहात्तव सपुत्रस्य वधांछांतवस्य च॥ कौरवा मृत्युनाक्रांताः
सहिताः सर्वराजभिः॥ अजावय इवागोपा वने श्वापदसंकुले॥ भृशमुद्विग्नमनसो हीना देवव्रतेन ते॥ पतिते भरतश्रेष्ठे बभू
वुः कुरुवाहिनी॥ द्यौरिवापेतनक्षत्रा हीनं खमिव वायुना॥ विपन्नसस्येव मही वाक्चैवासंस्कृता यथा॥ आसुरीव महा
सेना निगृहीते पुरा बलौ॥ विधवेव वरारोहा शुष्कतोयेव निम्नगा॥ वृकैरिव वने रुद्धा पृषती हतयूथपाः॥ स्वाधर्षा हतसिंहे
व महती गिरिकंदरा॥ भारती भारतश्रेष्ठ पतिते जाह्नवीसुते॥ विष्वग्वातहता भग्ना नौरिवासीन्महार्णवे॥ बलिभिः पांडवैर्वी
रैर्लब्धलक्षैर्भृशार्दिता॥ सा तदासीद्भृशं सेना व्याकुलाश्वरथद्विपा॥ विषण्णभूयिष्ठनरा कृपणा ध्वस्तमानसा॥ तस्यां त्रस्ता नृप
तयः सैनिकाश्च पृथग्विधाः॥ पाताल इव मज्जंतो हीना देवव्रतेन ते॥ कर्णं हि कुरवो स्मार्षुः सर्वे देवव्रतोपमं॥ सर्वशस्त्रभृतां
श्रेष्ठं रोचमानमिवातिथिं॥ बंधुमापद्गतस्येव तमेवापागमन्मनः॥ चुक्रुशुः कर्ण कर्णेति तत्र भारत पार्थिवाः॥ राधेयं हितमस्मा
कं सूतपुत्रं तनुत्यजं॥ स हि नायुध्यत तदा दशाहानि महायशाः॥ सामात्यबंधुः कर्णो वै तमाह्वयत माचिरं॥ भीष्मेण हि म २

युधि

हाबाहुः सर्वक्षत्रस्य पश्यतः॥ रथेषु गण्यमानेषु बलविक्रमशालिषु॥ संख्यातोर्द्धरथः कर्णो द्विरथः सन्नरर्षभः॥ रथातिर
थसंख्यायां योग्रणीः शूरसंमतः॥ पितृवित्तेशदेवेशानपि यो योद्धुमुत्सहेत॥ स तु तेनैव कोपेन राजन्गांगेयमुक्तवान्॥
त्वयि जीवति कौरव्य नाहं योत्स्ये कदाचन॥ त्वया तु पांडुपुत्रेषु निहतेषु महामृधे॥ दुर्योधनमनुज्ञाप्य वनं यास्यामि कौर
व॥ पांडवैर्वा हते भीष्म त्वयि स्वर्गमुपेयुषि॥ हंतास्म्येकरथेनैव कृत्स्नान्यान्मन्यसे रथान्॥ एवमुक्त्वा महाराज दशाहानि म
हायशाः॥ नायुध्यत तदा कर्णः पुत्रस्य तव संमतः॥ भीष्मस्त्वमरविक्रांतः पांडवेयस्य पार्थिव॥ जघान समरे योधानसंख्येय
पराक्रमः॥ तस्मिंस्तु निहते शूरे सत्यसंधे मितौजसि॥ त्वत्सुताः कर्णमस्मार्षुस्तितीर्षव इव प्लवं॥ तावकास्तव पुत्राश्च सहि
ताः सर्वराजभिः॥ एहि कर्णेति चाक्रंदन्कालोयमिति चाब्रुवन्॥ जामदग्न्याभ्यनुज्ञातमस्त्रे दुर्वारपौरुषं॥ अगमन्नो मनः क
र्णं बंधुमात्ययिकेष्विव॥ स हि शक्तो रणे राजंस्त्रातुमस्मान्महाभयात्॥ त्रिदशानिव गोविंदः सततं सुमहायशाः॥ ॥वै
शंपायन उवाच॥ ॥तथा तु संजयं कर्णं कीर्तयंतं पुनः पुनः॥ आशीविषवदुच्छ्वस्य धृतराष्ट्रोब्रवीदिदं॥ ॥धृतराष्ट्र

द्रो॥ उवाच॥ ॥यत्तद्धि कर्णेति कर्षमिगमहोमत सदा। अप्यप्यपतद्राधेयं स्तंतंपुत्रमनुत्तमं। अपितन्नमृषाकार्षीद्युधिसत्य
पराक्रमः। संत्रस्तानां तदार्त्तानां त्रातारं त्राणमिच्छतां। अपितत्पूरयामास धनुर्द्धरवरो युधि। यद्धि निपतिते भीष्मे कौरवा
णां मया कृतं। कर्णो विकर्त्तनः खङ्गं परेषामादधच्छ्रियं। कृतवान्समपुत्राणां जयाशां सफलामपि॥ ॥इति महाभारते द्रोणपर्व
णि॥ ॥संजय उवाच॥ ॥हतं तं भीष्ममत्याधिरथिर्विदित्वा भिन्नां नावमिवात्यगाधे कुरूणां। सोदर्यवद्व्यसनात्सूतपुत्रः संता
रयिष्यंस्तव पुत्रस्य सेनां॥ ॥कर्ण उवाच॥ ॥यस्मिन्धृतिः सत्यपराक्रमौजः सत्यं स्मृतिर्वीरगुणाश्च सर्वे। अस्त्राणि दिव्या
न्यथ संनतिर्ह्रीः प्रिया च वागनसूया च भीष्मे। सदा कृतज्ञे द्विजशत्रुघातके सनातनं चंद्रमसीव लक्ष्म। स चेत्प्रशांतः परवी
रहंता मन्ये हतानेव च सर्ववीरान्। नेह ध्रुवं किंचन जातु विद्यां लोके ह्यस्मिन्कर्मणो नित्ययोगात्। सूर्योदये को हि विमुक्त
संशयो भावं कुर्वीताद्य महाव्रते हते। वसुप्रभावे वसुवीर्यसंभवे गते वसूनेव वसुंधराधिपे। वसूनि पुत्रांश्च वसुंधरां तथा
कुरूंश्च शोचध्वमिमां च वाहिनीं॥ ॥संजय उवाच॥ ॥महाप्रभावे वरदे निपातिते लोकेश्वरे शांतनवे मितौजसि परा ३

आहवशौंडं संग्रामशूरं १४ यमसदनं धर्मराजगृहं मंदिरं वा १५ अमरैरपि देवैरपि १६ यमौ माद्रीपुत्रौ। रणे युद्धे १७

जिते भारत नायके बले कर्णोऽभ्यसान्त्वयत्कं तस्तदानीं ८ इदं च राधेयवचो निशम्य सुतास्तु राजंस्तव सैनिकाश्च
परस्परं चुक्रुशुरार्त्तिजं भृशं तदाश्रु नेत्रैर्मुमुचुर्हि शब्दं ९ प्रवर्त्तमाने तुमुले महाहवे प्रयुज्यमानेषु रथेषु सा
दिषु कर्णोऽब्रवीद्धर्षकरं वचस्तदा रथर्षभान्सर्वमहारथर्षभः १० जगत्यनित्ये सततं प्रधावति प्रचिंतयन्नस्थिर
मद्य लक्षये असत्सु तिष्ठत्स्विह पातितो रणे गिरिप्रकाशः कुरुपुंगवः कथं ११ निपातिते शांतनवे महारथे दिवा
करे भूतलमास्थिते यथा न पार्थिवाः सोढुमलं धनंजयं गिरिप्रवोढारमिवानिलं द्रुमाः १२ हतप्रधानं त्विदमार्त्त
रूपं परैर्हतोत्साहमनाथमद्य वै मया कुरूणां परिपाल्यमाहवे बलं यथा तेन महात्मना तथा १३ समाहितं चात्मनि भा
रमीदृशं जगत्तथानित्यमिदं हि चिंतयन् निपातितं चाहवशौंडमाहवे कथं न कुर्यामहमाहवे भयं १४ अहं तु तान्कु
रुवृषभानजिह्मगैः प्रवेरयन्यमसदनं रणे चरः यशः परं जगति विभाव्य वर्त्तिता परैर्हतो युधि शयिताथवा पुनः १५
युधिष्ठिरो धृतमतिः सधर्मविद् वृकोदरो गजशततुल्यविक्रमः तथार्जुनस्त्रिदशवरात्मजो यतो न तद्बलं सुगममथा
मरैरपि १६ यमौ रणे यत्र यमोपमौ बले स सात्यकिर्यत्र च देवकीसुतः न तद्बलं कापुरुषोऽभ्युपेयिवान्निवर्त्तते मृत्यु

द्रोण मुखादिवाशुभ्रतः १७ नपाश्युदीर्णंतपसेवशाम्यते बलं बलेनापि न थामनस्विनिः बलंचमेशत्रुनिवारणे ध्रुवं स्व
रक्षणेचाचलवद्व्यवस्थितं १८ एवंचैषांबुध्यमानःप्रभावं गंतैवाहं तान्जयायाद्य सूत मित्रद्रोहो मर्षणीयो नमेयं
भग्नेसैन्येयःसहायःसमित्रः १९ कर्तास्म्येतत्सत्पुरुषार्यकर्मत्यक्त्वा प्राणाननुयास्यामि भीष्मं सर्वान्संख्ये शत्रु
संघान्हनिष्येहतस्तैर्वावीरलोकंगमिष्ये २० समाकुष्टे रुदिते स्त्रीकुमारे पराजिते पौरुषे धार्त्तराष्ट्रे मयाकृत्य
मितिजानामि सूत तस्माच्छत्रून्धार्त्तराष्ट्रस्य जेष्ये २१ कुरून्‌ रक्षन्पांडुपुत्रान्हनिष्यन्त्यक्त्वाप्राणान्घो
ररूपेरणेस्मिन् सर्वान्संख्ये शत्रुसंघान्निहत्य दास्याम्यहं धार्त्तराष्ट्रस्य राज्यं २२ नि~~[illegible]~~बध्यतामेक
वचं विचित्रं हैमं शुभ्रमणिरत्नभाति शिरस्त्राणं चार्कसमानभासं धनुःशराश्चाग्निविषाहिकल्पाः २३ उपासं
गान्मे रथे योजयंतु धनूंषि दिव्यानि तथाहरंतु असीन्यनेकानि गदाश्च गुर्वीः शंखंचजांबुनदचित्रभासं
२४ एतांरौचनीनागकक्षांच जैत्रीं जैत्रंचमेध्वजमिंदीवरांकं श्लक्ष्णैर्वस्त्रैर्विप्रमृज्यानयस्वचित्रामालां
चात्रबध्वासजालां २५ अश्वानग्र्यान्पां ४
१८ १९ वीरलोकान्वीरगतिंगमिष्यइत्यर्थः २० २१ इंदीवरांकंक
मलचिह्नंध्वजं २५

दुराधर्षप्रकाशान्सुद्यानूसमानान्मंत्रयुतान्निरद्विःनविनीडिः कांचनैरसुपेतान् ध्वजी ध्वजी सुतपुत्रान् यस्यास्य रथं
यान्यहंमम मन्त्रावनद्धं रत्नैश्चित्रं सूर्यवेदुप्रकाशं ॥ श्वेतैर्युक्तं संप्रहारोपपन्नं वीरैर्युक्तं तत्स्मावसर्पस्य चित्राणि
चापानि च वेगवन्ति ज्यासूत्रमाः संहननोपपन्नाः ॥ तूणांश्चपूर्णान्महतः शराणामासज्यगात्रावरणानि चित्रा प्रा
यान्ति कं वा नयता शुसर्वं दृष्ट्वा पूर्णं वीरकारस्य च दिमां श्यानीयमानामव बध्यश्रीर्षे वादयं त्वाशुजयायभेरीः ॥ ध्रुया
हिसुताश्च यतः किरीटी वृकोदरो धर्मसुतो यमौ च ॥ तांश्चाहनिष्यामि समेत्य संख्ये भीष्माय वियामि हतो द्विषद्भिः य
स्मिन्राजा सत्यधृतिर्युधिष्ठिरः समास्थितो भीमसेनार्जुनौ च ॥ वासुदेवः ससात्यकिः सृंजयाश्च मन्ये बलं तमजय्यं महीपि
पः ॥ तं वे न्मस्तुः सर्वहरोभिरक्षते सदाप्रमत्तः समरे किरीटिनं ॥ तथापि हंतास्मि समेत्य संख्ये यास्यामि वा भीष्मपथा य
मायाः ॥ तत्त्ववाहं तत्र गमिष्यामि तेषां मध्ये शूराणां तत्र चाहं ब्रवीमि ॥ मित्रद्रुहो दुर्बलभक्तयो ये पापात्मानो न ममैते सहा ३
याः ॥ ॥ संजय उवाच ॥ ॥ समृद्धिमन्तं रथमुत्तमं दृढं सकूबरं हेमपरिष्कृतं शुभं। पताकिनं वातजवैर्हयोत्तमै

युक्तं समास्थाय यदा योजयाय सः॥ संपूज्यमानः कुरुभिर्महात्मा रथर्षभैर्देवगणैरिवेंद्रः॥ ययौ तदायोधनमुग्रधन्वा
यत्रावसानं भरतर्षभस्य। वरूथिना महता सध्वजेन सुवर्णमुक्तामणिरत्नमालिना। सदश्वयुक्तेन रथेन कर्णो मेघ
स्वनेनार्क इवामितौजाः॥ कृताभ्रनाभः स कृताशनप्रभः स्वतः शुभे वै सुरथे धनुर्धरः। स्थितो राजाधिरथिर्महारथः स्वयं
विमाने सुरराडिव स्थितः॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥शरतल्पे महात्मानं शयानममितौ
जसं। महावातसमूहेन समुद्रमिव शोषितं। दिव्यैरस्त्रैर्महेष्वासं पातितं सव्यसाचिना। जयाशा तव पुत्राणां संभग्ना श
र्म वर्म च। अपाराणामिव द्वीपमगाधे गाधमिच्छतां। स्रोतसा यामुनेनेव शरौघेण परिप्लुतं। महेंद्रेणेव मैनाकमस
ह्यं भुवि पातितं। नभश्च्युतमिवादित्यं पतितं धरणीतले। शतक्रतोरिवाचिंत्यं पुरा वृत्रेण निर्जयं। मोहनं सर्वसैन्यस्य
युधि भीष्मस्य पातनं। ककुदं सर्वसैन्यानां लक्ष्म सर्वधनुष्मतां। धनंजयशरैर्व्याप्तं पितरं ते महाव्रतं। तं वीरशयने वी
रं शयानं पुरुषर्षभं। भीष्ममाधिरथिर्दृष्ट्वा भरतानां महाद्युतिं। अवतीर्य रथादार्तो बाष्पव्याकुलितेक्षणः। अभिवाद्यांज ५

लिं मूर्ध्ना वंदमानोऽभ्यभाषत। कर्णोऽहमस्मि भद्रं ते वद मामभिभारत। पुण्यया क्षेमया वाचा चक्षुषा चावलोकय। न नूनं सु
कृतस्येह फलं कश्चित्समश्नुते। यत्र धर्मपरो वृद्धः शेते भुवि भवानिह। कोशसंजनने मंत्रे व्यूहप्रहरणेषु च। नाथमन्यं न प
श्यामि कुरूणां कुरुपुंगव। बुद्ध्या विशुद्धया युक्तो यः कुरूंस्तारयेद्भयात्। योधांस्तु बहुधा भित्त्वा पितृलोकं गमिष्यति।
अद्य प्रभृति संक्रुद्धा व्याघ्रा इव मृगक्षयं। पांडवा भरतश्रेष्ठ करिष्यंति कुरुक्षयं। अद्य गांडीवघोषस्य वीर्यज्ञाः सव्यसा
चिनः। कुरवो वित्रसिष्यंति गावः सिंहस्वनादिव। अद्य गांडीवमुक्तानामशनीनामिव स्वनः। त्रासयिष्यति बाणानां कु
रूनन्यांश्च पार्थिवान्। समिद्धोऽग्निर्यथा वीर महाज्वालो वनं दहेत्। धार्तराष्ट्रान्प्रधक्ष्यंति तथा बाणाः किरीटिनः। येन
येन प्रसरतो वाय्वग्नी सहितौ वने। तेन तेन प्रदहतो भूरिगुल्मतृणद्रुमान्। यादृशोऽग्निः समिद्धः स्यात्तादृक्पार्थो न संशयः। यथा
वायुर्नरव्याघ्र तथा कृष्णो न संशयः। नदतः पांचजन्यस्य रसतो गांडिवस्य च। श्रुत्वा सर्वाणि सैन्यानि त्रासं यास्यंति भा
रत। कपिध्वजस्य चोत्पाते रथस्यामित्रकर्शिनः। शब्दं सोढुं न शक्ष्यंति त्वामृते वीर पार्थिवाः। को ह्यर्जुनं योधयितुं त्वदन्य

द्रो० भीष्म ःपार्थिवोर्दीति। यस्य दिव्यानि कर्माणि प्रवदंति मनीषिणः॥ अमानुषेषु संग्रामे त्र्यंबकेन महात्मनः। तस्माल्लेभे वरं शास्त्रं
दुष्प्राप्यमकृतात्मभिः॥ कोऽन्यः शक्तो रणे जेतुं पूर्वैर्यान जितस्त्वया। पांडुपुत्रो रणश्लाघी माधवेन च रक्षितः॥ जितो येन रणे
रामो भवता वीर्यशालिना। क्षत्रियांतकरो घोरो देवदानवपूजितः॥ तमद्याहं पांडवं युद्धे वीडमन्वेष्यमाणो भवतानु
ज्ञिष्टः। आशीविषं दृष्टिहरं यथोग्रं शूरं शश्रास्यप्रबलान्निहंतुं॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥
तस्य लालप्यमानस्य कुरुवृद्धः पितामहः। देशकालोचितं वाक्यमब्रवीत्प्रीतमानसः॥ समुद्र इव सिंधूनां ज्योतिषामिव
भास्करः॥ सत्यस्येव यथा संतो बीजानामिव चोर्वरा। पर्जन्य इव भूतानां प्रतिष्ठा सुहृदां भव॥ बांधवास्त्वानुजीवंतु सहस्रा
क्षमिवामराः॥ मानहा भव शत्रूणां मित्राणां मातवर्द्धनः। कौरवाणां भव गतिर्यथा विष्णुर्दिवौकसां॥ स्वबाहुबलवीर्ये
ण धार्त्तराष्ट्रहितैषिणा। कर्ण राजपुरं गत्वा कांबोजा निर्जितास्त्वया॥ गिरिव्रजगताश्चापि नग्नजित्प्रमुखा नृपाः। अंबष्ठा
श्च विदेहाश्च गांधाराश्च जितास्त्वया॥ हिमवद्दुर्गनिलयाः किराता रणकर्कशाः। दुर्योधनस्य वशगास्त्वया कर्ण पुरा कृताः॥ ६

उत्कला मेकलाः पौंड्राः कलिंगांध्राश्च संयुगे। निषादाश्च त्रिगर्त्ताश्च बाह्लीकाश्च जितास्त्वया॥ तत्र तत्र च संग्रामे दुर्योधन
रा हितैषिणा। बहवश्च जिता वीरास्त्वया कर्ण महौजसा॥ यथा दुर्योधनस्तात सज्ञातिकुलबांधवः। तथा त्वमपि सर्वेषां कौर
वाणां गतिर्भव॥ शिवेनाभिवदामि त्वां गच्छ युध्यस्व शत्रुभिः। अनुशाधि कुरून्संख्ये धत्स्व दुर्योधने जयं॥ भवान्पौत्रसमो
ऽस्माकं यथा दुर्योधनस्तथा। तवापि धर्मतः सर्वे यथा तस्य वयं तथा॥ यौनात्संबंधकाल्लोके विशिष्टं संगतं सतां। सद्भिः सह
नरश्रेष्ठ प्रवदंति मनीषिणः॥ स सत्यसंगतो भूत्वा ममेदमिति निश्चितः। कुरूणां पालय बलं यथा दुर्योधनस्तथा॥ इति श्रुत्वा
वचस्तस्य चरणावभिवाद्य च। ययौ वैकर्त्तनः कर्णः समीपं सर्वधन्विनां॥ सोऽभिवीक्ष्य नराग्र्याणां स्थानमप्रतिमं महत्। व्यू
ढप्रहरणोरस्कं सैन्यं तत्समबृंहयत्। हर्षिताः कुरवः सर्वे दुर्योधनपुरोगमाः॥ उपागतं महाबाहुं सर्वानीकपुरःसरं। कर्णं
दृष्ट्वा महात्मानं युद्धाय समवस्थितं। क्ष्वेडितास्फोटितरवैः सिंहनादरवैरपि। धनुःशब्दैश्च विविधैः कुरवः समपूजयन्॥ ॥
महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥रथस्थं पुरुषव्याघ्रं दृष्ट्वा कर्णमवस्थितं। हृष्टो दुर्योधनो राजन्निदं वच
नमब्रवीत्॥ सनाथमिदमत्यर्थं भवता पालितं बलं। मन्ये किंतु समर्थं यद्धितं तत्संप्रधार्यतां॥ ॥कर्ण उवाच॥ ॥ब्रूहि तत्

पुरुषव्याघ्र त्वं हि प्राज्ञतमो नृप। यथा चार्षीपतिः कृष्णं वीक्ष्यते न तथेतरः। ते स्म सर्वे तव वचः श्रोतुकामा जनेश्वर। ना
न्याय्यं हि भवान्वाक्यं ब्रूयादिति मतिर्मम॥ ॥दुर्योधन उवाच॥ ॥भीष्मः सेनाप्रणेतासीद्वयसा विक्रमेण च। श्रुतेन
चोपसंपन्नः सर्वैर्योधगुणैस्तथा। तेनातियशसा कर्ण घ्नता शत्रुगणान्मम। सुयुद्धेन दशाहानि पालिताः स्मो महात्मना। त
स्मिन्नसुकरं कर्म कृतवत्यास्थिते दिवं। कं तु सेनाप्रणेतारं मन्यसे तदनन्तरं। न विनानायकं सेना मुहूर्तमपि तिष्ठति। आ
हवेष्वाहवश्रेष्ठ नेतृहीनेव नौर्जले। यथा ह्यकर्णधारा नौ रथश्चासारथिर्यथा। द्रवेद्यथेष्टं तद्वत्स्यादृते सेनापतिं बलं। आ
दिशिको यथा सार्थः सर्वं कृच्छ्रं समर्च्छति। अनायका तथा सेना सर्वान्दोषान्समर्च्छति। स भवान्वीक्ष्य सर्वेषु मामकेषु महा
त्मसु। पश्य सेनापतिं युक्तमनु शान्तनवादिह। यं हि सेनाप्रणेतारं भवान्वक्ष्यति संयुगे। तं वयं सहिताः सर्वे करिष्यामो न
रोत्तम॥ ॥कर्ण उवाच॥ ॥सर्व एव महात्मान इमे पुरुषसत्तमाः। सेनापतित्वमर्हन्ति नात्र कार्या विचारणा। कुल
संहननज्ञानैर्बलविक्रमबुद्धिभिः। युक्ताः कृतज्ञा ह्रीमन्त आहवेष्वपलायिनः। युगपन्न तु ते शक्याः कर्तुं सर्वे पुरःसराः।
एक एव तु कर्तव्यो यस्मिन्वैशेषिका गुणाः। अन्योन्यस्पर्धिनां तेषां यद्येकं सत्करिष्यसि। शेषा विमनसो व्यक्तं न योत्स्य ३

न्ति हि भारत। अयं तु सर्वयोधानामाचार्यः स्थविरो गुरुः। युक्तः सेनापतिः कर्तुं द्रोणः शस्त्रभृतां वरः। को हि तिष्ठति दुर्ध ३
र्षे द्रोणे ब्रह्मविदुत्तमे। सेनापतित्वयोग्योऽन्यः शुक्राङ्गिरसदर्शने। न च सोऽप्यस्ति ते योधः सर्वराजसु भारत। द्रोणं यः सम
रे यान्तं नानुयास्यति संयुगे। एष सेनाप्रणेतॄणामेष शस्त्रभृतामपि। एष बुद्धिमतां चैव श्रेष्ठो राजन्गुरुश्च ते। एवं दुर्योधना
चार्यमाशु सेनापतिं कुरु। जिगीषन्तो सुरान्संख्ये कार्त्तिकेयमिवामराः॥ ॥संजय उवाच॥ ॥कर्णस्य तु वचः श्रुत्वा
राजा दुर्योधनस्तदा। सेनामध्यगतं द्रोणमिदं वचनमब्रवीत्॥ ॥दुर्योधन उवाच॥ ॥वर्णश्रैष्ठ्यात्कुलोत्पत्त्या
श्रुतेन वयसा धिया। वीर्याद्दाक्ष्यादधृष्यत्वादर्थज्ञानान्नयाज्जयात्। तपसा च कृतज्ञत्वाद्वृद्धः सर्वगुणैरपि। युक्तो भवत्स
मो गोप्ता राज्ञामन्यो न विद्यते। स भवान्पातु नः सर्वान्विबुधानिव वासवः। भवन्नेत्राः परान्जेतुमिच्छामो द्विजसत्तम।
रुद्राणामिव कापाली वसूनामिव पावकः। कुवेरमिव यक्षाणां मरुतामिव वासवः। वसिष्ठ इव विप्राणां तेजसा
मिव भास्करः। पितॄणामिव धर्मेन्द्रो यादसामिव चांबुराट्। नक्षत्राणामिव शशी दितिजानामिवोशना। श्रेष्ठः सेनाप्रणे
तॄणां स नः सेनापतिर्भव। अक्षौहिण्यो दशैका च वशगाः संतु तेऽनघ। ताभिः शत्रून्प्रतिव्यूह्य जहीन्द्रो दानवानिव॥

व

द्रोण त्वयातुनेत्रानवानग्रेदेवानामिवपावकिः॥वयंत्वामनुयास्यामःसौरभेयाइवर्षभं।उग्रधन्वामहेष्वासोदिव्यास्त्रंयामसपा
रगः॥अग्रेभवंतंतुदृष्ट्वानार्जुनःप्रहरिष्यति॥ध्रुवंयुधिष्ठिरंसंख्येसानुबंधंसबांधवं।जेष्यामिपुरुषव्याघ्रभवान्सेनापति
र्यदि॥ ॥संजयउवाच॥ ॥एवमुक्तेततोद्रोणंजयेत्यूचुर्नराधिपाः॥सिंहनादेनमहताहर्षयंतस्तवात्मजं॥सैनि
काश्चमुदायुक्तावर्द्धयंतिद्विजोत्तमं।दुर्योधनंपुरस्कृत्यसुहायेवमनोरथै॥ ॥द्रोणउवाच॥ ॥वेदंषडंगंवेदा
हमर्थविद्यांचमानवीं।त्र्यंबकमिषुवस्त्रंशस्त्राणिविविधानिच।येवाप्युक्तामयिगुणाभवद्भिर्जयकांक्षिभिः।चिकी
र्षुस्तानहंसत्यान्योधयिष्यामिपांडवान्।पार्षतंतुरणेराजन्नहनिष्यामिवैहिवित्तामहिसृष्टोवधायममैवनृप
पुंगव।योधयिष्यामिसैन्यानिनाशयन्सर्वसोमकान्।नचमांपांडवायुद्धेयोधयिष्यंतिहर्षिता॥ ॥संजयउवाच
॥ ॥सएवमभ्यनुज्ञातश्चक्रेसेनापतिंततः।द्रोणंतवसुतोराजन्विधिदृष्टेनकर्मणा।अथाभिषिषिचुर्द्रोणंदुर्यो
धनमुखानृपाः।सेनापत्येयथास्कंदंपुराशक्रमुखाःसुराः।ततोवादित्रघोषेणसहपुंसांमहास्वनः।प्रादुरासीद
द्रोणेकृतेसेनापतौनृपाः।ततःपुण्याहघोषेणस्वस्तिवादस्वनेनच।संस्तवैर्गीतशब्दैश्चसूतमागधबंदिनां।जयशब्दै ८

द्विजाग्र्याणांसुखगानश्रितैस्तथा।सत्कृत्यविधिनाद्रोणंमेनिरेपांडवान्जितान्॥ ॥इतिमहाभारतेद्रोणपर्वणि॥ ॥
संजयउवाच॥ ॥सैनापत्यंतुसंप्राप्यभारद्वाजोमहामहारथः।युयुत्सुर्व्यूह्यसैन्यानिप्रायात्तवसुतैःसह।सैंधवश्च
कलिंगश्चविकर्णश्चतवात्मजः।दक्षिणंपार्श्वमास्थायसमतिष्ठंतदंशिताः।प्रपक्षःशकुनिस्तेषांप्रवरैर्हयसादिभिः।
ययौगांधारकैःसार्द्धंविमलप्रासयोधिभिः।कृपश्चकृतवर्माचचित्रसेनोविविंशतिः।दुःशासनमुखायत्ताःसव्यंपार्श्वम
पालयन्।तेषांप्रपक्षाःकांबोजाःसुदक्षिणपुरस्सराः।ययुरश्वैर्महावेगैःशकाश्चयवनैःसह।मद्रास्त्रिगर्ताःसांबष्ठ
ःप्रतीच्योदीच्यमालवाः।शिबयःशूरसेनाश्चशूद्राश्चमलदैःसह।सौवीराःकितवाःप्राच्यादाक्षिणात्याश्चसर्वशः।तवात्म
जंपुरस्कृत्यसूतपुत्रस्यपृष्ठगाः।हर्षयंतश्चसैन्यानिबलेषुबलमादधत्।ययौवैकर्तनःकर्णःप्रमुखेसर्वधन्विनां।त
स्यदीप्तोमहाकायःस्वान्यनीकानिहर्षयन्।हस्तिकक्षोमहाकेतुर्बभौसूर्यसमद्युतिः।नभीष्मव्यसनंकश्चिद्दृष्ट्वाकर्णमम
न्यत।विशोकाश्चाभवन्सर्वेराजानःकुरुभिःसह।हृष्टाश्चब्रुवन्योधास्तत्राजल्पेनसंगताः।नहिकर्णंरणेदृष्ट्वायुधिस्थास्यंति

क

द्रोण पांडवाः। कस्मिन्हि समरे शक्तो जेतुं देवानपि स्वयं। किं पुनः पांडवान्युद्धे हीनवीर्यपराक्रमान्। भीष्मेणाद्य रणे पार्थाः पा
लिता बाहुशालिना। तांस्तु कर्णः शरैस्तीक्ष्णैर्नाशयिष्यति संयुगे। एवं ब्रुवंतस्ते न्योन्यं हृष्टरूपा विशांपते। राधेयं पूजयंत
स्तु कर्णं संतस्थुर्निर्ययुः। अस्माकं शकटव्यूहो द्रोणेन विहितो भवत्। परेषां क्रौंच एवासीद्व्यूहो राजन्महात्मनां। प्रीयमाणेन
विहितो धर्मराजेन भारत। व्यूहप्रमुखतस्तेषां तस्थतुः पुरुषर्षभौ। वानरध्वजमुच्छ्रित्य विष्वक्सेनधनंजयौ। ककुदं सर्वसै
न्यानां लक्ष्म सर्वधनुष्मतां। आदित्यपथगः केतुः पार्थस्यामिततेजसः। दीपयामास तत्सैन्यं पांडवस्य महात्मनः। यथा प्र
ज्वलितः सूर्यो युगांते वै वसुंधरां। दीप्यन्हदृश्यत तथा केतुः पार्थस्य धीमतः। योधानामर्जुनः श्रेष्ठो गांडीवं धनुषां वरं।
वासुदेवश्च भूतानां चक्राणां च सुदर्शनं। चत्वार्येतानि तेजांसि वहन्श्वेतहयो रथः। परेषामग्रतस्तस्थौ कालचक्रमिवो
द्यतं। एवं तौ सुमहात्मानौ परसेनाग्रगावुभौ। तावकानां मुखे कर्णः परेषां तु धनंजयः। यत्तौ जाताभिसंरब्धौ परस्प
रवधैषिणौ। अवैक्षेतां तदान्योन्यं समरे कर्णपांडवौ। ततः प्रयाते सहसा भारद्वाजे महारथे। आर्त्तनादेन घोरेण वसु ५

मा२ धा समकंपत। ततस्तुमुलमाकाशमावृणोत्स दिवाकरं। वातोद्धूतं रजस्तीव्रं कौशेयनिकरोपमं। ववर्ष घोरस्वच्चापि मांसा
स्थिरुधिराण्युत। गृध्राः श्येनाबकाः कंका वायसाश्च सहस्रशः। उपर्युपरि सेनां ते तदा पर्यपतन्नृप। गोमायवश्च प्राक्रोश
न्भयदान्दारुणान्रवान्। अकार्षुरपसव्यं च बहुशः पृतनां तदा। चिखादिषंतो मांसानि पिपासंतश्च शोणितं। अपतन्दीप्यमा
नाश्च सनिर्घाताः सकंपनाः। उल्का ज्वलंत्यः संग्रामे पुच्छेनावृत्य सर्वशः। परिवेषो महांश्चापि सविद्युत्स्तनयित्नुमान्। भास्कर
स्याभवद्राजन्प्रयाते वाहिनीपतौ। एते चान्ये च बहवः प्रादुरासन्सुदारुणाः। उत्पाता युधि वीराणां जीवितक्षयकारकाः। तत
ः प्रववृते युद्धं परस्परजयैषिणां। कुरुपांडवयोधानां शब्देनापूरयज्जगत्। ते त्वन्योन्यं सुसंरब्धाः पांडवाः सह कौरवैः। प्रत्य
घ्नन्निशितैस्तीक्ष्णैर्जयगृध्राः प्रहारिणः। स पांडवानां महतीं महेष्वासो महाद्युतिः। वेगेनाभ्यद्रवत्सेनां किरञ्शरशतैः शितैः।
द्रोणमभ्युदितं दृष्ट्वा पांडवाः सह सृंजयाः। प्रत्यगृह्णंस्ततो राजञ्शरवर्षैः पृथक्पृथक्। संक्षोभ्यमाणा द्रोणेन भिद्यमाना म
हाचमूः। व्यशीर्यत सपांचाला मेघानिवानिलेरिताः। बहूनीह विकुर्वाणो दिव्यान्यस्त्राणि वीर्यवान्। अपीडयत्क्षणेनैव

द्रो० ८
भीष्म

द्रोणः पांडवसृंजयान् ॥ वध्यमाना द्रोणेन वासवेनेव दानवाः ॥ पांचालाः समकंपंत धृष्टद्युम्नपुरोगमाः ॥ ततो दिव्यास्त्रविच्छूरो
याज्ञसेनिर्महारथः ॥ अभिनच्छरवर्षेण द्रोणानीकमनेकधा ॥ द्रोणस्य शरवर्षाणि शरवर्षेण पार्षतः ॥ सन्निवार्य ततः सर्वान्
कुरूनप्यवधीद्बली ॥ संहृत्य तु ततो द्रोणः समवस्थाप्य चाहवे ॥ स्वमनीकं महाबाहुः पार्षतं समुपाद्रवत् ॥ स बाणवर्षं सुमहद्
सृजन्पार्षतं प्रति ॥ मघवान्समभिक्रुद्धः सहसा दानवेष्विव ॥ ते कंप्यमाना द्रोणेन बाणैः पांडवसृंजयाः ॥ पुनः पुनरभज्यंत सिंहे
नेवेतरे मृगाः ॥ तथा पर्यचरद्द्रोणः पांडवानां बले बली ॥ अलातचक्रवद्राजंस्तदद्भुतमिवाभवत् ॥ खचरनगरकल्पं कल्पितं
शास्त्रदृष्ट्या पवनधुतपताकं शोभितं वल्गिताश्वं ॥ स्फटिकविमलकेतुं त्रासनं शात्रवाणां रथवरमधिरूढः संजहारारिसेनां
॥ ॥ महाभारते द्रोणपर्वणि ॥ ॥ संजय उवाच ॥ ॥ तथा द्रोणमभिघ्नंतं साश्वसूतरथद्विपान् ॥ व्यथिताः पांडवा दृष्ट्वा नचै
नं पर्यवारयन् ॥ ततो युधिष्ठिरो राजा धृष्टद्युम्नधनंजयौ ॥ अब्रवीत्सर्वतो यत्तैः कुंभयोनिर्निवार्यतां ॥ तत्रैनमर्जुनश्चैव पार्षतं
श्च सहानुगाः ॥ पर्यगृह्णंस्तथा सर्वे समायांतं महारथाः ॥ केकया भीमसेनश्च सौभद्रोऽथ घटोत्कचः ॥ युधिष्ठिरो यमौ मत्स्यो द्रु १८

उ

पदस्यात्मजास्तथा ॥ द्रौपदेयाः ससंरब्धा धृष्टकेतुः ससात्यकिः ॥ चेकितानश्च संक्रुद्धो युयुत्सुश्च महारथः ॥ ये चान्ये पार्थिवा १८
राजन्पांडवस्यानुयायिनः ॥ कुलवीर्यानुरूपाणि चक्रुः कर्माण्यनेकशः ॥ संरक्ष्यमाणां तां दृष्ट्वा वाहिनीं पांडवै रणे ॥ व्यावृ
त्य चक्षुषी कोपाद्भारद्वाजोऽन्ववैक्षत ॥ स तीव्रं कोपमास्थाय रथे समरदुर्मदः ॥ व्यधमत्पांडवानीकमभ्राणीव सदानिलः ॥ रथा
नश्वान्नरान्नागानभिधावंस्ततस्ततः ॥ चचारोन्मत्तवद्द्रोणो वृद्धोऽपि तरुणो यथा ॥ तस्य शोणितदिग्धांगाः शोणास्ते वातरंहसः ॥
श्रियं रक्षतुः आजानेया हया राजन्नविभ्रांताः श्रियं दधुः ॥ तमंतकमिव क्रुद्धमापतंतं यतव्रतं ॥ दृष्ट्वा संप्राद्रवन्योधाः पांडवस्य ततस्ततः ॥
तेषां प्रद्रवतां भीमः पुनरावर्ततामपि ॥ पश्यतां तिष्ठतां चासीच्छब्दः परमदारुणः ॥ शूराणां हर्षजननो भीरूणां भयवर्धनः ॥ द्या
वापृथिव्योर्विवरं पूरयामास सर्वतः ॥ ततः पुनरपि द्रोणो नाम विश्रावयन्युधि ॥ अकरोद्रौद्रमात्मानं किरंछरशतैः परान्
॥ स तथा तेष्वनीकेषु पांडवेयस्य धीमतः ॥ कालवद्व्यचरद्द्रोणो युवेव स्थविरो बली ॥ उत्कृत्य च शिरांस्युग्रो बाहूनपि सुभूषणान्
॥ कृत्वा शून्यान्रथोपस्थानुदक्रोशन्महारथः ॥ तस्य हर्षप्रणादेन बाणवेगेन चाभिभो ॥ प्राकंपंत रणे योधा गावः शीतार्दि

द्रोण

नाऽद्रवा द्रोणस्य रथघोषेण मौर्वीनिष्पेषणेन च। धनुःशब्देन चाकाशे दिशः सममनादयत्। नान्यो ह्यस्य धनुषा बाणा
निश्चरंतः सहस्रशः। व्याप्य सर्वा दिशः पेतुर्गजाश्वरथपत्तिषु। द्रोणमासादयंश्चक्रुः पांचालाः पांडवैः सह। तान्स सरथ
हस्त्यश्वान्प्राहिणोद्यमसादनं। चक्रेऽचिरेण च द्रोणो महीं शोणितकर्दमां। तन्वता परमास्त्राणि शरान्सततमस्यता। द्रोणेन
विहितं दिक्षु बाणजालमदृश्यत। पदातिषु रथाश्वेषु वारणेषु च सर्वशः। तस्य विद्युदिवाभ्रेषु चरन्केतुरदृश्यत॥
स केकयानां प्रवरांश्च पंच पंचालराजं च शरैः प्रमथ्य। युधिष्ठिरानीकमदीनयोधं द्रोणोऽभ्ययात्कार्मुकबाणपाणिः॥
तं भीमसेनश्च धनंजयश्च शिनेश्च नप्ता द्रुपदात्मजश्च। शैब्यात्मजः काशिपतिः शिबिश्च हृष्टा नदंतो व्यकिरन्शरौघैः
।तेषामथ द्रोणधनुर्विमुक्ताः पतत्रिणः कांचनचित्रपुंखाः। भित्त्वा शरीराणि गजाश्वयूनां जग्मुर्महीं शोणितदिग्धवा
जाः। सा योधसंघैश्च रथैश्च भूमिः शरैर्विभिन्नैर्गजवाजिभिश्च। प्रच्छाद्यमाना पतितैर्बभूव समावृता द्यौरिव कालमे
घैः। शैनेयभीमार्जुनवाहिनीनां सौभद्रपांचालसकाशिराजं। अन्यांश्च वीरान्समरे ममर्द द्रोणः सुतानां तव भूतिका ११

मः॥ एतानि चान्यानि च कौरवेंद्र कर्माणि कृत्वा समरे महांति। प्रताप्य लोकानिव कालसूर्यो द्रोणो गतः स्वर्गमि मित्र
घाती। एवं रुक्मरथः शूरो हत्वा शतसहस्रशः। पांडवानां रणे योधान्पार्षतेन निपातितः। अक्षौहिणीमभ्यधिकां
शूराणामनिवर्तिनां। निहत्य पश्चाद्धृतिमानगमत्परमां गतिं। पांडवैः सह पांचालैरशिवैः क्रूरकर्मभिः। हतो रुक्मर
थो राजन्कृत्वा कर्म सुदुष्करं। ततो निनादो भूतानामाकाशे समजायत। सैन्यानां च ततो राजन्नाचार्ये निहते युधि।
धरां खं द्यां दिशो वापि प्रदिशश्चावनादयत्। हा हा धिगिति भूतानां शब्दः समभवन्महान्। देवताः पितरश्चैव पूर्वे ये
चास्य बांधवाः। ददृशुर्निहतं तत्र भारद्वाजं महारथं। पांडवास्तु जयं लब्ध्वा सिंहनादान्प्रचक्रिरे। तेन नादेन महता सम
कंपत मेदिनी॥ ॥ महाभारते द्रोणपर्वणि॥ ॥ धृतराष्ट्र उवाच॥ ॥ किं कुर्वाणं रणे द्रोणं जघ्नुः पांडवसृंजयाः।
।तथा निपुणमस्त्रेषु सर्वशस्त्रभृतां वरं। रथभंगो बभूवास्य धनुर्वाशीर्यतास्यतः। प्रमत्तो वाभवद्द्रोणस्ततो मृत्युमुपे
यिवान्। कथं नु पार्षतस्तात शत्रुभिर्दुष्प्रधर्षणं। किरंतमिषुसंघातान्रुक्मपुंखाननेकशः। क्षिप्रहस्तं द्विजश्रेष्ठं कृ
तिनं चित्रयोधिनं। दूरेषुपातिनं दांतमस्त्रयुद्धेषु पारगं। पांचालपुत्रो न्यवधीद्दिष्ट्या वरमच्युतं। कुर्वाणं दारुणं कर्म

रक्षेयत्तं महारथं॥ व्यक्तं हि दिष्टं बलवान्पौरुषादिति मे मतिः॥ यद्द्रोणो निहतः शूरः पार्षतेन दुरात्मना॥ अस्त्रं चतुर्वि
धं वीरे यस्मिन्नासीत्प्रतिष्ठितं॥ तमिष्वस्त्रधरावार्यं द्रोणं शंससि मे हतं॥ श्रुत्वा रथं रुक्मरथं वैयाघ्रपरिवारितं॥ जातरू हतं
पशिरस्त्राणं नाद्य शोकमुपानुदे॥ न नूनं परदुःखेन म्रियते कोपि संजय॥ यत्र द्रोणमहं श्रुत्वा हतं जीवामि मंदभाक्॥ परिस्कारं पाव:॥
दैवमेव परं मन्ये न सुनीतं न पौरुषं॥ यत्र द्रोणं हतं श्रुत्वा जहतं जीवामि मंदभाक् दैवामेव परं मन्ये न सुनीतं न पौरुषं॥
यत्र द्रोणं हतं श्रुत्वा हतो जीवामि मंदभाक्॥ अश्मसारमयं नूनं हृदयं सुदृढं मम॥ यच्छ्रुत्वा निहतं द्रोणं शतधा न वि
दीर्यते॥ ब्राह्मे दैवे तथेष्वस्त्रे यमुपासन्गुणार्थिनः॥ ब्राह्मणा राजपुत्राश्च स कथं मृत्युना हृतः॥ शोषणं सागरस्येव
मेरोः प्रशमनं यथा॥ पतनं भास्करस्येव न मृष्ये द्रोणपातनं॥ दृप्तानां प्रतिषेद्धासीद्धार्मिकाणां च रक्षिता॥ योत्यासीत्कृपण
स्यार्थे प्राणानपि परंतपः॥ मंदानां मम पुत्राणां जयाशा यस्य विक्रमे॥ बृहस्पत्युशनस्तुल्यो बुद्ध्या स निहतः कथं॥ ते च
शोणा बृहंतोश्वा छन्ना जालैर्हिरण्मयैः॥ रथे वातजवा युक्ताः सर्वशस्त्रातिगा रणे॥ बलिनो घोषिणो दांताः सैंधवाः साधु
वाहिनः॥ दृढाः संग्राममध्येषु कच्चिदासन्नविक्लवाः॥ करिणां बृंहतां युद्धे शंखदुंदुभिनिःस्वनं॥ ज्याक्षेपशरवर्षाणां १२

शास्त्राणां च सहिष्णवः॥ आशंसंतः परान्जेतुं जितश्वासा जितव्यथाः॥ हयाः पराजिताः शीघ्रा भारद्वाजरथोद्वहाः॥
ते स्म रुक्मरथे युक्ता नरवीरसमाहिताः॥ कथं नाभ्यभवंस्तात पांडवानामनीकिनीं॥ जातरूपपरिस्कारमास्थाय रथ
मुत्तमं॥ भारद्वाजः किमकरोच्छूरः संक्रंदनो युधि॥ विद्यां यस्योपजीवंति सर्वलोकधनुर्धराः॥ स सत्यसंधो बलवान्द्रो
णः किमकरोद्युधि॥ दिवि शक्रमिव श्रेष्ठं महात्मानं धनुर्भृतां॥ के तु तं रौद्रकर्माणं युद्धे प्रत्युद्ययू रथाः॥ ननु रुक्मरथं
दृष्ट्वा प्रद्रवंति स्म पांडवाः॥ दिव्यमस्त्रं विकुर्वाणं रणे तस्मिन्महाबलं॥ उताहो सर्वसैन्येन धर्मराजः सहानुजः॥ पांचा
ल्यः प्रग्रहो द्रोणं सर्वतः पर्यवारयत्॥ नूनमावारयत्पार्थो रथिनोन्यान्जिह्मगैः॥ ततो द्रोणं समारोहत्पार्षतः पाप
कर्मकृत्तान ह्यन्यं परिपश्यामि बाधकं धृष्टद्युम्नस्य शुष्मिणः॥ धृष्टद्युम्ना हते रौद्रात्पाल्यमानात्किरीटिना॥ तैर्वृतः सर्वतः शूरै
ःपांचाल्यापसदस्ततः॥ केकयैश्चेदिकारूषैर्मत्स्यैरन्यैश्च भूमिपैः॥ व्याकुलीकृतमाचार्यं पिपीलिरुरगं यथा॥ कर्म्मि
ण्यसुकरे शक्तं उघानेति मतिर्मम॥ योधीत्य चतुरो वेदान्सांगानाख्यानपंचमान्॥ ब्राह्मणानां प्रतिष्ठासीत्स्रोतसामि
व सागरः॥ क्षत्रं च ब्रह्म चैवेह यस्मिन्विद्यास्त्र संश्रिताः॥ स कथं ब्राह्मणो वृद्धः शस्त्रेण वधमाप्तवान्॥ अमर्षणो मर्षि

तवाद्वृष्टिर्ज्ञामानः सदामया॥ अमर्षमाणाः कौंतेयः कर्मणस्तस्य तत्फलं। यस्य कर्मानुजीवंति लोके सर्वधनुर्भृतः। सत्यसंधः सु
कृती श्रीकामो निहतः कथं। दिविशक्र इव श्रेष्ठो महासत्वो महारथः। स कथं निहतः पार्थैः क्षुद्रमत्स्यैर्यथा तिमिः। क्षिप्रहस्त
श्च बलवान् दृढधन्वारिमर्दनः। न यस्य जीवितकांक्षी विषयं प्राप्य जीवति। यं द्वौ न जहतः शब्दौ जीवमानं कदाचन। ब्राह्म
श्च वेदकामानां ज्याघोषश्च धनुर्भृतां। अदीनं पुरुषव्याघ्रं ह्रीमंतमपराजितं। नाहं मृष्ये हतं द्रोणं सिंहद्विरदविक्रमं। कथं
संजय दुर्धर्षमिनाधृष्ययशोबलं। पश्यतां पुरुषेंद्राणां समरे पार्षतो वधीत्। के पुरस्तादयुध्यंत रक्षंतो द्रोणमंतिकात्। के नु प
दुर्लभं श्चाद्वर्तंत गच्छंतो दुर्गमां गतिं। के रक्षन् दक्षिणं चक्रं सव्यं के च महात्मनः। पुरस्तात् के च वीरस्य युध्यमानस्य संयुगे। के च तत्र
तत्स्त्यक्त्वा प्रतीपं मृत्युमाव्रजन्। द्रोणस्य समरे वीराः केऽकुर्वंत परां धृतिं। कच्चिन्नैनं भयान्मंदाः क्षत्रिया विजह रणे रक्षितारस्ततः
शून्ये कच्चिन्नैनं भयान्मंदाः क्षत्रिया विजह रणे रक्षितारस्ततः शून्ये कच्चिन्नैको हतः परैः॥ न स पृष्ठमपि त्रासाद्रणे शौर्यात्प्रद रा
र्शयेत्। परामप्यापदं प्राप्य स कथं निहतः परैः। एतदार्येण कर्तव्यं कृच्छ्रास्वापत्सु संजय। पराक्रमेद्यथाशक्ति तच्च तस्मिन्प्रति
ष्ठितं। मुह्यते मे मनस्तात कथा तावन्निवर्ततां। भूयस्तु लब्धसंज्ञस्त्वां परिप्रक्ष्यामि संजय॥ ॥महाभारते द्रोणपर्वणि॥ ॥वैशंपायन १३

थि

नपा॰ उवाच॥ ॥एवं पृष्ट्वा सूतपुत्रं हृच्छोकेनार्दितो भृशं। जये निराशः पुत्राणां धृतराष्ट्रोऽपतत्क्षितौ। तं विसंज्ञं निपतितं सिषिचुः
परिचारकाः। जलेनात्यर्थशीतेन वीजंतः पुण्यगंधिना। पतितं चैनमाज्ञाय समंतात् भरतस्त्रियः। परिवव्रुर्महाराजमस्पृशंश्चैव पा
णिभिः। उत्थाप्य चैनं शनकै राजानं पृथिवीतलात्। आसनं प्रापयामासुर्बाष्पकंठ्यो वरांगनाः। आसनं प्राप्य तु मूर्छयाभिपरि नृपो
प्लुतः। निश्चेष्टोऽतिष्ठत तदा वीज्यमानः समंततः। स लब्ध्वा शनकैः संज्ञां वेपमानो महीपतिः। पुनर्गावल्गणिं सूतं पर्यपृच्छ
द्यथातथं॥ ॥धृतराष्ट्र उवाच॥ ॥यः स उद्यन्निवादित्यो ज्योतिषा प्रणुदं स्तमः। अजातशत्रुमायांतं कस्तं द्रोणादवारय
त्। प्रभिन्नमिव मातंगं तथा क्रुद्धं तरस्विनं। आसक्तमनसं दीप्तं प्रतिद्विरदघातिनं। वाशितासंगमे यद्वदजय्यं प्रतियूथपैः॥
अतिचान्या नरान्वीरान्वीरः पुरुषसत्तमः। यो ह्येको हि महाबाहुर्निर्दहेद्घोरचक्षुषा। कृत्स्नं दुर्योधनबलं धृतिमान्सत्यसंगरः॥
चक्षुर्हणं जयेस क्रमिष्वासधनरक्षितं। दांतं बहुमतं लोके के शूरास्समवारयन्। के दुष्प्रधर्षं राजानमिष्वासधरमच्युतं। समासे
दुर्नरव्याघ्रं कौंतेयं यत्र मामकाः। तरसैवाभिपत्याथ यो वै द्रोणमुपागमत्। तं भीमसेनमायांतं के वीराः पर्यवारयन्। यदा
याज्जलदप्रख्यो रथः परमवीर्यवान्। पर्जन्य इव बीभत्सुः स्तनयन्नशनीः सृजन्। विसृजन्शरजालानि वर्षाणीव मघवानिव॥

लो

द्रोण

त्र्यवस्फूर्जकैर्दिव्याः सर्वासिललनेमिस्वनेन चा चापविद्युत्प्रभो घोरो रथगुल्मबलाहकः। रथनेमिघोषस्तनितः शरशब्दाति
बंधुरः। रोषानिलस्य मूढ्रतो मनोनिग्रायशीघ्रगः। मर्मातिगो बाणधरस्तुमुलः शोणितोदकः। संप्लावयन्दिशः सर्वा मानवे
रास्तरन्महीं। भीमनिस्तनितो रौद्रो दुर्योधनपुरोगमान्। युद्धेभ्यषिंचद्बीजयो गार्द्धपत्रैः शिलाशितैः। गांडीवं धार
यन्धीमान्कीदृशं वो मनस्तदा। इषुसंबाधमाकाशं कुर्वन्कपिवरध्वजः। यदायात्कथमासीद्वस्तदा पार्थमवेक्ष्य
वः। कच्चिद्गांडीवशब्देन न प्राणश्यत वै बलं। खुहं सनिरवं कुर्वन्नर्जुनो हृत्रामभ्यात्। कच्चिन्नापानुदत्प्राणा
निषुभिर्वो धनंजयः। वातो मेघानिवाविध्यन्प्रवांश्चरवणानिवा सोहं गांडीवधन्वानं नरः सोढुं रणेहीति। यस्य युध्य
त्यसेनाग्रे जनः सर्वो विदीर्यति। यत्सेनाः समकंपत यद्वीरानस्पृशद्भयं। केतदा न जहुद्रोणं के के क्षुद्राः प्राद्रवन्भ
स: यात्। अस्मान्वा गां जितान्युद्धे भ्रमेण धनंजयः। केवा तत्र तनूस्त्यक्त्वा प्रतीपं तमथाव्रजन्। न च वेगं शितास्त्रस्य क्रमाः
सोढुं नराधिपाः। गांडीवस्य च निर्घोषं पर्जन्यनिनदोपमं। विषक्सेनो यस्य यंता यस्य योद्धा धनंजयः। अशक्यः सर
थो जेतुं मन्ये देवासुरैरपि। सुकुमारो युवा शूरो दर्शनीयश्च पांडवः। मेधावी निपुणो धीमान्युधि सत्यपराक्रमः। १४

त्मारावं विपुलं कुर्वन्व्यमृद्नात्कौरवान्रणे। यदा गावल्गणे द्रोणं के शूरास्तमवारयन्। आशीविषवत्क्रुद्धः सहदेवोय
दाभ्ययात्। शत्रूणां कदनं कुर्वन्द्रोणे जेता सुदुर्जयः। आर्यव्रतममोघेषुं ह्रीमंतमपराजितं। द्रोणायाभिमुखं यांतं के शूराः प
र्यवारयन्। यस्तु सौवीरराजस्य प्रमथ्य महतीं चमूं। आददे महिषीं सौम्यां काम्यां सर्वांगशोभनां। सत्यं धृतिश्च शौर्यं च ब्रह्म मंयापाव:
चर्यं च केवलं। सर्वाणि युयुधानेस्मिन्नित्यानि पुरुषर्षभे। बलिनं सत्यकर्माणमदीनमपराजितं। वासुदेवसमं युद्धे वासु
देवादनंतरं। धनंजयोपदेशेन श्रेष्ठमिष्वस्त्रकर्मणि। पार्थेन सममस्त्रेषु कस्तं द्रोणादवारयत्। वृष्णीनां प्रवरं वीरं श्रेष्ठं
सर्वधनुष्मतां। रामेण सममस्त्रेषु यशसा विक्रमेण च। सत्यं धृतिर्मतिः शौर्यं ब्रह्म चानुत्तमं। सात्वते तानि नित्यानि
त्रिलोक्यमिव केशवे। तमेवं गुणसंपन्नं दुर्वारमपि दैवतैः। समासाद्य महेष्वासं के वीराः पर्यवारयन्। पांचालेषूत्तमं शूरमुत्त
मामितौजसं प्रियं। नित्यमुत्तमकर्माणमुत्तमौजसमाहवे। युक्तं धनंजयहिते ममानर्थाय चोद्यतं। यमवैश्रवणादित्यमहेंद्रव
रुणोपमं। महारथं समाज्ञातं द्रोणायोद्यतमाहवे। त्यजंतं तुमुले प्राणान्के वीराः पर्यवारयन्। एकोपसत्तश्चेदिभ्यः पांडु

वान्यःसमाश्रितः॥धृष्टकेतुंसमायांतंद्रोणंकस्तमवारयत्॥योवधीत्केतुमान्वीरोराजपुत्रंदुरासदं॥अपरांतगिरिद्वारेद्रो
णात्कस्तमवारयत्॥यस्मिन्नस्त्राधिकाविद्यागुरोःसर्वाधनंजयात्॥यस्मिन्नस्त्राणिसत्यंचब्रह्मचर्यंचनित्यदा॥वासुदेवसमं
युद्धेधनंजयसमंबले॥तेजसादित्यसदृशंबृहस्पतिसमंमतौ॥अभिमन्युंमहात्मानंव्यात्ताननमिवांतकं॥द्रोणायाभिमुखंयांतं
केशूराःपर्यवारयन्॥तरुणोदर्शनीयश्चसौभद्रःपरवीरहा॥यदाभ्यधावत्सद्रोणंतदासीद्रोणमतःकथं॥द्रौपदेयानरव्याघ्राः
समुद्रमिवसिंधवः॥यद्द्रोणमाद्रवन्संख्येकेशूरास्तानवारयन्॥एतेद्वादशवर्षाणिक्रीडामुत्सृज्यबालकाः॥अस्त्रार्थमवसन्भी
ष्मेबिभ्रतोव्रतमुत्तमं॥क्षत्रंजयःक्षत्रदेवःक्षत्रधर्माचमानदः॥धृष्टद्युम्नात्मजावीराःकेतान्द्रोणादवारयन्॥शताद्विशिष्टंयंयु
द्धेसममन्यंतवृष्णयः॥चेकितानंमहेष्वासंकस्तंद्रोणादवारयत्॥वार्द्धक्षेमिःकलिंगानांयःकन्यामाहरद्युधि॥अनाधृष्टिरदी
नात्माकस्तंद्रोणादवारयत्॥भ्रातरःपंचकैकेयाधार्मिकाःसत्यविक्रमाः॥इंद्रगोपकसंकाशारक्तवर्मायुधध्वजाः॥मातृष्वसु
:सुतावीराःपांडवानांजयार्थिनः॥तान्द्रोणंहंतुमायातान्केवीराःपर्यवारयन्॥यंयोधयंतोराजानोनाजयन्वारणावते॥षण्मा १५

सानतिसंरब्धाजिघांसंतोयुधांपतिं॥धनुष्मतांवरंशूरंसत्यसंधंमहाहवे॥द्रोणात्कस्तंनरव्याघ्रंयुयुत्सुंपर्यवारयत्॥यः
पुत्रंकाशिराजस्यवाराणस्यांमहारथं॥समरेस्त्रीषुगृध्यंतंभल्लेनापाहरद्रथात्॥धृष्टद्युम्नंमहेष्वासंपार्थानांमंत्रधारिणं॥यु
क्तंदुर्योधनानर्थेसृष्टंद्रोणवधायच॥निर्दहंतंरणेयोधान्दारयंतंचसर्वशः॥द्रोणायाभिमुखंयांतंकेवीराःपर्यवारयन्॥उत्संग
इवसंवृद्धंद्रुपदस्यास्त्रवित्तमं॥शिखंडिनंब्रह्मगुप्तंकोवाद्रोणादवारयत्॥यइमांपृथिवींकृत्स्नांचर्मवत्समवेष्टयत्॥म
हतारथघोषेणसंचारिण्यामहारथः॥दशाश्वमेधानाजह्रेस्वन्नपानाप्तदक्षिणान्॥निरर्गलान्सर्वमेधान्पुत्रवत्पालयन्प्रजाः॥
सुयाचन्याःचारूः पान्तुमरोघत पावः गंगाश्रोतःसुयावत्यःसिकताःसंत्यसंघतः॥तावतीर्गाददौवीरउशीनरसुतोध्वरे॥नपूर्वेनापरेचक्रुरिदंकेचनमानवाः॥इ
तिचुक्रुशुर्देवाःकृतेकर्मणिदुष्करे॥पश्यामस्त्रिषुलोकेषुनतंसंस्थाणुचारिषु॥जातंवापिजनिष्यंतंद्वितीयंवापिसांप्रतं॥अ
न्यमौशीनराच्छैब्याद्धुरोवोढारमित्युत॥गतिंयस्यनयास्यंतिमनुष्यालोकवासिनः॥तस्यनप्तारमायांतंशैब्यंकेसमवारय
न्॥द्रोणाभिमुखमायांतंव्यात्ताननमिवांतकं॥विराटस्यरथानीकंमत्स्यस्यामित्रकर्षिणः॥प्रेप्सुंतंविजयंयुद्धेकेवीराःपर्यवा
रयन्॥सद्योवृकोदराज्जातोमहाबलपराक्रमः॥मायावीराक्षसोघोरोयस्मान्ममहद्भयं॥पार्थानांजयकामंतंपुत्राणांममकं

द्रोण

हकं।घटोत्कचं महाकायं कस्तं द्रोणाद्वारयेत्।एते चान्ये च बहवो येषामर्थाय संजय।त्यक्ष्यंति समरे प्राणान्किं ते यामजि
तं युधि।येषां च पुरुषव्याघ्रः शार्ङ्गधन्वा व्यपाश्रयः॥हितार्थी चापि पार्थानां कथं तेषां पराजयः।लोकानां गुरुरत्यंतं लोकनाथ
ः सनातनः।नारायणो रणे नाथो दिव्यो दिव्यात्मकः प्रभुः।यस्य दिव्यानि कर्माणि प्रवदंति मनीषिणः।तान्यहं कीर्तयिष्यामि
भक्त्या स्थैर्यार्थमात्मनः॥ ॥महाभारते उद्योगपर्वणि॥ ॥धृतराष्ट्र उवाच॥ ॥शृणु दिव्यानि कर्माणि वासुदेवस्य वान्यानि पादः
संजय।कृतवान्यानि गोविंदो यथा नान्यः पुमान्क्वचित्।गोकुले वर्द्धमानेन बालेनैव महात्मना।विख्यापितं बलं बाह्वोस्त्रि
षु लोकेषु संजय।उच्चैःश्रवस्तुल्यबलं मातरिश्वसमं जवे।जघान हयराजं तं यमुनातीरवासिनं।दानवं घोरकर्माणं गवां मृ
त्युमिवोत्थितं।वृषरूपधरं बाल्ये भुजाभ्यां निजघान ह।प्रलंबं नरकं पीठं मुरुं जंभं महासुरं।हयग्रीवं महाकायमवधीत्पु
ष्करेक्षणः।तथा कंसो महातेजा जरासंधेन पालितः।विक्रमेणैव कृष्णेन निहतः सगणो रणे।सुनामा बलविक्रांतः समग्राक्षौ
हिणीवृतः।भोजराजस्य मध्यस्थो भ्राता कंसस्य वीर्यवान्।बलदेवद्वितीयेन कृष्णेनामित्रघातिना।तरस्वी समरे दग्धः स
सैन्यः शूरसेनराट्।दुर्वासा नाम विप्रर्षिस्तथा परमकोपनः।आराधितः सदारेण स चास्मै प्रददौ वरान्।तथा १६

त्य

गांधारराजस्य सुतां वीरः स्वयंवरे।निर्जित्य पृथिवीपालानवहत्पुरुषर्षभः॥अमृष्यमाणा राजानो यस्य जात्या हया इव
।रथे वैवाहिके युक्ताः प्रतोदेन कृतव्रणाः।जरासंधं महाराज सुपायेन जनार्दनः।परेण घातयामास समग्राक्षौहिणीपतिं।
चेदिराजं च विक्रांतं राजसेनापतिं बली।अर्घे विवदमानं तु जघान पशुवत्तदा।सौभं दैत्यपुरं स्वस्थं शाल्वगुप्तं दुरासदं।स
मुद्रकुक्षौ विक्रम्य पातयामास माधवः।अंगान्वंगान्कलिंगांश्च मागधान्काशिकोशलान्।वात्स्यगार्ग्यकरूषांश्च पौं
ड्रांश्चाप्यजयद्रणे।आवंत्यान्दाक्षिणात्यांश्च पार्वतीयान्दुरासदान्।काश्मीरकानौरसकान्पिशाचांश्च समुद्गलान्।कां
बोजान्वाटधानांश्च चोलान्पांड्यांश्च संजय।त्रिगर्तान्मालवांश्चैव दरदांश्च सुदुर्जयान्।नानादिग्भ्यश्च संप्राप्तान्नृपां
श्चैव शकांस्तथा।जितवान्पुंडरीकाक्षो यवनांश्च सहानुगान्।प्रविश्य मकरावासं यादोभिरभिसंवृतं।जिगाय वरुणं यु
द्धे सलिलांतर्गतं पुरा।युधि पंचजनं हत्वा पातालतलवासिनं।पांचजन्यं हृषीकेशो दिव्यं शंखमवाप्तवान्।खांडवे पार्थसहि
तस्तोषयित्वा हुताशनं।आग्नेयमस्त्रं दुर्धर्षं चक्रं लेभे तथैव च।वैनतेयं समारुह्य त्रासयित्वामरावतीं।महेंद्रभवनाद्वीर

आगमं च अवगतवान्॥

द्रोण पारिजातस्तु यानयत्तातद्धमर्षितवान् शक्रो जानंस्तस्य पराक्रमं॥ राज्ञां चाप्यजितं कं चित्कृष्णेनेह न शुश्रुम॥ यच्च तन्न
द्भुतं सुप्तायां सभायां मम संजय॥ कृतवान्पुंडरीकाक्षः कोन्यः कर्तुं तथार्हति॥ यच्च भक्त्या प्रपन्नोहं मदाक्षं कृष्णमीश्वरं तं
तत्सुविदितं सर्वं प्रत्यक्षमिव चागमं॥ नांतं विक्रमयुक्तस्य बुद्ध्या युक्तस्य वा पुनः॥ कर्मणः शक्यते गंतुं हृषीकेश
स्य संजय॥ तथा गदश्च सांबश्च प्रद्युम्नोथ विदूरथः॥ आगावहोनिरुद्धश्च चारुदेष्णः ससारणः॥ उल्मुको निशठश्चैव
झिल्ली बभ्रुश्च वीर्यवान्॥ पृथुश्च विपृथुश्चैव समीकोथारिमेजयः॥ एते चान्ये बलवंतः वृष्णिप्रवराः प्रहारिणः॥ कथंचि सं.
त्पांडवानीकं श्रयेरन्समरार्थिनः॥ आहूता वृष्णिवीरेण केशवेन महात्मना॥ ततः संशयितं सर्वं भवेदिति मतिर्म
म॥ नागायुतबलो वीरः कैलासशिखरोपमः॥ वनमाली हली रामस्तत्र यत्र जनार्दनः॥ यमाहुः सर्वपितरं वासुदेवं
द्विजातयः॥ अपि वा ह्येष पांडूनां योत्स्यते केशवः स्वयं॥ स यदा तात युद्धेत पांडवार्थे हि संजय॥ न तदा प्रतिसंयो
द्धा भविता तस्य कश्चन॥ यदि स्म कुरवः सर्वे जयेयुर्नाम पांडवान्॥ वार्ष्णेयोर्थे हि तेषां वै गृह्णीयाच्छस्त्रमुत्तमं॥ ततः स १७

र्वान्नरव्याघ्रो हत्वा नरपतीन्रणे॥ कौरवांश्च महाबाहुः कुंत्यै दद्यात्स मेदिनीं॥ यस्य यंता हृषीकेशो योद्धा यस्य धनंजयः॥ रथ
स्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः॥ न केन चिदुपायेन कुरूणां दृश्यते जयः॥ तस्मान्मे सर्वमाचक्ष्व यथा युद्धमवर्तत॥ अर्जुन
: केशवस्यात्मा कृष्णश्चात्मा किरीटिनः॥ अर्जुने विजयो नित्यं कृष्णे कीर्तिश्च शाश्वती॥ सर्वेष्वपि च लोकेषु बीभत्सुरपराजितः॥
प्रधानेनैव भूयिष्ठममेयाः केशवे गुणाः॥ मोहाद्दुर्योधनः कृष्णं यो न वेत्तीह माधवं॥ मोहितो दैवयोगेन मृत्युपाशपुरस्कृतः॥ न
वेद कृष्णं दाशार्हमर्जुनं चैव पांडवं॥ पूर्वदेवौ महात्मानौ नरनारायणावुभौ॥ एकात्मानौ द्विधाभूतौ दृश्येते मानुषैर्भुवि॥
मनसापि हि दुर्धर्षौ सेनामेतां यशस्विनौ॥ नाशयेतामिहेच्छंतौ मानुषत्वात्तु नेच्छतः॥ युगस्येव विपर्यासो लोकानामिव मोह
नं॥ भीष्मस्य च वधस्तात द्रोणस्य च महात्मनः॥ न ह्येव ब्रह्मचर्येण न वेदाध्ययनेन च॥ न क्रियाभिर्न चास्त्रैर्मृत्योः कश्चिन्निवा
र्यते॥ लोकसंभावितौ वीरौ कृतास्त्रौ युद्धदुर्मदौ॥ भीष्मद्रोणौ हतौ श्रुत्वा किं नु जीवामि संजय॥ यां तां श्रियमसूयामः पुरा दृष्ट्वा
युधिष्ठिरे॥ अद्य तामनुजानीमो भीष्मद्रोणवधेन ह॥ तथा च मत्कृते प्राप्तः कुरूणामेष संक्षयः॥ पक्वानां हि वधे सूत वज्रायंते तृणा

पक्वानां पातः॥

सव्यसाचिकान्प्रतिनिधर्मोधारणात्मा न भवति। किं तु सर्वैर्विनाशायेत्यन्वयः। नाधर्मइतिपाठे नाशाक्षानन्वयो। विहितो। नाति।
अवति क्रमणीयः वर्त्तितव्य विरमति कालः सन्नतिवर्त्तितइतिपाठे सधर्मः कालः सचन्यतिशयेन सर्वविनाशाय वर्त्तत इत्यन्व
द्रोण त्ययि। अनान्यमिदं मिथ्यालोके ग्राह्यत्युधिष्ठिरः। यस्यकोपान्महेष्वासो भीष्मद्रोणौ विपातितौ। प्राकृतप्रकृतितो धर्मेण धर्मो सा
सकान्नुति। क्रूरः सर्वविनाशाय कालो विनातिवर्त्तते। अन्यथा चिंतितार्थो नरैस्तात भवत्विति। अन्यथैव हि गच्छंति दै। वयो
गात्मति। सोमात्तस्मात्परिहार्यार्थे संग्रामे कृच्छ्रं तवमे। अपारणीये दुष्पृने यथावृत्तं प्रवक्ष्यमि॥ ॥महाभारते द्रोणपर्वणि
॥ ॥संजयउवाच॥ ॥हंत ते कथयिष्यामि सर्वं प्रत्यक्षदर्शिवान्। यथा सत्यपत द्रोणः सादितः पांडुसृंजयैः। सेनापति
त्वे संप्राप्य भारद्वाजो महारथः। मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यमब्रवीत्। यत्कौरवाणामृषभाद्गांगेयादनंतरं सैन्यापत्ये
नमां राजन्नद्य सत्कृतवानसि। सदृशं कर्मणस्तस्य फलमाप्नुहि भारत। करोमि कामं कं तेद्य प्रवृणीष्व यदिच्छसि। ततो दुर्योधनो
तम राजा कर्णदुःशासनादिभिः। संमंत्र्य दुर्धर्षमाचार्यं जयतां वरं। ददासि चेद्वरं मह्यं जीवग्राहं युधिष्ठिरं। गृहीत्वा रथिनां श्रेष्ठम
त्समीपमुपानय। ततः कुरूणामाचार्यः श्रुत्वा पुत्रस्य ते वचः। सेनां प्रहर्षयन्सर्वामिदं वचनमब्रवीत्। धन्यः कुंतीसुतो राजन्य
स्य ग्रहणमिच्छसि। न वधार्थं सुदुर्धर्ष वरमद्य प्रयाचसे। किमर्थं च नरव्याघ्र न वधं तस्य कांक्षसि। नाशंससि क्रियामेतां मत्तो १८

यः। विपद्यंते विवर्जैतः॥ उक्तमेनिरतेवाये॥ ॥जीवग्राहं जीवंतं। धन्यः सुकृती॥

नाशंससि न संभावयसि। सुजातं शोभनं जन्म। सुजातैः शोभनं जन्मेति पाठे। अजातशत्रुताया विशेषणं। व्यक्तं नियतं। अर्थत

दुर्योधनो ध्रुवं। आहोस्विद्धर्मराजस्य द्वेष्टा तस्य न विद्यते। यदिच्छसि त्वं जीवंतं कुलं रक्षसि चात्मनः। अथवा भरतश्रेष्ठ नि
र्जित्य पांडवान्। राज्यं संप्रतिदत्वा च सौभ्रात्रं कर्तुमिच्छसि। धन्यः कुंतीसुतो राजा सुजातं चास्य धीमतः। अजातशत्रुता सत्या
तस्य यत्स्निह्यते भवान्। द्रोणेन त्वेवमुक्तस्य तव पुत्रस्य भारत। सहसा निःसृतो भावो यो अस्य नित्यं हृदि स्थितः। नाकारो गूहितुं शक्यो
बृहस्पतिसमैरपि। तस्मात्तव सुतो राजन्प्रहृष्टो वाक्यमब्रवीत्॥ ॥दुर्योधन उवाच॥ ॥वधे कुंतीसुतस्याजौ नाचार्य
विजयो मम। हते युधिष्ठिरे पार्थो हन्यात्सर्वान्हि नो ध्रुवं। न च शक्या रणे सर्वे निहंतुममरैरपि। य एव तेषां शेषः स्यात्स एवास्मा
न्न शेषयेत्। सत्यप्रतिज्ञे त्वानीते पुनर्द्यूतेन निर्जिते। पुनर्यास्यंत्यरण्याय पांडवास्तमनुव्रताः। सोयं मम जयो व्यक्तं दीर्घकालं
भविष्यति। अतो न वधमिच्छामि धर्मराजस्य कर्हिचित्। तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोर्थतत्ववित्। तं वरं सांतरं तस्मै
ददौ संचिंत्य बुद्धिमान्॥ ॥द्रोण उवाच॥ ॥न चेद्युधिष्ठिरं वीरः पालयत्यर्जुनो युधि। मन्यस्व पांडवश्रेष्ठमानीतं वशा
मात्मनः। न हि शक्यो रणे पार्थः सेंद्रैर्देवासुरैरपि। प्रत्युद्यातुमतस्तात नैतदामर्षयाम्यहं। स हि स्तरः कृतास्त्रश्च मत्पूर्वश्चा

त्ववित् कृत्यानुबंधवेदी। आमर्षयाम्युत्सहे। अहं पूर्वगुरुर्यस्य॥

एकायनगतो जयमरणैकनिश्चयः। भूयः पुनः। द्विजश्रेष्ठ यद्यर्थी मंत्रः कृत्यनिश्चयः॥ ॥

द्रोण स्वकर्मणि। तरुणः सुकृती युक्त एकायनगतश्च ह। अस्त्राणीन्द्राच्च रुद्राच्च भूयः स समवाप्तवान्। अमर्षितश्च ते राजस्ततो नाममर्थयामहं
।मत्वापकाम्यतां युद्धादेनो पायेन शक्तितो। अपनीते ततः पार्थे धर्मराजो जितस्त्वया। ग्रहणे हि जयस्तस्य न वधे पुरुषर्षभ। एतेन वा
प्युपायेन ग्रहणं ग्रहणमेष्यसि। अहं गृहीत्वा राजानं सत्यधर्मपरायणं। आनयिष्यामि ते राजन्वशमद्य न संशयः। यदि स्थास्यति सं
ग्रामे मुहूर्तमपि मेऽग्रतः। अपनीते नरव्याघ्रे कुंतीपुत्रे धनंजये। फाल्गुनस्य समक्षं तु न हि पार्थो युधिष्ठिरः। ग्रहीतुं समरे राजन्सेंद्रै
रपि सुरासुरैः॥ ॥संजय उवाच॥ ॥सांतरं तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे। गृहीतं तममन्यंत तव पुत्राः सुबालिशाः। पां
डवेषु हि सापेक्षं द्रोणं जानंति ते सुताः। ततः प्रतिज्ञास्थैर्यार्थं स मंत्रो बहुलीकृतः। ततो दुर्योधनेनापि ग्रहणं पांडवस्य तत्। सैन्य
स्थानेषु सर्वेषु सुघोषितमरिंदम॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥ततस्तु सैनिकाः श्रुत्वा तं युधिष्ठिरनि
ग्रहं। सिंहनादरवांश्चक्रुर्बाणशंखरवैः सह। तत्तु सर्वं यथावृत्तं धर्मराजेन भारत। आप्तैराशु परिज्ञातं भारद्वाजचिकीर्षितं॥
ततः सर्वान्समानाय्य भ्रातृनन्यांश्च सर्वशः। अब्रवीद्धर्मराजस्तं धनंजयमिदं वचः। श्रुतं ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितं। यथा त १८
न्न भवेत्सत्यं तथा नीतिर्विधीयतां। सांतरं हि प्रतिज्ञातं द्रोणेनामित्रकर्शन। तच्चांतरं महेष्वासे त्वयि तेन समाहितं। स त्वमद्य म

अत्यद्विति स्ववर्मेश्वतिरूपकमन्येत्यर्थः। त्वयामिति निवंतश्चतिरूपकं त्वमसीत्यर्थः। ब्रूयामितिपाठे। अन्यच्च ब्रूयामिति सामा

हाबाहो युध्यस्व मदंतरं। यथा दुर्योधनः कामं नेमं द्रोणादवाप्नुयात्॥ ॥अर्जुन उवाच॥ ॥यथा मे न वधः कार्य आ
चार्यस्य कथंचन। तथा तव परित्यागो न मे राजंश्चिकीर्षितः। अप्येवं पांडव प्राणानुत्सृजेयमहं युधि। प्रतीपो नाहमाचार्ये त्वां
नाजह्यां कथंचन। त्वां निगृह्याहवे राजन्धार्तराष्ट्रो यमिच्छति। न स तं जीवलोकेऽस्मिन्कामं प्राप्नोत्कथंचन। प्रपतेद्द्यौः सनक्ष
त्रा पृथिवी शकली भवेत्। न त्वां द्रोणो निगृह्णीयाज्जीवमाने मयि ध्रुवं। यदि तस्य रणे साह्यं कुरुते वज्रभृत्स्वयं। विष्णुर्वा सहि
तो देवैर्न त्वां प्राप्स्यत्यसौ मृधे। मयि जीवति राजेंद्र न भयं कर्तुमर्हसि। द्रोणादस्त्रभृतां श्रेष्ठात्सर्वशस्त्रभृतामपि। अन्यच्च ब्रू
यां राजेंद्र प्रतिज्ञां मम निश्चलां। न स्मराम्यनृतां वाचं न स्मरामि पराजयं। न स्मरामि प्रतिश्रुत्य किंचिदप्यनृतं कृतं॥ ॥संजय
उवाच॥ ॥ततः शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह। प्रावाद्यंत महाराज पांडवानां निवेशने। सिंहनादश्च संजज्ञे पांड
वानां महात्मनां। धनुर्ज्यातलशब्दश्च गगनस्पृक्सुभैरवः। तं श्रुत्वा शंखनिर्घोषं पांडवस्य महौजसः। त्वदीयेष्वप्यनी
केषु वादित्राण्यभिजघ्निरे। ततो व्यूढान्यनीकानि तव तेषां च भारत। शनैरुपेयुरन्योन्यं योत्स्यमानानि संयुगे। ततः प्रवव
ते युद्धं तुमुलं लोमहर्षणं। पांडवानां कुरूणां च द्रोणपांचालयोरपि। यतमानाः प्रयत्नेन द्रोणानीकविशातने। न शेकुः

न्योक्तिः प्रतिज्ञामिति शेषः। विनाशकर्तुमिति शेषः॥

संग्रामासकृतपत्रसंकोचे॥ वरूथिना रथेन॥

द्रोण ॥ संजयाराजंस्त्रिदशोद्रोणेनपालितं॥ तथैवतवसैन्यस्यरथोदाराःप्रहारिणः॥ नशेकुःपांडवींसेनांपाल्यमानांकिरी
टिना॥ आस्तांतेस्तिमितेसेनेरक्षमाणेपरस्परं॥ संप्रसुप्तेयथानक्तंवनराज्यौसुपुष्पिते॥ ततोरुक्मरथोराजन्न
र्केणेवविराजता॥ वरूथिनाविनिष्पत्यव्यचरत्पृतनांतरं॥ तमुद्यतंरथेनैकमाशुकारिणमाहवे॥ अनेकमि
वसंत्रासान्मेनिरेपांडुसृंजयाः॥ तेनमुक्ताःशराघोराविचेरुःसर्वतोदिशः॥ त्रासयंतोमहाराजपांडवस्यवा
हिनीं॥ मध्यंदिनमनुप्राप्तोगभस्तिशतसंवृतः॥ यथादृश्येतघर्मांशुस्तथाद्रोणोप्यदृश्यत॥ नचैनंपांडवेयानांक
श्चिच्छक्तोनिवारितुं॥ वीक्षितुंसमरेक्रुद्धंमहेंद्रमिवदानवाः॥ मोहयित्वाततःसैन्यंभारद्वाजःप्रतापवान्॥ धृष्टद्युम्न
बलंतूर्णंव्यधमन्निशितैःशरैः॥ सदिशःसर्वतोरुद्ध्वासंवृत्यखमजिह्मगैः॥ पार्षतोयत्रतत्रैवममृदेपांडुवाहि
नीं॥ ॥महाभारतेद्रोणपर्वणि॥ ॥संजयउवाच॥ ॥ततस्तुपांडवानीकंजनयंस्तुमुलंमहत्॥ व्यचरत्सततेना
शेणेदहन्कक्षमिवानलः॥ निर्दहंतमनीकानिसाक्षादग्निमिवोत्थितं॥ दृष्ट्वारुक्मरथंक्रुद्धंसमकंपंतसृंजयाः॥
प्रततःकृष्यतःसंख्येधनुषोस्याशुकारिणः॥ ज्याघोषःश्रूयतेत्यर्थंविस्फूर्जितमिवाशनेः॥ रथिनःसादिनश्चैवनागान २०
श्वान्पदातिनः॥ रौद्राहस्तवतामुक्ताःप्रमृद्नंतिस्मसायकाः॥ नानद्यमानःपर्जन्यःसानिलःशुचिसंक्षये॥ अश्मवर्ष

युगांतकालवन्मेघाःप्रलयसमयसंबंधीमेघइवेत्यर्थः॥ प्राणेनपूर्ववातिनःपश्चिमाः॥

द्र.द्रो. मिवासृजत्॥ तथाबाणमयंवर्षंद्रोणस्ययं॥ विचरंस्तत्रदाराजन्सेनांसंक्षोभयन्प्रभुः॥ वर्धयामाससंत्रासंशत्रूणाममानुषं॥ तस्यविद्युदिवा
भ्रेषुचापंहेमपरिष्कृतं॥ व्यदृश्यततस्मिन्दृश्यतस्मिन्ननातनः॥ सवीरःसत्यवान्प्राज्ञोधर्मनित्यःसदारुणः॥ युगांत
कालवन्मेघारौद्रांप्रास्कंदयन्नदीं॥ अमर्षवेगप्रभवांक्रव्यादगणसंकुलां॥ बलौघैःसर्वतःपूर्णांवीरवृक्षापहारि
णीं॥ शोणितोदांरथावर्तांहस्त्यश्वकृतरोधसां॥ कवचोडुपसंयुक्तांमांसपंकसमाकुलां॥ मेदोमज्जास्थिसिकतामुष्णी
षवरफेनिलां॥ संग्रामजलदापूर्णांप्रासमत्स्यसमाकुलां॥ नरनागाश्वकलिलांशरवेगौघवाहिनीं॥ शरीरदारुसंघ
ट्टांरथकच्छपसंकुलां॥ उत्तमांगोपलैस्तीर्णांनिस्त्रिंशझषसेवितां॥ रथनागह्रदोपेतांनानाभरणभूषितां॥ महारथशता
वर्तांभूमिरेणूर्मिमालिनीं॥ महावीर्यवतांसंख्येसुतरांभीरुदुस्तरां॥ शरीरशतसंबाधांगृध्रकंकनिषेवितां॥ महा
रथसहस्राणिनयंतींयमसादनं॥ शूलव्यालसमाकीर्णांप्राणिवाजिनिषेवितां॥ छिन्नछत्रमहाहंसांमुकुटां
डजसंकुलां॥ चक्रकूर्मांगदानक्रांशरक्षुद्रझषाकुलां॥ बलवद्गृध्रशृगालानांघोरसंघैर्निषेवितां॥ निहतान्प्राणिनः
संख्येद्रोणेनबलिनारणे॥ वहंतींपितृलोकायशतशोराजसत्तम॥ शरीरशतसंबाधांकेशशैवलशाड्वलां॥
नदींप्रावर्तयद्राजन्भीरूणांभयवर्धिनीं॥ तंजयंतमनीकानितानिमहारथं॥ सर्वतोभ्यद्रवन्द्रोणंयुधिष्ठिर

अभ्यस्तो विद्धः॥ लालयन्कालयन्॥

द्रोण सुरोगमाः॥ नानदद्भवत्। शूरो सावकाहतकार्मुकाः॥ सर्वतः प्रत्यम्क्लेसे तदद्भुतं भीमदर्शनं। चतमायस्तु शकुनिः सह-
देवं समाद्रवत्। सनियंतृध्वजरथं विव्याध निशितैः शरैः। तस्य माद्रीसुतः केतुं धनुः सूतं हयानपि। नातिक्रुद्धः शरैश्छित्वा
षष्ट्या निव्याध सौबलं। सौबलस्तु गदां गृह्य प्रचस्कंद रथोत्तमात्। सतस्या गदया राजन्रथात्सूतमपातयत्। ततस्तौ विरथौ
राजन्गदाहस्तौ महाबलौ। चिक्रीडतू रणे शूरौ सशृंगाविव पर्वतौ। द्रोणः पांचालराजानं विद्ध्वा दशभिराशुगैः। बहुभिस्ते-
नचाभ्यस्तस्तं विव्याध शताधिकैः। विविंशतिर्भीमसेनो विंशत्या निशितैः शरैः। विद्ध्वा नाकंपयद्वीरं तदद्भुतमिवाभवत्। विविं-
शतिस्तु सहसा व्यश्वकेतुशरासनं। भीमं चक्रे महाराज ततः सैन्यान्यपूजयत्। स तन्न ममृषे वीरः शत्रोर्विजयमाहवे। ततोऽस्य ग-
दया दांतान्हयान्सर्वान्यपातयत्। हताश्वात्स रथाद्राजन्गृह्य चर्म महाबलं। अभ्ययाद्भीमसेनं तु मत्तो मत्तमिव द्विपं। शल्यस्तु नकुलं वी-
रः स्वस्रीयं प्रियमात्मनः। विव्याध प्रहसन्बाणैर्लालयन्कोपयन्निव। तस्याश्वानातपत्रं च ध्वजं सूतमथो धनुः। निपात्य नकु-
लः संख्ये शंखं दध्मौ प्रतापवान्। धृष्टकेतुः कृपेणास्तांश्छित्वा बहुविधान् शरान्। कृपं विव्याध सप्तत्या लक्ष्म चास्याहरत्त्रिभिः।
तं कृपः शरवर्षेण महता समवारयत्। निवार्य च रणे विप्रो धृष्टकेतुमयोधयत्। सात्यकिः कृतवर्माणं नाराचेन स्तनांतरे। विद्ध्वा २१

सेनापतिः पांचालः॥

विव्याध सप्तत्या पुनरन्यैः स्मयन्निव। तं भोजः सप्तसप्तत्या विद्ध्वा तु निशितैः शरैः। नाकंपयत शैनेयं शीघ्रो वायुरिवाचलं।
सेनापतिः सुशर्माणं शीघ्रं मर्मस्वताडयत्। स चापि तं तोमरेण जत्रुदेशेऽभ्यताडयत्। विकर्तनं तु समरे विराटः प्रत्यवारयत्॥
सह मत्स्यैर्महावीर्यैस्तदद्भुतमिवाभवत्। तत्पौरुषमभूत्तत्र सूतपुत्रस्य दारुणं। यत्सैन्यं वारयामास शरैः सन्नतपर्वभिः।
द्रुपदस्तु स्वयं राजा भगदत्तेन संगतः। तयोर्युद्धं महाराज चित्ररूपमिवाभवत्। भगदत्तस्तु राजानं द्रुपदं नतपर्वभिः। सनियंतृध्वजरथं दंनतप५
विव्याध पुरुषर्षभः। द्रुपदस्तु ततः क्रुद्धो भगदत्तं महारथं। आजघानोरसि क्षिप्रं शरेणानतपर्वणा। युद्धं योधवरौ लोके सो-
मदत्तिशिखंडिनौ। भूतानां त्रासजननं चक्रातेऽस्त्रविशारदौ। भूरिश्रवा रणे राजन्याज्ञसेनिं महारथं। महता सायकौघेण
छादयामास वीर्यवान्। शिखंडी तु ततः क्रुद्धः सोमदत्तिं विशांपते। नवत्या सायकानां तु कंपयामास भारत। राक्षसौ भीमक-
र्माणौ हैडिंबालंबुषावुभौ। चक्रातेऽत्यद्भुतं युद्धं परस्परजयैषिणौ। मायाशतसृजौ दृप्तौ मायाभिरितरेतरं। अंतर्हितौ चेरतु-
स्तौ भृशं विस्मयकारिणौ। चेकितानोऽनुविंदेन युयुधे त्वतिभैरवं। यथा देवासुरे युद्धे बलशक्रौ महाबलौ। लक्ष्मणः क्ष-
त्रदेवेन विमर्दमकरोद्भृशं। यथा विष्णुः पुरा राजन्हिरण्याक्षेण संयुगे। ततः प्रजविताश्वेन विधिवत्कल्पितेन च। रथेनाभ्य-

विविध॰

अनेकधा विविधैर्निर्माणप्रकारैः पांतनागा यस्य। अनेकतोरणोनिवायावः। नामितं क्रमेण उच्चांतनत्कलवना चित्तं चामरं॥

द्रोण पत्रघजान्सोमदंयोरवोनरद्राततोयायत्वरितोयुद्धकांक्षीमल्लः। तेनचक्रेमहत्युद्धमनिमन्तुररिंदमः। पोरवस्त्वघासोम
दृस्तरस्त्रातिरवाकिरत्। तस्यार्जुनिर्धजं छत्रंधनुश्चाव्यापातयत्। सोमदत्तः पौरवंत्वान्यैर्विधासन्नसिरग्नुगोः। पंचभिस्तस्य
विव्याधहयान्सूतंचसायकैः। ततः प्रहर्षयन्सेनां सिंहवच्छिंदन्मुहुः। समादत्तार्जुनिस्तूर्णं पौरवांतकरंशरं। तंतुसंधितमा
त्रायसायकं घोरदर्शनं। चिच्छेदहार्दिक्यस्त्रकर्णसमारंधनुः। सद्यस्त्वन्यधनुश्छिन्नाः सोमदत्तः परवीरहा। उद्दवर्दसितं
परावर्त्तमि। खड्गमाददानः परावैरां सनेतानेकतोरणधर्मणा। कृतदृढवरं। चांतासिखरन्यागीनदर्शयन्वीर्यमात्मनः। नामितं पुनरुद्धां
तमाद्युतंपुनरुच्छितं। धर्मनिस्त्रिंशयोराजन्निर्विशेषमदृश्यत। सपौरवश्चरथस्येषामाशुन्यसरसासंनदन्। पौरवं रथमाखा
यकेशपक्षेपराम्भृशत्। अथास्यपदाघ्नन्नसिना पातयतध्वजं। विकोशंचेनंनिर्धिनाम्यैलत्नाग मिवधात्विपत्रा तमागलि
तकेशांत दृष्ट्वासर्वपार्थिवाः। उक्षाणमिवसिंहेनपात्यमानमचेतनं। तमार्जुनिवशंप्राप्तंकृष्यमाणमनाथवत्। पौरवं २२
पतितं दृष्ट्वानामृष्यतजयद्रथः॥

आधूतमवनमनं। उच्छितमुन्नमनं। पतितमासन्नपतनं॥

बर्हिणं बर्हिपक्षानतं बर्हिबर्हवितत मितिवायावः। संपातेषु मिलितेषु। अनिपातेषु प्रहारेषु। निपातेषु प्रवारणेषु। अवक्षे
पः प्रहरणं। असेर्विर्युद्धः शास्त्रजनतो शास्त्रांतराणांनिदर्शनमाविष्करणं। विसर्जितमितिवायावः। बाह्यंनिपातोयसर्पणं। अंत

सबर्हिणं महाराजकिंकणीशतजालवत्। वर्मचादाय खड्गं वनदन्पर्यपतद्रथात्। ततः सिंधवमालोक्य कार्ष्णिरुत्सृज्य पौर
वं। उत्पपातरथात्तूर्णं श्येनवन्निपपातह। प्रासपट्टिशनिस्त्रिंशानशनुभिः संप्रचोदितान्। चिच्छेदचासिना कार्ष्णिश्चर्मणासं
रुरोधच। संपातेषभिद्यातेषु निपातेष्वसिचर्मणोः। तत्रयोरंतरंकश्चिद्दृष्टोनरसिंहयोः। अवक्षेपोसितिरुद्धिः शस्त्रांतरनिदर्शि
तं। बाह्यांतरनिपाता श्चनिर्विशेषमदृश्यत। बाह्यमभ्यंतरंचैवचरंतोमार्गमुत्तमं। ददृशातेमहात्मानौ सपक्षाविवपर्वतौ। विसर्जितं पातः॥
। ततोविक्षिपतः खड्गंसौभद्रस्ययशस्विनः। आवरणपर्यंते प्रजहारजयद्रथः। रुक्मपत्रांतरेसक्तस्तस्मिन्चर्मणि भास्वति
भारा सिंधुराजबलोद्धूतः सोमज्यतमहानसिः। सभग्नमाज्ञायनिस्त्रिंशमवप्लुत्यपदानिषट्। अदृश्यतनिमेषेण स्वंनेरथंपु
२ नराश्रितः। तंकार्ष्णिंसमरोन्मुक्तमास्थितंरथमुत्तमं। सहिताः सर्वराजानः परिवव्रुः समंततः। ततश्चर्मचखड्गंच समुत्क्षिप्य
महाबलः। ननादोर्जुनदायादः प्रेक्षमाणो जयद्रथं। सिंधुराजंपराजित्यसोभद्रः परवीरहा। तापयामास तत्सैन्यं
भुवनंभास्करोयथा। तस्यसर्वायसींशक्तिं शल्यं कनकभूषणं। चिक्षेपसमरेघोरां दीप्तामग्निशिखामिव॥

रनिपातोयसर्पणं। बाह्यंव्यवहितं अभ्यंतरमासन्नं। आवरणपर्यंते चर्मयाश्वप्रदेशे। रुक्मपत्रयोरंतरे संघट्टस्थाने॥ ॥

सकोपं कोपविहितं। विकोपं कोपविस्मृतमिति। विदूर्येण विरुतं विभ्रमजिरं प्रांगणे वाने विषये दृष्टैरतना विति श्रुतिधा

द्रोण तामवप्लुत्य जयाद्द्विकोपं धाकरोदसि। विनतेयो यथा कस्मिः पतंतमुरगोत्तमं। तस्य लाघवमाज्ञाय सत्वं चामिततेजसः।
सहिताः सर्वराजानः सिंहनादमथानदन्। ततस्तामेव शल्यस्य सोमदत्तः परवीरहा। मुमोच भुजवीर्येण विदूर्य्यविरुताजि
रां। सो तस्य रथमासाद्य निर्मुक्तभुजगोपमा। जघान सूतं शल्यस्य रथात्चिनमपातयत्। ततो विराटद्रुपदौ धृष्टकेतुर्युधिष्ठि
रः। सात्यकिः केकया भीमो धृष्टद्युम्नशिखंडिनौ। यमौ च द्रौपदेयाश्च साधुसाध्विति चुक्रुशुः। बाणशब्दाश्च विविधाः सिंह
नादाश्च पुष्कलाः। प्रादुरासन्हर्षयंतः सौभद्रमपलायिनं। नत्वाममृष्यंत पुत्रास्ते यात्रां विजयलक्षणां। अथैनं सहसा सर्वे
चाविशन्महत्।सारथिस्त्वरमाणस्तंदुःशासनमचेतसं।रणमध्यादपोवाहसौभद्रशरपीडितं।पांडवाद्रौ
पदेयाश्चविराटश्चसमीक्ष्यतं।पांचालाःकेकयाश्चैवसिंहनादमथानदन्।वादित्राणिचसर्वाणिनानालिंगा
निसर्वशः।प्रावादयंतसंहृष्टाःपांडूनांतत्रसैनिकाः।अपश्यन्स्मयमानाश्चसौभद्रस्यविचेष्टितं।अत्यंतवैरि
णंदृप्तंदृष्ट्वाशत्रुंपराजितं।धर्ममारुतशक्राणामश्विनोःप्रतिमास्तथा।धारयंतोध्वजाग्रेषुद्रौपदेयामहार
थाः।सात्यकिश्चेकितानश्चधृष्टद्युम्नशिखंडिनौ।केकयाधृष्टकेतुश्चमत्स्यपांचालसृंजयाः।पांडवाश्चमुद
युक्तायुधिष्ठिरपुरोगमाः।अभ्यद्रवंतत्वरिताद्रोणानीकंबिभित्सवः।ततोऽभवन्महद्युद्धंत्वदीयानांपरैःसह।
जयमाकांक्षमाणानांशूराणामनिवर्तिनां।तथातुवर्तमानेविसंग्रामेअतिभयंकरे।दुर्योधनोमहाराज

द्रोण

राधेयमिदमब्रवीत् । परुषःश्चासनं वीरमभिमन्युं वृषांगतं । शतपंतमिवादित्यं निघ्नंतं शात्रवान्रणे । अथ द्रौणिस्तु सं
रथाः सिंहा इव वनौकसः ॥ सोऽभिमन्युर्हतास्तान्समन्यमस्त्रं व तपांडवाः । ततः कर्णः शरैस्तीक्ष्णैरभिमन्युं दुरासदं । अभ्य
वर्षत संक्रुद्धः पुत्रस्य हितकृत्तव । तस्य चानुचरास्तीक्ष्णैर्विव्याधुः परमेषुभिः । अवजानन्नदीनं स्वं रः सोऽभवत्समरे
रणे । शिरः । अभिमन्युस्तु राधेयं त्रिसप्तत्या शिलीमुखैः । अविध्यत्त्वरितो राजन्द्रोणाय प्रमर्षमनाः । तं तदा नारा
काः श्लिष्टो णां हारारथीत्रं रथी । आरुह्य तं रथामुखावस्त्रश्रस्तास्तजालमन्दं । ततः कर्णोऽजयत्पुत्रं प्रमानीसर्वधनुर्भृतां
। सोऽभंजशतशाविधेऽदनमास्त्राणि दर्शयन् । सोऽभवत्स्वविदायोद्धीराम शिष्यः प्रतापवान् । समरे शत्रुदुर्धर्षमभिम
न्युमपीडयत् । स तथा पीड्यमानस्तु राधेयेनास्त्रवृष्टिभिः । समरे ऽमरसंकाशः सोऽभज्ञो न व्यसीदत । ततः शिलाशितैस्ती
क्ष्णैर्भल्लैरानतपर्वभिः । छित्त्वा धनूंषि शूराणामार्जुनिः कर्णमार्दयत् । धनुर्मंडलनिर्मुक्तैः शरैराशीविषोपमैः । स
छत्रध्वजं यंतारं साश्वमाशु स्मयन्निव । कर्णोऽपि चास्य चिक्षेप बाणान्सन्नतपर्वणः । असंभ्रांतश्च तान्सर्वानगृह्णात्फाल्गुनात्म
जः ॥ ततो मुहूर्तात्कर्णस्य बाणेनैकेन वीर्यवान् । सध्वजं कार्मुकं वीरश्छित्वा भूमौ न्यपातयत् । ततः कृच्छ्रगतं क ६२
र्णं दृष्ट्वा कर्णादनंतरः । सोऽभज्यमन्यातन्यं सदृढं स्तुद्यमान्यकार्मुकं । तत उच्चुक्रुशुः पार्थास्तेषां चानुचरा जनाः । वादित्राणि
च संजघ्नुः सोऽभज्यं चापि तुष्टुवुः ॥ ॥ महाभारते द्रोणपर्वणि अभिमन्युवधे ॥ ॥ ५१

रश्च निरेति । बचादीन्यकश ॥ सोनडं त्रिनिरित्यर्थः ॥

सोऽभ्यवर्तत ॥ ॥ सोऽभिगर्ज्य द्विधनुष्पाणिर्ज्यां विकर्षन्पुनः पुनः । तयोर्महात्मनोस्तूर्णं रथांतरमवापतत् । सोऽवि
ध्यद्दशभिर्बाणैरभिमन्युं दुरासदं । सच्छत्रध्वजयंतारं साश्वमाशु स्मयन्निव । पितृपैतामहं कर्म कुर्वाणमतिमा
नुषं । दृष्ट्वार्दितं शरैः कार्ष्णिं दायादं पितामहं वृत्तं । तस्याभिमन्युरायम्य स्मयन्निव कितव निर्णया शिरः प्रच्यावयामास
तद्यथा सपनं तुर्वि । कर्णिकारमिवाद्धूतं वातानततितं नगात् । भ्रातरं निहतं दृष्ट्वा राजन् कर्णो व्यथां ययौ । विमुखीकृ
त्य कर्णं तु सौभद्रः कंकपत्रिभिः । अन्यानपि महेष्वासांस्तूर्णमेवाभिदुद्रुवे । ततस्तद्वितितं जालं हस्त्यश्वरथपत्तिमत्
। क्रुद्धोऽभिमन्युरभिनत्तिग्मतेजा महायशाः । कर्णस्तु बहुभिर्बाणैरर्द्यमानोऽभिमन्युना । अपायाज्जवनैरश्वैस्ततो
ऽनीकमभिद्यत । शलभैरिव चाकाशं धाराभिरिव चावृतं । अभिमन्योः शरैराजन्न प्राज्ञायत किंचन । तावका
नां तु योधानां वध्यतां निशितैः शरैः । अन्यत्र सैंधवाद्राजन्न स्म कश्चिद्व्यतिष्ठत । सौभद्रस्तु ततः शंखं प्रध्माप्य पुरुषर्
षभः । शीघ्रमभ्यपतत्सेनां भारतीं भरतर्षभ । स कक्षेऽग्निरिवोत्सृष्टो निर्दहस्तरसारिपून् । मध्ये भारतसैन्यानामा
र्जुनिः पर्यवर्तत । रथनागाश्वमनुजानर्दयन्निशितैः शरैः । संप्रविश्याकरोद्भूमिं कबंधगणसंकुलां । सौभद्र
चापप्रभवैर्निकृत्ताः परमेषुभिः । स्वानेवाभिमुखान्घ्नंतः प्राद्रवन्जीवितार्थिनः । ते घोरा रौद्रकर्माणो विपा

ञ्युधिष्ठिरस्याग्रतः न्ये २

द्रो०ण वामिव स्थिताः॥ निघ्नंतारथनागाश्वान्नगच्छद्युग्रसंधरां॥ सायुधाःसांगुलित्राणाःसगदाःसांगदाररणाः॥ हस्त्येतवा
हवस्थिताहेमानरणान्वपिता॥ शराश्चापानिखङ्गाश्च शरीराणि॥ शिरांसि च सकुंडलानि खड्गाणि च्छमावामन्म ह
सुराः॥ सोऽस्य कर्मरेर्धिष्ठांतेरापाण्डकबंधुरे॥ अस्त्रैर्विमर्द्यितस्याकें तीक्ष्णैर्बक्रधामुगे॥ राक्षिवापासिमि
श्रैर्वपतिस्सुमहात्मबलैः॥ वर्मचापधरैश्चापि व्यश्वकैश्लैसिमंततः॥ निहाते: स्वैर्यिरश्चौ वरिणो क्षविशांपता अ
सम्यक्त्वा पृथिवीद्राणाना सीत्सुदारुणा॥ वध्यतां राजपुत्राणां क्रुध्दंतामितरात्तेरोश्चाद्रुतासीन्महावक्षोनाद्रुणां नय
द्वेन॥ महाशोभरतास्थश्टदिशासवव्यनादयत्॥ सोमडश्चाडवन्येनाग्रनराश्वरथक्षिपात्॥ वल्स मम्मिरि वोस्रासा नि
इन्वेस्तरसारिघ्नमध्येसारतसैन्यानामार्जुनिः शुस्तहृष्पतत्॥ विचरंतं दिशः सर्वाः प्रदिशश्चापि मारतातं तदान
नुपश्यमसैन्येनरजसा वृतं॥ आददानं गजाश्वानां हरतां चाहविष्मा रत॥ सहसेन त्रायापश्यामहृर्यमिवधंदिन
य्या॥ अभिमन्युं महाराजधपतपं ताक्षिपक्षमणा॥ सवासवसमः संख्ये वासवस्यात्मजात्मजः॥ अभिमन्युर्म
हाराजसैन्यमध्येव्यरोचत॥ ॥इति द्रोणपर्वणि अभिमन्युवधे॥ ॥धृतराष्ट्र उवाच॥ ॥बालमत्यंतसुखिनं ६५
तं स्वबाहुबलदर्पितं॥ युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजं॥ गाहमानमनीकानि सदश्वैस्त्रिहायनैः॥

प्लवमानमिवप्रदेवांप्राप्य॥ बलंसामर्थ्यं॥ वीर्यमुत्साहं॥ वीर्यप्रभावं॥ ब्रह्मसत्वं॥ सनातनंरहस्यं॥

अपि यौधिष्ठिरात्सैन्यात्कश्चिदन्वपतद्रथी॥ ॥संजयउवाच॥ ॥युधिष्ठिरोभीमसेनः शिखंडीसात्यकिर्यमौ धृष्ट
द्युम्नो विराटश्च द्रुपदश्च सकेकयः॥ धृष्टकेतुश्च संरब्धो मत्स्याश्चान्वपतन्रणे॥ तेनैव तु पथा यांतः पितरो मातुलैः सह॥ अ
भ्यद्रवन्व्यूढानीकाः प्रहारिणः॥ तान्दृष्ट्वा द्रवतः शूरांस्त्वदीयाविमुखाभवन्॥ ततस्तद्विमुखं दृष्ट्वा तव सूनोर्म
हद्बलं॥ जामाता तव तेजस्वी विष्टंभयिषुरद्रवत्॥ सैंधवस्य महाराजपुत्रो राजा जयद्रथः॥ स पुत्रगृद्धिनः पार्थान्सहसैन्यान
वारयत्॥ उग्रधन्वा महेष्वासो दिव्यमस्त्रमुदीरयन्॥ वार्धक्षत्रिरुपासेधत्प्रवणादिव कुंजरः॥ ॥धृतराष्ट्र उवाच॥ ॥
अतिभारमहं मन्ये सैंधवे संजयाहितं॥ यदेकः पांडवान्क्रुद्धान्पुत्रप्रेप्सूनवारयत्॥ अत्यद्भुतमहं मन्ये बलं शौर्यं च सैंधवे
॥ तस्य प्रब्रूहि मे वीर्यं कर्म चाग्र्यं महात्मनः॥ किं दत्तं हुतमिष्टं वा सुतप्तमथवा तपः॥ सिंधुराजेन येनैकः क्रुद्धान्पार्था
न्वारयत्॥ ॥संजयउवाच॥ ॥द्रौपदीहरणे यत्तद्भीमसेनेन निर्जितः॥ मानात्स तप्तवान्राजन्वरार्थी सुमहत्तपः॥ इंद्रिया
णींद्रियार्थेभ्यः प्रियेभ्यः संनिवर्त्य सः॥ क्षुत्पिपासातपसहः कृशो धमनिसंततः॥ देवमाराधयच्छर्वं गृणन्ब्रह्म सनातनं॥ भक्तानुकं
पी भगवांस्तस्य चक्रे ततो दयां॥ स्वप्नांतेप्यथ चैवाह हरः सिंधुपतेः सुतं॥ वरं वृणीष्व प्रीतोऽस्मि जयद्रथ यमीप्ससि एवमु

परानवधीरिति पूर्वार्द्धेनान्वयः॥ ॥वरूथं रथवेष्टनं॥

द्रोण एवमुक्तस्तु शर्वेण सिंधुराजो जयद्रथः। उवाच प्रणतो रुद्रं प्रांजलिर्नियतात्मवान्॥ पांडवेयानहं संख्ये भीमवीर्यपराक्रमान्। वार
येयं रथेनैकेन समस्तानिति भारत॥ एवमुक्तस्तु देवेशो जयद्रथमथाब्रवीत्॥ ददानि ते वरं सौम्य विना पार्थं धनंजयं॥ वारयि
ष्यसि संग्रामे चतुरः पांडुनंदनान्॥ एवमस्त्विति देवेशमुक्त्वाबुध्यत पार्थिवः॥ स तेन वरदानेन दिव्येनास्त्रबलेन च॥ एकः
संधारयामास पांडवानामनीकिनीं॥ तस्य ज्यातलघोषेण क्षत्रियान्भयमाविशत्॥ परांस्तु तव सैन्यस्य हर्षः परमकोभवत्॥ दृष्ट्वा
तु क्षत्रिया भारं सैंधवे सर्वमर्पितं॥ उत्क्रुश्याभ्यद्रवन्राजन्येन यौधिष्ठिरं बलं॥ ॥इति श्रीद्रोणपर्वण्यभिमन्युवधे॥ ॥संजय
उवाच॥ ॥यन्मां पृच्छसि राजेंद्र सिंधुराजस्य विक्रमं॥ शृणु तत्सर्वमाख्यास्ये यथा पांडूनयोधयत्॥ तमूहुः सारथेर्वश्याः सैं
धवाः साधुवाहिनः॥ विकुर्वाणा बृहंतोश्वाः श्वसनोपमरंहसः॥ गंधर्वनगराकारं विधिवत्कल्पितं रथं॥ तस्याभ्यशोभयत्केतुर्व
राहो राजतो महान्॥ श्वेतच्छत्रपताकाभिश्चामरव्यजनेन च॥ स बभौ राजलिंगैस्तैस्तारापतिरिवांबरे॥ मुक्तावज्रमणिस्वर्णैर्भू
षितं तदयस्मयं॥ वरूथं विबभौ तस्य ज्योतिर्भिः खमिवावृतं॥ स विस्फार्य महच्चापं किरन्निषुगणान्बहून्॥ तत्खंडं पूरयामा
स यद्दारयदर्जुनिः॥ स सात्यकिं त्रिभिर्बाणैरष्टभिश्च वृकोदरं॥ धृष्टद्युम्नं तथा षष्ट्या विराटं दशभिः शरैः॥ द्रुपदं पंचभि ६५

पंचविंशत्या पंचभिः पंचभिः॥ आदिशब्दात् षष्टिं न भीमं तु द्विरप्याद्दशभिरिति प्रत्येकं॥

स्तीक्ष्णैर्दशभिश्च शिखंडिनं॥ केकयान्पंचविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः॥ युधिष्ठिरं तु सप्तत्या ततः शेषानपानुद
त्॥ इषुजालेन महता तदद्भुतमिवाभवत्॥ अथास्य शितपीतेन भल्लेनादिश्य कार्मुकं॥ चिच्छेद प्रहसन्राजा धर्मपुत्रः प्रता
पवान्॥ अक्ष्णोर्निमिषमात्रेण सोन्यदादाय कार्मुकं॥ विव्याध दशभिः पार्थं तांश्चैवान्यांस्त्रिभिस्त्रिभिः॥ तस्य तल्लाघवं दृष्ट्वा
भीमो भल्लैस्त्रिभिः पुनः॥ धनुर्ध्वजं च छत्रं च क्षितौ क्षिप्रमपातयत्॥ सोन्यदादाय बलवान्सज्यं कृत्वा च कार्मुकं॥ भीमस्यापातय
त्केतुं धनुरश्वांश्च मारिष॥ स हताश्वादवप्लुत्य छिन्नधन्वा रथोत्तमात्॥ सात्यकेराप्लुतो यानं गिर्यग्रमिव केसरी॥ ततस्त्वदीयाः
संहृष्टाः साधु साध्विति चुक्रुशुः॥ सिंधुराजस्य तत्कर्म प्रेक्ष्याश्रद्धेयमद्भुतं॥ संक्रुद्धान्पांडवानेको यद्दधारास्त्रतेजसा॥ तत्तस्य
कर्म भूतानि सर्वाण्येवाभ्यपूजयन्॥ सौभद्रेण हतैः पूर्वं सोत्तरायुधिभिर्द्विपैः॥ पांडूनां दर्शितः पंथाः सैंधवेन निवारितः॥
यतमानास्तु ते वीरा मत्स्यपांचालकेकयाः॥ पांडवाश्चान्वपद्यंत शल्यैकैकशः सैंधवं॥ यो यो हि यतते भेत्तुं द्रोणानीकं तवा
हितः॥ तं तमेव वरप्राप्त्या सैंधवः प्रत्यवारयत्॥ ॥द्रोणपर्वण्यभिमन्युवधे॥ ॥संजय उवाच॥ ॥सैंधवेन निरुद्धेषु
जयगृद्धिषु पांडुषु॥ सुघोरमभवद्युद्धं त्वदीयानां परैः सह॥ प्रविश्य त्वार्जुनिः सेनां सत्यसंधो दुरासदां॥ व्यक्षोभयत तेजस्वी
मकरः सागरं यथा॥ तं तथा शरवर्षेण क्षोभयंतमरिंदमं॥ यथाप्रधानाः सौभद्रमभ्ययुर्नरसत्तमाः॥ तेषां तस्य च संमर्दो दा

द्रो० ए
[illegible]

शुशुभस्फारिरथांगैः॥
रुणः समपद्यत॥ रथं तं शरवर्षेण प्रच्छाद्य ममितौजसं॥ रथस्थातेन संक्रुद्धस्त्वरमित्ररथार्जुनिः॥ वृषसेनस्य यंतारं स्व
विच्छेद कार्मुकं॥ तस्य विव्याध बलवांछरैः स्थानजिह्मगैः॥ वाजिनाय मानि रथानि रश्मिर प्रलौतोरणात्॥ तत्रांतरेण निमेन्यो
र्यंता पासारयद्रथं॥ रथव्रजात्ततो हृष्टाः साधु साध्विति चुक्रुशुः॥ तं सिंहमिव संक्रुद्धं प्रमथंतं शरैररीन्॥ आराद्यांतमभ्ये
त्य वसातीयो ऽभ्ययाद्द्रुतं॥ सोभिमन्युं शरैः षष्ट्या रुक्मपुंखैरवाकिरत्॥ अब्रवीच्च न मे जीवन् जीवतो युधि मोक्ष्यसि॥ तमयस्म
य वर्माणमिषुणा दूरपातिना॥ विव्याध हृदि सौभद्रः स पपात व्यसुः क्षितौ॥ वसातीयं हतं दृष्ट्वा क्रुद्धाः क्षत्रियपुंगवाः॥
परिवव्रुस्तदा राजंस्तव पौत्रं जिघांसवः॥ तद्युद्धमभवद्धोरं सौभद्रस्यारिभिः सह॥ तेषां शरान्सेषुसनान् शरीराणि शिरांसि
च सकुंडलानि स्रग्वीणि क्रुद्धश्चिच्छेद फाल्गुनिः॥ सखड्गाः सांगुलित्राणाः सपट्टिशपरश्वधाः॥ अदृश्यंत भुजाश्छिन्ना हेमाभरणा
भूषिताः॥ स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः॥ वर्मभिश्चर्मभिर्हारैर्मुकुटैश्छत्रचामरैः॥ उपस्करैरधिष्ठानैरीषादंडकबंधुरैः॥
अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः॥ अनुकर्षैः पताकाभिस्तथा सारथिवाजिभिः॥ रथैश्च भग्नैर्नागैश्च हतैः कीर्णाभवन्मही॥ नि
हतैः क्षत्रियैः शूरैर्नानाजनपदेश्वरैः॥ जयगृद्धैर्वृता भूमिर्दारुणा समपद्यत॥ दिशो विचरतस्तस्य सर्वाश्च प्रदिशस्तथा॥ रणे ऽभिम ६६
न्योः क्रुद्धरूपमंतरधीयत॥ कांचनं यद्यदस्यासीद्वर्माभरणानि च॥ धनुषश्च शराणां च तदपश्याम केवलं॥ तं तदा नाशक्नुवन्कश्चिच्च

आदत्तशांतिब्बाह्नात्ताडय द्रष्टि परार्द्देनाद्रयः॥ अथानदर्दितिपावेज्ञ विध्यदिति शेषः॥

क्षुर्भ्यामभिवीक्षितुं॥ आददानं शरैर्योधान्मध्ये सूर्यमिव स्थितं॥ ॥द्रोणपर्वणि अभिमन्युवधे॥ ॥संजय
उवाच॥ ॥आददानस्तु शूराणामायूंष्यभवदार्जुनिः॥ अंतकः सर्वभूतानां प्राणान्काल इवागते॥ स शक्र इव वि
क्रांतः शक्रसूनोः सुतो बली॥ अभिमन्युस्तदानीकं लोडयन्बह्वशोभत॥ प्रविश्यैव तु राजेंद्र क्षत्रियेंद्रांतको
पमः॥ सत्यश्रवसमादत्त व्याघ्रो मृगमिवोल्बणं॥ सत्यश्रवसि चाक्षिप्ते त्वरमाणा महारथाः॥ प्रगृह्य विविधं
महपूर्वे शस्त्रमभिमन्युमुपाद्रवन्॥ अहं पूर्वमहं पूर्वमिति क्षत्रियपुंगवाः॥ स्पर्धमानाः समाजग्मुर्जिघांसंतोर्जुनात्मजं॥ क्ष
त्रियाणामनीकानि प्रद्रुतान्यभिधावतां॥ जग्रास तिमिरासाद्य क्षुद्रमत्स्यानिवार्णवे॥ ये केचन गतास्तस्य समी
पमपलायिनः॥ न ते प्रतिन्यवर्तंत समुद्रादिव सिंधवः॥ महाग्राहगृहीतेव वातवेगभयार्दिता॥ समकंपत सा सेना
१४ विभ्रष्टा नौरिवार्णवे॥ अथ रुक्मरथो नाम मद्रेश्वरसुतो बली॥ त्रस्तामाश्वासयन्सेनामत्रस्तो वाक्यमब्रवीत्॥ अ
लं त्रासेन वः शूरा नैष कश्चिन्मयि स्थिते॥ अहमेनं ग्रहीष्यामि जीवग्राहं न संशयः॥ एवमुक्त्वा तु सौभद्रमभिदुद्रा
व वीर्यवान्॥ सुकल्पितेनोह्यमानः स्यंदनेन विराजता॥ सो ऽभिमन्युं त्रिभिर्बाणैर्विद्ध्वा वक्षस्यथानदत्॥ त्रिभिश्च द
क्षिणे बाहौ सव्ये च निशितैस्त्रिभिः॥ स तस्येष्वसनं छित्त्वा फाल्गुनिः सव्यदक्षिणौ॥ भुजौ शिरश्च स्वक्षिभ्रु क्षितौ क्षि

नो विशिखैः कर्णिकारैः॥ आयच्छन्त्रथ पुत्रकवाराः। आरच्य मायां दुर्लक्ष्यां रथशिक्षां। फलोपगाः फलोन्मुखाः॥

द्रोण दममपातयत्। दृष्ट्वा रुक्मरथं रुग्णं पुत्रं शल्यस्य मानिनं। जीवग्राहं जिघृक्षन्तं सौभद्रेण यशस्विना। संग्रामदुर्मदा राज-
११ राजपुत्राः प्रहारिणः॥ वयस्याः शल्यपुत्रस्य सुवर्णविकृतध्वजाः॥ तालमात्राणि चापानि विकर्षन्तो महारथाः॥ आर्जुनिं
शरवर्षेण समन्तात्पर्यवारयन्। शूरैः शिक्षाबलोपेतैस्तरुणैरत्यमर्षणैः॥ दृष्ट्वैकं समरे शूरं सौभद्रमपराजितं।
छाद्यमानं शरव्रातैर्हृष्टो दुर्योधनोऽभवत्। वैवस्वतस्य भवनं गतं ह्येनममन्यत। सुवर्णपुंखैरिषुभिर्नानालिंगैस्त्रिभि-
स्त्रिभिः॥ अदृश्यमार्जुनिं चक्रुर्निमिषात्ते नृपात्मजाः। ससूताश्वध्वजं तस्य स्यन्दनं तं च मारिष। आचितं समपश्याम श्वावि-
७०८ धं शललैरिव। स भृशं विद्धः क्रुद्धस्तुत्रो गज इवांकुशैः॥ गान्धर्वमस्त्रमायच्छद्रथमायां च भारत। अर्जुनेन तपस्तप्त्वा
गन्धर्वेभ्यो यदाहृतं। तुंबुरुप्रमुखेभ्यो वै तेनामोहयताहितान्॥ एकः सन्स शतधा राजन्दृश्यते स्म ससाधकः। अलातचक्रवत्संख्ये
क्षिप्रमस्त्राणि दर्शयन्। रथचर्यास्त्रमायाभिर्मोहयित्वा परंतपः। बिभेद शतधा राजञ्छरीराणि महीक्षितां। प्राणाः प्राणभृ-
तां संख्ये प्रेषिता निशितैः शरैः। राजन्प्रापुरमुं लोकं शरीराण्यवनिं ययुः। धनूंष्यश्वान्नियन्तॄंश्च ध्वजान्बाहूंश्च सां-
गदान्। शिरांसि च शितैर्भल्लैस्तेषां चिच्छेद फाल्गुनिः। चूतारामो यथा भग्नः पंचवर्षः फलोपगः। राजपुत्रशतं तत्त-
ह्रा था सौभद्रेणापतद्धतं। क्रुद्धाशीविषसंकाशान्सुकुमारान्सुखोचितान्। क्रुद्धाशीविषसंकाशान्सुकुमारान्सुखो- ६७
चितान्। एकेन निहतान्दृष्ट्वा भीतो दुर्योधनोऽभवत्॥

दु

प्रतिपत्तिं प्रतिविधानं। विष्वग्वातो वात्याचक्रं॥

रथिनः कुंजरानश्वान्पदातींश्चावमर्दतः। दृष्ट्वा दुर्योधनः क्षिप्रमुपायात्तममर्षितः। तयोः क्षणमिवापूर्णः संग्रामस्तुमु-
लोऽभवत्। अथाभवत्ते विमुखः पुत्रः शरशताहतः॥ ॥इति द्रोणपर्वणि अभिमन्युवधे॥ ॥धृतराष्ट्र उवाच॥ ॥यथा
वदसि मे सूत एकस्य बहुभिः सह। संग्रामं तुमुलं घोरं जयं चैव महात्मनः। अश्रद्धेयमिवाश्चर्यं सौभद्रस्याथ विक्रमं।
किं तु नात्यद्भुतं मन्ये येषां धर्मो व्यपाश्रयः। दुर्योधनेऽथ विमुखे राजपुत्रशते हते। सौभद्रे प्रतिपत्तिं कां प्रत्यपद्यन्त मामकाः
॥ ॥संजय उवाच॥ ॥संशुष्कास्याश्चलन्नेत्राः प्रस्विन्ना लोमहर्षिणः। पलायनकृतोत्साहा निरुत्साहा द्विषज्जये। हतान्भ्रातॄ-
न्पितॄन्पुत्रान्सुहृत्संबंधिबान्धवान्। उत्सृज्योत्सृज्य गच्छन्ति त्वरयन्तो हयद्विपान्। तान्प्रभग्नांस्तथा दृष्ट्वा द्रोणो द्रौणिर्बृहद्ब-
लः। कृपो दुर्योधनः कर्णः कृतवर्मा च सौबलः। अभ्यद्रवन्सुसंक्रुद्धाः सौभद्रमपराजितं। तेऽपि पौत्रेण ते राजन्प्रायशो विमुखीकृ-
ताः। एकस्तु सुखसंवृद्धो बाल्याद्दर्पाच्च निर्भयः। इष्वस्त्रविन्महातेजा लक्ष्मणोऽर्जुनिमभ्ययात्। तमन्वगेवास्य पिता पुत्रगृध्नी न्यवर्तत।
अनु दुर्योधनं चान्ये न्यवर्तन्त महारथाः। तं तेऽभिषिषिचुर्बाणैर्मेघा गिरिमिवांबुभिः। स च तान्प्रममाथैको विष्वग्वातो यथांबुदान्
। पौत्रं तु तव दुर्धर्षं लक्ष्मणं प्रियदर्शिनं। पितुः समीपे तिष्ठन्तं शूरमुद्यतकार्मुकं। अत्यन्तसुखसंवृद्धं धनेश्वरसुतोपमं। आस

द्रोण

सादरेणकार्ष्णिमभ्यगान्मत्तमिवद्विपं।लक्ष्मणेनतुसंगम्यसौभद्रःपरवीरहा।शरैःसुनिशितैस्तीक्ष्णैर्बाह्वोरुरसिचार्पितैः
ःसंक्रुद्धोविमहाबाहुर्दंडाहतइवोरगः।पौत्रस्तवमहाराजतवपौत्रमभाषत।सुदृष्टःक्रियतांलोकोह्यमुंलोकंगमिष्य
सिपश्यतांबांधवानांत्वांनयामियमसादनं।एवमुक्त्वाततोभल्लंसौभद्रःपरवीरहा।उद्बबर्हमहाबाहुर्निर्मुक्तोरगसं
निभं।सतस्यभुजनिर्मुक्तोलक्ष्मणस्यसुदर्शनं।सुनसंसुभ्रुकेशांतंशिरोहार्षीत्सकुंडलं।लक्ष्मणंनिहतंदृष्ट्वाहाहेत्यु
त्सुक्रुशुर्जनाः।ततोदुर्योधनःक्रुद्धःप्रियेपुत्रेनिपातिते।हतैनमितिसंक्रोशन्क्षत्रियान्क्षत्रियर्षभः।ततोद्रोणःकृपःक
र्णोद्रोणपुत्रोबृहद्बलः।कृतवर्माचहार्दिक्यःषड्रथाःपर्यवारयन्।सतान्विद्ध्वाशितैर्बाणैर्विमुखीकृत्यचार्जुनिः।वेगे
नात्यपतत्क्रुद्धःसैंधवस्यमहद्बलं।आवव्रुस्तस्यपंथानंगजानीकेनदंशिताः।कलिंगाश्चनिषादाश्चक्राथपुत्रश्चवी
र्यवान्।तद्युद्धमभवदत्यर्थंदृढमासीद्विशांपते।ततस्तत्कुंजरानीकंव्यधमद्धृष्टमार्जुनिः।यथाविवान्नित्यगतिर्जलदान्
ञ्छतशोंऽबरे।ततःक्राथःशरव्रातैरार्जुनिंसमवाकिरत्।अथेतरेसन्निवृत्ताःपुनर्द्रोणमुखारथाः।परमास्त्राणितन्वानाः
सौभद्रमभिदुद्रुवुः।तान्निवार्यार्जुनिर्बाणैःक्राथपुत्रमथार्दयत्।शरौघेणाप्रमेयेणत्वरमाणोजिघांसया।सधनुर्बाणकेयू
रौबाहूसमुकुटंशिरः।छत्रंध्वजंनियंतारमश्वांश्चास्यन्यपातयत्।। ६९

कर्णिनासकर्णफलकेन।।

कुलशीलश्रुतबलैःकीर्त्याचास्त्रबलेनच।युक्तेतस्मिन्हतेवीराःप्रायशोविमुखाभवन्।। ।।इतिद्रोणपर्वणिअभि
मन्युवधे।। ।।धृतराष्ट्रउवाच।। ।।तथाप्रविष्टंतरुणंसौभद्रमपराजितं।कुलानुरूपंकुर्वाणंसंग्राममपलायि
नं।आजानेयैःसुबलिभिर्यांतमश्वैस्त्रिहायनैः।प्लवमानमिवाकाशेकेशूराःपर्यवारयन्।। संजयउवाच।।
अभिमन्युःप्रविश्यैवतावकान्निशितैःशरैः।अकरोद्विमुखान्सर्वान्पार्थिवान्पांडुनंदनः।तंतुद्रोणःकृपःकर्णोद्रौ
णिश्चसबृहद्बलः।कृतवर्माचहार्दिक्यःषड्रथाःपर्यवारयन्।दृष्ट्वातुसैंधवेभारमतिमात्रंसमाहितं।सैन्यंतवमहारा
जयुधिष्ठिरमुपाद्रवत्।सौभद्रमितरेवीरमभ्यवर्षन्शरांबुभिः।तालमात्राणिचापानिविकर्षंतोमहारथाः।तांस्तु
सर्वान्महेष्वासान्सर्वविद्यासुनिष्ठितान्।व्यष्टंभयद्रणेबाणैःसौभद्रःपरवीरहा।द्रोणंपंचाशताविद्ध्वाविंशत्याचबृ
हद्बलं।अशीत्याकृतवर्माणंकृपंषष्ट्याशिलीमुखैः।रुक्मपुंखैर्महावेगैराकर्णसमचोदितैः।अविध्यद्दशभिर्बाणै
रश्वत्थामानमार्जुनिः।सकर्णंकर्णिनाकर्णेपीतेननिशितेनच।फाल्गुनिर्द्विषतांमध्येविव्याधपरमेषुणा।पातयि
त्वाकृपस्याश्वांस्तथोभौपार्ष्णिसारथी।अथैनंदशभिर्बाणैःप्रत्यविध्यत्स्तनांतरे।ततोबृहद्बलंवीरंकुरूणांकीर्तिवर्द्ध
नं।पुत्राणांतववीराणांपश्यतामवधीद्बली।तंद्रौणिःपंचविंशत्याक्षुद्रकाणांसमार्प्पयत्।

रुधिरोत्पीडारक्तश्चवाद्ग॥

द्रोण वरं वरं मित्राणां मास्तंतमनीतवत्। सतुबाणैः शितैस्तूर्णं सोभिवृष्य विध्यनमारिष। पवयनोक्षमर्वरा द्रोणामस्त्रज्ञामानमार्जु
निः षष्ट्या शराणां तं द्रोणिस्त्रिर्यग्धारिः स्वातजविःउ यिरा कंपयविक्षमिनाकमिव पर्वतं। सतुद्रौणिं त्रिसप्तत्या रुक्मपुं
खैरजिह्मगैः प्रत्यविध्यन्महाते जाऋलवानपकारिणं। तस्मिन्द्रोणो बाणशतं पुत्रगृद्धी न्यपातयत्। अश्वत्थामा तथा
षष्टिं परीप्सन्पितरं रणे। कर्णो द्वाविंशतिर्भल्लान्कृतवर्मा च विंशतिं। बृहद्बलस्तु पंचाशत्कृपः शारद्वतो दश। तांस्तु
प्रत्यवधीत्सर्वान्दशभिर्दशभिः शरैः। तैरर्द्यमानः सौभद्रः सर्वतो निशितैः शरैः। तं कोशलानामधिपः कर्णिना ना
ताडयद्धृदि। सतस्याश्वान्ध्वजं चापं सूतं चापातयत्क्षितौ। अथ कोशलराजस्तु विरथः खड्गचर्मधृत्। इये
ष फाल्गुनिः कायाच्छिरो हर्तुं सकुंडलं। कोशलानामसौ वीरं राजपुत्रं बृहद्बलं। हृदि विव्याध बाणेन सच्छिन्नहृदयो
पतत्। बभंज च सहस्राणि दशराज्ञां महात्मनां। सृजतामशिवा वाचः खड्गकार्मुकधारिणां। तथा बृहद्बलं हत्वा
सौभद्रो व्यचरद्रणे। विष्टंभयन्महेष्वासान् योधांस्तव शराम्बुभिः॥ ॥द्रोणपर्वण्यभिमन्युवधे॥ ॥संजय उवाच ६७
स कर्णं कर्णिना कर्णे पुनर्विव्याध फाल्गुनिः। शरैः पंचाशता चैनमविध्यत्कोपयन्भृशं। प्रतिविव्याध राधेयस्तावद्
भिरथ तं पुनः। शरैराचितसर्वांगो बह्वशोभत भारत। कर्णश्चाप्यकरोत्क्रुद्धो रुधिरोत्पीडवाहिनं। कर्णोपि विद्धो शूर

पुराहि नस्त्रा हनिष्यति॥

५

शरैश्चित्रोऽस्त्रगाप्लुतः। तौ तदायारचित्रांगौ रुधिरेणसमुक्षितौ। बभूवतुर्महात्मानौ पुष्पिताविवकिंशुकौ। अथ कर्ण
स्य सचिवान्षट्शूरांश्चित्रयोधिनः। साश्वसूतध्वजरथान्सौभद्रो निजघान ह। तथेतरान्महेष्वासान्दशभिर्दशभिः शरैः प्रत्य
विध्यदसंभ्रांतस्तदद्भुतमिवाभवत्। मागधस्य सुतं हत्वा षड्भिरजिह्मगैः। साश्वं ससूतं तरुणमश्वकेतुमपातयत्। मार्तिका
वतकं भोजं ततः कुंजरकेतनं। क्षुरप्रेण समुन्मथ्य ननाद विसृजन्शरान्। तस्य दौःशासनिर्विद्ध्वा चतुर्भिश्चतुरो हयान्। सूत
मेकेन विव्याध दशभिश्चार्जुनात्मजं। ततो दौःशासनिं कार्ष्णिर्विद्ध्वा सप्तभिराशुगैः। संरंभाद्रक्तनयनो वाक्यमुच्चैरथाब्रवीत्
। पिता तवाहवं त्यक्त्वा गतः कापुरुषो यथा। दिष्ट्या त्वमपि जानीषे योद्धुं न त्वद्य मोक्ष्यसे। एतावदुक्त्वा वचनं कर्मारपरिमार्जितं
। नाराचं विससर्जास्मै तं द्रौणिस्त्रिभिराच्छिनत्। तस्यार्जुनिर्ध्वजं छित्वा शल्यं त्रिभिरताडयत्। तं शल्यो नवभिर्बाणैर्गार्ध्रपत्रै
रताडयत्। हृदयेसंभ्रांतवत्राजंस्तदद्भुतमिवाभवत्। तस्यार्जुनिर्ध्वजं छित्वा हत्वा चपार्ष्णिसारथी। तं विव्याधायसैः षड्भिः सो
पाक्रामद्रथांतरं। शत्रुंजयं चंद्रकेतुं महामेघं सुवर्चसं। सूर्यभासं च पंचैतान्हत्वा विव्याध सौबलं। तं सौबलस्त्रिभिर्विद्ध्वा
दुर्योधनमथाब्रवीत्। सर्व एनं प्रमथ्नीमः पुरैकैकं हिनस्ति नः। अथाब्रवीत्तदा द्रोणं कर्णो वैकर्तनो रणे। पुरा सर्वान्

वधं हन्तोपायं॥

द्रो॰ प्रघ्नाति बृहत्यस्य वधमास्थुनः। ततो द्रोणो महेष्वासः सर्वांस्तान्प्रत्यभाषत। अस्ति वोस्यांतरं कश्चित्कुमारस्य प्रपश्यति। अन्व
स्य पितरं ह्येष चरतः सर्वतो दिशः। शीघ्रतां नरसिंहस्य पांडवेयस्य पश्यत। धनुर्मंडलमेवास्य रथमार्गेषु दृश्यते। संदधान
स्य विशिखान्शीघ्रं चैव विमुंचतः। आरुजन्निव मे प्राणान्मोहयन्निव सायकैः। प्रहर्षयति मां भूयः सौभद्रः परवीरहा॥
अति मानंदयत्येषः सौभद्रो विचरन्रणे। अंतरं यस्य संरब्धा न पश्यंति महारथाः। अस्यतो लघुहस्तस्य दिशः सर्वा महेषु
भिः। न विशेषं प्रपश्यामि रणे गांडीवधन्वनः। अथ कर्णः पुनर्द्रोणमाहार्जुनिशरार्दितः। स्थातव्यमिति तिष्ठामि पीड्यमा
नोभिमन्युना। तेजस्विनः कुमारस्य शराः परमदारुणाः। क्षिण्वंति हृदयं मेद्य घोराः पावकतेजसः। तमाचार्योब्रवीत्कर्णं शन
कैः प्रहसन्निव। अभेद्यमस्य कवचं युवा चाशुपराक्रमः। उपदिष्टा मया ह्यस्य पितुः कवचधारणा। तामेष निखिलां वेत्ति ध्रु
वं परपुरंजयः। शक्यं त्वस्य धनुश्छेत्तुं ज्यां च बाणैः समाहितैः। अभीषवो हयाश्चैव तथोभौ पार्ष्णिसारथी। एतत्कुरु महेष्वास
राधेय यदि शक्यते। अथैनं विमुखीकृत्य पश्चात्प्रहरणं कुरु। सधनुष्को न शक्योयमपि जेतुं सुरासुरैः। विरथं विधनुष्कं च
कुरुष्वैनं यदीच्छसि। तदाचार्यवचः श्रुत्वा कर्णो वैकर्तनस्त्वरन्। अस्यतो लघुहस्तस्य पृषत्कैर्धनुराच्छिनत्। अश्वानस्या १०

किङ्किकं सर्वतोभद्रं। व्यसिचर्मा असिचर्मविहीनः। क्षितिमास्थित इत्यस्य च्छयः। रणे संग्रामे। वर्यया यावतिश्च यार्थ्यो॥

वधीद्द्रोणो गौतमः पार्ष्णिसारथी। शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन्। त्वरमाणास्त्वराकाले विरथं षण्महारथाः।
शरवर्षैरकरुणा बालमेकमवाकिरन्। स छिन्नधन्वा विरथः स्वधर्ममनुपालयन्। खड्गचर्मधरः श्रीमानुत्पपात विहायसं।
मार्गैस्स कैशिकाद्यैश्च लाघवेन बलेन च। आर्जुनिर्व्यचरद्व्योम्नि भृशं वै पक्षिराडिव। मय्येव निपतत्येष सासिरित्यूर्ध्वदृष्टयः। २२
विव्यधुस्तं महेष्वासाः समरे छिद्रदर्शिनः। तस्य द्रोणोच्छिनन्मुष्टौ खड्गं मणिवरत्सरुं। क्षुरप्रेण महातेजास्त्वरमाणः सपत्नजि
त्। राधेयो निशितैर्बाणैर्व्यधमच्चर्म चोत्तमं। व्यसिचर्मेषुपूर्णांगः सोंतरिक्षात्पुनः क्षितिं। आस्थितश्चक्रमुद्यम्य द्रोणं क्रुद्धो
भ्यधावत। सचक्ररेणूज्ज्वलशोभितांगो बभावतीवोन्नतचक्रपाणिः। रणेभिमन्युः क्षणमास भद्रः स वासुदेवानुकृतिं विकु
र्वन्। स्रुतरुधिरकृतैकरागवक्त्रो भृकुटिपुटाकुटिलोतिसिंहनादः। प्रभुरमितबलो रणेभिमन्युर्नृपवरमध्यगतो विराजते
॥ ॥द्रोणपर्वणि अभिमन्युवधे॥ ॥संजय उवाच॥ ॥विष्णोः स्वसानंदिकरः स विष्ण्वायुधभूषितः। रराजातिरथः संख्ये
जनार्दन इवापरः। वपुः समीक्ष्य पृथ्वीशा दुःसमीक्ष्यं सुरैरपि। तच्चक्रं भृशमुद्विग्नाः संचिच्छिदुरनेकधा। महारथस्ततः का
र्ष्णिः संजग्राह महागदां। विधनुः स्यंदनासिस्तैर्विचक्रश्चारिभिः कृतः। अभिमन्युर्गदापाणिरश्वत्थामानमार्दयत्। सगदा

द्रो०

सुयतां दृष्ट्वा ज्वलंतीमशनीमिव। अप्राकामद्रथोपस्थाद्विक्रमांस्तु नरर्षभः। तस्याश्वान्गदया हत्वा तथोभौ पार्ष्णिसारथी
।शराचितांगः सौभद्रः आविद्धस्तूर्णमभ्यपतत्। ततः सुबलदायादं कालकेयमयोधयत्। जघान चास्यानुचरान्गांधारान्सप्त
सप्ततिं। पुनर्वसुवशातीयान्जघान रथिनो दश। केकयानां रथान्सप्त हत्वा दश च कुंजरान्। दौःशासनिरथं साश्वं गदया
समपोथयत्। ततो दौःशासनिः क्रुद्धो गदामुद्यम्य मारिष। अभिदुद्राव सौभद्रं तिष्ठ तिष्ठेति चाब्रवीत्। तावुद्यतगदौ
वीरावन्योन्यवधकांक्षिणौ। भ्रातरौ संप्रजह्राते पुरेव त्र्यंबकांधकौ। तावन्योन्यं गदाग्राभ्यां संहत्य पतितौ क्षितौ। इंद्रध
जाविवोत्सृष्टौ रणमध्ये परंतपौ। दौःशासनिरथोत्थाय कुरूणां कीर्त्तिवर्द्धनः। उत्तिष्ठमानं सौभद्रं गदया मूर्ध्न्यताडयत्। गदा
वेगेन महता व्यायामेन च मोहितः। विचेतान्यपतद्भूमौ सौभद्रः परवीरहा। एवं विनिहतो राजन्नेको बहुभिराहवे। क्षो
भयित्वा चमूं सर्वां नलिनीमिव कुंजरः। अशोभत हतो वीरो व्याधैर्वनगजो यथा। तं तथा पतितं शूरं तावकाः पर्यवारय
न्। दावं दग्ध्वा यथा शांतं पावकं शिशिरात्यये। विमृद्य तरुशृंगाणि संनिवृत्तमिवानलं। अस्तंगतमिवादित्यं तप्त्वा भारतवा
हिनीं। उपप्लुतं यथा सोमं संशुष्कमिव सागरं। पूर्णचंद्राभवदनं काकपक्षावृताक्षकं। तं भूमौ पतितं दृष्ट्वा तावकास्ते म ७१

हारथाः। मुदा परमया युक्ताः चुक्रुशुः सिंहवन्मुहुः। आसीत्परमको हर्षस्तावकानां विशांपते। इतरेषां तु वीराणां नेत्रेभ्यः प्रा
पतज्जलं। अंतरिक्षे च भूतानि प्राक्रोशंत विशांपते। दृष्ट्वा निपतितं शूरं च्युतं चंद्रमिवांबरात्। द्रोणकर्णमुखैः षड्भिर्धार्त्तराष्ट्रैर्महा
रथैः। एकोऽयं निहतः शेते नैष धर्मो मतो हि नः। तस्मिंस्तु निहते वीरे बह्वशोभत मेदिनी। द्यौर्यथा पूर्णचंद्रेण नक्षत्रगणमालि
नी। रुक्मपुंखैश्च संकीर्णै रुधिरौघैश्च संप्लुता। उत्तमांगैश्च वीराणां भ्राजमानैः सकुंडलैः। विचित्रैश्च परिस्तोमैः पताकाभि
श्च संहता। चामरैश्च कुथाभिश्च प्रविद्धैश्चांबरोत्तमैः। रथाश्वनरनागानामलंकारैश्च सुप्रभैः। खड्गैश्च निशितैः पीतैर्निर्मुक्तै
र्भुजगैरिव। चापैश्च विशिखैश्छिन्नैः शक्त्यृष्टिप्रासकंपनैः। विविधैरायुधैश्चान्यैः संवृता भूरशोभत। वाजिभिश्चापि निर्जी
वैः श्वसद्भिः शोणितोक्षितैः। सारोहैर्विषमा भूमिः सौभद्रेण निपातितैः। सांकुशैश्च महामात्रैः सवर्मायुधकेतुभिः। पर्वतै
रिव विध्वस्तैर्विशिखोन्मथितैर्गजैः। पृथिव्यामनुकीर्णैश्च व्यश्वसारथियोधिभिः। ह्रदैरिव प्रक्षुभितैर्हतनागै रथोत्तमैः।
पदातिसंघैश्च हतैर्विविधायुधभूषणैः। भीरूणां त्रासजननी घोररूपाभवन्मही। तं दृष्ट्वा पतितं भूमौ चंद्रार्कसदृशद्युतिं। ता
वकानां परा प्रीतिः पांडूनां चाभवद्व्यथा। अभिमन्यौ हते राजन् शिशुके चाप्राप्तयौवने। संप्राद्रवच्चमूः सर्वा धर्मराजस्य पश्यतः॥

यौ१

श्चिवारुतैरित्युपलक्षणे तृतीया।समाक्षिप्य नसंहरन्।।समानयन् एकतां नयन्।पत्तयः पादरक्षाः।उपस्करा उपकरणानि।

द्रोण दीर्यमाणं बलं दृष्ट्वा सोमदेवि निपातिते।अजातशत्रुः स्वान्वीरानिदं वचनमब्रवीत्।स्वर्गमेष गतः शूरो यो हतो न पराङ्मुखः।।
संस्तंभयत मा भैष्ट विजेष्यामो वयं रिपून्।इत्येवं सुमहातेजा दुःखितेभ्यो महाद्युतिः।धर्मराजो युधां श्रेष्ठो ब्रुवन्दुःखमपानुद
त्।युद्धे ह्यासीविषाकारान्राजपुत्रान्रणेऽर्जुनः।पूर्वं निहत्य संग्रामे पश्चादार्जुनिरन्वगात्।हत्वा दशसहस्राणि कौशल्यं च
महारथं।कृष्णार्जुनसमः कार्ष्णिः शक्रसद्म गतो ध्रुवं।रथाश्वनरमातंगान्विनिहत्य सहस्रशः।अवितृप्तः स संग्रामाद्शोच्यः
पुण्यकर्मकृत्।। ।।संजयउवाच।। ।।वयं तु प्रवरं हत्वा तेषां तैः शरपीडिताः।निवेशायाभ्युपायाम सायाह्ने रुधिरोक्षि
ताः।निरीक्ष्यमाणास्तु वयं परे चायोधनं शनैः।अपयाता महाराज ग्लानिं प्राप्ता विचेतसः।ततो निशाया दिवसस्य चाशिवः
शिवारुतैः संनिववर्त्तवाद्भुतः।कुशेशयापीडनिभे दिवाकरे विलंबमाने स्तमुपेत्य पर्वतं।वरासिशक्त्यृष्टिवरूथचर्मणां वि
भूषणानां च समाक्षिपन्प्रभां।दिवं च भूमिं च समानयन्निव प्रियां प्रियांतं तनुं भानुरुपैति पावकं।महाभ्रकूटाचलशृंगसन्नि
भैर्गजैरनेकैरिव वज्रपातितैः।सवैजयंत्यंकुशवर्मयंतृभिर्निपातितैर्निष्टनतीव गौश्चिता।हतेश्वरैश्चूर्णितपत्त्युपस्करै
र्हताश्वसूतैर्विपताककेतुभिः।महारथैर्भूः शुशुभे विचूर्णितैः पुरैरिवामित्रहतैर्नराधिप।।वराश्ववृंदैः सहसादिभिर्हतैः प्रविद्ध ७२

पत्त्युपस्कराः प्रत्येकोपकरणानि वा।। पत्त्युपस्करैः पाठः पत्त्युपस्करैः पाठः।।

भांडास्तरणैः पृथग्विधैः।निरस्तजिह्वादशनांत्रलोचनैर्धरा बभौ घोरविरूपदर्शना।प्रविद्धवर्माभरणा वरायुधा विपन्नहस्त्य
श्वरथानुगा नराः।महार्हशय्यास्तरणोचिताः सदा क्षितावनाथा इव शेरते हताः।अतीव हृष्टाः श्वसृगालवायसा बलाः सुपु
ष्टाः सहकास्तरक्षवः।वयांस्यसृक्पाण्यथ रक्षसां गणाः पिशाचसंघाश्च सुदारुणा रणे।त्वचो विनिर्भिद्य पिबन्वसामसृक् तथै
व मज्जाः पिशितानि चाश्नुवन्।वपाविलुंपंति हसंति गांति च प्रकर्षमाणाः कुणपाननेकशः।शरीरसंघातवहा ह्यसृग्ज
लारथोडुपा कुंजरशैलसंकटा।मनुष्यशीर्षोपलमांसकर्दमा प्रविद्धनानाविधशस्त्रमालिनी।महाभया वैतरणीव दु
स्तरा प्रवर्तिता योधवरैस्तदा नदी।उवाह मध्येन रणाजिरं भृशं भयावहा जीवमृतप्रवाहिनी।पिबंति चाश्नंति च यत्र दु
र्दृशाः पिशाचसंघा विविधाः सुभैरवाः।सुनंदिताः प्राणभृतां भयंकराः समानभक्ष्याः श्वसृगालपक्षिणः।तथा तदायोध
नमुग्रदर्शनं निशामुखे पितृपतिराष्ट्रसन्निभं।निरीक्ष्यमाणाः शनकैर्जहुर्नराः समुत्थितं नृत्यकबंधसंकुलं।अपेत
विध्वस्तमहार्हभूषणं निपातितं शक्रसमं महारथं।रणेऽभिमन्युं ददृशुस्तदा जना व्यपोढहव्यं सदसीव पावकं।। ।।इति म
हाभारते द्रोणपर्वण्यभिमन्युवधः।। ।।संजयउवाच।। ।।तस्मिंस्तु निहते वीरे सौभद्रे रथयूथपे।विमुक्तरथसन्नाहाः

सर्वे निक्षिप्तकार्मुकाः।। ।।अभिमन्युवधः।। ।।

असंबाधमगतीघातं। प्रत्यनीकगताः — — — असमंजसमयुक्तरूपं। संबाधे संकटे नो चेच्च कश्चित्। कृपणेनावस

द्रोण र्वे निकृत्तकार्मुकाः॥ उपायविशारदा राजानं परिवार्य युधिष्ठिरं। तद्दिवं दुःखं ध्यायंतः सीदन्गतमानसाः॥ ततो युधिष्ठिरो
राजा विललाप सुदुःखितः॥ अभिमन्यौ हते वीरे भ्रातुः पुत्रे महारथे। द्रोणानीकमसंबाधं मम प्रियचिकीर्षया॥ भित्वा व्यू
हं प्रविष्टोसौ गोमध्यमिव केसरी॥ यस्य शूरा महेष्वासाः प्रत्यनीकगता रणे॥ प्रभग्ना विनिवर्तंते कृतास्त्रा युद्धदुर्मदाः॥
अत्यंतशत्रुरस्माकं येन दुःशासनः शरैः॥ क्षिप्रं ह्यभिमुखः संख्ये विसंज्ञो विमुखीकृतः॥ स तीर्त्वा दुस्तरं वीरो द्रोणानीक
महार्णवं। प्राप्य दौःशासनिं कार्ष्णिर्यातो वैवस्वतक्षयं॥ कथं द्रक्ष्यामि कौंतेयं सौभद्रे निहतेर्जुनं॥ सुभद्रां वा महाभागां प्रियं
पुत्रमपश्यतीं॥ किंस्विद्वयमपेतार्थमश्लिष्टमसमंजसं। तावुभौ प्रतिवक्ष्यामो हृषीकेशधनंजयौ॥ अहमेव सुभद्रायाः
केशवार्जुनयोरपि। प्रियकामो जयाकांक्षी कृतवानिदमप्रियं॥ न लुब्धो बुध्यते दोषान्मोहाल्लोभः प्रवर्तते॥ मधुलिप्सु
र्हि नापश्यं प्रपातमिदमीदृशं॥ यो हि भोज्ये पुरस्कार्यो यानेषु शयनेषु च॥ भूषणेषु च सोस्माभिर्बालो युधि पुरस्कृतः॥ कथं
हि बालस्तरुणो युद्धानामविशारदः॥ सदश्व इव संबाधे विषमे क्षेममर्हति॥ नो चेद्धि वयमप्येनं महीमनुशयीमहि॥ बीभत्सो
: कोपदीप्तस्य दग्धाः कृपणचक्षुषा॥ अलुब्धो मतिमान्ह्रीमान् क्षमावान्रूपवान्बली॥ वपुष्मान्मानकृद्वीरः प्रियः सत्यप ७३

न्नेन चक्षुषा। वपुष्मांस्तेजसी॥

अप्रतिवीर्यो अप्रतिद्वंद्विपौरुषं यस्य॥ ॥अबालबुद्धिः — — — अनुपायेन केवलेन बलेन। प्रकृतमाचिरिरं॥

राक्रमः॥ यस्य श्लाघंति विबुधाः कर्माण्यूर्जितकर्मणः॥ निवातकवचाञ्जघ्ने कालकेयांश्च वीर्यवान्॥ महेंद्रशत्रवो येन हि
रण्यपुरवासिनः॥ अक्ष्णोर्निमेषमात्रेण पौलोमाः सगणा हताः॥ परेभ्योपि भयार्तेभ्यो यो ददात्यभयं विभुः॥ तस्यास्माभिर्न शकि
तस्त्रातुमद्यात्मजो भयात्॥ भयं तु सुमहत्प्राप्तं धार्तराष्ट्रान्महाबलान्॥ पार्थः पुत्रवधात्क्रुद्धः कौरवाञ्शोषयिष्यति॥ क्षुद्रः क्षु
द्रसहायश्च स्वपक्षक्षयमातुरः॥ व्यक्तं दुर्योधनो दृष्ट्वा शोचन्हास्यति जीवितं॥ न मे जयः प्रीतिकरो न राज्यं न चामरत्वं न सुरैः स
मजा५ लोकता॥ इमं समीक्ष्याप्रतिवीर्यपौरुषं निपातितं देववरात्मजात्मजं॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥तथा
विलपमानं तं कुंतीपुत्रं युधिष्ठिरं। कृष्णद्वैपायनस्तत्र आजगाम महानृषिः॥ अर्चयित्वा यथान्यायमुपविष्टं युधिष्ठिरः॥
अब्रवीच्छोकसंतप्तो भ्रातुः पुत्रवधेन सः॥ अधर्मयुक्तैर्बहुभिः परिवार्य महारथैः॥ युध्यमानो महेष्वासैः सौभद्रो निहतो
रणे॥ बालश्च बालबुद्धिश्च सौभद्रः परवीरहा॥ अनुपायेन संग्रामे युध्यमानो विशेषतः॥ मया प्रोक्तः स संग्रामे द्वारं संजनय
स्व नः॥ प्रविष्टे च परानीकं सैंधवेन च वारिताः॥ ननु नाम समं युद्धमेष्टव्यं युद्धजीविभिः॥ इदं चैवासमं युद्धमीदृशं यत्कृतं
प परैः॥ तेनास्मि भृशसंतप्तः शोकबाष्पसमाकुलः॥ शमं नैवाधिगच्छामि चिंतयानः पुनः पुनः॥ संजय उवाच॥ ॥तं तथा विल

एष विधिर्मृत्यु।कथंकेनप्रकारेणसंहरतेमारयंति।पुरातनमादिकालिकं।इतिहाससमाख्यानं।तत्तस्मात्॥
द्रोण पन्नंविशोकबाष्पसमाकुलं।उवाचभगवान्व्यासोयुधिष्ठिरमिदंवचः।युधिष्ठिरमहाप्राज्ञसर्वशास्त्रविशारद।व्यसनेषु
नमुह्यंतित्वादृशाभरतर्षभ।स्वर्गमेषगतःशूरःशत्रून्हत्वाबहून्रणे।अबालसदृशंकर्मकृत्वावैपुरुषोत्तमः।अनतिक्र
मणीयोविविधिरेषयुधिष्ठिर।देवदानवगंधर्वान्मृत्युर्हरतिभारत॥ ॥युधिष्ठिरउवाच॥ ॥इमेवैपृथिवीपाला
ःशेरतेपृथिवीतले।निहताःपृतनामध्येमृतसंज्ञामहाबलाः।नागायुतबलाश्चान्येवायुवेगबलास्तथा।तएतेनिहताः
संख्येतुल्यरूपानरर्षभाः।नैषांपश्यामिहंतारंप्राणिनांसंयुगेक्वचित्।विक्रमेणोपपन्नाहितेजोबलसमन्विताः।जेतव्य
मितिचान्योन्यंनित्यंयेषांहृदिस्थितं।अथचेमेहताःप्राज्ञाःशेरतेविगतायुषः।मृतावैइतिचशब्दोयंवर्त्ततेगतार्थवत्।
इमेमृतामहीपालाप्रायशोभीमविक्रमाः।निश्चेष्टानिरभीमानाःशूराःशत्रुवशंगताः।अत्रमेसंशयःप्राप्तःकुतःसंज्ञा अ २५
मृताइति।कस्यमृत्युःकुतोमृत्युःकथंसंहरतेप्रजाः।हरत्यमरसंकाशतन्मेब्रूहिपितामह॥ ॥संजयउवाच॥ ॥तंत
थापरिपृच्छंतंकुंतीपुत्रंयुधिष्ठिरं।आश्वासनमिदंवाक्यमुवाचभगवानृषिः॥ ॥व्यासउवाच॥ ॥अत्राप्युदाहरंती ७८
ममितिहासंपुरातनं।अकंपनस्यकथितंनारदेनपुरानृप।सचापिराजाराजेंद्रपुत्रव्यसनमुत्तमं।अप्रसह्यतमंलोकेप्रा
वानितिमेमतिः।तदहंसंप्रवक्ष्यामिमृत्योःप्रभवमुत्तमं।अतस्त्वंमोक्ष्यसेदुःखात्स्नेहबंधनसंश्रयात्।पुरावृत्तमिदं

श्रुतइतिहासात्।आत्मनोमनसः॥

तातशृणुकीर्त्यतोमम।धन्यमाख्यानमायुष्यंशोकघ्नंपुष्टिवर्द्धनं।पवित्रमरिसंघघ्नंमंगलानांचमंगलं।यथैववेदा
ध्ययनमुपाख्यानमिदंतथा।श्रवणीयंमहाराजप्रातर्नित्यंनृपोत्तमैः।पुत्रानायुष्मतोराज्यमीहमानैःश्रियंतथा।
पुराकृतयुगेतातआसीद्राजाह्यकंपनः।सशत्रुवशमापन्नोमध्येसंग्राममूर्द्धनि।तस्यपुत्रोहरिर्नामनारायणसमोब
ले।श्रीमान्कृतास्त्रोमेधावीयुधिशक्रोपमोबली।सशत्रुभिःपरिवृतोबहुधारणमूर्द्धनि।व्यस्यद्बाणसहस्राणियो
धेषुचगजेषुच।सकर्मदुष्करंकृत्वासंग्रामेशत्रुतापनः।शत्रुभिर्निहतःसंख्येपृतनायांयुधिष्ठिर।सराजाप्रेतकृत्या
नितस्यकृत्वाशुचान्वितः।शोचन्नहनिरात्रौचनालभत्सुखमात्मनः।तस्यशोकंविदित्वातुपुत्रव्यसनसंभवं।अथाज
गामदेवर्षिर्नारदोस्यसमीपतः।सतुराजामहाभागोदृष्ट्वादेवर्षिसत्तमं।पूजयित्वायथान्यायंकथामकथयत्तदात
स्यसर्वंसमाचष्टयथावृत्तंनरेश्वर।शत्रुभिर्विजयंसंख्येपुत्रस्यचवधंतथा।ममपुत्रोमहावीर्यइंद्रविष्णुसमद्युतिःश
त्रुभिर्बहुभिःसंख्येपराक्रम्यहतोबली।कएषमृत्युर्भगवन्किंवीर्यबलपौरुषः।एतदिच्छामितत्त्वेनश्रोतुंमतिमतां
वर।तस्यतद्वचनंश्रुत्वानारदोवरदःप्रभुः।आख्यानमिदमाचष्टपुत्रशोकापहंमहत्॥ ॥नारदउवाच॥ ॥शृणुरा

संहारं संहरणोपायं। आसीन्न वेदन्नालवानिति व्यवहितेनान्वयः॥ प्रयतः सर्वकार्येषु स्मृतिविंते इति कथ्यते। त्रासयन्निव

द्रोण जन्म ह्यावाहो आख्यानं बहुविस्तरं। यथा वृत्तं श्रुतं चैव मयापि वसुधाधिप। प्रजाः सृष्ट्वा तदा ब्रह्मा आदिसर्गे पितामहः
असंहृतं महातेजा दृष्ट्वा जगदिदं प्रभुः॥ तस्य चिंता समुत्पन्ना संहारं प्रति पार्थिव। चिंतयन् ह्यसौ वेद संहारं वसुधाधिपान
स्य रोषान्महाराज खेभ्योऽग्निरुदतिष्ठत। तेन सर्वा दिशो व्याप्ताः सांतर्देशा दिधक्षता। ततो दिवं भुवं खं च ज्वालामालासमा
वृतं। चराचरं जगत्सर्वं ददाह भगवान् प्रभुः॥ ततो हतानि भूतानि चराणि स्थावराणि च। महता क्रोधवेगेन त्रासयन्निव
वीर्यवान्। ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः। जगाम शरणं देवं ब्रह्माणं परमेष्ठिनं। तस्मिन्नापतिते स्था
ज्व णौ प्रजानां हितकाम्यया। अब्रवीत्परमो देवो ज्वलन्निव महामुनिः। किं कुर्मः कामं कामार्होऽसि पुत्र कं करिष्यामि प्रि
यं सर्वं ब्रूहि स्थाणो यदिच्छसि॥ ॥द्रोणपर्वणि मृत्युपाख्याने॥ ॥स्थाणुरुवाच॥ ॥प्रजासर्गनिमित्तं हि कृतो यत्नस्त्व
या विभो। त्वया सृष्टाश्च वृद्धाश्च भूतग्रामाः पृथग्विधाः। तास्तवेह पुनः क्रोधात्प्रजा दह्यंति सर्वशः। ता दृष्ट्वा मम कारुण्यं प्र
सीद भगवन्प्रभो॥ ॥ब्रह्मोवाच॥ ॥न कुध्ये न च कामो मे न तदेवं भवेदिति। पृथिव्या हितकामं तु ततो मां मन्युराविशत् ३५
इयं हि मां सदा देवी भारार्ता समचूचुदत्। संहारार्थं महादेव भारेणाभिहता सती॥ व्यवहितेनान्वयः। पुरा प्रकृष्टमाबुद्धि
यस्य महत्तत्त्व परमात्मनः त्वं मनुते बुध्यत इति महामुनिः। कामं इष्टं कामादिच्छति। भारेणावनी या भारखेनातिपीडिता। अत एव भारे

ततोऽस्येव प्रियार्थं संहारं नाधिगच्छामी त्यन्वयः॥ तस्यैतापमतन्नवामि। कुरु तत्र मिरर्थात्। सर्वमिव तस्मिकाले। तत्कर्मनिवर्त
रत्नप्रकृतिमापद्येरन्॥ जनाम। श्रोणस संतानाः॥ अधिदेवे अध्यक्षना। लोकपालो का यदि कृतः लोकपालो इति वस्त्रा
ततोऽहं नाधिगच्छामि तथा बहुविधं तदा। संहारमप्रमेयस्य ततो मां मन्युराविशत्॥ ॥स्थाणुरुवाच॥ संहारार्थं प्रसाद
स्व मा रुषो वसुधाधिप। मा प्रजाः स्थावराश्चैव जंगमाश्च व्यनीनशत्। तव प्रसादाद्भगवन्निदं वर्तेत्रिविधं जगत्। अनागत
मतीतं च यच्च संप्रति वर्तते। भगवान् क्रोधसंदीप्तः क्रोधादग्निमवासृजत्। संदहत्यस्य कूटानि द्रुमांश्च सरितस्तथा। पल्व
लानि च सर्वाणि सर्वांश्चैव तृणोलपान्। स्थावरं जंगमं चैव निःशेषं कुरुते जगत्। तदेतद्भस्मसाद्भूतं जगत्स्थावरजंगमं। प्र
सीद भगवन्मा ते रोषः स्याद्वरो मम। सर्वे हि नष्टा नश्यंति तव देव कथंचन। तस्मान्निवर्ततां तेजः स्वय्येव देव लीयतां। तत्स
म्पश्य देवेश प्रजानां हितकाम्यया। यथेमे प्राणिनः सर्वे निवर्तेरंस्तथा कुरु। अभावं न हि गच्छेयुरुत्सन्नप्रजनाः प्र जे
जाः। अधिदैवे नियुक्तोऽस्मि त्वया लोकेषु लोककृत्। मा विनश्येज्जगन्नाथ जगत्स्थावरजंगमं। प्रसादाभिमुखं देवं तस्मा
देवं ब्रवीम्यहं॥ ॥नारद उवाच॥ ॥श्रुत्वा हि वचनं देवः प्रजानां हितकारणं। तेजः संधारयामास पुनरेवांतरात्मनि। त
तो निगृह्य महत्तेजो भगवान् लोकसत्कृतः। प्रवृत्तिं च निवृत्तिं च कल्पयामास वै प्रभुः। उपसंहरतस्तस्य तमग्निं रोषजं तदा। प्रा
दुर्बभूव विश्वेभ्यो गोभ्यो नारी महात्मनः। कृष्णा रक्ता तथा पिंगा रक्तजिह्वास्यलोचना। कुंडलाभ्यां च राजेंद्र तप्ताभ्यां तप्त
वमामंत्रणं। प्रवृत्तं स्वर्गस्तुदयसाधनं कर्म। निवृत्तं मोक्षसाधनं। विस्मरणं। कृष्णा रक्ता पिंगला च प्रदेशभेदेन॥

द्रोण

संतिविशः प्रयप्रशमर्षिकामकं। स्वर्गपिशमर्शींमत्वा उवाच त्वां देवि तिशाप॥ अथ एवाग्नौ। मजउपंडिता॥ उक्रेवेतने॥ पंडितेऽश्रु
ततिःसहिता॥ ॥ईदृशीनामस्मिमहृष्टा। अथ तु त्वं प्रयाति यावत्॥ तस्मे हारात्मा। कर्म क्रूरं हा रुष्णा। अद्विसमनिष्ठ॥

पद्मा। सेति स्म त्वयचरखे सोथदक्षिणां दिशमाश्रिता। स्मयमाने वमा वेदय देवैर्निस्तुशयबुन्नि। तामाकृपतदादेवो लोकादि
निधनेच्छुस्सस्मुत्सो। इतिमहापालजदिवे मां प्रजा इति। इंद्रियहार बुध्याप्य प्राङ्मनुर्न तारुषाममम। तस्मात्संदस्म हास्थिप्रजा
ः मजउपंडिता॥ ममवैद्दिति पापगनततः ग्यायात्वा प्स्यति। एवमुक्तात्तेसमानन हस्तुःकमलालोचना। दध्यौचात्यध्य
मबलाश्रुपाशंदचसुस्वरं। या णिभ्यां प्रतिजग्राह तान्यश्रूणि पितामहः। सर्वभूतहिताथाय तां च यत्नेन यत्नदा॥ द्रोण
पर्वणिमृत्युपाख्याने॥ ॥नारदउवाच॥ विनीय दुःखमबलाश्रुत्वात्मनैव प्रजापतिं। उवाच प्रांजलिर्भूत्वा लतेवावर्जि
ता पुनः॥ मृत्युरुवाच॥ त्वया सृष्टा कथं नारी ईदृशी वदतां वर। क्रूरं कर्मा हितं कुर्यां तत् देव किं नु जानती। बिभेम्यहम
धर्माद्धि प्रसीद भगवन्प्रभो। प्रियान्पुत्रान्वयस्यांश्च भ्रातॄन्मातॄः पितॄन्पतीन्। अपध्यास्यंति मां देव यद्धि तेषां त्याबिभ्यम्यह
।कृपणानांहि रुदतांयेपतंत्यश्रुबिंदवः। तेभ्योऽहं भगवन्भीता शरणं त्वाहमागता। यमस्य भवनं देव न गच्छेयं सुरोत्तम।
सारयवां वरदश्रेष्ठ देव तु वरं च नः। एतदिच्छाम्यहं कामं त्वत्तो लोकपितामह। इच्छेयं त्वत्प्रसादाद्धि तपस्तप्तं सुरेश्व
र। प्रदिशामेव रंदब्रह्मं महेश्वर भगवन्मना। यथा ह्युक्तागमिष्यामि धेनुकाश्रमसुत्तमं। तत्रैतप्स्यतपस्तीव्रं तवैवारा
धानरता॥
एवं ज्ञानेनमया दृष्टा कि तु रते पुत्रवादीच न स्मृती तिशापः। मे ममाप्यध्यास्यंति। अनिशं चिंतयिष्यंति लोकाः। एन्यो
कन्यः। नववनं विप्रयं वदयमनुखनन्न त्वं कं वा प्रधानतं तु खेन। वदाननं॥ ७६

संकल्पिता निर्मिता॥ काका हि बवदुनयवसंबध्यता अनिंदिताप्रकंपिता नावो। आत्मनि कृत्स्नेर। यमानामनु तं पराई

न हि याप्सामि देवेश प्राणिनां प्राणनुत्तां। प्रियान्नावधिष्ठं विलपमानानामधर्मास्थि निरहन्मां॥ ब्रह्मोवाच॥ मृत्यो संक
ल्पिता मेऽन्य प्रजासंहारहेतुना। गच्छ संहर सर्वास्त्वं प्रजा मा ते विचारणा। भवितार्वदेतदेवं हिनैतज्जात्वन्यथा भवेत्। भ
वत्वनिंदिता लोके कुरुष्वचनं मम॥ ॥नारदउवाच॥ ॥एवमुक्तानवद्गीनाप्रांजलिर्भगवन्मुखी। संहारे नोके
राबुद्धिं त्रलानांक्षितकाम्यया। तूष्णीमासीत्तदा देवः प्रजानामीश्वरेश्वरः। प्रसादं चागमत्क्षिप्रमात्मन्येव पितामहः। स्मय
मानश्च लोकशोलोकान्सर्वानवैक्षत। लोकाश्चासन्यथा पूर्वं दृष्टास्तेनापमन्युना। निवृत्ते तरोषे तस्मिंस्तु भगवत्यप
राजिते। सा कन्यापि जगाम अस्य समीपात्तस्य धीमतः। अपसृत्याप्रतिश्रुत्य प्रजासंहरणं तदा। त्वरमाणा च राजेन्द्र मृत्युर्धे
नुकमभ्यगात्। सा तत्र परमं तीव्रं चचार व्रतमुत्तमं। सा तदा ह्येकपादेन तस्थौ पद्मानि षोडश। पंच चाब्दानि कारुण्या
त्प्रजानां च हितैषिणी। इंद्रियाणींद्रियार्थेभ्यः प्रियेभ्यः संनिवर्त्य सा। ततस्त्वेकेन पादेन पुनरन्यानि सप्तवै तस्थौ पद्मानि
प्रयातिषड् द्वे च सप्त चैकं च पार्थिव। ततः पद्मायुतं तात मृगैः सह चचार सा। पुनर्गत्वा ततो नंदां पुण्यां शीतामलोदकां
। अप्सु वर्षसहस्राणि सप्त चैकं च सा नयत्। धारयित्वा तु नियमं नंदायां वीतकल्मषा। सा पूर्वं कौशिकीं पुण्यां जगाम नियम
मेष्ठता। तत्र वायुजलाहारा चचार नियमं पुनः। पंचगंगासु सा पुण्या कन्या वेतसकेषु च। तपोविशेषैर्बहुभिः कर्षयंती देह

द्रो०

॥केवलं पवित्रं। प्राणायामः प्राणापानगतिनिरोधः। परमा एकाग्रधीः॥ सोप्यनेन मनसा ब्रुवाणा तु हृष्टोऽभ्यंतोस्मि। तस्यातमनानत्व। किमिद
मात्मनः। तानागत्वा उमा गंगा महामरुं च केवलं। तस्थौ चाश्मवन्निश्चेष्टा प्राणायामपरायणा। पुनर्हिमवतो शृङ्गे यत्र देवाः पुरा
यजन्। तत्रांगुष्ठेन सा तस्थौ निखर्वं परमा शुभा। पुष्करेषु च गोकर्णे नैमिषे मलये तथा। अपाकर्षत्स्वकं देहं नियमैर्मनसः प्रि
यैः। अनन्यदेवता नित्यं दृढभक्ता पितामहे। तस्थौ पितामहं चैव तोषयामास धर्मतः। ततस्तामब्रवीत्प्रीतो लोकानां प्रभ
वोऽव्ययः। सौम्येन मनसा राजन्प्रीतः प्रीतमनास्तदा। मृत्यो किमिदमत्यर्थं तपांसि चरतीति हा। ततोऽब्रवीत्पुनर्मृत्युर्भगवं
तं पितामहं। नाहं हन्यां प्रजा देव स्वस्थाश्चाक्रोशतोस्तथा। एतदिच्छामि सर्वेशाद्वरं मत्तः प्रभो। अधर्मभयभीतास्मि ततो
हं तप आस्थिता। भीताया मे महाभाग प्रयच्छाभयमव्यय। आर्तां चानागसां नारीं याचामि भव मे गतिः। तामब्रवीत्ततो देवो भू
तभव्यभविष्यवित्। अधर्मो नास्ति ते मृत्यो संहरन्त्या इमाः प्रजाः। मया चोक्तं मृषा भद्रे भविता न कथंचन। तस्मात्संहर कल्याणि
प्रजाः सर्वाश्चतुर्विधाः। धर्मः सनातनस्त्वां वै सर्वथा पावयिष्यति। लोकपालो यमश्चैव सहाया व्याधयस्तथा। अहं च वि
बुधाश्चैव पुनर्दास्यामि ते वरं। यथा त्वमेनसा मुक्ता विरजाः ख्यातिमेष्यसि। सैवमुक्ता महाराज कृतांजलिरिदं प्रभुं। पु
नरेवाब्रवीद्वाक्यं प्रसाद्य शिरसा तदा। यद्येवमेतत्कर्तव्यं मया न स्यात्किना विना। तवाज्ञा मूर्ध्नि मे न्यस्ता यत्तु वक्ष्यामि तच्छृणु। ७७
मत्वांते तया साध्याहारावयः। आक्रोशनाकंदमानाः सापं तावं। सर्वे समर्दनातिमर्वं वर्तमानं। दास्यामीतिति मंत्रणं। कर्तव्यं कृत्वा। म

लोभोनुपानः प्राणीच्छा मे क्रोधवृद्धेद्वधीः परा। गुणेषु द्वेषयुद्धमनस्तेषां पच्यन्ते। शोणोपकारधीर्मे रोऽकृत्येकर्दवेनाः
मः। गतास्तन्नजयाताप्युषः। प्राणिनां विप्राणान्तामपि। त्वयि त्वमेवा। धर्मो धारणात्मा। धर्मस्याचारस्य। इच्छोपदेष्टा। धर्मपाधर्मौ दिन
पेता धर्मानित्या। कर्मवादप्युता अपरूपा निर्गीत्यर्थः। धरित्री पृथिवी सर्वसहा। कामरोषौ इच्छाद्वेषौ तेन धर्मेण। अन्यपि विपदि
लोभः क्रोधाभ्यसूयेर्ष्याद्रोहो मोहश्च देहिनां। अहीश्चान्योन्यपरुषा नदेहा भिंधुः पृथग्विधाः॥ ॥ब्रह्मोवाच॥ ॥तथा न विष्य
ति मृत्यो साधु संहर वि प्रजाः। अधर्मस्ते न भविता नापध्यास्यामहं शुभे। यान्यश्रुबिंदूनि करे ममापासंस्ते व्याधयः प्राणिनामात्मजाताः
ते मारयिष्यन्ति नरान्गतासून्नाधर्मस्ते भविता मा स्म भैषीः। नाधर्मस्ते भविता प्राणिनां वै त्वं वै धर्मस्त्वं हि धर्मस्य चेष्टा धर्म्या
भूत्वा धर्मनित्या धरित्री तस्मात्प्राणिनः सर्व एमा नियच्छ। सर्वेषां वि प्राणिनां कामरोषौ संत्यज्य त्वं संहरस्वेह जीवान्। एवं
धर्मस्त्वामजिष्यत्यनंतो मिथ्यावृत्तान्मारयिष्यत्यधर्मः। तेनात्मानं पावयस्वात्मनैव त्वं पापेत्मानं मज्जयिष्यत्यसत्यात्। तस्मा
त्कामं रोषमभ्यागतं त्वं संत्यज्यांतः संहरस्वेह जीवान्॥ ॥नारद उवाच॥ ॥सा विभीता मृत्युसंज्ञोपदेशाच्छापाद्भीता
बाढमित्यब्रवीत्तं। सा च प्राणान्प्राणिनामंतकाले कामक्रोधौ त्यक्त्वा हरत्यसक्ता। मृत्युस्तेषां व्याधयः तु प्रसुता व्याधी रोगो।
युज्यते येन जंतुः। सर्वेषां हि प्राणिनां प्रायणांते तस्माच्छोकं मा कृथा निष्फलं त्वं। सर्वे देवाः प्राणिनां न गत्वा वृत्ताः संनि

अमत्यात्मत्यतिक्रमात। अतो अस्मात्संहरणविषयात। शोषमवशिष्टमपि कामममगात। तपसस्तमसस्तु जेत्यच वयः। तेषां प्राणिनां
।संघस्त्वात्मन्येव जाता। सुधस्ता इत्यपि वा पाठः। व्याधिरेषघरोगतप्तः। नतमरणं। प्ररूप्य मरणं प्रायणं। तस्मांते आयुष्यकर्मणि
ऽवसाने॥

द्रो॰ देवाइंद्रियाणिवायवोमासुष्पंकर्मयावता।गत्वाऽनुस्त्यामनिरहताहन्ता यत्याइस्यान्नताःमताः॥तथैवपूर्ववदेवमवंतिस्वध
रूतिमेवमजंतइत्यर्थः॥मृतस्यप्रविविधागतिरित्याह।एवमिति।मरणोसतित्यर्थः॥अमुत्रलोकांतरगत्वाकेचिद्देवाःस्वर्लोक
माजोहन्ताःकेचिन्मर्त्येवन्मरणधर्माएवतिर्यङ्नरकादयइत्यर्थः॥मृतस्यदेवादिभावोविरुद्धइतिचेन्नजीवस्याविनाशित्वादि
त्याह।वायुरिति।शरीरप्राणादिलक्षणः।पंचविधोवायुःभीमःप्रकोपभीषणः।भीमनादोदारुणस्यकुंडलादिलक्षणस्यना

हन्ताप्रत्येवाएवंसर्वेप्राणिनस्तत्रगत्वाहन्तादेवामर्त्यश्चक्षजसिंह।वायुर्भीमोभीमनादोमहौजाभेत्तादेहंप्राणिनांसर्व
गोसौ।निवर्तिविकदाचिन्महोग्रतेजोविशिष्टः॥सर्वेदेवामर्त्यसंज्ञाविशिष्टास्तस्मात्पुत्रंमाशुचोराजसिंह।स्वर्गे
प्रेमोदतेतत्रनन्नोनित्यंरम्याचीरत्नाकानचाम्या।संत्काइःखंसंगतःपुण्यकृद्भिरेषामृत्युर्द्देवविशिष्टप्रजानां॥

दस्यजनकः॥हैमहिजामहाबलः॥प्राणिनांदेहानांभेत्ताउनजीवानां।आसौजीवोविशिष्टदेहादिविमुक्तएवासर्वगःसर्वव्यापी॥आ
वृत्तिनिवृत्तिनिवप्राप्नोति।नानुभवत्येव।अयाःसर्वस्माइदिक्तः॥अनंततेजाअपरिच्छिन्नप्रकाशः॥देवाद्युलोकवासिनः॥सर्वेम १८
र्त्यसंज्ञाविशिष्टाःपूर्वंमर्त्याएवासन्नित्यर्थः॥एतेनदेवायिमानुषाःसंतोमरणमनुप्राप्यवदेवसावमाशुचंतःइत्यवर्थमावी
मृत्युरितिभावः॥अथवामर्त्यसंज्ञेभ्योमनुष्येभ्यः।विशिष्टास्तेषामपिकल्पांतेदेहत्यागावश्यंभावादित्यर्थः।उपसंहरत्येषेति॥

स्वयंब्रह्मणाकृता।सर्वंस्वनावं।निश्चयंनिश्चलं।अर्थपदंव्याख्यानं॥ ॥इतिमृत्युव्याख्यानं॥ ॥गुरसोगरिमभाजः॥स्वाने
प्राप्तेकालेसंहरितीयथावत्स्वयंकृताप्राणहराप्रजानां।आत्मानंतविप्राणिनोघ्नंतिसर्वेनैनंमृत्युर्दंडपाणिर्हनस्ति।तस्मान्मृ
तान्नानुशोचंतिधीराः।सत्त्वंज्ञात्वानिश्चयंब्रह्मसृष्टं॥ ॥द्वैपायनउवाच॥ ॥एतच्छ्रुत्वार्थवद्वाक्यंनारदेनप्रकाशितंउवा
वाकंपनोराजासखायंनारदंतदा।व्यपेतशोकःप्रीतोस्मिभगवन्नृषिसत्तम।श्रुत्वेतिहासंत्वत्तःकृतार्थोस्म्यभिवाद
ये।तथोक्तोनारदस्तेनराज्ञाऋषिवरोत्तमः।जगामनंदनंशीघ्रंदेववर्षिरमितात्मवान्।पुण्यंपयशस्यंस्वर्ग्यंचधन्यमायुष्य
मेवच।अस्येतिहासस्यसदाश्रवणंश्रावणंतथा।एतदर्थपदंश्रुत्वातदाराजायुधिष्ठिरः।क्षत्रधर्मंचविज्ञायशूराणांचपरां
गतिं।संप्राप्तोसौमहावीर्यःस्वर्गलोकंमहारथः।अभिमन्युःपरान्हत्वाप्रमुखेसर्वधन्विनां।युध्यमानोमहेष्वासोहतोऽ
भिमुखोरणे।असिनागदयाशक्त्याधनुषाचमहारथः।विरजाःसोमसूनुश्चपुनस्तत्रप्रलीयते।तस्मात्परांधृतिंकृत्वाभ्रातृ
भिःसहपांडव।अप्रमत्तःसुसंनद्धःक्षिप्रंयोद्धुमुपाक्रम॥ ॥इतिद्रोणपर्वणिमृत्युप्रजापतिसंवादः॥ ॥संजयउवाच॥
श्रुत्वामृत्युसमुत्पत्तिंकर्माण्यनुपमानिच।धर्मराजःपुनर्वाक्यंप्रसाद्यैनमथाब्रवीत्॥ ॥युधिष्ठिरउवाच॥ ॥गुरवःपुण्य
कर्माणःशक्रप्रतिमविक्रमाः।स्थानेराजर्षयोब्रह्मन्ननघाःसत्यवादिनः।भूयएवतुमांतथ्यैर्वचोभिरुपबृंहय।राजर्षी
योगं॥ अभिहत्याध्यय॥

द्रोण

कन्याश्च स्वरूपावत्यस्तल्लिंगाभिस्तद्वस्त्रोपयुक्ताभिः। अमितस्त्विषा तत्तानुरूपदीप्तवान्। मनोवाग्बुद्धीनां समाधाव्यापारः। म
नसः संकल्पो वाचो व्याहरणं। बुद्धिरवसाय इत्यर्थः। उदकपूर्वकं दत्तां गोनतामोद्धारणेनोत्सृज्य दानं छांदसो लिंग

णं। पुराणानां समाख्यासयकर्मभिः। क्रियन्तो दक्षिणा दत्ताः के शुद्धनामदान्यभिः राजर्षिभिः पुण्यकृद्भिः इवान्यब्रवीतुमे
॥ ॥व्यास उवाच॥ ॥श्वित्यस्य नृपतेः पुत्रः संजयो नाम नामतः। सखायौ तस्य चैवास्तां ऋषी पर्वतनारदौ॥ तौ कदाचिद्गृहं तस्य प्र
विष्टौ तद्दिदृक्षया। विधिवच्चार्चितौ तेन प्रीतौ तत्रोषतुः सुखं॥ तं कदाचित्सुखासीनं ताभ्यां सह शुचिस्मिता। दुहितास्यागमत्कन्या
संजयं वरवर्णिनी। तयाभिवादितः कन्यामभ्यनंदद्यथाविधि। तत्सलिंगाभिराशीर्भिरिष्टाभिरुपतस्थिवान्। तां निरीक्ष्या
ब्रवीद्वाक्यं पर्वतः प्रहसन्निव। कस्येयं चंचलापांगी सर्वलक्षणसंमता। उताहो भाः स्विदर्कस्य ज्वलनस्य शिखा त्वियं। श्री
र्ह्रीः कीर्तिर्धृतिः पुष्टिः सिद्धिश्चंद्रमसः प्रभा। एवं ब्रुवाणं देवर्षिं नृपतिः संजयोब्रवीत्। ममेयं भगवन्कन्या मत्तो वरमभीप्स
ति। नारदस्त्वब्रवीदेनं देहि मह्यमिमां नृप। भार्यार्थं सुमहच्छ्रेयः प्राप्तुं चेदिच्छसे नृप। ददानीत्येव संहृष्टः संजयः प्राह नारदं
। पर्वतस्तु सुसंक्रुद्धो नारदं वाक्यमब्रवीत्। हृदयेन मया पूर्वं वृतां वै वृतवानसि। यस्मात्कृता त्वया विप्र मा गाः स्वर्गं यथेच्छया।
एवमुक्तो नारदस्तं प्रत्युवाचोत्तरं वचः। मनोवाग्बुद्धिसंभाषादत्ता चोदकपूर्वकं। पाणिग्रहणमंत्राश्च प्रथितं वरलक्षणं॥ ॥ द्रो ९७

व्यत्ययः। पाणिग्रहणमंत्राश्च प्रख्यापिता इति। गृभ्णामि ते सौभगत्वाय हस्तमित्यादयः। एतच्चयं दारलक्षणं दारकरणोपयुक्तं॥

तत्त्वेषां वचनानि निष्ठा निष्पत्तिर्निष्ठिता दारकरणनिष्पत्तावुपयुक्ता निष्ठा सप्तपदीकरणं स्मृता। सप्तपदीतिवायावः।
अनुत्पन्ने अनिष्पन्ने कार्यार्थे दारकारणलक्षणेऽर्थे। एतावत्यपि मदर्थं मत्वा त्वयेयमुद्वोढुं त्वाक्यत एवेति भावः। व्याहृ

तत्त्वेषां निष्ठिता निष्ठा निष्ठा सप्तपदी स्मृता। अनुत्पन्नेव नार्यार्थे मां त्वं व्याहृतवानसि। तस्मात्त्वमपि न स्वर्गं गमिष्यसि मया
विना। अन्योन्यमेवं तावुक्त्वा जग्मतुः स्वगृहं प्रति। संजयोथापि विप्रान्यान्नाछादनभोजनैः। पुत्रकामः परं शक्त्या यत्ने
नोपाचरच्छुचिः। तस्य प्रसन्ना विप्रेंद्राः कदाचित्पुत्रमीप्सवः। तपःस्वाध्यायनिरता वेदवेदांगपारगाः। सहिता नारदं प्राहु
र्देह्यस्मै पुत्रमीप्सितं। तथोक्तः प्रांजलिराजा पुत्रं वव्रे गुणान्वितं। यशस्विनं कीर्तिमंतं तेजस्विनमरिंदमं। यस्य मूत्रं पुरीषं
क्लेदः स्वेदश्च कांचनं। सुवर्णष्ठीविरित्येवं तस्य नामाभवत्कृतं। तस्मिन्वरप्रदानेन वर्धयत्यमितं धनं। कारयामास नृपति
:सौवर्णं सर्वमीप्सितं। ×तथेत्युक्तास्तु द्विजरुक्तः संजयं नारदोब्रवीत्। तत्तुभ्यं प्रसन्ना राजर्षे पुत्रमीप्संति ब्राह्मणाः। वरं वृणीष्व भ
द्रं ते यादृशं पुत्रमीप्सितं। विख्याताः प्रागृहप्राकारदुर्गाणि ब्राह्मणावसथानि च। शय्यासनानि यानानि स्थालीपिठरभाजनं॥
तस्य तस्य राज्ञो यद्वेश्म बाह्यश्चोपस्करश्च ये। सर्वं तत्कांचनमयं कालेन परिवर्धितं। अथ दस्युगणाः श्रुत्वा दृष्ट्वा चैनं तथाविधं।

तवानसि शप्तवानसि। तस्य पुत्रमीप्सवतः इत्यन्वयः। पुत्रमिति छांदसो लिंगव्यत्ययः। क्लेदो घ्राणादिमलः। स्वात्यः पातिस्यः। पिठ
राः स्थलिजराः। भाजनं कलशादि। वेश्मांतर्गृहं। बाह्यं बहिःशालाः। उपस्करा उच्चावचद्रव्यमयाः। चिकीर्षितमपकर्तुं॥ ॥

विज्ञास्य छित्वा। वरदं वरेण्यं यादव्र। अस्याः पृथ्वीमण्वपाव्रः॥ भगवान्महादेवः। देवाव्यवद्वारोपदेश वच्चयाट — कारावा॥

३।७ ॥ संन्न्नेयतस्य नृपतेः समारब्धास्ति कीर्तितुं॥ केचित्तत्राब्रुवन्राजः सुवर्णष्ठीमविस्मयं। कोस्याकरः कांचनस्य प्रयत्नेक
रवाम हाततस्तेद्र्नृपवोलुब्धाः प्रविश्य नृपतेर्गृहं। राजपुत्रं तदाजह्नुः सुवर्णष्ठीविनं बलात्। गृहीत्वा तमुपायज्ञा नीला
रण्यमचेतसः। हत्वा विशस्य चापश्यंस्तु ह्या वसु नकिंचन। तस्य प्राणे विमुक्तस्य नष्टं तद्वरदं वसु। दस्यवश्च तदान्योन्यं
जघ्नुर्मूर्खा विचेतसः। हत्वा परस्परं नष्टाः कुमारं चाद्भुतं भुवि। असंभाव्यं गता घोरं नरकं दुष्टकारिणः। तं दृष्ट्वा निहतं पु
२ त्रं वरदत्तं महातपाः। विललाप सुदुःखार्तो बहुधा करुणं नृपः। विलपंतं निशम्याथ पुत्रशोकहतं नृपं। प्रत्यदृश्यत
देवर्षिर्नारदस्तस्य संनिधौ। उवाच चैनं दुःखार्तं विलपंतमचेतसं। सृंजयं नारदो मेत्य तन्निबोध युधिष्ठिर। कामानामवि
तृप्तस्त्वं सृंजयेह मरिष्यसि। यस्य चैते वयं गेहे उषिता ब्रह्मवादिनः। आविक्षितं मरुत्तं चेन्मृतं सृंजय शुश्रुमा। संवर्तो याजया
मास हेघात्विव बृहस्पतेः। यस्मै राजर्षये प्रादाद्धनं स भगवान्प्रभुः। हैमं हिमवतः पादं यियक्षोर्विविधैः सवैः। यस्य सेंद्राम
रुद्गणा बृहस्पतिपुरोगमाः। देवा विश्वसृजः सर्वे यजनांते समासते। यज्ञवाटस्य सौवर्णाः सर्वे चासन्परिच्छदाः। यस्य सर्वं
तदा ह्यन्नं मनोभिप्रायगं शुचि। कामतो बुभुजुर्विप्राः सर्वे चार्थार्थिनो द्विजाः। ८७

मनोभिप्रायगं मनोहस्यनुरूपं। द्विजाः क्रियाविरूपा॥

भक्ष्याभोदकाः। श्वाकादिभोज्यमोदनमेदनं। सुमृष्टं प्रकृष्टं मृष्टं च प्रभूतं प्रचुरमितिवा। सुवर्णष्ठीविनामा ह्यानां। ब्रह्मचर्यादि
भिः सर्वभक्ष्यादीनां दत्वेत्यन्वयः। अनुध्यानो नुग्रहीतो स्तुतीनो वा। तिरामयानि रूपद्रवाः। जितान्नधर्मैर्जितानालुण्ड्यदः॥

पयो दधि घृतं क्षौद्रं भक्ष्यं भोज्यं च शोभनं। तस्य यज्ञेषु सर्वेषु वासांस्याभरणानि च। ईप्सितान्युपतिष्ठंति प्रहृष्टान्वेदपारगा
न्। मरुतः परिवेष्टारो मरुत्तस्याभवन्गृहे। आविक्षितस्य राजर्षेर्विश्वेदेवाः सभासदः। यस्य वीर्यवतो राज्ञः सुवृष्ट्यास
स्य संपदः। हविर्भिस्तर्पिता येन सम्यक्क्लृप्तैर्दिवौकसः। ऋषीणां च पितॄणां च देवानां सुखजीविनां। ब्रह्मचर्यश्रुतिमुखैः
सर्वैर्दानैश्च सर्वदा। शयनासनयानानि स्वर्णराशीश्च दुस्त्यजान्। तत्सर्वममितं वित्तं दत्वा विप्रेभ्य इच्छया। सोनुध्यातस्तु शक्रे
ण प्रजाः कृत्वा निरामयाः। श्रद्दधानो जिताँल्लोकान्गतः पुण्यदुहोक्षयान्। सप्रजः सानुयामात्यः सदारापत्यबांधवः। यौ
वनेन सहस्राब्दं मरुत्तो राज्यशासनात्। सचेन्ममार सृंजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अय
ज्वानमदाक्षिण्यमभिश्वित्येत्युदाहरन्॥ ॥ शांतिपर्वणि षोडशराजकीये॥ १॥ नारद उवाच॥ ॥ सुहोत्रं नाम राजा
नं मृतं सृंजय शुश्रुम। एकवीरमनाधृष्यममित्रैरभिवीक्षितं। यः प्राप्य राज्यं धर्मेण ऋत्विग्ब्रह्मपुरोहितान्। आपृच्छदात्मनः
श्रेयः पृष्ट्वा तेषां मते स्थितः। प्रजानां पालनं धर्मो दानमिज्याद्विषज्जयः। एतत्सुहोत्रो विज्ञाय धर्मेणैच्छद्धनागमं॥

पुण्यफलश्राविणः। नृपाः क[illegible]राजानः। चेतयमानावबोधयन्तः। चतुर्भद्रतरः चतुर्भिर्भद्रैरधिकः। पुण्यातिशायनि षष्ठानि चत्वारि भद्र
णि भवंति। तदुक्तं भामीवेण। भद्राणि यानि तेषां किं विभावितमनीषिणा। अत्यद्भुतानि चत्वारि बलं धर्मः सुखं धनं। तुभ्यं त्वत्ताधिक इत्यर्थः। इति

[illegible] ॥ २ ॥

द्रोण

ःश्राटकादश्यपवः।पर्य्यनेका वत्सरान्।हिरण्यान्हिरण्मयान्।।वाहिन्यः सरितः।स एव पवायावः।स्वैरिणः सर्वजनोपजीव्या
ःनाकादीन्श्रवदं नित्यव्ययः।कामात्र्मनोतिहतान्यर्थान्।सौवर्णानि रूपाणि पशुरूपाणि सौवर्ण्येनारके पञ्चशाख्योरित्यनि

धर्मेणाराधयद्देवान्प्राणोः शत्रूनजयंस्तथा।सर्वाण्यपि च भूतानि स्वगुणैरप्यरंजयत्।।यो भुंक्ते इमां वसुमतीं म्लेच्छाट
विकवर्जितां।यस्मै ववर्ष पर्जन्यो हिरण्यं परिवत्सरान्।हिरण्यास्तत्र सरितः स्वैरिणो व्यवहन्नुरा।ग्राहान्कर्कट
कांश्चैव मत्स्यांश्च विविधान्बहून्।कामान्वर्षति पर्जन्यो रूपाणि विविधानि च।सौवर्णान्यप्रमेयाणि वाप्यश्चक्रोश
संमिताः।सहस्रं वामनान्कुब्जान्नक्रान्मकरकच्छपान्।सौवर्णान्विहितान्दृष्ट्वा ततोऽस्मयत वै तदा।तत्सुवर्णमप
र्य्यन्तं राजर्षिः कुरुजांगले।इजानो वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत।सोऽश्वमेधसहस्रेण राजसूयशतेन च।पुण्यैः
क्षत्रिययज्ञैश्च प्रभूतवरदक्षिणैः।काम्यनैमित्तिकाजस्रैरिष्टां गतिमवाप्तवान्।स चेन्ममार सृंजय चतुर्भद्रतरस्त्व
या।पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः।अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरत्।। ।।द्रोणपर्वणि षोडशरा
जिके।। ।।२।। ।।नारद उवाच।। ।।राजानं पौरवं वीरं मृतं सृंजय शुश्रुम।।

धानं।अप्रमेयानि महाप्रमाणानि। ८१
असंख्यानि वा।सौवर्णानीति।यथालिंगमनुषज्यते।कोशो धनुर्नवसहस्रं।विहितान्घटितान्।बातन इति प्रथमां
तानन्।स सुहोत्र इत्यर्थः।अस्मयत विस्मितोऽभवत्।अमन्यत उपनीतवान्।धनं किमिष्टकं।अजस्राणि नित्यादीप्य।

सहस्राणां सहस्रं तु निष्काणां।निष्का कुरसंस्काराख्यमानं।अकराणि छंदांसि।विधिः कल्पशास्त्रं।ये विपश्चितो।वेदविद्याव्र
तस्नाताः।वेदं विद्याव्रतं वा समाप्य स्नाताः।वदान्या महान्तो दक्षिणावाः।अपवर्गानुकारिणः पुसौकेः स्तुतिपाठकैः।वर्द्धमा
नकैः वर्द्धापकैः।स राजा अत्यकल्पयत्।द्विधा इति।धूर्युजो रथारूढाः।गवां शतं सहस्राणि कोटिसुवर्णमालामहात्मनां

यः सहस्रं सहस्राणां श्वेतानश्वानवासृजत्।तस्याश्वमेधे राजर्षिर्देशादेशात्समेयुषां।शिक्षाक्षरविधिज्ञानां नासीत्सं
ख्या विपश्चितां।वेदविद्याव्रतस्नाता वदान्याः प्रियदर्शनाः।सुभिक्षाच्छादनगृहाः सुशय्यासनवाहनाः।नटनर्त्तकगं
धर्वैः पूर्णैर्वर्द्धमानकैः।नित्योद्योगैश्च क्रीडंतितत्रस्म परिहर्षिताः।यज्ञे यज्ञे यथाकालं दक्षिणां सोऽत्यकालयत्।
द्विपाः दशसहस्राख्याः प्रमदाः कांचनप्रभाः।सध्वजाः सपताकाश्च रथा हेममयास्तथा।यः सहस्रं सहस्राणि कन्या हेम
विभूषिताः।धूर्युजो हयगजारूढाः सगृहक्षेत्रगोशताः।शतं शतसहस्राणि स्वर्णमालामहात्मनां।गवां सहस्रानुचरान्
दक्षिणामत्यकालयत्।हेमशृंग्यो रौप्यखुराः सवत्साः कांस्यदोहनाः।दासीदासखरोष्ट्रांश्च प्रादादाजाविकं बहु।।
रत्नानां विविधानां च विविधांश्चान्नपर्वतान्।तस्मिंश्च वितते यज्ञे दक्षिणामत्यकालयत्।तत्रास्य गाथा गायंति ये पुराणविदो जनाः

हेममालाविभूतदेहानां।सहस्रानुचरां यानवसहस्रानुगतां।हेमशृंग इति द्वितीयार्थे प्रथमा।कांस्यदोहनाः कांस्या।ऽपिहे
तोधसः कुंभक्षीरवाः।अजाविकं मेषजलिरवनमुदायं।राजतिवापावः।आविकमविसमूहं।रत्नानामिति पर्वतानि।समास
समपि संबध्यते।।

द्रोण

श्चंगस्यांगस्याराति निषूदनस्य। पुण्योत्तराय पोत्तरं पुण्यपुण्याधिकाः॥३॥ चर्मैवत्या ब्रगिया कुफले बैकुप्रसाने निषक्तो
हिमस्तवशः॥ निष्काणां कोट्याम स स्वेष्टास्त्विति: प्रज्ञावी महिषादयः॥ विविधं समदत्। वर्षतो वर्षस्य। पर्जन्ये डीसणो

श्चंगस्य यजमानस्य धर्माधिगताः शुभाः। पुण्योत्तरास्त्वेकतत्व स्त्रस्यासन्सर्वकामिका॥ सचेन्ममार सृंजय च
तुर्भद्रतरस्तव्या। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरत्॥ द्रोणपर्व
णि षोडशराजिके॥ ३॥ नारद उवाच॥ शिबिमौशीनरं चापि मृतं सृंजय शुश्रुम। य इमां पृथिवीं सर्वां चर्मवत्समवे
ष्टयत्॥ साद्रिद्वीपार्णववनां रथघोषेण नादयन्॥ स शिबिर्वीरशिष्टंत्य तुरव्याघ्रिकपत्रजित्। तेन यज्ञैर्बहुविधै फले
रिष्टं पर्याप्तिसहस्रिणः॥ सर्वीजं वीर्यं तान्श्रीमान वाप्य वसु पुष्कलं। सर्वंह सर्वं निष्क्राणां समतः सोनदुधा॥ अथ ज
ह्याश्वमेधैर्यो विजित्य पृथिवीमिमां। निरर्गलैर्यज्ञवाटे निष्ककोटिसहस्रशः॥ हस्त्यश्वपशुभिर्धान्यैर्मृगैर्गोजावि
भिस्तथा॥ विविधं पृथिवीं पुण्यां शिबिर्ब्राह्मणसात्करोत्॥ यावत्यो वर्षतो धारा यावत्यो दिवि तारकाः॥ याव
त्यः सिकता गांग्यो यावन्मेरौ महोपलाः॥ उदन्वति च यावंति रत्नानि प्राणिनोपि च। तावतीरददद्गा वै शि
बिरौशीनरोध्वरे। नोद्धर्तारं धुरं तस्य कंचिदन्यं प्रजापतिः। भूतं भव्यं भवंतं वा नाध्यगच्छन्नरर्षभं॥ ८२

× नाहत्वृषा। न्यकश्चिद्वस्य धुरं नाद्यगात् द्वितीयो नरेश्वर राज्ञा दशामध्वरे नाध्यगच्छन्नाधिगतवंतः इतं नक्ष्यं नवं तं च॥

मादेः इत्यध्वरविशेषणं। तस्मान्निधेरभ्युद्धारार्थं नार्हन्नवर्तते। न च नावास्यर्थः। नोद्धर्तारं धुरं तस्य कंचिदन्यमिति
पाठेन शाखेऽन्यार्थे। तस्मान्निरवधीप्यो निर्विज्ञाप्य नरशार्दूल योरित्यनिधानं। तस्य धुरं नोद्धर्तारं अस्त्यर्थः वोदा

॥प्रस्रुता हुताः। तस्यासन्विविधा यज्ञाः सर्वकामैः समन्विताः। हिमरूप्यासनव्यपदेशमसाकारतोरणाः। शुचिस्वाद्वन्नपानं च ब्रा
ह्मणाः प्राप्नुता हुताः। नानानामस्वैः प्रियकथाः पयोदधिमहाह्रदाः॥ तस्यासन्नपवना दक्षुतवृक्षः सुलाभपवर्तिताः। पिब
त स्नात खादत मिति यत्रोचते जनाः। यस्मिन्प्रीतो रुद्रः तुष्टेन कर्मणा। अस्ति यं ददतो विप्रेभ्यो वराकांक्षि
या क्रियाः। यथोक्तमेवमन्ये तानां प्रियत्वं स्वर्गमितिन मे। एतोक्ष्य भावरानिष्टान् शिबिः कालदिवं गतः॥ स चेन्ममार सृं
जय चतुर्भद्रतरस्तव्या। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरत्॥ द्रो
णपर्वणि षोडशराजिके॥ ४॥ ॥ नारद उवाच॥ ॥ रामं दाशरथिं चैव मृतं सृंजय शुश्रुम। यं प्रजा अन्वमोदंत पि
ता पुत्रा निवौरसान्॥ असंख्येया गुणा यस्मिन्नासन्नमिततेजसि। यश्चतुर्दश वर्षाणि निदेशात्पितुरच्युत॥ वने
वनितया सार्धमवसल्लक्ष्मणाग्रजः। जघान च

रन्यं कंचित्राधिगच्छतीत्यन्वयः। प्रसूतं द्रशालशालाणि अश्रुतं दश
सहस्राणि। तावत्संख्याः देवजनाः यत्रोचते। तत्र पिबत स्नात खादथमिति त्राश्राम्भा समन्वितवेषं गः। पयोकंय
यां विशतनवरक्कि ये त्यन्वयः॥ ४॥ यं प्रजा अन्वमोदंत। मुदिताः। यं प्रजामोदितवानित्यर्थः। अन्वमेवायिपति
नो तिगिरिवेति॥

द्रोण

जनस्थाने पंचवाट्यां। स रामः शूर्पणख्यास्तु छेदेमयान्। शूर्पणख्यो गिरिं नेदः स्याद्ध्योः गिरिस्तु कांचन इत्य

जनस्थाने राक्षसान्सत्तु जघ्ने सः। न पश्चिना रक्षमार्थं सहस्राणि चतुर्दश। नाम्ने च वसमस्तस्य रावणो नाम राक्षस
॥ जहार माययावैदेहीं संमोह्य तं स हातुजं। तमागस्कारिणं रामः पौलस्त्यमजितं परैः। जघान सममस्तुरं तु रेवत्रयं च
कोधकं सुरासुरैरवध्यं तं देवब्राह्मणकंटकं। जघान सममहाबाहुः पौलस्त्यं सगणं रणे। सप्रजात्तु मदे कृपात्रिदशो र
निष्टजितः। व्याप्य कृत्स्नं जगत्कीर्त्या सुरर्षिगणसत्कृतः। स प्राप्य विविधं राज्यं सर्वं न्यतात्तु कंपकः। आज्ञदा रमहाय
ज्ञैः प्रजा धर्मेण पालयन्। निर्गलान्स शूर्पणख्यान स्तु मेधशतं विभु। आजहार सुरत्नास्यद्विपा सुदमा वदन्। अन्ये
श्च विविधैर्यज्ञैराजे व कृतुणो दीपः। तुलिपा। स उयदा मं सर्व गेगांश्च हि दिमां। स तं तं तु गणसंपक्षो ह्यमानः स्वते
जसा। अतिस वीरिणि न्हता तिरामोदा रा रघि वं तौ। रूपीणां देवतानां च मातृपाणां च सदेशः। सृष्टिव्यां स ह व्या स्मात्र
द्यामेराज्यं प्रशासति। नाह्ली यत तद्य प्राणां प्राणिनां तन दन्यथा। प्राणापानसमानस्थ रा मराज्यं प्रशासति। पर्यद्दीप्य
ततो जासितदान धाम्ना सवत्रा दीर्घायुषः प्रजाः। सर्वांस्तु वानप्रिय ततदा। वे दिष्ठत निः सेप्रीतः प्राप्नुवंति दिवौकस ८२
॥ हव्यं कव्यं च विविधं निःसृष्टं जितमेव च। अदंशमशकादि स्वान नष्टव्यालसरीसृपाः॥
।नि सर्वं। प्राणावृणां स्वन
र्यौः अपर्यप्रतिबंधः स्यात्संपासाः संकल्पिताः आकृतौ। इति तिशयः। ता एवाह। दृव्यमिति। तिम्यूर्णविपति सादि प्रदिष्टं। क्षतमिष्ट विषयं॥

स्वधां स्वधाकारी पत्नी तद्विंशश्च ऊर्जा स्वाहाकाराय पत्नी ता न तु न यं। पितृभ्यो देवेभ्यश्च यथाक्रमं प्राद्धा हितव्ययः। रामा
द्यामंप्राप्य रामं स्मरणीयं। आत्मानं राजवंशं। हृष्पा अयपवर्तकं। श्रेष्ठं संप्रतिष्ठाप्य। रामादीनां किलाष्टौ च नाम्नो संप्रति

नास्तु प्रापाच्छतो घ्रस्तु नाकाले ज्वलनो दहेत्। नाधर्मरुचयो जुष्टा सर्वे वानान्नवंस्ताद्। शिष्ट यज्ञकर्मणि सर्वे च स्मिन्
नानवत्त्रा स्त्रश्च मृत्रश्च स्तो निर्जनस्थाने प्राणाशीतेः। पादानि हृत्सरक्षां सिपिट देवेष्वीश्वरः। स दस्र चत्वार उरूपा दशा व
र्षाणातात्युषः। न च स्त्रेणाः कनिष्ठेभ्यः कार्याद्यान्यकारयत्। शां तामु बालो हितान्ने मन्त्र मातेग विक्रमः। आजानुबाहुः सु
भुजः सिंहस्कंधो महाबलः। स्त्राव षसहस्राणि दश वर्षशतानि च। सर्वं नृतमनःकांतो रामो राज्यमकारयत्। रामो रामो
राम इति प्रजानामभवत्कथा। रामाद्रामं जगदभूद्रामे राज्यं प्रशासति। चतुर्विधाः प्रजा रामः स्वर्गं नीत्वा दिवं गतः। आत्मनः
संप्रतिष्ठाप्य राजवंशमिहाष्टधा। स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अय
ज्वानमदक्षिणमभिश्वैत्येत्युदाहरन्॥ ॥ द्रोणपर्वणि षोडशराजिके॥ ५॥ नारद उवाच॥ ॥ भगीरथं च
राजानं मृतं सृंजय शुश्रुम। येन भागीरथी गंगा चयनैः कांचनैश्चिता। यः सहस्रं सहस्राणां कन्या हेमविभूषिताः। राज्ञे
भ्यश्च ब्राह्मणेभ्यो ह्यमन्यत

ष्ठितः। तत्र रामस्य कुशलावो। लक्ष्मणस्यांगदचंद्रकेतू। भरतस्य तक्षपुष्करौ। शत्रुघ्नस्य बाहुः श्रुतसेनाविति॥ चयनैः पक्वापात स्थ नि॥

दो॰ण तेनराज्ञा।जलौघेनकरणभूतेन। उपकारमभीप्सोः दक्षिणादक्षादिनिःसृतायाश्चैवप्रथमा। तथा तेनप्रकारेण। गंगा भागीरथी
उर्वशीति। तोयौतिरेवानवतानगीरथस्यापत्यं भागीरथी। ऊरावुपवेशनादुर्वशी। इत्यादरादि। एवं गंगा तथा

सर्वा रथगताः कन्या रथाः सर्वे च ऊर्ध्वजाः। रथे रथे शतं नागाः सर्वे वै हेममालिनः। सहस्रमश्वाश्चैकैकं गजानां
शतं तेवष्टुः। अश्वे अश्वे शतं गावो गवां पंच च जाविकं। तेन कारितां जलौघेन दक्षिणोरूपसादितुं उपकरेनि
व्यथिता तस्यांकेतुषमादृष्टा तथा भागीरथी गंगा उर्वशी चाभवत्पुरा। इति दृष्टं वं गता राज्ञः पुत्रत्वमगमत्
दा। तां तु गाथां जगुः प्रीता गंधर्वाश्चर्षयश्च हंसाः। पिष्टदेवमनुष्याणां श्रुत्वैतां वल्गुवादिनां। भगीरथं यज्ञमा
नं ऐक्ष्वाकं भूरिदक्षिणं। गंगा समुद्रगा देवी वव्रे पितरमीश्वरं। यस्य सेन्द्रैः सवरुणैर्देवैर्यज्ञः स्वलं
कृतः। सम्यक्परिगृहीतस्य शांतविघ्नो निरामयः। योयदिच्छेत विप्रो वियत्रयत्रात्मनः प्रियं। भगीरथस्य
स्तदा प्रीतस्त्वतत्राददद्दशा। नादेयं ब्राह्मणेभ्यासीद्यस्ययस्याप्रियं धनं। सोपि विप्रप्रसादेन ब्रह्मलो
\\ कं गतो नृपः॥
राज्ञोऽदित्या बांपश्चा सेव पुत्रत्वमगमत्। पुत्राख्यः पुत्रोऽभवदित्यर्थः। तां ऊत्पन्नि रबद्धं॥
सूर्यवंशोत्पन्नं कुं जं॥ ८४

स्यारमखोमुखे स्वारमनयोरिति। मखमुखे वा पिष्टदेवयानोमार्गो कोऽस्मि। दिशाशो। दिश्यायोर्यस्याध्वरायोराज्ञा दक्षिणियं
याः। असौ गंगे ववामखमुखेऽहो मार्गो। नाविद्रजगति येन राज्ञा याता प्राप्ता। अथवा मखमुखाद्भुतोलोको येनयातोको
नावित्याक्षा असाविदेति। असो परः। इदं स्वलिंगमखं चेत्यर्थः। दिशादिश्वतः। सर्वाश्रयणे येन। तेन राज्ञा सदा। पाद पास्त्र

येनयातोमखमुखे। दिशाशाविहपादपाः। तेनावस्थानुमितितिं गंगा राजमीश्वरं। सचेन्ममारस्तंजयवन्तुमेइतरस्तु
या। पुत्रात्तुल्यनरस्तुत्य मा। ऊत्रमन्तत्प्रथाः। अयञानमदक्षिणपमभिप्रेत्येति व्याहरत्॥ द्रोणपर्वणि षोडशराजि
को॥६॥ ॥नारद उवाच॥ दिलीपं चैलविलं श्रुतं जयसुंसूम। यस्य यज्ञशतेष्वासन्प्रयुताश्रुतशो द्विजाः। नवज्ञानार्थ
संपन्नाय ज्वानः पुत्रपौत्रिणः। यइमां वसुसंपूर्णां वसुधां वसुधाधिपः। ईजानो वितते यज्ञे ब्राह्मणेभ्योऽह्यमान्यत। दिलीपस्य च
यज्ञेषु कृतः पंथा हिरण्मयः। तं नमं इवकुर्वाणाः सेंद्रादेवाः समागमन्। चषालं प्रचषालं च यस्य यूपे हिरण्मये

स्यवस्थातुमितिं निसंऊतावचेतनास्थावरा अपितमनुवर्तिनमाकांक्षां तइतिभावः। कथं तंराजं राजानं। इत्थं रमव्याद्तं पतावं
गवाश्रवगम्याः इत्यर्थानां ज्ञानार्थवाह्वा॥६॥ ऐलविलमिलविलायाः पुत्रं तंपथानं नमपि विहासं। चषालं यूपकटकं। प्र
चलषालं मचलाचसमागमत्प्रथाविधावस्याचषालश्चचषालोयदनायागतागतमपि तिर्वद्दतीत्यर्थः॥

॰स्वफलकाख्यः मल्लारहतना॰

हतनागरः॥ षाडवः स्यादसौ रागसंज्ञको रागषाडवः स्यादसो रागषाडवः॥ चक्रेनपरिपेततुः॥ पन निमग्ने। अश्मांतनोऽज्या

द्रोण

रागषाडवनोऽन्ये च भक्ष्याः प्रथितुरशेरते। नदेत दृष्टुनं मन्ये अन्येनैं सहस्रांशपैः॥ यदस्सुसुध्यमानस्य चक्रे नपरिपेततुः। राज्ञो दृढधन्वानं दिलीपं सत्यवादिनं। ये पश्यन्ति सुरिदक्षिणं। नपि स्वर्गजितो नराः। त्रयः शब्दा न जीर्यन्ते केवल निवेशने॥ ५५॥

स्वाध्यायघोषो ज्याघोषः पिबताश्नीत खादत। स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ द्रोणपर्वणि षोडशराजिके॥ ६१॥ ॥नारद उवाच॥ मांधातारं यौवनाश्वं मृतं सृंजय शुश्रुम। देवासुरमनुष्याणां त्रिलोकविजयी नृपः। यं देवावश्विनौ गर्भात्पितुः पूर्वं चकर्षतुः। मृगयां विचरन् राजा तृषितः क्लांतवाहनः। धूमं दृष्ट्वागमत्सत्रं पृषदाज्यमवाप सः। तं दृष्ट्वा युवनाश्वस्य जठरे सुततां गतं। गर्भाद्धि जह्रतु देवावश्विनौ भिषजां वरौ। तं दृष्ट्वा पितुरुत्संगे शयानं देववर्चसं। अन्योन्यमब्रुवन् देवाः कमयं धास्यतीति वै। मामेवायं धयत्वग्रे इति ह स्मादवासवः। ततोंऽगुलीभ्यो हीन्द्रस्य प्रादुरासीत्पयो घृतं। मांधास्यतीति कारुण्यादुक्तो ह्यनुकंपतः॥

शिखादवनस्पतीणि॥ ६१॥ ॥पृषदाज्यं दधिमिश्रं घृतं जलं। तं पृषदाज्यं। धांदसो लिंगव्यत्ययः॥ अयथ प्रथमं इ ८५
नि परेषयोपदेशो। पयो घृतं। सारूप्यमृतं॥

वतिति हस्तस्त्वमेति। अतिरिक्तं दीयत इत्यन्वयः। पर्वतान्नानं दमयान्॥ ६१॥ ॥

॰ हारावर॰

तस्मात्तु मांधातेत्येवं नाम्ना स तु विविश्रुतः। ततस्तु धाराः पयसो घृतस्य च महात्मनः। तस्यास्ये यौवनाश्वस्य पाणिरिंद्रस्य
मांधता२ चास्रवत्। अपिबत्पाणिमिंद्रस्य स चाप्यह्ना व्यवर्द्धत। सोऽभवद्द्वादशसमो द्वादशाहेन वीर्यवान्। इमां च पृथिवीं कृत्स्नामेकाह्ना समवाजयत्। धर्मात्मा धृतिमान्वीरः सत्यसंधो जितेंद्रियः। जन्मेजयं सुधन्वानं गयं पूरुं बृहद्रथं। असितं चैव राजानं च मांधाता मनुजानजयत्। उदेति च यतः सूर्यो यत्र च प्रतितिष्ठति। तत्सर्वं यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते। सोऽश्वमेधशतैरिष्ट्वा राजसूयशतेन च। अदद्रोहितान्मत्स्यान् ब्राह्मणेभ्यो विशांपते। हैरण्यान्योजनोत्सेधानायतान् दशयोजनान्। बहुप्रकारान्सुस्वादून् भक्ष्यभोज्यान्नपर्वतान्। अतिरिक्तं ब्राह्मणानां भुंजतां दीयतां जनैः। भक्ष्यान्नपाननिचयाः शुशुभुस्तत्र पर्वताः। [illegible] दाज्यपंकादधिफेनाङ्गुडोदकाः। रुरुधुः पर्वतान्नद्यो मधुक्षीरवहाः शुभाः। देवासुरनरा यक्षा गंधर्वोरगपक्षिणः। विप्रास्तत्रागतास्त्वासन्वेदवेदांगपारगाः। ब्राह्मणा ऋषयश्चापि न तत्रासन्निरक्षराः। समुद्रांतां वसुपूर्णां वसुंधरां ५१॥
स तां ब्राह्मणसात्कृत्वा जगामास्तं तदा नृपः। गतः पुण्यकृतां लोकान्व्याप्य स्वयशसा दिशः। स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ द्रोणपर्व

चतस्रो होत्रधर्मस्य ऋत्विजो ब्रह्मणः । नाल्पेन पर्याप्तं ॥ ॥९॥ नवद्वयं धर्ममाह । सहस्रेणेति द्वितीयार्थे प्रथमा । अन्यस्तुरितिपाव
णि षोडशराजिके ॥८॥ ॥नारद उवाच॥ ययातिं नाहुषं चैव मृतं सृञ्जय शुश्रुम । राजसूयशतैरिष्ट्वा सोऽश्वमेधश
तेन च । पुण्डरीकसहस्रेण वाजपेयशतैस्तथा । अतिरात्रसहस्रेण चातुर्मास्यैश्च कामतः । अग्निष्टोमैश्च विविधैः सत्रै
श्च प्राज्यदक्षिणैः । अब्राह्मणानां यद्वित्तं पृथिव्यामस्ति किंचन । तत्सर्वं परिसंख्याय ततो ब्राह्मणसात्करोत् । व्यूढे दे
वासुरे युद्धे कृत्वा देवसहायताम् । चतुर्धा व्यभजत्सर्वां पृथिवीमिमाम् । यज्ञैर्नानाविधैरिष्ट्वा प्रजामुत्पाद्य चोत्तमाम् । दे
वयान्यां चोशनस्यां शर्मिष्ठायां च धर्मतः । देवारण्येषु सर्वेषु विजह्रेऽमरोपमः । आत्मनः कामकारेण द्वितीय इव वासवः ।
यदा नाध्यगमच्छान्तिं कामानां सर्ववेदवित् । ततो गाथामिमां गीत्वा सदारः प्राविशद्वनम् । यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रि
यः । नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् । एवं कामान्परित्यज्य ययातिर्धृतिमेत्य च । पूरुं राज्ये प्रतिष्ठाप्य प्रयातो वनमीश्वरः ॥
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ॥ अयज्वानमदाक्षिण्यमभि श्वैत्येत्युदाहरन् ॥
द्रोणपर्वणि षोडशराजिके ॥९॥ ॥नारद उवाच॥ ॥नाभागमम्बरीषं चैव मृतं सृञ्जय शुश्रुम । यः सहस्रं सहस्राणां राज्ञां चै
कमयोधयत् । जिगीषमाणाः संग्रामे समन्ताद्वैरिणोऽभ्ययात् । शस्त्रयुद्धेन घोरास्तं तस्याशिवा गिरः । बललाघवशाक्र

नवकूपाठ ॥

जिगीषमाणा इति पूर्वेणान्वयः । शस्त्रयुद्धविदः इति च ॥ ॥ अन्यत्सु.: पाठ ॥

नेषामिति द्वितीयार्थे षष्ठी । गतव्यथो गतवदिति शेषः । शरण्यं शरणार्थिनो नवाम इष्टैरीप्सितैः । मोदकाः लड्डुकाः ।
पूरिका इति प्रसिद्धाः । अपूपान् पिष्टकान् । धमकान् पर्पटिकाः । शष्कुली दीर्घपूपाः । करम्भान् दधिमन्थान् । पृथ्वीपि

स्तेषां सोऽस्त्रबलेन च । चतुर्बाहुध्वजरथान्निर्बिद्धापासान्गतव्यथः । एनं मुक्तसनात्मा प्रार्थयन्जीवितैषिणः । शरणमीयुश्च श
रणं तव स्म इति वादिनः । स तु तान्वशगान्कृत्वा जित्वा चेमां वसुन्धराम् । ईजे यज्ञशतैरिष्ट्वा शास्त्रदृष्टेन पथानघ । बुभुजुः स
र्वसंपन्नमन्नमन्ये जनास्तदा । तस्मिन्यज्ञे च विप्रेन्द्राः सुपृक्ताः परमार्चिताः । मोदकान्पूरिकापूपान्स्वादु माधमकांस्तथा । शष्कुली
। करम्भान्पृथुमृद्वीकान्नान्यानि सुकृतानि च । सूपान्मैरेयकान्दध्ना रागषाडवपानकान् । मिष्टान्नानि सुयुक्ता
नि पृथूनि सुरभीणि च । घृतं मधु पयस्तोयं दधीनि रसवन्ति च । फलं मूलं च सुस्वादु द्विजास्तत्रोपभुञ्जते । मदनीयानि पानानि
नि विदित्वा चात्मनः सुखम् । अपिबन्त यथाकामं पानपा गीतवादितैः । तत्र स्म गाथा गायन्ति क्षीवा हृष्टाः पठन्ति च । नाभाग
स्तुतिसंयुक्ता नृत्यन्तश्च सहस्रशः । तेषु यज्ञेष्वम्बरीषो दक्षिणामत्यकालयत् । राज्ञां शतसहस्राणि दश प्रयुतयाजिनाम् । हि
रण्यस्यंदनाढ्यान्सानुपात्रपरिच्छदान् । ईजानो विततैर्यज्ञैर्दक्षिणामत्यकालयत् ॥

रकान् । रुचिकापूडान् । मैरेयका
न्मसकडुडान् । विकारान् पूपान् । पूरिकाः । पानकान् पुष्परसादीन् । मृष्टान्नानि स्वादूनि अन्यदन्नानि । सुयुक्तानि सुकल्पितानि

रश्मीनिषिक्ताश्तमहाकलाट॥१७॥ निष्कंतंदशसहस्रं॥ अ इति षष्ठमार्थेक्षिताय॥

द्रोण० रश्मीनिषिक्ताश्चशतानिच।सदंडकोषनिचयाब्राह्मणेभ्योह्यमन्यत।नैवपूर्वेजनाश्चक्रुर्नकरिष्यंतिचापरे।य
द्देवराजोवपतिःकरोत्साितिनदक्षिणाः॥इत्येवमस्मिंदंतवाचाय्रस्यमद्र्थियः।सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया।पुत्रात्पु
ण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः॥अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्॥ द्रोणपर्वणिषोडशराजिके॥२७॥ ॥
नारदउवाच॥ ॥शशबिंदुंचराजानंमृतंसृंजयशुश्रुम।ईजेसविविधैर्यज्ञैःश्रीमान्सत्यपराक्रमः॥तस्यभार्यासहस्रा
णांशतमासीन्महात्मनः।एकैकस्यांचभार्यायांसहस्रंतनयाभवन्॥तेकुमाराःपराक्रांताःसर्वेनियुतयाजिनः॥राजा
नःक्रतुभिर्मुख्यैरीजानावेदपारगाः॥हिरण्यकवचाःसर्वेसर्वेचोत्तमधन्विनः॥सर्वेश्वमेधैरीजानाःकुमाराःशाशबिंदवाः॥अ
श्वमेधेराजेंद्रोब्राह्मणेभ्योददत्पिता।शतंशतंरथगजाएकैकंपृष्ठतोन्वयुः॥राजपुत्रंतदाकन्यास्तपनीयस्वलंकृताः॥कन्यां
नागे कन्यांशतंनागानागेनागेशतंरथाः।रथेरथेशतंचाश्वाबलिनोहेममालिनः॥अश्वेअश्वेसहस्रंगागवांपश्चादजाविकं।एतद्ध
नमपर्यंतमश्वमेधेमहामखे।शशबिंदुर्महाभागोब्राह्मणेभ्योह्यमन्यत॥वार्क्षाश्चयूपायावंतोअश्वमेधेमहामखे।तेतथै
वपुनस्तावंतःकांचनाःसर्वेअन्नपानानिचयाःपर्वताःक्रोशमुच्छ्रिताः॥तस्याश्वमेधेनिर्वृत्तेराज्ञःशिष्टास्त्रयोदशः ८१

ततोऽभित॥ अन्नाद्युत्थाम्लीयास्तु॥शतंशतानिदशसहस्राणि॥नचतत्रदक्षिणाः॥नचतत्रविहितद्रव्याणि॥

तुष्टपुष्टजनाकीर्णःशांतविघ्नोह्यनामयः॥शशबिंदुरिमांभूमिंचिरंभुक्त्वादिवंगतः।सचेन्ममारसृंजयचतुर्भद्रतरस्त्व
या।पुत्रात्पुण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः॥अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्॥ ॥द्रोणपर्वणिषोडशराजि
के॥२८॥ ॥नारदउवाच॥ ॥गयंचामूर्तरयसंमृतंसृंजयशुश्रुम।योवैवर्षशतंराजाकृताशिनोभवत्।तस्मैह्यग्निर्वरं हुता
प्रादात्ततोवव्रेवरंगयः॥तपसाब्रह्मचर्येणव्रतेननियमेनच॥गुरूणांचप्रसादेनवेदानिच्छामिवेदितुं।स्वधर्मेणाविहिंस्या
न्यान्धनमिच्छामिचाक्षयं।विप्रेषुददतःश्रद्धाचभवत्वनिशंतथा॥अनन्यासुसवर्णासुपुत्रजन्मचमेभवेत्।अन्नंमेदद
तःश्रद्धाधर्मेमेरमतांमनः॥अविघ्नंचास्तुमेनित्यंधर्मकार्येषुपावक।तथानविघ्नतास्तत्कालतत्रैवातस्थायत।गयोऽप्यवा
प्यतत्सर्वंधर्मेणारीनजीयत्।सदर्शपौर्णमासाभ्यांकालेचाग्रयणेनच।चातुर्मास्यैश्चविविधैर्यज्ञैश्चावाप्तदक्षिणैः॥अय
जच्छ्रद्धयाराजापरिसंवत्सरान्शतं।गवांशतसहस्राणिशतमश्वशतानिच।शतंनिष्कसहस्राणिगवांचाप्ययुतानिषट्।अन्त्वा
योत्थायप्रादात्परिसंवत्सरान्शतं।नक्षत्रेषुचसर्वेषुददन्नक्षत्रदक्षिणाः॥ईजेचविविधैर्यज्ञैर्यथासोमोंगिरायथा।सौ
वर्णांपृथिवींकृत्वायइमांमणिशर्करां।विप्रेभ्यःप्रददौराजासोऽश्वमेधेमहामखे।जांबूनदमयायूपाःसर्वेरत्नपरिच्छदाः॥

पंडीत

मद्दशमङ्गतः॥ एरुरक्षस्तउपस्थितेभ्यः। पश्चाद्विंशद्योजनमायतानां॥ विस्तारोपि रक्तस्तु विंशद्योजनमायातः इत्यर्थः॥ कुमारः

द्रोण०

गयस्यासन्सहस्राणि सर्वस्त्रिन मनोहराः॥ सर्वकामसमृद्धांश्च प्रादान्नासु गयस्तदा। ब्राह्मणेभ्यः प्रहृष्टेभ्यः सर्वभूतेभ्य एव
च। ससमुद्रवनद्वीपनदीनदवनेषु च। नगरेषु च राष्ट्रेषु दिवि व्योम्नि च येवसन्। भूतग्रामाश्च विविधाः संतृप्ता यज्ञसंप
दा। गयस्य सदृशो यज्ञो नास्त्यन्य इति ते ब्रुवन्। षट्त्रिंशद्योजनायामा त्रिंशद्योजनमायता। पश्चात्पुरस्तु विंशद्वेदाह्या
सा हिरण्मयी॥ गयस्य यजमानस्य मुक्तावज्रमणीस्तृता। प्रादात्स ब्राह्मणेभ्योथ वासांस्याभरणानि च। यथोक्तां दक्षिणां चा
न्या विप्रेभ्यो भूरिदक्षिणाः॥ यत्र भोजनशिष्टस्य पर्वताः पंचविंशतिः॥ कुल्याः कुशरवाहिन्यो रसानामनवंस्तदा॥ वस्त्रा
भरणगंधानां राशयश्च पृथग्विधाः॥ यस्य प्रभावाद्गयस्त्रिषु लोकेषु विश्रुतः॥ वटश्चाक्षय्यकरणः पुण्यं ब्रह्मसरश्च
यत्तत्। सचेन्ममार सृंजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्
॥ द्रोणपर्वणि षोडशराजिके॥ ६२॥ ॥नारद उवाच॥ ॥सांकृतिं रंतिदेवं च मृतं सृंजय शुश्रुम। यस्य द्विशतसाहस्रा आ
संस्तदा महात्मनः॥ गृहानभ्यागता विप्रानतिथीन्परिवेषकाः। पक्वापक्वं दिवारात्रमपर्यंतधनं तदा। न्यायेनाधिगतं वित्तं
ब्राह्मणेभ्यो ह्यमन्यत। वेदानधीत्य धर्मेण यश्चक्रे द्विषतो वशे। उपस्थितान्पशून्स्वयंयं शंसितव्रतान्। बहून्स्वर्गमिवेतो वि
धिवत्सत्रयाजिनं॥ ॥ ८८

ञोरविकारः॥ ६२॥ पक्वापक्वं पक्वमपक्वं चेति द्वैराज्यः॥ हेमरूप्यं। वित्तं। कुप्यं॥

महानसात्पाकस्थानात्। अग्निहोत्रादग्निहोत्रमवधीकृत्य महानसाग्निहोत्रयोर्मध्य इत्यर्थः॥ दास्यतिसंप्रदास्यतीति वि
स्मये द्विरुक्तिः सुवर्णानां साधुमष्टोत्तरं शतं निष्कमाहुस्तद्वाध्यं इमाममहमासकाधिकं पलमाहुरित्यत्र एत्याद्यास
शत

नदीमहानसाद्यच्च प्रवृत्ता चर्मराशितः॥ तस्माच्चर्मण्वती पूर्वमग्निहोत्रेऽभवत्पुरा। ब्राह्मणेभ्यो ददौ निष्कान्सौवर्णान्सुप्र
भावतः॥ तुभ्यं निष्कं तुभ्यं निष्कमिति स्म प्रभाषति। तुभ्यं तुभ्यं तुभ्यमिति प्रादान्निष्कान्सहस्रशः॥ ततः पुनः समाश्वास्य निष्का
न्वै प्रयच्छति। अल्पं दत्तं मयाद्येति निष्ककोटिप्रदायकः॥ एकाह्नादास्यति पुनः कोन्यस्तं संप्रदास्यति। द्विजपाणिवियोगेन दुः
खं मे शाश्वतं महत्। भविष्यति न संदेह एवं राजा ददद्वसु। सहस्रशश्च सौवर्णान्वृषभान्गोशतानुगान्। साष्टं शतं सुवर्णानां नि
ष्कमाहुः पलं तथा। अर्धमासममदद्ब्राह्मणेभ्यः शतं समाः॥ अग्निहोत्रोपकरणं यज्ञोपकरणं च यत्। ऋषिभ्यः करकान्कुं
भान्स्थालीः पिठरमेव च। शयनासनयानानि प्रासादांश्च गृहाणि च। हक्षांश्च विविधान्दद्यादन्नानि च धनानि च। सर्वं सौवर्ण
मेवासीद्रंतिदेवस्य धीमतः॥ तत्रास्य गाथा गायंति ये पुराणविदो जनाः। रंतिदेवस्य तां दृष्ट्वा समृद्धिमतिमानुषीं। नैतादृशं
दृष्टपूर्वं कुबेरसदनेष्वपि। धनं च पूर्यमाणं नः किं पुनर्मनुजेष्विति। व्यक्तं वस्वोकसारेयमित्यूचुस्तत्र विस्मिताः॥ सांकृते रंति

दन्नानि च धनानि च वाव:॥

कतः॥ अनेन मानेन निष्ककोटिं शतं समाश्च ददद्दित्यनुषंगः॥ वनानि वा ददद्दित्यनुषंगः॥ वस्वोकसारामरावती॥

२३॥ ॥दक्षिणापावयित्वा। जंतुराशिभिः संपूर्णा मनःशिलाद्वलक्षीशिरा अकरोदित्यव्ययः॥

द्रो०
देवस्य यां रात्रिमतिथिर्वसेत्। आलभ्यंत तदा गावः सहस्राण्येकविंशतिः॥ तत्र स्म सूदाः क्रोशंति सुमृष्टमणि
कुंडलाः॥ सूपं भूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा॥ रंतिदेवस्य यत्किंचित्सौवर्णमभवत्तदा। तत्सर्वं वितते यज्ञे ब्रा
ह्मणेभ्यो ह्यमन्यत॥ प्रत्यक्षं तस्य हव्यानि प्रतिगृह्णंति देवताः॥ कव्यानि पितरः काले सर्वकामा द्विजोत्तमाः॥ स चे
न्ममार सृंजय चतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वानमदाक्षिण्यमभिश्वैत्यानि व्याहरन्॥
द्रोणपर्वणि षोडशराजिके॥२३॥ ॥नारद उवाच॥ दौष्यंतिं भरतं चापि मृतं सृंजय शुश्रुम। कर्माण्यसुकराण्यन्यैः
कृतवान्यः शिशुर्वने॥ हिमावदातान्यः सिंहान्नखदंष्ट्रायुधान्बली। निर्वीर्यांस्तरसाक्रम्य विचकर्ष बबंध च॥ क्रूरांश्चोग्र
बलान्व्याघ्रान्दमित्वा चाकरोद्वशे। मनःशिलाइव शिलाइव शिलासंहननानजितराशिभिः॥ व्यालादंष्ट्रा। तिबलवान्सत्वान्सु
प्रगाढानपि दंष्ट्रांश्चगृह्याव रुरुस्युक्काम्यानकरोद्वशे। महिषानप्यतिबलान्बलिनो विचकर्ष हि। सिंहानां च सहस्रा
णि शतान्यदमयद्बलात्। बलिनः सृमरान्खड्गान्नानासत्वानि चाप्युत। कृच्छ्रप्राणान्वने बद्ध्वा दमयित्वाप्यपासृजत्। तं सर्व ६९
दमनेत्याहुः ख्यातिमत्स्यात्स कर्मणा॥ तं प्रत्यषेधज्जननी मा सत्वानि विव्यधीरिति। सोऽश्वमेधशतेनेष्ट्वा यमुनामनु वीर्यवान्। त्रिंशतो
ऽश्वान्सरस्वत्यां गंगामनु चतुःशतान्। सोऽश्वमेधसहस्रेण राजसूयशतेन च॥

त्र्यः। विश्वजिता चेष्ट्वा नविश्वजिता चापरिमाणेन विपुलेन तथा। चक्रवर्ती सार्वभौमः॥ ॥२४॥ अष्टिताभ्यष्टिपते ख्याति

ऊनरी। जमहायज्ञैः समाप्तवरदक्षिणैः॥ अग्निष्टोमातिरात्राभ्यामुक्थ्यविश्वजिताभ्यपि। वाजपेयसहस्राणां सहस्रे
श्च सुसंवृतैः॥ दुष्यंताशाकुंतलो राजा तर्पयित्वा द्विजान्धनैः॥ सहस्रं यत्र पद्मानां कण्वाय भरतो ददौ॥ जांबूनदस्य पमानं॥
शुद्धस्य कनकस्य महायशाः॥ यस्य यूपः शतव्यामः परिणाहेन कांचनः। समागम्य द्विजैः सार्धं सेंद्रैर्देवैः समुच्छ्रितः॥ स्व
लंकृतान्भ्राजमानान्सर्वरत्नैर्मनोरमैः॥ हिरण्यानश्वान्द्विरदान्रथानुष्ट्रानजाविकान्॥ दासीदासं धनं धान्यं गाः सवत्साः
पयस्विनीः॥ ग्रामान्गृहाणि क्षेत्राणि विविधांश्च परिच्छदान्॥ कोटिशतायुतांश्चैव ब्राह्मणेभ्यो ह्यमन्यत। चक्रवर्ती ह्यदीना
त्मा जेतारीनजितः परैः। स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया॥ पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ अयज्वान
मदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ॥द्रोणपर्वणि षोडशराजिके॥२४॥ ॥नारद उवाच॥ ॥पृथुं वैण्यं च राजा
नं मृतं सृंजय शुश्रुम। यमभ्यषिंचन्साम्राज्ये राजसूये महर्षयः॥ यत्नतः प्रथितेत्यूचुः सर्वानभिभवन्पृथुः। क्षतान्नस्त्रा
स्यते सर्वानित्येवं क्षत्रियोऽभवत्॥ पृथुं वैण्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन्। ततो राजेति नामास्य अनुरागादजायत॥
अकृष्टपच्या पृथिवी आसीद्वैण्यस्य कामधुक्। सर्वाः कामदुघा गावः पुटके पुटके मधु। आसन्हिरण्मया दर्भाः सुखस्पर्शाः
सुखावहाः॥ तेषां चीराणि संवीताः प्रजास्तेष्वेव शेरते॥

यास्यतीत्यर्थः॥ क्षतात्परित्रायात्॥

जवयस्यकेतनस्यसर्गःप्रतिबंधः। नंगइतिवापाठः॥ शाश्वतीःसमाइतिशेषः॥ अहं बरं उडुंबरदारुमयं। दोग्धाचक्रति गो

द्रोण० फलान्यमृतकल्पानि निर्मलानिच मृदूनिच। तेषामासीत्तदाहारो निराहारास्तुनाभवन्। अरोगाःसर्वसिद्धार्थामनुष्या
अकुतोभयाः। न्यवसंतयथाकामं वृक्षेषुच गुहासुच। प्रविभागो नराष्ट्राणां पुराणांचानवत्तदा। यथासुखं यथाकाम
तथैवमुदिताःप्रजाः। तस्याभिषिक्तमात्रस्य सम्यक्पृथोःसमुद्रमभिय्यास्यतः। पर्वतश्चददुर्मार्गं ध्वजसंगश्चनाभवत्। तं वनस्पतयः
शैलादेवासुरनरोरगाः। सप्तर्षयःपुण्यजना गंधर्वाप्सरसोपिच। पितरश्चसुखासीनमभिगम्येदमब्रुवन्। सम्राडसि
क्षत्रियोसिराजागोप्तापितासि नः। देह्यस्मभ्यं महाराज प्रभुःसन्नीप्सितान्वरान्। यैर्वयंशाश्वतीस्तृप्तीर्वर्तयिष्यामहे
सुखं। तथेत्युक्त्वा पृथुर्वैण्यो गृहीत्वाजगवंधनुः। शरांश्चाप्रतिमान्घोरांश्चिंतयित्वाब्रवीन्महीं। एह्येहि वसुधे क्षिप्रमेभ्यः
क्षरकांक्षितंपयः। ततोदास्यामि भद्रंते अन्नं यस्ययथेप्सितं॥ ॥वसुधोवाच॥ दुहितृत्वेनमांवीर संकल्पयितुमर्ह
सि। तथेत्युक्त्वा पृथुःसंविधानमकरोद्वशी। ततोभूतनिकायास्तां वसुधांदुदुहुस्तदा। तांवनस्पतयःपूर्वंसमुत्तस्थुर्दु
धुक्षवः। सातिष्ठत्वत्सलावत्सं दोग्धृपात्राणिचेच्छती। वत्सोभूत्पुष्पितःशालःप्लक्षोदोग्धाभवत्तदा। छिन्नप्ररोहणं दुग्धंपा
त्रमौदुंबरंशुभं। उदयःपर्वतोवत्सो मेरुर्दोग्धामहागिरिः। रत्नान्योषधयोदुग्धंपात्रमश्ममयंतथा। दोग्धाचासीत्तदादेवो दुग्धं
ऊर्जस्करंप्रियं। असुरादुदुहुर्मायामामपात्रेतुतेतदा॥ वत्सपात्रयोःसंबंधकः॥ ॥इंद्रोवत्सःकांचनं पात्रमित्य ९५
र्थः॥ ऊर्जस्करममृतं॥

ते

वत्सआसीत्तदा। तेषां गायत्रीप्रमुखं। विवस्वतइतिप्रमवित्रेषणं। छंदेतकः मृत्युः। पयोमीष्टान्यभिमतानिवयांसि॥ विरा२टं थ्री।पा।

दोग्धाद्विमूर्धातत्रासीद्वत्सश्चासीद्विरोचनः। कृषिंचसस्यंचनरा दुदुहुःपृथिवीतले। स्वायंभुवोमनुर्वत्सस्तेषां दोग्धाभवत्पृ
थुः। अलाबुपात्रेच तथाविषं दुग्धावसुंधरा। धृतराष्ट्रोभवद्दोग्धा तेषांवत्सस्तुतक्षकः। सप्तर्षिभिर्ब्रह्मदुग्धा तथा चाक्लि
ष्टकर्मभिः। दोग्धा बृहस्पतिःपात्रं छंदोवत्सश्चसोमराट्। अंतर्धानंचामपात्रे दुग्धा पुण्यजनैर्विराट्। दोग्धा वैश्रव
णस्तेषांवत्सश्चासीद्वृषध्वजः। पुण्यगंधान्पद्मपात्रेगंधर्वाप्सरसोदुहन्। वत्सश्चित्ररथस्तेषां दोग्धा विश्वरुचिःप्रभुः। स्वधांरज
तपात्रेदुदुहुःपितरश्चतं। वत्सोवैवस्वतस्तेषां यमोदोग्धांतकस्तदा। एवंनिकायैस्तैर्दुग्धा पयोभीष्टंहिसाविराट्। तैर्व
र्तयंतितेह्यद्य पात्रैर्वत्सैश्चनित्यशः। यज्ञैश्चविविधैरिष्ट्वा पृथुर्वैण्यःप्रतापवान्। संतर्पयित्वाभूतानि सर्वैःकामैर्मनःप्रि
यैः। हैरण्यानकरोद्राजा येकेचित्पार्थिवाभुवि। तान्ब्राह्मणेभ्यःप्रायच्छदश्वमेधेमहामखे। षष्टिंनागसहस्राणि षष्टिंना
गशतानिच। सौवर्णानकरोद्राजा ब्राह्मणेभ्यश्चतान्ददौ। इमांचपृथिवींसर्वां मणिरत्नविभूषितां। सौवर्णीमकरोद्रा
जा ब्राह्मणेभ्यश्चताददौ। सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया। पुत्रात्पुण्यतरस्तुभ्यं माशुचोमेत्युप्यथाः। अयज्वानमद
क्षिणमभिश्वैत्येत्युदाहरन्॥ द्रोणपर्वणिषोडशराजिके॥ २५॥ ॥नारदउवाच॥ रामोमहातपाःशूरोवीर
लोकनमस्कृतः। जर

र्थिवाःपृथिवीसंबंधिनःपदार्थाः॥२५॥ ॥येमृतास्तेऽतीतायेवर्तमानास्तेपिमरिष्यंत्येवेत्याह। रामइति

द्रो०रा

यो रामः॥ इमां त्वमि। सुखामनुपश्यन् कुर्वन्नायमादि सुगम्। विदितं धर्मं आनुपर्येनिम्या आनुपरिगतवान्॥ एतेन नवा नानिवात्॥
अतएव वर्णितवानित्यर्थः॥ यस्मेत्यत्र। निरुक्तेर्विसर्गलोपः॥ यस्येति सुखमिति च पाठो यस्य रामस्य इमां न्वमिप यर्येनिपरित्नमति
। जनो यात्। आयमविरुतं सुखमनुकुर्वन्॥ वसेगोपोते। पितरि जमदग्नौ। क्षत्रियैः कार्त्तवीर्ये नस्त्राविः क्रमेणापरामृष्टे अत्रु दन्

॥यस्माद्य मनुपाव:

मदम्यो प्यतियशाक्त विरसो मरिष्यति। यः स्माद्यमनुपर्येनित्वमिकुर्वन्निमां सुखां। नवामादिक्रियायस्य प्राप्य श्रियमनुत्तमां। यः क्षत्रियैः प
रामृष्टे वसे पितरि चासुवृत्तो वधीत्कार्त्तवीर्यमजितं समरे परैः॥ क्षत्रियाणां वनः पहिमयुतानि सहस्रशः॥ तदा सूत्तोः समेतानि एके
कं धनुषा जयत्। ब्रह्मद्विषां चाथ तस्मिन्नष्टसाणिवनई शः॥ पुनरन्यानि जयाद् दंडनकुरे जयानदा मदसप्तमलेना गुत्सदस्नमसि
नावधीत्। उर्ध्वं धनाःसहस्रं च न्देह्याः समरदना॥ समरयाश्च गजा वीरा निहताः स्त्र रोतो। पितृवधममर्षितेन जामदग्न्येन धीमता॥
नि जघ्ने देश सहस्रा शमः परमोस्तुना तदा॥ न ह्यमृष्यत तावाबोया स्त्रेनेश सुदीरिता॥ न्तगो रामाभिधावेतियदा कंदन्दि जोन
माः। ततः काश्मारदरदान् कुंति क्षुद्रक मालवान्॥ अंगवंगकलिंगांश्च विदेहान् ताम्रलिप्तकान्॥ रक्षोवाहान् वीतिहोत्रांस्त्रि
गर्तान्मार्तिकावतान्॥ शिबीनन्यांश्च राजन्यान्देशान्सहस्रशः॥ निजघान शितैर्बाणैर्जामदग्न्यः प्रतापवान्॥ कोटीशतसहस्राणां द
शत
॥ क्षत्रियाणां सहस्रश २०१
विकचनात्। अयुतानां च तः षष्टिः सहस्रशः॥ चतुःषष्टिकोटारित्यर्थः॥ मृत्यो मृत्युमवधीकृत्य। तस्मिंस्तन्मध्ये
एवं। जयाद् निजयाद्। दंतकूरे दंतकूर देशाधिपात् हंधनात्। तरुच्यारवावलं वनात्। नैराश्यमवासितः॥

परीवापान्। पवापाद्। नामरांसि कृत्वा। नाश्चादशद्वीपानिति। त्रयोदशाभिरूपाद्विपैः॥ महान् तथा दि। अंगवंगनमलयसंज्ञाः
शंखास्पश्चास्त्रकोव न्यादशा। एतेष द्रुपदीपा जंबूद्वीपे परिख्याताः॥ गोमेदः कुशद्वीपश्च मद्रगा संज्ञितस्तथा लंकामि

इंद्रगोपकवर्णस्य बंधुजीवनिभस्य च। रुधिरस्य परीवापान्स्थापयित्वा सरांसि च। सर्वानष्टादश द्वीपान्वशमानीय भार्गव
ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणैः॥ वेदीमष्टनलोत्सेधां सौवर्णां विधिनिर्मितां। सर्वरत्नशतैः पूर्णां पताकाशतमा
लिनीं। ग्राम्यारण्यैः पशुगणैः संपूर्णां च महीमिमां॥ रामस्य जामदग्न्यस्य प्रतिजग्राह कश्यपः॥ ततः शतसहस्राणि द्विपेंद्रान्हे
मभूषणान्॥ रामस्य जामदग्न्यस्य प्रतिजग्राह कश्यपः। निर्दस्युं पृथिवीं कृत्वा शिष्टेष्टजनसंकुलां॥ कश्यपाय ददौ रामो हयमे
धमहामखे॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः। इष्ट्वा क्रतुशतैर्वीरो ब्राह्मणेभ्यो ह्यमन्यत॥ सप्तद्वीपां वसुमतीं
मारीचाय ददौ द्विजः॥ रामं प्रोवाच निर्गच्छ वसुधातो ममाज्ञया। स कश्यपस्य वचनात्प्रोत्सार्य सरितां पतिं। इषुपातैर्युधां
श्रेष्ठः कुर्वन्ब्राह्मणशासनं॥ अध्यावसद्गिरिश्रेष्ठं महेंद्रं पर्वतोत्तमं। एवं गुणशतैर्जुष्टो भृगूणां कीर्तिवर्धनः॥ जामदग्न्योप्य
तियशा मरिष्यति महाद्युतिः॥ त्वया चतुर्भद्रतरः पुत्रात्पुण्यतरस्तव। अयज्वानमदाक्षिण्यमा पुत्रमनुतप्यथाः॥ एते चतुर्भ
द्रतरास्त्वया भद्रशताधिकाः॥ मृता नरवरश्रेष्ठ मरिष्यंति च सृंजय॥ ॥ द्रोणपर्वणि षोडशराजिकं॥ ७०॥
हल इत्याख्यायाः
एवं त्वमीप्सामताना स्यात्। अप्रपन्नेत्यन्न तलदुत्तमशब्दु इसवचन॥ शिष्यः माधवः ५ इत्याभिमताः॥ गिरिश्रेष्ठं पर्वतोत्तमं तुल्यार्थोदिश यसा
दा॥ १६॥

विस्मापयेत चित्रविस्तारेण। प्रतीतः प्रीतः। सान्त्वादिका कृतसन्त्वादः। वरः समर्थः। वीरः सोत्साहः। शिष्टशोदिति॥ चिष्टेरिति वा॰पा॰॥

द्रोण व्यासउवाच॥ ॥ उपाख्यानमायुष्यं श्रुत्वा षोडशराजिकं। अव्याहरन्नरपतिस्तूष्णीमासीत्ससंजयः। तमब्रवीत्तथासीनं
नारदो भगवानृषिः। श्रुतं कीर्तिमतो मह्यं गृहीतं ते महाद्युते। आहोस्विदन्ततो नष्टं श्राद्धं शूद्रापताविव। स एवमुक्तः प्रत्याह
प्राञ्जलिः संजयस्तदा। एतच्छ्रुत्वा महाबाहो धन्यमाख्यानमुत्तमं। राजर्षीणां पुराणानां यज्वनां दक्षिणावतां। विस्मयेन हृते
शोके तमसीवार्कतेजसा। विपाप्मास्म्यव्यथोपेतो ब्रूहि किं करवाण्यहं॥ ॥नारद उवाच॥ ॥दिष्ट्यापहृतशोकस्त्वं वृणी
ष्वेदयमिहमितत्तत्प्रपत्स्यसे सर्वं न मृषावादिनो वयं॥ ॥संजय उवाच॥ ॥एतेनैव प्रतीतोऽहं प्रसन्नो यद्भवान्मम। प्रसन्नो य
स्य भगवान्न तस्यास्तीह दुर्लभं॥ ॥नारद उवाच॥ ॥पुनर्ददानि ते पुत्रं दस्युभिर्निहतं वृथा। उद्धृत्य नरकात्कष्टात्पशुमप्रोक्षि
तं यथा॥ ॥व्यास उवाच॥ ॥प्रादुरासीत्ततः पुत्रः संजयस्याद्भुतप्रभः। प्रसन्नेनर्षिणा दत्तः कुबेरतनयोपमः। ततः संगम्य पु
त्रेण प्रीतिमानभवन्नृपः। ईजे च क्रतुभिः पुण्यैः समाप्तवरदक्षिणैः। अकृतार्थश्च भीतश्च न च सान्नाहिको हतः। अयज्वा त्वनप
त्यश्च ततोऽसौ जीवितः पुनः। शूरो वीरः कृतार्थश्च प्रताप्यारीन्सहस्रशः। अभिमन्युर्गतो वीरः पृतनाभिमुखो हतः। ब्रह्मचर्येण
याः केचित्प्रज्ञया च श्रुतेन च। इष्टैश्च क्रतुभिर्यान्ति तांस्ते पुत्रोऽक्षयान्गतः। विद्वांसः कर्मभिः पुण्यैः स्वर्गमीहन्ति नित्यशः॥ १५२
न तु स्वर्गादयं लोकः काम्यते स्वर्गवासिभिः॥

शक्यं शक्यमुक्तिं किंचिदतिवर्च्यमिदमीप्सितं प्राप्यमित्यर्थः। किंचित्प्राप्यमीशितुमिति पाठे अप्राप्यं किंचिदीशितुमुप
लब्धं प्रतिमानयितुं न शक्यं रणमरणेन सर्वकामानां प्राप्तत्वादिति भावः। अन्तान्मरणान्नाभावमन्तःसंपत्प्राप्तैः। द्विजोचितां हि
तस्मात्स्वर्गगतं पुत्रमर्जुनस्य हतं रणे। नेहानयितुं शक्यं हि किंचित्प्राप्यमीशितुं। यां योगिनो ध्यानविविक्तदर्शनाः प्रयान्ति
यां चोत्तमयागयाजिनः। तपोभिरिद्धैरनुयान्ति यां तथा तामक्षयां ते तनयो गतो गतिं। अन्तात्पुनर्भावगतो विराजते राजेव वी
रो ह्यमृतात्मरश्मिभिः। तामैन्दवीमात्मतनुं द्विजोचितां गतोऽभिमन्युर्न स शोकमर्हति। एवं ज्ञात्वा स्थिरो भूत्वा जह्यरीन्नाधैर्य
माप्नुहि। जीवन्त एव नः शोच्या न तु स्वर्गगतोऽनघ। शोचतो हि महाराज अघमेवाभिवर्द्धते। तस्माच्छोकं परित्यज्य श्रेयसे प्रयते
द्बुधः। प्रहर्षमभिमानं च सुखप्राप्तिं च चिन्तयन्। एतद्बुद्ध्वा बुधाः शोकं न शोकः शोक उच्यते। एवं विद्वान्समुत्तिष्ठ प्रयतो भव मा
शुचः। श्रुतस्ते संभवो मृत्योस्तपांस्यनुपमानि च। सर्वभूतसमत्वं च चंचलाश्च विभूतयः। संजयस्य तु तं पुत्रं मृतं संजीवितं पुनः।
एवं विद्वन्महाराज मा शुचः साधयाम्यहं। एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत। वागीशाने भगवति व्यासे व्यभ्रनभःप्रभे॥

जिरभिमतो। अहं पापं दुःखं वा अभिमानं मानातिशयं। चिंतयन्नभिलषन्। अनेतिका काचिद्बहुभयत्र संबध्यते। पूर्वतो बु
धानकुर्वन्तीति शेषः। परतो न शोकः शोक इत्युच्यते। किं त्वात्मिवशोक इत्यर्थः। संजयस्य पुत्रमुद्दिश्य एवं चंचला विभूतयश्च श्रु
ता इति मशेषानुषंगः॥ ॥

इति षोडशराजिकं पूर्णं॥ ॥सत्रकं वो दीनस्य रा॥ ह्रिष्टमनुवर्हं। अयशासितो तिष्ठस्त्व मकाः। नंदंति वर्द्धंते। स्वबदश्य्यर्थी॥

द्रोण गतिमतिमतां श्रेष्ठे समासाद्य युधिष्ठिरः पूर्वेषां पार्थिवेंद्राणां महेंद्रप्रतिमौजसां। न्यायाधिगतवित्तानां तां श्रुत्वा यज्ञसं
पदां संपूज्य मनसा विशोकोऽभवद्युधिष्ठिरः॥ पुनश्चाचिंतयद्दीनः किंस्विद्वक्ष्ये धनंजयं॥ ॥इति द्रोणपर्वणि षोडशराजि
कं समाप्तं॥ ॥संजय उवाच॥ ॥तस्मिन्नहनि निर्वृत्ते घोरे प्राणभृतां क्षये। आदित्येऽस्तंगते श्रीमान्संध्याकाल उपस्थिते॥
व्यपयातेषु वासाय सर्वेषु भरतर्षभ। हत्वा संशप्तकव्रातान्दिव्यैरस्त्रैः कपिध्वजः॥ प्रायात्स्वशिबिरं जिष्णुर्जैत्रमास्थाय तं
रथं। गच्छन्नेव च गोविंदं सन्नकंठोऽभ्यभाषत। किं नु मे हृदयं त्रस्तं वाक्च सज्जति केशव। स्पंदंति वाप्यनिष्टानि गात्रं सीदति चा
च्युत। अनिष्टं चैव मे श्लिष्टं हृदयान्नापसर्पति। भुवि यद्दिक्षु चाप्युग्रा उत्पातास्त्रासयंति मां। बहुप्रकारा दृश्यंते सर्व एवा
घशंसिनः। अपि स्वस्ति भवेद्राज्ञः सामात्यस्य गुरोर्मम॥ ॥वासुदेव उवाच॥ ॥व्यक्तं शिवं तव भ्रातुः सामात्यस्य भविष्य
ति। मा शुचः किंचिदेवान्यत्तत्रानिष्टं भविष्यति॥ संजय उवाच॥ ॥ततः संध्यामुपास्यैव वीरौ वीरावसादने। कथयंतौ र
णे वृत्तं प्रयातौ रथमास्थितौ। ततः स्वशिबिरं प्राप्तौ हतानंदं हतत्विषं। वासुदेवोऽर्जुनश्चैव कृत्वा कर्म सुदुष्करं। ध्वस्ताकारं २५२
समालक्ष्य शिबिरं परवीरहा। बीभत्सुरब्रवीत्कृष्णमस्वस्थहृदयस्ततः। नंदंति नाद्य तूर्याणि मंगलानि जनार्दन। मिश्रा दुंदुभिनिर्घोषैः

आडंबरैर्गर्जगर्जितैः। वीणा वा वाद्यमिव वा वाद्यते स्म वत्र नत्र तु पंजनीयः। शम्यास्वराणां शारंगप्रक्रियाभिः प्रकारेण। नोल

शंखाश्चाडंबरैः सह। वीणा वा वाद्य न वाद्यंते शम्यातालस्वनैः सह। मंगल्यानि च गीतानि न गायंति पठंति वा। स्तुतियुक्तानि र
म्याणि ममानीकेषु बंदिनः। योधाश्चापि हि मां दृष्ट्वा निवर्तंते ह्यधोमुखाः। कर्माणि च यथापूर्वं कृत्वा नाभिवदंति मां। अपि स्वस्ति
भवेदद्य भ्रातृभ्यो मम माधव। न हि शुध्यति मे भावो दृष्ट्वा स्वजनमाकुलं। अपि पांचालराजस्य विराटस्य च मानद। सर्वेषां चै
व योधानां सामग्र्यं स्यान्ममाच्युत। न च मामद्य सौभद्रः प्रहृष्टो भ्रातृभिः सह। रणादायांतमुचितं प्रत्युद्याति हसन्निव। एवं सं
कथयंतौ तौ प्रविष्टौ शिबिरं स्वकं। ददृशाते भृशास्वस्थान्पांडवान्नष्टचेतसः। दृष्ट्वा भ्रातॄंश्च पुत्रांश्च विमना वानरध्वजः। अप
श्यंश्चैव सौभद्रमिदं वचनमब्रवीत्। मुखवर्णोऽप्रसन्नो वः सर्वेषामेव लक्ष्यते। न चाभिमन्युं पश्यामि न च मां प्रतिनंदथ। मया
श्रुतश्च द्रोणेन चक्रव्यूहो विनिर्मितः। न च वस्तस्य भेत्तास्ति विना सौभद्रमर्भकं। न चोपदिष्टस्तस्यासीन्मयानीकाद्विनिर्गमः॥
कच्चिन्न बालो युष्माभिः परानीकं प्रवेशितः। भित्त्वानीकं महेष्वासः परेषां बहुशो युधि। कच्चिन्न निहतः शेते सौभद्रः परवी
रहा। लोहिताक्षं महाबाहुं जातं सिंहमिवाद्रिषु। उपेंद्रसदृशं ब्रूत कथमायोधने हतः। सुकुमारं महेष्वासं वासवस्यात्मजा
योध त्मजं। सदा मम प्रियं ब्रूत कथमाने हतः। सुभद्रायाः प्रियं पुत्रं द्रौपद्याः केशवस्य च। अंबायाश्च प्रियं नित्यं कोऽवधीत्कालचोदि

करणधनिः। अस्यनिबद्धवीत्वयः। उचितमिति क्रियाविशेषणं॥

दांतं विनीतं। अन्यच्चाहुतं। पुंस्कोकिलसमध्वनिं संस्तुवंतं यस्या। अस्य हृदयस्या। अघेनिवापाठः

द्रोण ना। सहशोर्हस्तिसिंहस्य केशवस्य महात्मनः॥ विक्रमश्रुतमाहात्म्यैः कथमायोधने हतः॥ वार्ष्णेयीदयितं शूरं मयास
दालालितं। यदि पुत्रं न पश्यामि यास्यामि यमसादनं। मृदुकुंचितकेशांतं बालं बालमृगेक्षणं। मत्तद्विरदविक्रां
तं शालपोतमिवोद्गतं। स्मिताभिभाषिणं दांतं गुरुवाक्यकरं सदा। बाल्येप्यबालकर्माणं प्रियवाक्यममत्सरं। म
होत्साहं महाबाहुं दीर्घराजीवलोचनं। भक्तानुकंपिनं दांतं न च नीचानुसारिणं। कृतज्ञं ज्ञानसंपन्नं कृतास्त्रम
निवर्तिनं। युद्धाभिनंदिनं नित्यं द्विषतामघवर्द्धनं। स्वेषां प्रियहिते युक्तं पितॄणां जयगृद्धिनं। न च पूर्वप्रहर्तारं संग्रा
मे नष्टसंभ्रमं। यदि पुत्रं न पश्यामि यास्यामि यमसादनं। रथेषु गण्यमानेषु गणितं तं महारथं। मम: ध्यर्द्धगुणं संख्ये त
रुणं बाहुशालिनं। प्रद्युम्नस्य प्रियं शिष्यं केशवस्य ममैव च। यदि पुत्रं न पश्यामि यास्यामि यमसादनं। सुनसं सुलला
टांतं स्वक्षिभ्रुदशनच्छदं। अपश्यतस्तद्वदनं का शांतिर्हृदयस्य मे। तंत्रीस्वनसुखं रम्यं पुंस्कोकिलसमध्वनिं। अशृ
ण्वतः स्वरं तस्य का शांतिर्हृदयस्य मे। रूपं चाप्रतिमं तस्य त्रिदशेष्वपि दुर्लभं। अपश्यतो वीरस्य का शांतिर्हृदयस्य
मे। अभिवादनदक्षं तं पितॄणां वचने रतं। नाद्याहं यदि पश्यामि का शांतिर्हृदयस्य मे। सुकुमारः सदा वीरो महार्हशय ८४
नोचितः। भूमावनाथवच्छेते नूनं नाथवतां वरः॥ शयानं समुपासंति यं पुरा परमस्त्रियः। तमद्य विप्रविद्धांगमुपासंत्य

स्तुतां वंशक्रमसूचकाः। मागधाः स्तोत्रावलीपाठकाः। यथेति कथमर्थः। यदि मे पितास्यात्तदा मचासंस्पादित्यवयः॥

शिवाः शिवाः॥ यं पुरा बोधयंतिस्म सूतमागधवंदिनः। बोधयंत्यद्य तं नूनं श्वापदा विकृतैः स्वरैः॥ छत्रच्छायासमुचितं तस्य
८२ तद्वदनं शुभं। नूनमद्य रजो ध्वस्तं रणरेणुः करिष्यति। हा त्वत्रकावितृप्तस्य सततं पुत्रदर्शने। भाग्यहीनस्य कालेन यथा
नेनायसे बलात्। साद्य संयमनी नूनं सदा सुकृतिनां गतिः। स्वभाभिर्भासिता रम्या त्वयात्यर्थं विराजते। नूनं वैवस्वतस्त्वां
वरुणश्च प्रियातिथिं। शतक्रतुर्धनेशश्च प्राप्तमर्चंत्यभीरुकं। एवं विलप्य बहुधा भिन्नपोतो वणिग्यथा। दुःखेन महता वि
ष्टो युधिष्ठिरमपृच्छत। कच्चित्स कदनं कृत्वा परेषां पांडुनंदन। स्वर्गतोऽभिमुखः संख्ये युध्यमानो नरर्षभैः। स हतं तज्जिययात्रि
युध्यमानो नरर्षभैः। असहायः सहायार्थी मामनुध्यातवान्ध्रुवं। पीड्यमानः शरैस्तीक्ष्णैः कर्णद्रोणकृपादिभिः॥ नानालिंगैः
सुधौतैर्मे मम बालोल्पचेतनः॥ इह मे स्यात्परित्राणं पितेति स पुनः पुनः। इति विप्रलपन्मन्ये नृशंसैर्विपातितः। अथवा मत्प्र
सूतः सस्वस्रीयो माधवस्य च। सुतः सुभद्रायां च संभूतो नैवं वक्तुमर्हति। वज्रसारमयं नूनं हृदयं सुदृढं मम। अपश्यतो दीर्घबा
हुं रक्ताक्षं यन्न दीर्यते। कथं बाले महेष्वासा नृशंसा मर्मभेदिनः। स्वस्रीयं वासुदेवस्य मम पुत्रेऽक्षिपंचरात्। यो मां
नित्यमदीनात्मा प्रत्युद्गम्याभिनंदति। उपायांतं रिपून्हत्वा सोऽद्य किं मां न पश्यति। नूनं स पतितः शेते धरण्यां रुधिरोक्षि

स्रुता वंशाकमस्तवकाः ॥ मागधाः भोगावली पाठकाः ॥ याचंति कथमर्थी । यदि मे पिता स्यात्तदा मे चासंप्यादित्यव्ययं निरुद्धवि धम

द्रोण तः ॥ शोनयन्मेदिनीं गावेराद्दितएवपातितः ॥ सुमहामतशोचामियाशत्रुमपलायितं रणे विनिहतं सुवाशोकार्णवे विनिंस्पति
॥ सुमहावस्थते किं मामभिमन्युं पश्यती ॥ शेपद्धापिवडः खाहैं ते वत्स्यामि किं वदं ॥ वज्रसारमयं नूनं हृदयं यन्नयास्यति ॥ म
हस्वधमवहं दृष्ट्वा रुदंती शोककर्षितां ॥ हसानं अभिरे शाणां मिं हनादौ मया श्रुतं ॥ सुखसुखसुखा पिकल्ने नश्रु नोवरातुपाल
मन ॥ श्रशाकुं वेलादीनस्तुं बालं दृष्ट्वा महारथाः ॥ किं मोरहमधर्मज्ञाः पांडवे हतपतं वलं ॥ किं तयो विडियं कृद्वा केशवार्जुनि
यो हृदये ॥ सिंहद्वनदष्टप्रानाः शोककालगपस्थिते ॥ आगमिष्यति वः क्षिप्रं फलं पापस्य कर्मणः ॥ अधर्मो हि कृतस्तावः कथं स्या
दफलश्चिरं ॥ इतिनान्सति माष विवेयपाञ्चो महामति ॥ अध्यायाते स्त्र उस्तजपरोवडः खवमम वितः ॥ किम घमेनवा ख्यातं ॥ इत्याकु
स्मरणेममाशुकुर्वेतानदं सर्वस्मिराकुरान्मृतारथाः ॥ ॥ संजय उवाच ॥ निशम्य वासुदेवस्तु तत्राधिसिर सिसुतं । मिव मि
त्युवाकृत्यमतो बशोकममचितं ॥ सर्वेषामेषवै पंथाः शूराणामनिवर्त्तिनां ॥ क्षत्रियाणां विशेषेण येषां युद्धेन जीविका ॥ एषा
विहुध्यमानानां शूराणामनिवर्त्तिनां ॥ विहिता धर्मशास्त्रज्ञैर्गतिमतां वर ॥ ध्रुवं हि युद्धे मरणं शूराणां कुरुनंदनागत ॥ अ
एपकृतालोकानभिमन्युर्न संशयः ॥ एतद्धि सर्ववीराणां कांक्षितं भरतर्षभ ॥ संग्रामे भिमुखो मृत्युः प्राप्तुयामेति मानद ॥ १५५

स्य ॥ गतिर्ईशायानाव ॥ गीत २

साम्यामश्चरणा ॥ आसाया ॥ ज्ञात्वापि ॥ आहोस्विदथवा ॥ आयुधमनिधनं धि ॥

सचवीरा रणे हत्वा रात्रुतत्रान्महारथान् ॥ वीरैराकांक्षितं मृत्युं संप्राप्तो भिमुखो रणे ॥ माशुचः पुरुषव्याघ्र पूर्वैरेष
सनातनः ॥ धर्मकृद्भिः कृतो धर्मः क्षत्रियाणां रणेक्षयः ॥ इमे ते भ्रातरः सर्वे दीना भरतसत्तम ॥ त्वयि शोकसमाविष्टे नृपा
श्च सुहृदस्तव ॥ एतांस्त्वं वचसा साम्ना समाश्वासय मानद ॥ विदितं वेदितव्यं ते न शोकं कर्तुमर्हसि ॥ एवमाश्वासितः पार्थः कृ
ष्णेनाद्भुतकर्मणा ॥ ततो ब्रवीत्तदा भ्रातॄन् सर्वान्पार्थः स गद्गदं ॥ स दीर्घबाहुः पृथ्वंसो दीर्घराजीवलोचनः ॥ अभिमन्युर्यथा वृ
त्तः श्रोतुमिच्छाम्यहं तथा ॥ सनागस्यंदनहयान्दृष्टपश्यत्तान्मया ॥ संग्रामे सात्विकंधातान्समस्त्वरस्य विरिणः ॥ कथं वदः कृतास्त्रा
णां सर्वेषां शस्त्रपाणिनां ॥ सोनवडोनिहतं गच्छेद्वज्रिणापि समागतः ॥ यद्येवमहमज्ञास्यमशक्तं रक्षणे मम ॥ पुत्रस्य पांडुपांचालान्म
याउक्षेनवेततः ॥ कथं च वरथस्थानां शरवर्षाणि मुंचतां ॥ नीतो भिमन्युर्निधनं करवी कृत्सवः परैः ॥ अहो वः पौरुषं नास्ति न च
वो स्ति पराक्रमः ॥ यत्राभिमन्युः समरे पश्यतां वो निपातितः ॥ आत्मानमेव गर्हेयं यदहं वो सुदुर्बलान् ॥ युष्मानाज्ञायनिर्यातो
भीरुन्कृतनिश्चयान् ॥ अहो विभूषणार्थानि वर्मशास्त्रायुधानि वः ॥ वाचस्तु वक्तुं संसत्सु मम त्राणे न कारिताः ॥ एवमुक्त्वा ततो
तावाकांति शंखाप्यरोसिमान् ॥ न स्माशाकं ततो वीरस्तु केनचित्समवीक्षितं ॥ तमंतकमिवक्रुद्धं निश्वसंतं मुहुर्मुहुः ॥ पुत्रशोका

कोशल्यो बृहद्बलः॥

द्रोण मिसंतप्त मम स्थूलस्त्सेंद्रस्वंतदा। ननाशितुं शक्नुवंति दृष्ट्वा सुरदेवोर्जुनं। अन्यत्र वासुदेवाद्वा ज्येष्ठाद्वा पांडुनंदनात्। सर्वशि
क्षास्तु शिक्षावर्जुनस्य मनोनुगो। बहुमाना प्रियश्चाद्भुतश्चैवं च कुमरर्दनः। ततस्तत्पुत्रशोकेन न्यग्रीपीडितमानसः। राज्ञो
नय२ वृन्नेरक्ष्यं राजा वचनमब्रवीत्॥ ॥द्रोणपर्वणि अभिमन्युवधे॥ ॥युधिष्ठिर उवाच॥ ॥त्वयि याते महाबाहो संसप्तक
बलं प्रति। प्रयत्नमकरोत्तीव्रमाचार्यो ग्रहणे मम। व्यूढानीकं वयं द्रोणं वारयामः स्म सर्वशः। प्रतिव्यूह्य रथानीकं यत
मानं तथा रणे। स वार्यमाणो रथिभिर्मया चापि सुरक्षितः। अस्मान्प्रतिजघानाशु पीडयन्निशितैः शरैः। ते पीड्यमाना द्रोणेन द्रो
णानीकं न शक्नुमः। प्रतिवीक्षितुमप्याजौ भेत्तुं तत्कुत एव तु। वयं त्वप्रतिमं वीर्ये सर्वे सौभद्रमात्मजं। उक्तवंतः स्म ते तात भिंध्यनी
कमिति प्रभो। स तथा चोदितोस्माभिः सदश्व इव वीर्यवान्। असह्यमपि तं भारं वोढुमेवोपचक्रमे। स तवास्त्रोपदेशेन वीर्येण च सम
भर.२ न्वितः। प्राविशत्तद्बलं बालः सुपर्ण इव सागरं। ते त्वयाता वयं वीरं सात्वतीपुत्रमाहवे। प्रवेष्टुकामास्तेनैव येन स प्राविशच्चमूं। ततः सैं
धवको राजा क्षुद्रस्तात जयद्रथः। वरदानेन रुद्रस्य सर्वान्नः समवारयत्। ततो द्रोणः कृपः कर्णो द्रौणिः कौशल्य एव च। कृत ९६
वर्मा च सौभद्रं षड्रथाः पर्यवारयन्। परिवार्य तु तैः सर्वैर्युधि बालो महारथैः। यतमानः परं शक्त्या बहुभिर्विरथीकृतः॥

आलक्षितानरथमिषात्॥

ततो दौःशासनिः क्षिप्रं तथा तैर्विरथीकृतं। संशयं परमं प्राप्य दिष्टांतेनाभ्ययोजयत्। स तु हत्वा सहस्राणि नराश्वरथदंति
नां। अष्टौ रथसहस्राणि नवदंतिशतानि च। राजपुत्रसहस्रे द्वे वीरांश्चालक्षितान्बहून्। बृहद्बलं च राजानं स्वर्गेणाजौ प्रयो
ज्य ह। ततः परमधर्मात्मा दिष्टांतमुपजग्मिवान्। एतावदेव निर्वृत्तमस्माकं शोकवर्धनं। स चैवं पुरुषव्याघ्रः स्वर्गलोकमवाप्तवा
न्। ततोर्जुनो वचः श्रुत्वा धर्मराजेन भाषितं। हा पुत्र इति निःश्वस्य व्यथितोन्यपतद्भुवि। विषण्णवदनाः सर्वे परिगृह्य धनंजयं
। नेत्रैरनिमिषैर्दीनाः प्रत्यवेक्षन् परस्परं। प्रतिलभ्य ततः संज्ञां वासविः क्रोधमूर्छितः। कंपमानो ज्वरेणेव निःश्वसंश्च मुहुर्मु
हुः। पाणिं पाणौ विनिष्पिष्य श्वसमानोश्रुनेत्रवान्। उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत्। सत्यं वः प्रतिजानामि श्वोस्मि हंता ज
यद्रथं। न चेद्वधभयाद्भीतो धार्तराष्ट्रान्प्रहास्यति। न चास्माञ्शरणं गच्छेत्कृष्णं वा पुरुषोत्तमं। भवंतं वा महाराज श्वोस्मि हंता
जयद्रथं। धार्तराष्ट्रप्रियकरं मयि विस्मृतसौहृदं। पापं बालवधे हेतुं श्वोस्मि हंता जयद्रथं। रक्षमाणाश्च तं संख्ये ये मां योत्स्य
ति केचन। अपि द्रोणकृपौ राजञ्छादयिष्यामि तांशरैः। यद्येतदेवं संग्रामे न कुर्यां पुरुषर्षभाः। मा स्म पुण्यकृतां लोकान्प्राप्नुयां शू
रसंमतान्। ये लोका मातृहंतॄणां ये चापि पितृघातिनां। गुरुदाररतानां ये पिशुनानां च ये तथा। साधूनसूयतां ये च ये चापि प

भुक्तपूर्वां पूर्वमन्योपभुक्तां॥ निंदतां श्लोकवतीं। संयावं। यवागूं॥ आत्मापहारिणां। आत्मानमयथाप्रकाशयतां॥ मिथ्याभि

द्रो॰ ग रिवादिनां। ये च निक्षेपहर्तॄणां ये च विश्वासघातिनां। भुक्तपूर्वां स्त्रियं ये च निंदतामघशंसिनां। ब्रह्मघ्नानां च ये लोका ये च गोघा
तिनामपि। पायसं वा यवान्नं वा शाकं कृसरमेव वा। संयावापूपमांसानि ये च लोका वृथाश्नतां। तानह्नैवाधिगच्छेयं न चेद्ध
न्यां जयद्रथं। वेदाध्यायिनमत्यर्थं संशितं वा द्विजोत्तमं। अवमन्यमानो यान्याति वृद्धान्साधूंस्तथा गुरून्। स्पृशतो ब्राह्मणं
गां च पादेनाग्निं च यां लभेत्। याप्सु श्लेष्म पुरीषं वा मूत्रं वा मुंचतां गतिः॥ तां गच्छेयं गतिं कष्टां न चेद्धन्यां जयद्रथं। नग्नस्य स्नायमा
नस्य या च वंध्यातिथेर्गतिः। उत्कोचिनां मृषोक्तानां वंचकानां च या गतिः॥ आत्मापहारिणां या च या च मिथ्याभिशंसिनां। भृत्यैः संदृश्यमा
नानां पुत्रदाराश्रितैस्तथा। असंविभज्य क्षुद्राणां या गतिर्मृष्टमश्नतां। तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथं। संश्रितं चापि य
स्त्यक्त्वा साधुं तद्वचने रतं। न बिभर्ति नृशंसात्मा निंदते चोपकारिणं। अर्हते प्रातिवेश्याय श्राद्धं यो न ददाति च। अनर्हेभ्यश्च यो
दद्याद्वृषलीपतये तथा। मद्यपो भिन्नमर्यादः कृतघ्नो भर्तृनिंदकः। तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथं। धर्मादपेतास्ये चान्ये म
या नात्रानुकीर्तिताः। ये चानुकीर्तितास्तेषां गतिं क्षिप्रमवाप्नुयां। यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथं। इमां चाप्यपरां भूय
ः प्रतिज्ञां मे निबोधत। यद्यस्मिन्नहते पापे सूर्योऽस्तमुपयास्यति। इहैव संप्रवेष्टाहं ज्वलितं जातवेदसं॥ ९७

शंसिनां। असद्दोषोक्त्या परान्दूषयतां। संदृश्यमानानां निरीक्ष्यमाणानां। वृषली शूद्राकन्याभावे। तस्यां रजस्वला वा तस्याः पतये॥

तस्माद्ब्रह्मणश्च राउ। तदित्यलिंगत्वेपास्यर्थः। दितेरिति। कार्य्यकारणोपचाराद्दैत्यानामित्यर्थः। तस्य धनुःशब्दस्य चयः॥ शब्द

असुरसुरमनुष्याः पक्षिणो वोरगो वा पितृरजनिचरा वा ब्रह्मदेवर्षयो वा। चरमचरमपीदं यत्परं चापि तस्मात्तदपि मम रिपुं तं रक्षि
च तुं नैव शक्ताः। यदि विशति रसातलं तदग्र्यं यदपि च देवपुरं दितेः पुरं वा। तदपि शरशतैरहं प्रभाते भृशमभिपत्य रिपो
ः शिरोऽभिहर्ता। एवमुक्त्वा विचिक्षेप गांडीवं सव्यदक्षिणं। तस्य शब्दमतिक्रम्य धनुःशब्दोऽस्पृशद्दिवं। अर्जुनेन प्रति
ज्ञाते पांचजन्यं जनार्दनः। प्रदध्मौ तत्र संक्रुद्धो देवदत्तं च फाल्गुनः॥ स पांचजन्योऽच्युतवक्त्रवायुना भृशं सुपूर्णोदरनिःसृतध्व
निः। जगत्सपातालवियद्दिगीश्वरं प्रकंपयामास युगात्यये यथा। ततो वादित्रघोषाश्च प्रादुरासन्सहस्रशः। सिंहनादाश्च पांडू
नां प्रतिज्ञाते महात्मना॥ ॥इति द्रोणपर्वण्यभिमन्युवधः समाप्तः॥ ॥संजय उवाच॥ ॥श्रुत्वा तु तं महाशब्दं पांडूनां ते
जयैषिणां। चारैः प्रवेदिते तत्र समुत्थाय जयद्रथः। शोकसंमूढहृदयो दुःखेनाभिपरिप्लुतः। मज्जमान इवागाधे विपुले
शोकसागरे। जगाम समितिं राज्ञां सैंधवो विमृशन्बहु। स तेषां नरदेवानां सकाशे परिदेवयन्। अभिमन्योः पितुर्भीतः
सव्रीडो वाक्यमब्रवीत्। योऽसौ पांडोः किल क्षेत्रे जातः शक्रेण कामिना। स निनीषति दुर्बुद्धिर्मां किलैकं यमक्षयं। तत्स्वस्ति वो
ऽस्तु यास्यामि स्वगृहं जीवितेप्सया। अथवा स्थ प्रतिबला त्रातुं मां क्षत्रियर्षभाः। पार्थेन प्रार्थितं वीरास्ते स ददत ममाभयं। द्रो

शब्दांतरमतिक्रम्य॥ इति अभिमन्युवधः॥ ॥किलेत्यरुचौ॥

अन्य एवान्वयो। तमर्जुनं। अन्यथा कर्तुं समर्था पालयिता। प्रार्थयेत् प्राप्तुमर्हति॥

द्रोण णदुर्योधनकृपाः कर्णमद्रेशबाह्लिकाः। दुःशासनादयश्चापि समर्थास्त्रातुमप्यंतकार्दितं। किमंग पुनरेकेन फाल्गुनेन जिघांसता न त्रायेयुर्भवंतो मां समस्ताः पतयः क्षितेः। प्रहर्षं पांडवेयानां श्रुत्वा मम महद्भयं। सीदंतीव ममांगानि मुमूर्षोरिव पार्थिवाः। वधो नूनं प्रतिज्ञातो मम गांडीवधन्वना। तथा हि हृष्टाः क्रोशंति शोककालेपि पांडवाः। न देवा न च गंधर्वा नासुरोरगराक्षसाः। उत्सहंतेन्यथा कर्तुं कुत एव नराधिपाः। तस्मान्मामनुजानीत भद्रं वोस्तु नरर्षभाः। अदर्शनं गमिष्यामि न मां द्रक्ष्यंति पांडवाः। एवं विलपमानं तं भयाद्व्याकुलचेतसं। आत्मकार्यगरीयस्त्वाद्राजा दुर्योधनोब्रवीत्। न भेतव्यं नरव्याघ्र को हि त्वां पुरुषर्षभ। मध्ये क्षत्रियवीराणां तिष्ठंतं प्रार्थयेद्युधि। अहं वैकर्तनः कर्णश्चित्रसेनो विविंशतिः। भूरिश्रवाः शलः शल्यो वृषसेनो दुरासदः। पुरुमित्रो जयो भोजः कांबोजश्च सुदक्षिणः। सत्यव्रतो महाबाहुर्विकर्णो दुर्मुखस्तथा। दुःशासनः सुबाहुश्च कलिंगश्चाप्युदायुधः। विंदानुविंदावावंत्यौ द्रोणो द्रौणिः ससौबलः। एते चान्ये च बहवो नानाजनपदेश्वराः॥ ग्रो
ससैन्यास्त्वाभियास्यंति व्येतु ते मानसो ज्वरः। त्वं चापि रथिनां श्रेष्ठः स्वयं शूरोमितद्युतिः। स कथं पांडवेयेभ्यो भयं पश्यसि सैंधव। अक्षौहिण्यो दशैका च मदीयास्तव रक्षणे। यत्ता योत्स्यंति मा भैस्त्वं सैंधव व्येतु ते भयं॥ संजय उवाच॥ ९८
एवमाश्वासितो राजन्पुत्रेण तव सैंधवः। दुर्योधनेन सहितो द्रोणं रात्रावुपागमत्। उपसंग्रहणं कृत्वा द्रोणाय स विशांपते।

निमित्ते लक्ष्ये दृढवेधने। आचार्यकमुपदेशः। योगादभियोगात्॥

उपोपविश्य प्रणतः पर्यपृच्छदिदं तदा। निमित्ते दूरपातित्वे लघुत्वे दृढवेधने॥ मम ब्रवीतु भगवान्विशेषं फाल्गुनस्य च। विद्याविशेषमिच्छामि ज्ञातुमाचार्य तत्त्वतः। अर्जुनस्यात्मनश्चैव यथावत्प्रब्रवीहि मे॥ ॥द्रोण उवाच॥
त ३ सममाचार्यकं तात तवैवार्जुनस्य च। योगाद्दुःखोचितत्वाच्च तस्मात्त्वत्तोधिकोर्जुनः॥ न तु ते युधि संत्रासः कार्यः पार्थात्कथंचन। अहं हि रक्षिता तात भयात्त्वां नात्र संशयः॥ न हि मद्बाहुगुप्तस्य प्रभवंत्यमरा अपि। व्यूहिष्यामि च तं व्यूहं यं पार्थो न तरिष्यति। तस्माद्युध्यस्व मा भैस्त्वं स्वधर्ममनुपालय॥ पितृपैतामहं मार्गमनुयाहि महारथ। अधीत्य विधिवद्वेदानग्नयः सुहुतास्त्वया। इष्टं च बहुभिर्यज्ञैर्न ते मृत्युभयाद्भयं। दुर्लभं मानुषैर्मंदैर्महाभाग्यमवाप्य तु। भुजवीर्यार्जिताँल्लोकान्दिव्यान्प्राप्स्यस्यनुत्तमान्। कुरवः पांडवाश्चैव वृष्णयोन्ये च मानवाः। अहं च सह पुत्रेण अध्रुवा इति चिंत्यतां। पर्यायेण वयं सर्वे कालेन बलिना हताः। परलोकं गमिष्यामः स्वैः स्वैः कर्मभिरन्विताः। तपस्तप्त्वा च यांल्लोकान्प्राप्नुवंति तपस्विनः। क्षत्रधर्माश्रिता वीराः क्षत्रियाः प्राप्नुवंति तान्। एवमाश्वासितो राजन्भारद्वाजेन सैंधवः। अपानुदद्भयं पार्थाद्युद्धाय च मनो दधे। ततः प्रहर्षः सैन्यानां तथासीद्विशांपते। वादित्राणां ध्वनिश्चोग्रः सिंहनादरवैः सह॥ इति द्रोणपर्वणि जयद्रथवधे

आज्ञायेत्याशयो निवेश।आज्ञाप्येत्यर्थः।शब्दानां संपातः संमूर्छनं॥

द्रो० संजय उवाच॥ ॥प्रतिज्ञाते तु पार्थेन सिंधुराजवधे तदा।वासुदेवो महाबाहुर्धनंजयमभाषत।भ्रातृणां मतमाज्ञाय त्वया वा
ग्व्याहृता।सैंधवं श्वोऽस्मि हंतेति तत्साहसमिदं कृतं।असंमंत्र्य मया सार्धमतिभारोऽयमुद्यतः।कथं तु सर्वलोकस्य नावहास्य 7
म्भवेमहि।धार्तराष्ट्रस्य शिबिरे मया प्रणिहिताश्चराः।त इमे शीघ्रमागम्य प्रवृत्तिं वेदयंति नः।त्वया वै संप्रतिज्ञाते सिंधुराजवधे प्र
भो।सिंहनादः सवादित्रः सुमहानिति हः श्रुतः।तेन शब्देन वित्रस्ता धार्तराष्ट्राः सबांधवाः।नाकस्मात्सिंहनादोऽयमिति मत्वा व्य व
स्थिताः।सुमहाञ्छब्दसंपातः कौरवाणां महाभुज।आसीन्नागाश्वपत्तीनां रथघोषश्च भैरवः।अभिमन्योर्वधं श्रुत्वा ध्रुवमार्तो धृ
नंजयः।रात्रौ निर्यास्यति क्रोधादिति मत्वा व्यवस्थिताः।तैर्यतद्भिरियं सत्या श्रुतासत्यवतस्तव।प्रतिज्ञा सिंधुराजस्य वधे राजीव
लोचन।ततो विमनसः सर्वे त्रस्ताः क्षुद्रमृगा इव।आसन्सुयोधनामात्याः स च राजा जयद्रथः।अथोत्थाय सहामात्यैर्दीनः शिबिरमा
त्मनः।आयात्सौवीरसिंधूनामीश्वरो भृशदुःखितः।स मंत्रकाले संमंत्र्य सर्वा नैःश्रेयसीः क्रियाः।सुयोधनमिदं वाक्यमब्रवीद्रा
जसंसदि।मामसौ पुत्रहंतेति श्वोऽभियाता धनंजयः।प्रतिज्ञातो हि सेनाया मध्ये तेन वधो मम।तं न देवा न गंधर्वा नासुरो ७७
रगराक्षसाः।उत्सहंतेऽन्यथा कर्तुं प्रतिज्ञां सव्यसाचिनः।ते मां रक्षत संग्रामे मा वो मूर्ध्नि धनंजयः।पदं कृत्वाप्नुयाल्लक्ष्यं तस्मा
द्धु

विधीरतां रक्षेति परतः संबध्यते।अनिशाप्रवंत --- आक्रंदितः सकाकुवादममर्षितः।संविधानं प्रतिविधानं।पदेकृ

दत्र विधीयतां।अथ रक्षा न मे संख्ये क्रियते कुरुनंदन।अनुजानीहि मां राजन्गमिष्यामि गृहं प्रति।एवमुक्तस्त्वा
त्को दीनो विमनाः सुयोधनः।श्रुत्वा मिमनु वर्तत्वोध्यानमेवान्वपद्यत।तमार्तमभिसंप्रेक्ष्य राजन्किल स सैंधवः।मृदु चात्महितं चैव
साक्षेपमिदमुक्तवान्।नेह पश्यामि भवतां तथा वीर्यं धनुर्धरं।योऽर्जुनस्यास्त्रमस्त्रेण प्रतिहन्यान्महाहवे।वासुदेवसहाय
स्य गांडीवं धुन्वतो धनुः।कोऽर्जुनस्याग्रतस्तिष्ठेत्साक्षादपि शतक्रतुः।महेश्वरोऽपि पार्थेन श्रूयते योधितः पुरा।पदातिना महावीर्यो
गिरौ हिमवति प्रभुः।दानवानां सहस्राणि हिरण्यपुरवासिनां।जघानैकरथेनैव देवराजप्रचोदितः।समायुक्तो हि कौंते
यो वासुदेवेन धीमता।सामरानपि लोकांस्त्रीन्हन्यादिति मतिर्मम।सोऽहमिच्छाम्यनुज्ञातुं रक्षितुं वा महात्मना।द्रोणेन सह
पुत्रेण वीरेण यदि मन्यसे।स राज्ञा स्वयमाचार्यो भृशमाक्रंदितोऽर्जुन।संविधानं च विहितं रथाश्चाः किल सज्जिताः।कर्णो भू
रिश्रवा द्रौणिर्वृषसेनश्च दुर्जयः।कृपश्च मद्रराजश्च षडेतेऽस्य पुरोगमाः।शकटः पद्मपश्चार्धो व्यूहो द्रोणेन निर्मितः।पद्मक
र्णिकमध्यस्थः सूचीपार्श्वे जयद्रथः।स्थास्यते रक्षितो वीरैः सिंधुराड्युद्धदुर्मदः।धनुष्यस्त्रे च वीर्ये च प्राणे चैव तथोरसि।
अविषह्यतमा ह्येते निश्चिताः पार्थ षड्रथाः।एतानजित्वा षड्रथान्नैव प्राप्यो जयद्रथः।एषामेकैकशो वीर्यं षण्णां त्वमनुचिं

हः।पश्चार्धे पश्चाद्भागे यस्य।सूचीः सूचीमुखो व्यूहः॥ ॥

अर्हसि नचीयहिंसि। इदं श्रुतं सुहृद्देवनं। बहुमन्तुवचं मे ताम्रं सेनासुखं॥

द्रोण॰ तथा। सहिता नितरव्या धातराष्ट्रा काजेनु सेनया। तुयस्तु मंत्रयिष्यामो नीतिमात्महिताय वै। मंत्रज्ञैः सचिवैः सार्धं सुहृद्भिः
कार्यसिद्धये॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥अर्जुन उवाच॥ ॥षड् धार्तराष्ट्रस्य महत्त्वमन्यसे यान् बलाधिकान्। तेषां वीर्यं
ममार्धेन न तुल्यमिति मे मतिः॥ अस्त्रमस्त्रेण सर्वेषामेतेषां मधुसूदन। मया द्रक्ष्यसि निर्भिन्नं जयद्रथवधैषिणा। द्रोणस्य मिषत
स्याहं सगणस्य विलप्यतः। मूर्धानं सिंधुराजस्य पातयिष्यामि भूतले। यदि साध्याश्च रुद्राश्च वसवश्च सहाश्विनाः। मरुतश्च सहेंद्रे
ण विश्वेदेवा महेश्वराः॥ पितरः सहगंधर्वाः सुपर्णाः सागराद्रयः॥ द्यौर्वियत्पृथिवी चेयं दिशश्च सदिगीश्वराः॥ ग्रामारण्यानि
राणि च भूतानि स्थावराणि चराणि च। त्रातारः सिंधुराजस्य भवंति मधुसूदन। तथापि बाणैर्निहतं श्वो द्रष्टासि रणे मया। सत्येन च शपे कृ
ष्ण तथैवायुधमालभे। यस्य गोप्ता महेष्वासस्तस्य पापस्य दुर्मतेः। तमेव प्रथमं द्रोणमभियास्यामि केशव। तस्मिन् द्यू
तमिदं बद्धं मन्यसे स्म सुयोधनः। तस्मात्तस्यैव सेनाग्रं भित्त्वा यास्यामि सैंधवं। द्रष्टासि श्वो महेष्वासान्नाराचैस्तिग्मतेजनैः।
शृंगाणीव गिरेर्वज्रैर्दीर्यमाणान्मया युधि। नरनागाश्वदेहेभ्यो विस्रविष्यति शोणितं। पतद्भ्यः पतितेभ्यश्च विभिन्नेभ्यः शितैः
शरैः। गांडीवप्रेषिता बाणा मनोनिलसमा जवे। नृनागाश्वान्विदेहासून्कर्तारश्च सहस्रशः। यमात्कुबेराद्वरुणादिंद्राद्रुद्राच्च यन् १००
मया॥

उपात्तमस्त्रं घोरं तद्द्रष्टारो नरा युधि। ब्राह्मेणास्त्रेण चास्त्राणि हन्यमानानि संयुगे। मया द्रष्टासि सर्वेषां सैंधवस्याभिरक्षिणां। शर
वेगसमुत्कृत्तैः राज्ञां केशव मूर्धभिः। आस्तीर्यमाणां पृथिवीं द्रष्टासि श्वो मया युधि। क्रव्यादांस्तर्पयिष्यामि द्रावयिष्यामि शात्र
वान्। सुहृदो नंदयिष्यामि प्रमथिष्यामि सैंधवं। बहुनागस्कृतः कृत्संबंधी पापदेशसमुद्भवः। मया सैंधवको राजा हतः स्वान् शोच
यिष्यति। सर्वक्षीराणि भोक्तारं पापाचारं रणाजिरे। मया सराजकं बाणैर्भिन्नं द्रक्ष्यसि सैंधवं। तथा प्रभाते कर्तास्मि यथा कृष्ण सु
५५ योधनः। नान्यं धनुर्धरं लोके मंस्यते मत्समं युधि। गांडीवं च धनुर्दिव्यं योद्धा चाहं नरर्षभ। क्षत्रं च यंता हृषीकेश किं नु स्यादजितं मया।
तव प्रसादाद्भगवान्किमिवास्ति रणे मम। अविषह्यं हृषीकेश किं जानन्मां विगर्हसे। यथा लक्ष्म स्थिरं चंद्रे समुद्रे च यथा जलं। ए
वमेतां प्रतिज्ञां मे सत्यां विद्धि जनार्दन। मावमंस्था ममास्त्राणि मावमंस्था धनुर्दृढं। मावमंस्था बलं बाह्वोर्मावमंस्था धनंजयं। यथाभि
याय संग्रामे न जीयेयं जयामि च। तेन सत्येन संग्रामे हतं विद्धि जयद्रथं। ध्रुवं वै ब्राह्मणे सत्यं ध्रुवा साधुषु संनतिः। श्रीर्ध्रुवा चापि
दक्षेषु ध्रुवो नारायणे जयः॥ ॥संजय उवाच॥ ॥एवमुक्त्वा हृषीकेशं स्वयमात्मानमात्मना। संदिदेशार्जुनो नर्दन्वासवि
ः केशवं प्रभुः। यथा प्रभातां रजनीं कल्पितः स्याद्रथो मम। तथा कार्यं त्वया कृष्ण कार्यं हि महदुद्यतं॥ ॥द्रोणपर्वणि जयद्रथव

वनं जलं। सैन्या सनाश्रुरव्याः॥ स्नुषा स्वस्त्रैव बभूव सारिणां दमः प्रयोगोपि। अध्याये कोशो कोपहते। निद्रा च बहुपं नाविनाशति॥

द्रोण षे॥ ॥संजय उवाच॥ ॥तां निशां दुःखशोकार्त्तौ निःश्वसंताविवोरगौ। निद्रां नैवोपलेभाते वासुदेवधनंजयौ॥ नरनारायणौ

क्रुद्धौ ह्यद्रादेवाः सवासवाः॥ व्यथिता श्चिंतयामासुः किंस्विदेतद्भविष्यति। ववुश्च दारुणा वाता रूक्षा घोराभिशंसिनः॥ सकबं

धस्तथादित्ये परिघः समदृश्यत। शुष्काशन्यश्च निष्पेतुः सनिर्घाताः सविद्युतः॥ चचाल चापि पृथिवी सशैलवनकानना। चु

क्षुभुश्च महाराज सागरा मकरालयाः॥ प्रतिस्रोतः प्रवृत्ताश्च तथा गंतुं समुद्रगाः॥ रथाश्वनरनागानां प्रवृत्तमधरोत्तरं। क्रव्या

दानां प्रमोदार्थं यमराष्ट्रविवृद्धये। वाहनानि शकृन्मूत्रे मुमुचू रुरुदुश्च ह। तान्दृष्ट्वा दारुणान्सर्वानुत्पातान्लोमहर्षणान्॥ स

र्वे ते व्यथिताः सैन्यास्त्वदीया भरतर्षभ। श्रुत्वा महाबलस्योग्रां प्रतिज्ञां सव्यसाचिनः॥ अथ कृष्णं महाबाहुरब्रवीत्पाकशास

॥स्नुषा स्त्र सौ ध्वावः॥ निः॥ आश्वासय सुभद्रां त्वं भगिनीं स्नुषया सह। स्नुषा चास्या वयस्याश्च विशोकाः कुरु माधव। साम्ना सत्येन युक्तेन वचसाश्वासय

प्रभो। ततोर्जुनगृहं गत्वा वासुदेवः सुदुर्मनाः॥ भगिनीं पुत्रशोकार्त्तामाश्वासयत दुःखितां॥ ॥वासुदेव उवाच॥ ॥माशो

कं कुरु वार्ष्णेयि कुमारं प्रति सस्नुषा। सर्वेषां प्राणिनां भीरु निष्ठैषा कालनिर्मिता। कुले जातस्य वीरस्य क्षत्रियस्य विशेषतः॥ स १०१

दृशं मरणं ह्येतत्तव पुत्रस्य मा शुचः॥ दिष्ट्या महारथो वीरः पितुस्तुल्यपराक्रमः॥ क्षात्रेण विधिना प्राप्तो वीराभिलषितां गतिं। जित्वा

सुबहुशः शत्रून्प्रेषयित्वा च मृत्यवे॥ गतः पुण्यकृतां लोकान्सर्वकामदुहोक्षयान्। तपसा ब्रह्मचर्येण श्रुतेन प्रज्ञया

पि च। संतो यां गतिमिच्छंति प्राप्तस्तां तव पुत्रकः॥ वीरसूर्वीरपत्नी त्वं वीरश्वशुरबांधवा। मा शुचस्तनयं भद्रे गतः स परमां गतिं। प्राप्स्यते

चाप्यसौ पापः सैंधवो बालघातकः॥ अस्यावलेपस्य फलं ससुहृद्गणबांधवः॥ व्युष्टायां तु वरारोहे रजन्यां पापकर्मकृत्। न हि मो

क्ष्यति पार्थात्स प्रविष्टोप्यमरावतीं॥ श्वः शिरः श्रोष्यसे तस्य सैंधवस्य रणे हृतं। समंतपंचकाद्बाह्यं विशोका भव मा रुदः॥ क्षत्रधर्मं पु

रस्कृत्य गतः शूरः सतां गतिं। यां वयं प्राप्नुयामेह ये चान्ये शस्त्रजीविनः। व्यूढोरस्को महाबाहुरनिवर्ती रथप्रणुत्। गतस्तव वरा

रोहे पुत्रः स्वर्गं ज्वरं जहि। अनु जातश्च पितरं मातृपक्षं च वीर्यवान्। सहस्रशो रिपून्हत्वा हतः शूरो महारथः॥ आश्वासय स्नुषां

राज्ञि मा शुचः क्षत्रिये भृशं। श्वः प्रियं सुमहच्छ्रुत्वा विशोका भव नंदिनि। यत्पार्थेन प्रतिज्ञातं तत्तथा न तदन्यथा। चिकीर्षितं हि ते

भर्तुर्न भवेज्जातु निष्फलं। यदि च मनुजपन्नगाः पिशाचा रजनिचराः पतगाः सुरासुराः॥ रणगतमभियांति सिंधुराजं न स भ

विता सह तैरपि प्रभाते॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥संजय उवाच॥ ॥एतच्छ्रुत्वा वचस्तस्य केशवस्य महात्मनः

सुभद्रा पुत्रशोकार्त्ता विललाप सुदुःखिता। हा पुत्र मम मंदायाः कथमेत्यासि संयुगं। निधनं प्राप्तवांस्तात पितृतुल्यपराक्रमः॥

एत्य उग्रपेत्य। निधनं प्राप्तवानसात्यच्युयः॥ जावीर

दर्शनस्यकृपस्य॥

द्रो० कथमिंदीवरश्यामं सुदंष्ट्रं चारुलोचनं। मुखं ते दृश्यते वत्स गुंठितं रणरेणुना। नूनं शूरं निपतितं त्वां पश्यंत्यनिवर्त्तिनं। सु
शिरोग्रीवबाह्वंसं व्यूढोरस्कं नतोदरं। चारूपचितसर्वांगं स्वक्षं शस्त्रक्षताचितं। भूतानि त्वां निरीक्षंते नूनं चंद्रमिवोदितं। श
यनीयं पुरा यस्य स्पर्द्ध्यास्तरणसंवृतं। भूमावद्य कथं शेषे विप्रविद्धः सुखोचितः। योन्वास्यत पुरा वीरो वरस्त्रीभिर्महाभु
उ: जः। कथमन्वास्यते सोद्य शिवाभिः पतितो मृधे। योऽस्तूयत पुरा हृष्टैः सूतमागधबंदिभिः। सोद्य क्रव्यादगणैर्घोरैर्विनद
द्भिरुपास्यते। पांडवेषु च नाथेषु वृष्णिवीरेषु वा विभो। पंचालेषु च वीरेषु हतः केनास्यनाथवत्। अतृप्तदर्शना पुत्र दर्शनस्य
तवानघ। मंदभाग्या गमिष्यामि व्यक्तमद्य यमक्षयं। विशालाक्षं सुकेशांतं चारुवाक्यं सुगंधि च। तव पुत्र कदा भूयो मुखं द
क्ष्यामि निर्व्रणं। धिग्बलं भीमसेनस्य धिक्पार्थस्य धनुष्मतां। धिग्वीर्यं वृष्णिवीराणां पांचालानां च धिग्बलं। धिक्केकयांस्त
था चेदीन्मत्स्यांश्चैवाथ सृंजयान्। ये त्वा रणगतं वीरं न जानंति निपातितं। अद्य पश्यामि पृथिवीं शून्यामिव हतत्विषं। अभिमन्युमप
श्यंती शोकव्याकुललोचना। स्वस्रीयं वासुदेवस्य पुत्रं गांडीवधन्वनः। कथं त्वा विरथं वीरं द्रक्ष्याम्यन्यैर्निपातितं। हा वीर दृष्टो
नष्टश्च धनं स्वप्न इवासि मे। अहो ह्यनित्यं मानुष्यं जलबुद्बुदचंचलं। इमां ते तरुणीं भार्यां तवाधिभिरभिप्लुतां। कथं संधारयिष्यामि वि १७२

कृतदारानामीप्सितेदानां॥ नैवेशिकं विवाहोपयुक्तं। न्यस्तदंडानां सम्यक्मनोवाक्कायदंडानां। ऐकपत्न्यः पतिव्रताः। चातुराश्रमि

वत्सामिव धेनुकां। अहो ह्यकाले प्रस्थानं कृतवानसि पुत्रक। विहाय फलकाले मां सुगृद्धां तव दर्शने। नूनं गतिः कृतांतस्य
प्राज्ञैरपि सुदुर्विदा। यत्र त्वं केशवे नाथे संग्रामेऽनाथवद्धतः। यज्वनां दानशीलानां ब्राह्मणानां कृतात्मनां। चरितब्रह्मच
र्याणां पुण्यतीर्थावगाहिनां। कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि। सहस्रदक्षिणानां च या गतिस्तामवाप्नुहि। या गतिर्युध्य
मानानां शूराणामनिवर्त्तिनां। हत्वारीन्निहतानां च तां गतिं व्रज पुत्रक। गोसहस्रप्रदातॄणां क्रतुदानां च या गतिः। नैवेशिकं चाभि
मतं ददतां या गतिः शुभा। ब्राह्मणेभ्यः शरण्येभ्यो निधिं निदधतां तथा। या चापि न्यस्तदंडानां तां गतिं व्रज पुत्रक। ब्रह्मचर्येण यां यां
ति मुनयः संशितव्रताः। एकपत्न्यश्च यां यांति तां गतिं व्रज पुत्रक। राज्ञां सुचरितैर्या गतिर्भवति शाश्वती। चतुराश्रमिणां पुण्यैः
पावितानां सुरक्षितैः। दीनानुकंपिनां या च सततं संविभागिनां। पैशुन्याच्च निवृत्तानां तां गतिं व्रज पुत्रक। व्रतिनां धर्मशीलानां
गुरुशुश्रूषिणामपि। अमोघातिथिनां या च तां गतिं व्रज पुत्रक। कृच्छ्रेषु या धारयतामात्मानं व्यसनेषु च। गतिः शोकाग्निदग्धानां तां
गतिं व्रज पुत्रक। मातापित्रोश्च शुश्रूषां कल्पयंतीह ये सदा। स्वदारनिरतानां च या गतिस्तामवाप्नुहि। ऋतुकाले स्वकां पत्नीं गच्छ
तां या मनीषिणां। परस्त्रीभ्यो निवृत्तानां तां गतिं व्रज पुत्रक। साम्ना ये सर्वभूतानि पश्यंति विगतज्वराः। नारुंतुदानां क्षमिणां या गति

णां चतुर्न्निराश्रमेर्ष्यवद्रतां। कृच्छ्रेषु धारणात्स्य पुत्र॥

स्नायचारस्मसृत्यागः ॥ यथेनाथुरं शिविरामंतरं ॥ विहूर्यसंनिभैर्दीरिते ॥ लाजिरक्षते ॥

द्रोण० स्नामवाश्रुद्धि । मधुमांसनिवृत्तानां मदाद्दंभात्तथानृतात् । परोपतापत्यक्तानां तां गतिं व्रज पुत्रक । ह्रीमंतः सर्वशास्त्रज्ञा ज्ञानतृप्ता
जितेंद्रियाः । यां गतिं साधवो यांति तां गतिं व्रज पुत्रक ॥ एवं विलपतीं दीनां सुभद्रां शोककर्षितां । अभ्यपद्यत पांचाली वैराटी
सहिता तदा । ताः प्रकामं रुदित्वा च विलप्य च सुदुःखिताः । उन्मत्तवत्तदा राजन् विसंज्ञा न्यपतन् क्षितौ । सोपचारस्तु कृष्णस्तां दुःखि
तां भृशदुःखितां ॥ सिक्त्वांभसा समाश्वास्य तत्तदुक्त्वा हितं वचः । विसंज्ञकल्पां रुदतीं मर्मविद्धां प्रवेपतीं । भगिनीं पुंडरीकाक्ष इदं व
चनमब्रवीत् । सुभद्रे मा शुचः पुत्रं पांचाल्याश्वासयोत्तरां । गतोऽभिमन्युः प्रथितां गतिं क्षत्रियपुंगवः । ये चान्येऽपि कुले संति पुरुषा नो
वरानने । सर्वे ते तां गतिं यांतु ह्यभिमन्योर्यशस्विनः । कुर्याम तद्वयं कर्म क्रियासुः सुहृदश्च नः । कृतवान्यादृशं ह्येकस्तव पुत्रो महा
रथः ॥ एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तरां । पार्थस्यैव महाबाहुः पार्श्वमागादरिंदमः । ततोऽभ्यनुज्ञाय नृपान् कृष्णो बंधूंस्तथा
र्जुनं । विवेशांतःपुरं राजंस्ते च जग्मुर्यथालयं ॥ ॥ द्रोणपर्वणि जयद्रथवधे ॥ ॥ संजय उवाच ॥ ॥ ततोऽर्जुनस्य भवनं प्रवि
श्याप्रतिमं विभुः । स्पृष्ट्वांभः पुंडरीकाक्षः स्थंडिले शुभलक्षणे । संतस्तार शुभां शय्यां दर्भैर्वैदूर्यसंनिभैः । ततो माल्येन विधिव
ल्लाजैर्गंधैः समंगलैः ॥ अलंचकार तां शय्यां परिवार्यायुधोत्तमैः । ततः स्पृष्टोदके पार्थे विनीताः परिचारकाः । दर्शयंतोऽतिके चक्रु नैशं १०३

तस्मिंस्त्र्यंबकाय । पार्थायेति ताश्चर्थ्येच ब्रुवी ॥ ततः प्रतायः ॥ योगं विन्नसमाधानां सदा माबलेन । कथं तु न कुर्याद्देवा । कथं वृत्तिवा

त्रियंबकं बलिं । ततः प्रीतमनाः पार्थो गंधैर्माल्यैश्च माधवं । अलंकृत्योपहारं तं नैशं तस्मै न्यवेदयत् । स्मयमानस्तु गोविंदः फा
ल्गुनं प्रत्यभाषत । सुप्यतां पार्थ भद्रं ते कल्याणाय व्रजाम्यहं । स्थापयित्वा ततो द्वास्थान् गोप्तॄंश्चात्तायुधान्नरान् । दारुकानुगतः श्री
मान् विवेश शिबिरं स्वकं । शिश्ये च शयने शुभ्रे बहुकृत्यं विचिंतयन् । पार्थाय सर्वं भगवान् शोकदुःखापहं विधिं । व्यदधात्पुं
डरीकाक्षस्तेजोद्युतिविवर्द्धनं । योगमास्थाय युक्तात्मा सर्वेषामीश्वरेश्वरः । श्रेयस्कामः पृथुयशा विष्णुर्जिष्णोः प्रियंकरः ॥ न पांडवा
नां शिबिरे कश्चित्सुष्वाप तां निशां । प्रजागरः सर्वजनं ह्याविवेश विशांपते । पुत्रशोकाभितप्तेन प्रतिज्ञातो महात्मना ॥ सहसा
सिंधुराजस्य वधो गांडीवधन्वना । तत्कथं तु न महाबाहुर्वासविः परवीरहा । प्रतिज्ञां सफलां कुर्यादिति ते समचिंतयन् । कष्टं हीदं
व्यवसितं पांडवेन महात्मना । स च राजा महावीर्यः पालयत्वर्जुनः स्म तां । पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता । भ्रातरश्चा
पि विक्रांता बहुलानि बलानि च । धार्तराष्ट्रस्य पुत्राणां सर्वं तस्मै निवेदितं । स हत्वा सैंधवं संख्ये पुनरेतु धनंजयः ॥ जित्वारि
पुगणांश्चैव पारयत्वर्जुनो व्रतं । अहत्वा सिंधुराजं हि धूमकेतुं प्रवेक्ष्यति । न ह्यसावनृतं कर्तुमलं पार्थो धनंजयः ॥ जित्वा
रिपुगणान् धर्मपुत्रः कथं राजा भविष्यति मृतेऽर्जुने । तस्मिन् हि विजयः कृत्स्नः पांडवेन समाहितः । यदि नः सुकृतं किंचिद्यदि द

पावकः ॥ कद्दंडक्रं ॥ ॥

सहसा बलेन। अत्र त्वगतः॥

द्रोण त्रिकृतं यदि। फलेन तस्य सर्वस्य सव्यसाची जयद्रथान्। एवं कथयतां तेषां जयमाशंसतां प्रभो। कृष्णेणामहात्मानौ राजन् रजनी व्य
त्यवर्त्तत। तस्यार्द्धरात्र्यां मध्ये तु प्रतिबुद्धो जनार्द्दनः। स्मृत्वा प्रतिज्ञां पार्थस्य दारुकं प्रत्यभाषत। अर्जुनेन प्रतिज्ञातमार्त्ते
न हतबंधुना। जयद्रथं वधिष्यामि श्वोभूत इति दारुक। तत्तु दुर्योधनः श्रुत्वा मंत्रिभिर्मंत्रयिष्यति। यथा जयद्रथं पार्थो न हन्या
दिति संयुगे। अक्षौहिण्यो हिताः सर्वा रक्षिष्यंति जयद्रथं। द्रोणश्च सह पुत्रेण सर्वास्त्रविधिपारगः। एको वीरः सह
स्राक्षो दैत्यदानवमर्द्दिता। सोपि तं नोत्सहेताजौ हंतुं द्रोणेन रक्षितं। सोहं श्वस्तत्करिष्यामि यथा कुंतीसुतोर्जुनः। अप्राप्ते
स्तं दिनकरे हनिष्यति जयद्रथं। न हि दारा न मित्राणि ज्ञातयो न च बांधवाः। कश्चिन्नान्यः प्रियतरः कुंतीपुत्रान्ममार्जुनात्। अन
र्जुनमिमं लोकं मुहूर्त्तमपि दारुक। उदीक्षितुं न शक्तोहं भविता न च तत्तथा। अहं सं विजित्य तान्सर्वान्सहसा सहयद्विपान्।
अर्जुनार्थे हनिष्यामि सकर्णान्ससुयोधनान्। श्वो निरीक्षंतु मे वीर्यं त्रयो लोका महाहवे। धनंजयार्थं समरे पराक्रांतस्य दारुक।
श्वो नरेंद्रसहस्राणि राजपुत्रशतानि च। साश्वद्विपरथान्याजौ विद्रविष्यंति दारुक। श्वो ध्वस्तां चक्रमथितां द्रक्ष्यसे नृपवाहिनीं
। मया क्रुद्धेन समरे पांडवार्थे निपातितां। श्वः सदेवाः सगंधर्वाः पिशाचोरगराक्षसाः। ज्ञास्यंति लोकाः सर्वे मां सुहृदं सव्यसाचिनः॥
यस्तं द्वेष्टि स मां द्वेष्टि यस्तं चानु स मामनु। इति संकल्पतां बुद्ध्या शरीरार्द्धं ममार्जुनः। यथा त्वं मे प्रभातायामस्यां निशि रथोत्तमं॥ २०४

यथा व्रजसि तथा संपद्यतामित्युषंगः॥ आवृत्तिणश्कारणं॥ मंत्रविमर्षी॥ ॥

कल्पयित्वा यथाशास्त्रमादाय व्रजसीह मां। गदां कौमोदकीं दिव्यां शक्तिं चक्रं धनुः शरान्। आरोप्य वै रथे सूत सर्वोप
करणानि च। स्थानं च कल्पयित्वाथ रथोपस्थे ध्वजोत्तमे। वैनतेयस्य वीरस्य समरे रथशोभिनः। छत्रं जांबूनदैर्जालैर
र्क्कज्वलनसप्रभैः। विश्वकर्मकृतैर्दिव्यैरश्वानपि विभूषितान्। बलाहकं मेघपुष्पं शैब्यं सुग्रीवमेव च। युक्त्वा वा
जिवरान्यत्तः कवची तिष्ठ दारुक। पांचजन्यस्य निर्घोषमार्षभेणैव पूरितं। श्रुत्वा च भैरवं नादमुपायाया जवेन मां। ए
काह्नाहममर्षं च सर्वदुःखानि चैव ह। भ्रातुः पैतृष्वसेयस्य व्यपनेष्यामि दारुक। सर्वोपायैर्यतिष्यामि यथा बीभत्सुराह
वे। पश्यतां धार्त्तराष्ट्राणां हनिष्यति जयद्रथं। यस्य यस्य च बीभत्सुर्वधे यत्नं करिष्यति। आशंसे सारथे तत्र भवितास्य ध्रुवो
जयः॥ ॥दारुक उवाच॥ ॥जय एव ध्रुवस्तस्य कुत एव पराजयः। यस्य त्वं पुरुषव्याघ्र सारथ्यमुपजग्मिवान्। एवं
चैव करिष्यामि यथा मामनुशाससि। सुप्रभातामिमां रात्रिं जयाय विजयस्य हि॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ॥
संजय उवाच॥ ॥कुंतीपुत्रस्तु तं मंत्रं स्मरन्नेव धनंजयः। प्रतिज्ञामात्मनो रक्षन्मुमोहाचिंत्यविक्रमः। तं तु शोकेन सं
तप्तं स्वप्ने कपिवरध्वजं। आससाद महातेजा ध्यायंतं गरुडध्वजः। प्रत्युत्थानं तु कृष्णस्य सर्वावस्थं धनंजयः। न लोपयति धर्म्मा
त्मा भक्त्या प्रेम्णा च सर्वदा। प्रत्युत्थाय च गोविंदं स तस्मायासनं ददौ। न चासने स्वयं बुद्धिं बीभत्सुर्व्यदधात्तदा। ततः कृ

का।

यस्य चक्षुषं माविनि। विधौ विधाने। नियच्छति प्रवर्तयति। न शोच्यं। शोको नाचरणीयः। कार्यं कृत्यं। कार्यं करणीयं। नाव्यदिस्यत्र

द्रोण लोमहातेजा ज्ञानन्यार्थस्य निश्चयं। कुंतीसुतमिदं वाक्यमामानं स्थितमब्रवीत्। मा विषादे मनः पार्थ कृथाः कालो
हि दुर्जयः। कालः सर्वाणि भूतानि नियच्छति परे विधौ॥ किमर्थं च विषादस्ते तद्ब्रूहि द्विपदां वर। न शोच्यं विदुषां श्रेष्ठ
शोकः कार्यविनाशनः। यत्तु कार्यं भवेत्कार्यं कर्मणा तत्समाचर। हीनचेष्टस्य यः शोकः स हि शत्रुर्धनंजय। शोचन्नंदयते
२ शत्रून्कर्शयत्यपि बांधवान्। क्षीयते च नरस्तस्मान्न त्वं शोचितुमर्हसि। इत्युक्तो वासुदेवेन बीभत्सुरपराजितः। आबभाषे तदा २४
विद्वानिदं वचनमब्रवीत्। मया प्रतिज्ञा महती जयद्रथवधे कृता। श्वोऽस्मि हंता दुरात्मानं पुत्रघ्नमिति केशव। मत्प्रतिज्ञावि
घातार्थं धार्तराष्ट्रैः किलाच्युत। पृष्ठतः सैंधवः कार्यः सर्वैर्गुप्तो महारथैः। दशाचैकाचताः कृष्ण अक्षौहिण्यः सुदुर्ज
याः। हतावशेषास्तत्र माधव संख्यया। अमिताः परिवृतः संख्ये सर्वैश्चैव महारथैः। कथं शक्येत वै द्रष्टुं दुरात्मा
कृष्ण सैंधवः। प्रतिज्ञापारणं चापि न भविष्यति केशव। प्रतिज्ञायां च हीनायां कथं जीवेत मद्विधः। दुःखोपायस्य वीर
विकांक्षा परिवर्तते। द्रुतं च याति सविता तत एवं ब्रवीम्यहं। शोकस्थानं तु तच्छ्रुत्वा पार्थस्य द्विजकेतनः। संस्पृश्यांभस्त
तः कृष्णः प्राङ्मुखः समवस्थितः॥ इदं वाक्यं महातेजा बभाषे पुष्करेक्षणः। हितार्थं पांडुपुत्रस्य सैंधवस्य वधे वृतः। पार्थ
पाशुपतं नाम परमास्त्रं सनातनं। येन सर्वान्मृधे दैत्यान्जघ्ने देवो महेश्वरः। यदि तद्विदितं ते ऽद्य श्वो हंतासि जयद्रथं। २७५
यः। दुःखोपायस्य दुःखस्य। प्रतिज्ञायत। विकांक्षा विसंवादापरिवर्तते प्रतिनाति॥

स्कं मंत्रं। प्रणिहितः समाहितमनाः॥ ब्राह्मेण रूपान्वे सुकृतं आथर्वणस्य सूते॥

अथ ज्ञातं शपथ्यस्व मनसा वृषभध्वजं। तं देवं मनसा ध्यात्वा जोषमास्स्व धनंजय। ततस्तस्य प्रसादात्त्वं भक्तः प्राप्स्यसि। तन्मह १२८
त्। ततः कृष्णवचः श्रुत्वा संस्पृश्यांभो धनंजयः। भूमावासीन एकाग्रो जगाम मनसा भवं। ततः प्रणिहिते ब्राह्मे मुहूर्ते शुभल
क्षणे। आत्मानमर्जुनोऽपश्यद्गगने सह केशवं। पुण्यं हिमवतः पादमणिमंतं च पर्वतं। ज्योतिर्भिश्च समाकीर्णं सिद्धचारणसे
वितं। वायुवेगगतिः पार्थः खं भेजे सहकेशवः। केशवेन गृहीतः स दक्षिणे विभुना भुजे। प्रेक्षमाणो बहून्भावान्जगामाद्भुतद
र्शनान्। उदीच्यां दिशि धर्मात्मा सोऽपश्यच्छ्वेतपर्वतं। कुबेरस्य विहारे च नलिनीं पद्मभूषितां। सरिच्छ्रेष्ठां च तां गंगां वीक्षमाणो बहू
दकां। सदा पुष्पफलैर्वृक्षैरुपेतां स्फटिकोपमां। सिंहव्याघ्रसमाकीर्णां नानामृगसमाकुलां। पुण्याश्रमवतीं रम्यां मनोज्ञा
ंडजसेवितां। मंदरस्य प्रदेशांश्च किन्नरोद्गीतनादितान्। हेमरूप्यमयैः शृंगैर्नानौषधिविदीपितान्। तथा मंदारवृक्षैश्च पुष्पितै
रुपशोभितान्। स्निग्धांजनचयाकारं संप्राप्तः कालपर्वतं। ब्रह्मतुंगं नदीश्चान्यास्तथा जनपदानपि। सुशृंगं शतशृंगं च शरा दृष्टं
यातिवनमेव च। पुण्यमश्वशिरःस्थानं स्थानमाथर्वणस्य च। वृषदंशं च शैलेंद्रं महामंदरमेव च। अप्सरोभिः समाकीर्णं शृंगं
किन्नरैश्चोपशोभितं। तस्मिंश्च शैले व्रजता पार्थः सकृष्णः समवेक्षत। शुभैः प्रस्रवणैर्जुष्टां हेमधातुविभूषितां। चंद्ररश्मि

द्रोण

नथा व्रजन् विष्णुपदमाकाशमग्न्यगादिस्त्रयः॥ लास्यं नृत्यं॥ वल्गितं मिथस्तनघवारः॥ आस्फोटितं भुजाडंबरः॥ उत्क्रुष्टं सिंहस्वनितं॥
लोकानामादिभूपादानं॥ विश्वं कर्म प्राप्यं यस्य॥ ईशानमप्रतिहतेच्छं॥ अव्ययमविकारं॥ मनसः परमं पूर्वं ह्रस्वं॥ तिरस्त्रिकारणं॥ योनि

पृकारांगीष्ठ पृथिवीं पुरमालिनीं॥ सपुंडरीकां कुताकाशमनपश्यद्रुकुलाकराः॥ वियच्चाप्यपृथिवीं चैव तथा विष्णुपदं व्रजन्॥ वि
स्मितस्सह कृष्णेन क्षिप्तो बाण इवात्यगात्॥ ग्रहनक्षत्रसोमानां सूर्याग्न्योश्च समत्विषं॥ अपश्यत तदा पार्थो ज्वलंतमिव पर्वतं॥ समासाद्य त
तं शैलं शैलाग्रे समवस्थितं॥ तपोनित्यं महात्मानमपश्यद्वृषभध्वजं॥ सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा॥ शूलिनं जटिलं
गौरं वल्कलाजिनवाससं॥ नयनानां सहस्रैश्च विचित्रांगं महौजसं॥ पार्वत्या सहितं देवं भूतसंघैश्च भास्वरैः॥ गीतवादित्रसंह्रा
दैस्ताललास्यसमन्वितं॥ वल्गितास्फोटितोत्क्रुष्टैः पुण्यैर्गंधैश्च सेवितं॥ स्तूयमानं स्तवैर्दिव्यैर्मुनिभिर्ब्रह्मवादिभिः॥ गोप्तारं स
र्वभूतानामिष्वासधरमच्युतं॥ वासुदेवस्तु तं दृष्ट्वा जगाम शिरसा क्षितिं॥ पार्थेन सह धर्मात्मा गृणन्ब्रह्म सनातनं॥ लोकादिं वि
श्वकर्माणमजमीशानमव्ययं॥ मनसः परमं योनिं खं वायुं ज्योतिषां निधिं॥ स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं परां॥ देवदानवय
क्षाणां मानवानां च साधनं॥ योगानां च परं ब्रह्म दृष्टं ब्रह्मविदां निधिं॥ १०६

भूतस्थिस्थानं च॥ ज्योतिषां तेजसां॥ निधिमधिष्ठानं॥ परां मूलप्रकृतिं॥ प्रकृतिं प्रधानं॥ साधनं सिद्धेर्निधानं॥ योगानां योगदर्शिनां॥
परमाश्रयं दृष्टं॥ साक्षात्कृतं॥ ब्रह्मतत्त्वं॥ ब्रह्मविदां निधिं रहस्यं॥ ॥

कालस्य कोपो यस्य॥ शक्रस्य गुणा ऐश्वर्यादयः॥ सूर्यस्य गुणाः प्रतापादयः॥ तेषामुदयो यस्मात्॥ कारणात्मानं कारणैक
स्वभावं॥ भवं सर्वप्रभुत्वात्॥ शर्वं संहरणात्॥ शांतिः शमप्रधानत्वात्॥ विष्णोर्विशेषपयोगत्वात्॥ मत्स्यः सदेकस्वभावः॥

चराचरस्य स्रष्टारं प्रतिहर्तारमेव च॥ कालकोपं महात्मानं शक्रसूर्यगुणोदयं॥ ववंदे तं तदा कृष्णो वाङ्मनोबुद्धिकर्मभिः॥ यं प्र
पश्यंति विद्वांसः सूक्ष्माध्यात्मपदैषिणः॥ तमजं कारणात्मानं जग्मतुः शरणं भवं॥ अर्जुनश्चापि तं देवं भूयो भूयोऽप्यवंदत॥
ज्ञात्वा तं सर्वभूतादिं भूतभव्यभवोद्भवं॥ ततस्तावागतौ दृष्ट्वा नरनारायणावुभौ॥ सुप्रसन्नमनाः शर्वः प्रोवाच प्रहसन्निवा॥ स्वा
गतं वां नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ॥ किं च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यतां॥ येन कार्येण संप्राप्तौ युवां तत्साधयामि वां॥ व्रिय
तामात्मनः श्रेयस्तत्सर्वं प्रददामि वां॥ ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय कृतांजली॥ वासुदेवार्जुनौ शर्वं तुष्टुवाते महामती॥ भक्त्या
स्तवेन दिव्येन महात्मानमनिंदितौ॥ ॥वासुदेवार्जुनावूचतुः॥ ॥नमो भवाय शर्वाय रुद्राय वरदाय च॥ पशूनां पतये नित्यमुग्रा
य च कपर्दिने॥ महादेवाय भीमाय त्र्यंबकाय च शांतये॥ ईशानाय भगघ्नाय नमोऽस्त्वंधकघातिने॥ कुमारगुरवे नित्यं नीलग्री
वाय वेधसे॥ पिनाकिने हविष्याय सत्याय विभवे सदा॥ विलोहिताय धूम्राय व्याधिनेऽनपराजिते॥

॥महा॰॥ त्॥ सर्वमिदं वित्तुं व्यापकत्वात्॥ व्याधो यागमृगहननात्॥ हिंस्रक्रिडिस्तथाकरणात्॥ अनाद्यपाणिनः पराजय इति अनपराजितः॥ मर्दन
तो नद्या अनयानपराजिते इति पाठः॥ व्याधिनेऽनपराजिते इति देवबोधानां मते॥ विगतमनोऽनुस्यायवनानवपाठः देवबोधमते॥

नीलशिखंडो नीलकेशत्वात् । लोहितो दीक्षितो गोत्रेन दूरणशीलत्वात् । वसुरेता अग्नौ रेतः क्षेपणात् । मुंडो दीक्षितत्वात् । ब्रह्म
चारी रेतो विधारणात् । भूतानां प्राणिनां प्रमथादीनां । ब्रह्मवक्रो वेदः स एव मुखं मुख्यं यस्य । सर्वः सर्वस्वरूपत्वात् । शि

द्रोण

॥ विनायक नकवर्णा योनिदेवः

नित्यं नीलशिखंडाय शूलिने दिव्यचक्षुषे । हंत्रे गोप्त्रे त्रिनेत्राय व्याधाय वसुरेतसे । अचिंत्यायांबिकाभर्त्रे सर्वदेवस्तुताय च ।
वृषध्वजाय मुंडाय जटिने ब्रह्मचारिणे । तप्यमानाय सलिले ब्रह्मण्यायाजिताय च । विश्वात्मने विश्वसृजे विश्वमावृत्य
तिष्ठते । नमो नमस्ते सेव्याय भूतानां प्रभवे सदा । ब्रह्मवक्राय सर्वाय शंकराय शिवाय च । नमोस्तु वाचस्पतये प्रजानां पत
ये नमः । नमो विश्वस्य पतये महतां पतये नमः । नमः सहस्रशिरसे सहस्रभुज मृत्यवे । सहस्रनेत्रपादाय नमोसंख्येयकर्मणे ।
नमो हिरण्यवर्णाय हिरण्यकवचाय च । भक्तानुकंपिने नित्यं सिध्यतां नौ वरः प्रभो ॥ संजय उवाच ॥ ॥ एवं स्तुत्वा
महादेवं वासुदेवः सहार्जुनः । प्रसादयामास भवं तदा ह्यस्त्रोपलब्धये ॥ ॥ द्रोणपर्वणि जयद्रथवधे शतरुद्रियं ॥
संजय उवाच ॥ ॥ ततः पार्थः प्रसन्नात्मा प्रांजलिर्वृषभध्वजं । ददर्शोत्फुल्लनयनः समस्तं तेजसां निधिं । तं चोपहारं स्व
कृतं नैशं नैत्यकमात्मना । ददर्श त्र्यंबकाभ्याशे वासुदेवनिवेदितं । ततोभिपूज्य मनसा कृष्णं शर्वं च पांडवः । इच्छाम्यहं दिव्य

वेमोक्षहेतुत्वात् । वाचस्पतिर्वाग्रूपप्रवर्तनात् । महस्तेजो मात्यवत्त्वेऽस्य ॥ मन्यवे इति पाठः ॥ ॥ सेव्याय भजनीयाय ॥ १०७
समस्तं समग्रं । आत्मना स्वकृतं । स्वयं कल्पितं ॥

हृदं कुगलं । नीललोहितो भगवतोऽपरार्द्धे तत्त्वः । स्नानं स्नापनकं ॥

मस्त्रमित्यभाषत शंकरं ॥ ततः पार्थस्य विज्ञाय वरार्थे वचनं तदा । वासुदेवार्जुनौ देवः स्मयमानोभ्यभाषत । स्वागतं वां नर
श्रेष्ठौ विज्ञातं मनसेप्सितं । येन कामेन संप्राप्तौ भवद्भ्यां तं ददाम्यहं । सरो ऽमृतमयं दिव्यमभ्याशे शत्रुसूदनौ । तत्र मे तद्धनुर्दि
व्यं शरश्च विहितः पुरा । येन देवारयः सर्वे मया युधि निपातिताः । तत आनीयतां कृष्णौ सशरं धनुरुत्तमं । तथेत्युक्त्वा तु तौ
वीरौ तं सर्वपारिषदैः सह । प्रस्थितौ तत्सरो दिव्यं दिव्याश्चर्यशतैर्युतं । निर्दिष्टं यद्वृषांकेन पुण्यं सर्वार्थसाधनं । तौ जग्मतु
रसंभ्रांतौ नरनारायणावृषी । ततस्तौ तत्सरो गत्वा सूर्यमंडलसन्निभं । नागमंतर्जले घोरं ददृशातेऽर्जुनाच्युतौ । द्वितीयं चा
परं नागं सहस्रशिरसं वरं । वमंतं विपुलां ज्वालां ददृशातेऽग्निवर्चसं । ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृतांजली । तौ नागा
वुपतस्थाते नमस्यंतौ वृषध्वजं । गृणंतौ वेदविदुषौ तद्ब्रह्म शतरुद्रियं । अप्रमेयं प्रणमंतौ गत्वा सर्वात्मना भवं । ततस्तौ रुद्रमाहा
त्म्याद्धित्वा रूपं महोरगौ । धनुर्बाणश्च शत्रुघ्नं तद्द्वंद्वं समपद्यत । तौ तज्जगृहतुः प्रीतौ धनुर्बाणं च सुप्रभं । आजह्रतुर्महात्मानौ द
दतुश्च महात्मने । ततः पार्श्वाद्वृषांकस्य ब्रह्मचार्यन्यवर्तत । पिंगाक्षस्तपसः क्षेत्रं बलवान्नीललोहितः । स तद्गृह्य धनुःश्रेष्ठं
तस्थौ स्थानं समाहितः । विचकर्षाथ विधिवत्सशरं धनुरुत्तमं । तस्य मौर्वीं च मुष्टिं च स्थानं चालक्ष्य पांडवः । श्रुत्वा मंत्रं भवप्रोक्तं

जयात्मनसिकृत्वाह॥ ॥मधुपर्किकामंगल्योपस्थापकाः। रक्तकं विनोरंजकस्वराः। कर्करा कस्त्री सकाः॥ने व्योंहृदह
जयाद्राविंस विक्रमः। मरस्यैवं चनं बाणांस्तमोचा तिबलः बभुः वकारवस्तु नवीसन्नस्मिन्नरसितहस्तं। ततः श्रीतं मवंज्ञा
वाधीतिमानर्जुनस्तदा। वरमारण्यकेदनं दर्शितं शंकरस्य च। मनसा चिंतयामास मतान्य संप्रहृष्टमिति। तस्य तन्मतमाज्ञाय वृ
तः प्राद्रादृरंनवः। नवपास्तुपतं घोरं प्रतिज्ञामास्य पारगं। नवपास्तुपतं दिव्यमवाप्य वरमास्थितः॥ संहृष्टरोमाड हर्षकृतं
कार्यमिमत्यत। एवं दहश्यसंहृष्टौ शिरोन्यां तौ महेश्वरं। चक्रजानौ तौ रणे तस्मिन्नवेनार्जुनकेशवौ। आमो स्वशिबिरं बाणे
स्तदाप्रमयामुतौ। तथा नवेना हृगतौ महासुर निसृतितौ। इंद्रविष्णुयथाप्रीतौ जंभस्य वधकांक्षिणौ॥ ॥द्रोणपर्व
णि जयद्रथवधे॥ ॥संजय उवाच॥ ॥तयोः संवदतो रेवं कृष्णदारुकयोस्तदा। सात्यगाद्रजनी राजन्नथ राजा
स्तुध्यत। एवं पाणिस्वनिका मागधा मधुपर्किकाः। वैतालिकाश्च सूताश्च तुष्टुवुः पुरुषर्षभं। नर्तकाश्चाप्यनृत्यंत ज
गुर्गीतानि गायनाः। कुरुवंशस्तवार्थानि मधुरं रक्तकंठिनः। मृदंगा झर्झराश्चैव पणवानकगोमुखाः। आडंबराश्च शं
खाश्च दुंदुभ्यश्च महास्वनाः। एवमेतानि सर्वाणि तथान्यान्यपि भारत। वादयंति स्म संहृष्टाः कुशलाः साधुशिक्षिताः। समे
घमनिर्घोषो महान्शब्दः स्पृशन्दिवं। पार्थिवप्रवरं सुप्तं युधिष्ठिरमबोधयत्। प्रतिबुद्धः सुखं सुप्तो महार्हे शयने नृपः। उत्थायावश्यकार्या
का। पणवादतराः आनकाः पटहाः। गोमुखाः शृंगाणि। आडंबराः दुंदुभ्यः। इंडुन्योटकाः॥ ॥पाणिस्वनिका हस्तेन ताल

दानासनेच तुः संमामता। कषायेन सर्वौषध्यादिकल्केन। अक्लिष्टमवद्धतं वसनं यस्य। हीं संज्वलदग्निं। गोरा गोरी सुत्राद
र्थं यो स्नानगृहं प्रभुः। ततः शुक्लांबराः स्नातास्तरुणाः। आनमष्टवास्याः कांचनैः कलिः पूर्णैः समुपतस्थिरे नद्रा
सनेन प्रविष्टः परिक्ष्मयां वरं लघु। कस्मौवं रत्नसंयुक्ते। पातीयैरभिमंत्रितैः। उत्साहितः कषायेण बलवद्भिः सुशिक्षितैः। आ
सुतः माधिवासितेन जलेन समसुगंधिना। राजहंसनिभेन प्राप्योष्णीषं शिथिलार्पितं। जलक्षयनि मित्तं वेष्टयामास मूर्ध्नि। हरि
णा चंदनेनांगमुपलिप्य महाभुजः। स्रग्वी चाक्लिष्टवसनः प्राङ्मुखः प्रांजलिः स्थितः। जजाप जप्यं कौंतेयः सतां मार्गमनुष्ठित
ः। ततो ग्निशरणं दीप्तं प्रविवेश विनीतवत्। समिद्भिः सपवित्राभिरग्निमाहुतिभिस्तथा। मंत्रपूताभिरर्चित्वा निश्चक्राम मं ट
हात्ततः। द्वितीयां पुरुषव्याघ्रः कक्षां निष्क्रम्य पार्थिवः। तत्र वेदविदो वृद्धान पश्यद्ब्राह्मणर्षभान्। दांतान्वेदव्रतस्नातान्स्नातानव भृ
थेषु च। सहस्रानुचरान्सौरान्सहस्रंचाष्टचापरान्। अक्षतैः सुमनोभिश्च वाचयित्वा महाभुजः। तान्द्विजान्मधुसर्पिर्भ्यां फ
लैः श्रेष्ठैश्च मंगलैः। प्रादात्कांचनमेकैकं निष्कं विप्राय पांडवः। अलंकृतं चाश्वशतं वासांसि सा हानि दक्षिणाः। तथा गाः क
पिला दोग्ध्रीः सवत्साः पांडुनंदनः। हेमशृंगा रूप्यखुराः स्वा चक्रे प्रदक्षिणं। स्वस्तिकान्वर्धमानांश्च नंद्यावर्तांश्च कांचनान्
। माल्यं च जलकुंभांश्च ज्वलितं च हुताशनं॥
पूर्णान्यक्षतपात्राणि रुचकान्रोचनास्तथा॥

भद्रिणा क्रमेति शेषः। स्वस्तिकानालिपनानि। विवर्धमानान्शरावान्। नंद्यावर्तान्। मंगुरिनार्घपात्राणि॥

रूचकं माल्यलिंगकं ॥ विश्वकर्म्मकृतं विश्वकर्म्मप्रणीतेन विधिना निर्म्मितं ॥ शुद्धांतं कल्पांतरं ॥ स्वागतेन शतिब्राह्मणे नमस्त॥
द्रोण स्तस्मिन्निवसतपार्थो ॥ रूचकं रावनं राख्या ॥ अलंकृतः शुभ्रः कन्या दधिमं र्ध्यम्म क्षुद्रकं ॥ मंगल्यान्यपश्चिता ॥ स्त्रोचयद्धान्यदपि हृ
जितः ॥ दृष्ट्वा स्पृष्ट्वा चक्रौ तयो बाह्यो कक्षान्तानागमत् ॥ ततस्तस्य महाबाहोः स्त्रिश्रुतः परिचारकाः ॥ सोवर्णं सर्वतो नद्धं
रुचो विदूर्यमंडितं ॥ परार्ध्यास्तिरणास्तीर्णं सोत्ररच्छदमृद्धिमत् ॥ विश्वकर्म्मकृतं दिव्यमुपजन्हुर्वरासनं ॥ तत्र तत्सोपवि
ष्टस्य भूषणानि महात्मनः ॥ उपजन्हुर्महार्हाणि प्रेष्याः शुभ्राणि सर्वशः ॥ युक्ताभरणवेषस्य कौंतेयस्य महात्मनः ॥ रूपमा
सीन्महाराज द्विषतां शोकवर्द्धनं ॥ पांडुरैश्चंद्ररश्म्याभैर्हैमदंडैश्चामरैः ॥ दोधूयमानः शुशुभे विद्युद्भिरिव तोयदः ॥ सं
स्तूयमानः सूतैश्च वंद्यमानश्च वंदिभिः ॥ उपगीयमानो गांधर्वैरास्ते स्म कुरुनंदनः ॥ ततो मुहूर्त्ताद्दासानां रथनेमिस्वनो म
हान् ॥ नेमिघोषश्च रथिनां खुरघोषश्च वाजिनां ॥ ह्रादेन गजघंटानां शंखानां निस्वनेन च ॥ नराणां पदशब्देन कंपतीव स्म मे
दिनी ॥ ततः शुद्धांतमासाद्य जानुभ्यां भूतले स्थितः ॥ शिरसा वंदनमति वंद्यमदीयत ॥ कुंडली बद्धनिस्त्रिंशः सन्नद्धकवचो
युवा ॥ अभिप्रणम्य शिरसा द्वाःस्थो धर्म्मात्मजाय है ॥ न्यवेदयद्धृषीकेशमुपयातं महात्मने ॥ सो ब्रवीत्पुरुषव्याघ्रः स्वागतेने
व माधवं ॥ अर्घ्यं चैवासनं चास्मै दीयतां परमार्चितं ॥ ततः प्रवेश्य वार्ष्णेयमुपवेश्य वरासने ॥ सत्कृत्य सत्कृतस्तेन सत्कृत्य प १०९
र्य्यपृच्छद्युधिष्ठिरः ॥ ॥ द्रोणपर्वणि जयद्रथवधे ॥ ॥ संजय उवाच ॥ ॥

निराक्रियामयमारणं ॥ यात्रा स्थिति ॥

ततो युधिष्ठिरो राजा प्रतिनंद्य जनार्दनं ॥ सुखं न रजनी व्युष्टा कच्चित्ते मधुसूदन ॥ कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि त
वाच्युत ॥ वासुदेवोपि तद्युक्तं पर्य्यपृच्छद्युधिष्ठिरं ॥ ततः क्षत्ता प्रकृतयान्यवेदयदुपस्थिताः ॥ अनुज्ञातश्च राज्ञा स प्रावे
शयत्तं जनं ॥ विराटं भीमसेनं च धृष्टद्युम्नं च सात्यकिं ॥ चेदिपं धृष्टकेतुं च द्रुपदं च महारथं ॥ शिखंडिनं यमौ चैव चेकि
तानं सकेकयं ॥ युयुत्सुं चैव कौरव्यं पांचाल्यं चोत्तमौजसं ॥ युधामन्युं सुबाहुं च द्रौपदेयांश्च सर्वशः ॥ एते चान्ये च बहवः
क्षत्रियाः पांडवर्षभं ॥ उपतस्थुर्महात्मानं विविशुश्चासनेषु ते ॥ एकस्मिन्नासने वीरावुपविष्टौ महाबलौ ॥ कृष्णश्च युयुधा
नश्च महात्मानौ महाद्युती ॥ ततो युधिष्ठिरस्तेषां शृण्वतां मधुसूदनं ॥ अब्रवीत्पुंडरीकाक्षमाभाष्य मधुरं वचः ॥ एकं त्वां वय
माश्रित्य सहस्राक्षमिवामराः ॥ प्रार्थयामो जयं युद्धे शाश्वतानि सुखानि च ॥ त्वं हि राज्यविनाशं च द्विषद्भिश्च निराक्रिया
क्लेशांश्च विविधान्कृष्ण सर्वांस्तानपि वेत्थ नः ॥ त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल ॥ सुखमायत्तमत्यर्थं यात्रा च म
धुसूदन ॥ स तथा कुरु वार्ष्णेय यथा त्वयि मनो मम ॥ अर्जुनस्य यथा सत्या प्रतिज्ञास्याच्चिकीर्षिता ॥ स त्वं तारय दुःखस्मा
द्दुःखामर्षमहार्णवात् ॥ पारं तितीर्षतामद्य प्लवो नो भव माधव ॥ न हि तत्कुरुते संख्ये रथी रिपुवधोद्यतः ॥ यथा वै कुरु
ते कृष्ण सारथिर्यत्नमास्थितः ॥ यथैव सर्वास्वापत्सु पासि वृष्णीन्जनार्दन ॥

हजिनाह्।व्यसनाह्।सनातनोऽनादिनिधनः।चिदानंदः संहर्त्ता।कृष्ण संसाररूपकः।पुरुषोत्तमः परमात्मा।युद्धेऽजोऽसुहृद श्री॥

द्रोण तथैवास्मान्महाबाहो हि जिनाद्रात्तमर्दसि।व मगाधे।अवमस्मान् पांडवान् कुरुसागरात्।नारदाद्य स्तवोन्द्याशं रवचक्रगदा
धर।नमस्ते देवदेवेश सनातन चिदात्मन।विष्णो जिष्णो हरे कृष्ण वैकुंठ पुरुषोत्तम।नारदस्त्वां ममाचख्यौ पुराणं ऋषिसत्तम
।वरदं शार्ङ्गिणां देवं तं सत्यं कृष्णमाधव।इत्युक्तः पुंडरीकाक्षो धर्मराजेन संसदि।उद्यमेघस्वनो वाग्मी प्रत्युवाच युधिष्ठिर
वासुदेव उवाच॥ ॥सामरस्य पिलोकस्य सर्वेषु नतथा विधः।शरासनधरः कश्चिद्यथा पार्थो धनंजयः।वीर्यवानस्त्र संप
न्नः पराक्रांतो महाबलः।युद्धशौंडः सदामर्षी तेजसा परमो नृणां।स युवा वृषभस्कंधो दीर्घबाहुर्महाबलः।सिंहर्षभगतिः
श्रीमान्द्विषतस्ते हनिष्यति।अहं च तत्करिष्यामि यथा कुंतीसुतोऽर्जुनः।धार्तराष्ट्रस्य सैन्यानि धक्ष्यत्यग्निरिवेंधनं।अद्य तं पा
पकर्माणं क्षुद्रं सौभद्रघातिनं।अपुनर्दर्शनं मार्गमिषुभिः ऋक्ष्यतेऽर्जुनः।तस्याद्य गृध्राः श्येनाश्च बालो गोमायवस्तथा ७८।
।भक्षयिष्यंति मांसानि ये चान्ये पुरुषादकाः।यद्यस्य देवा गोप्तारः सेंद्राः सर्वे युधिष्ठिर।राजधानीं यमस्याद्य हतः प्रा
प्स्यति सैंधवः।निहत्य सैंधवं जिष्णुरद्य त्वामुपयास्यति।विशोको विज्वरो राजन्भव भूतिपुरस्कृतः॥ ॥द्रोणपर्वणि जयद्र
थवधे॥ ॥संजय उवाच॥ ॥तथा संभाषतां तेषां प्रादुरासीद्धनंजयः।दिदृक्षुर्भरतश्रेष्ठ राजानं ससुहृज्जनं।तं प्रविष्टं शुभां कक्षाम ११७

सकृत्पुरस्सरः सामयीसमयः॥ सेवातुरंडैमनोऽतुकूले यैर्युसुखसंवेदनं भवति॥

भिवाद्यायतः स्थितं ससुहृद्यार्जुनं तदा।सस्वजे पांडवर्षभः।हृष्टः स्वितमुवाचायं परिषज्य च बाहुना।आशिषः परमाः प्रोच्य स्म
यमानोऽन्वभाषत।व्यक्तमर्जुन संग्रामे ध्रुवस्ते विजयो महान्।यादृशी या हिते छाया प्रसन्नश्च जनार्दनः।तमब्रवीत्ततो जिष्णुर्महदाश्चर्य
मुत्तमं।दृष्टवानस्मि भद्रं ते केशवस्य प्रसादजं।ततस्तत्कथयामास यथादृष्टं धनंजयः।आश्वासनार्थं सुहृदां त्र्यंबकेन समागमं।त
तः शिरोभिरवनिं स्पृष्ट्वा सर्वे च विस्मिताः।नमस्कृत्य वृषांकाय साधु साध्विति चाब्रुवन्।अनुज्ञातास्ततः सर्वे सुहृदो धर्मसूनु
ना।त्वरमाणाः सुसंरब्धा युद्धायाभिनिर्ययुः।अभिवाद्य तु राजानं युयुधानाच्युतार्जुनाः।हृष्टा विनिर्ययुस्ते वै युधिष्ठिर निवेशना
त्।रथेनैकेन दुर्धर्षौ युयुधानजनार्दनौ।जग्मतुः सहितौ वीरावर्जुनस्य निवेशनं।तत्र गत्वा हृषीकेशः कल्पयामास सूतवद्रथं
रथं रथवरस्याजौ वानरर्षभलक्षणं।स मेघसमनिर्घोषस्तप्तकांचनसप्रभः।बभौ रथवरः क्लृप्तः शिशुर्दिवसकृद्यथा।ततः पुरुष
शार्दूलः सज्जः सज्जं पुरस्सरः।कृताह्निकाय पार्थाय न्यवेदयत तं रथं।तं तु लोके वरः पुंसां किरीटी हेमवर्मभृत्।चापबाणधरो
वाहं प्रदक्षिणमवर्तत।तपोविद्यावयोवृद्धैः क्रियावद्भिर्जितेंद्रियैः।स्तूयमानो जयाशीर्भिरारुरोह महारथं।जैत्रैः सां
ग्रामिकैर्मंत्रैः पूर्वमेव रथोत्तमं।अभिमंत्रितमर्चिष्मानुदयं भास्करो यथा।स रथी रथिनां श्रेष्ठः कांचने कांचनावृतः।विबभौ

श्रीराम॥

पतनोग्रहः॥ प्रदक्षिणं हंसास्तु वर्तिनं॥
द्रोण॰ विमलोऽर्चिष्मान्मेराविव दिवाकरः॥ अथवा समुद्रस्तु पार्थः सुयुधानजनार्दनौ॥ छायाः तेयुज्जमायांतं यथेंद्र देवमरुद्गिनौ॥ अ
थ जयार्हगोविंदो स्वमात्रं विभवं तोदरः॥ मातलिर्वा मघवतस्यस्वत्वैर्दं तं श्रयास्यतः॥ ततान्यासहितः पार्थो रथप्रवरमास्थितः
सहितो युधश्रुत्वा स्यां तमोतिभ्रश्यथाशरा॥ सैंधवस्य वधे पुत्र प्रयान शत्रुरुगदा॥ महाबुपतिमित्रा स्यायांथ ऽस्मार काम
ये॥ ततो वादित्रघोषेस्तु मंगल्यैश्च स्तवैः स्तुतिः॥ प्रयांतमथतां सूतामागधाश्चैव तुष्टुवुः॥ सजयाशीः सपुण्याहाः सूतमागध
निःस्वनाः॥ युक्तो वादित्रघोषेण तेषां रतिकरो भवत्॥ तमनुप्रतते वायुः पुण्यगंधवहः शुचिः॥ ववौ संहर्षयन्पार्थं द्विषितस्था
प्यशोषयत्॥ ततस्तस्मिन्क्षणे राजन्विविधानि शुभानि च॥ प्रादुरासन्निमित्तानि विजयाय बहूनि च॥ पांडवानां त्वदीयानां विपरी
तानि मारिष॥ दृष्ट्वार्जुनो निमित्तानि विजयस्य प्रदक्षिणं॥ युयुधानं महेष्वासमिदं वचनमब्रवीत्॥ युयुधान हि युद्धे मे दृश्य
ते विजयो ध्रुवः॥ तथा हीमानि लिंगानि दृश्यंते शिनिपुंगव॥ सोऽहं तत्र गमिष्यामि यत्र सैंधवको नृपः॥ यियासुर्यमलोकाय
म मम वीर्यं प्रतीक्षते॥ यथा हि परमं कृत्यं सैंधवस्य वधो मम॥ तथैव सुमहत्कृत्यं धर्मराजस्य रक्षणं॥ स त्वमद्य महाबाहो राजा
नं परिपालय॥ यथैव हि मया गुप्तस्त्वया गुप्तो भवेत्तथा॥ न हि पश्यामि तं लोके यस्त्वां युधि पराजयेत्॥ वासुदेवसमं युद्धे स्वया १११

अपेसाश्चवराधं॥ ॥युधपरिष्कृतं कुर्वन्वधकः स्थितं यच्चेति हतीयार्थे सप्तमी॥
यमप्यमरेश्वरः॥ त्वयि वाहं परा श्रुस्य पद्युम्ने वा महारथे॥ शक्नुयां सैंधवं हंतुमनपेक्षो नरर्षभ॥ मय्यपेक्षा न कर्तव्या कथंचिदपि सा
त्वत॥ राजन्येव परा गुप्तिः कार्या सर्वात्मना त्वया॥ न हि यत्र महाबाहुर्वासुदेवो व्यवस्थितः॥ किंचिद्यापद्यते तत्र यत्राहमपि च ध्रुवं॥
एवमुक्तस्तु पार्थेन सात्यकिः परवीरहा॥ तथेत्युक्त्वागमत्तत्र यत्र राजा युधिष्ठिरः॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥धृतराष्ट्र उ
वाच॥ ॥श्वोभूते किमकार्षुस्ते दुःखशोकसमन्विताः॥ अभिमन्यौ हते तत्र के वायुध्यंत मामकाः॥ ज्ञात्वा तस्य कर्माणि कौर
वाः सव्यसाचिनः॥ कथं तत्किल्बिषं कृत्वा निर्भया ब्रूहि मामकाः॥ पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवांतकं॥ आयांतं पुरुषव्या
घ्रं कथं ददृशुराहवे॥ कपिराजध्वजं संख्ये विधुन्वानं महद्धनुः॥ दृष्ट्वा पुत्रपरिद्यूनं किमकुर्वंत मामकाः॥ किं नु संजय मया मेऽद्य ते
डायधिनप्रति॥ परिदेवो महानत्र श्रुतो मे नाभिनंदनः॥ बभूवुर्हृत्यमनोग्राह्याः शब्दाः श्रुतिसुखावहाः॥ न श्रूयंते तथा तत्र सार्वासे
धवस्य निवेशने॥ स्तुवतां नाद्य श्रूयंत पुत्राणां शिबिरे मम॥ सूतमागधसंघानां नर्तकानां च सर्वशः॥ शब्देन नादिता नाऽत्यर्थमभवद्य
त्राभ्युति॥ दीनानामद्य तं नेद्र शब्दं शृणोमि समंततः॥ निवेशनं सत्यधृतेः सोमदत्तस्य संजय॥ आसीनो हं पुरा तात शब्दमस्रौ
घमुत्तमं॥ तदद्य हीनमुत्साहे पुत्राणां शिबिरे मम॥ निवेशनं ततो साहं सत्राणां ममलक्षये॥ विविंशतेर्दुर्मुखस्य चित्रसेनविक

स्वपतस्त्वापनाद्रौ नः॥ प्रतिपत्ते प्रतिस्वे पो वितंडा। आलापो भाषणं। संलापो भाषणं। गणानां संघानां। नीथैं नवि दानेन॥

द्रोण णयोः॥ अन्येषां च सुतानां च नतथा श्रूयते ध्वनिः॥ ब्राह्मणाः क्षत्रिया विश्या यं शिष्याः पर्युपासते। द्रोणपुत्रं महेष्वासं पुत्राणां मे परा

यणं॥ वितंडालापसंलापैर्हृष्टवादित्रवादितैः॥ गीतैश्च विविधैरिष्टै रमते यो दिवानिशं। उपास्यते मानो बहुभिः कुरुपांडवसा ॥बलिनि॥

त्वतैः। स्व तनस्य स्वस्त्वाशो नाद्य द्रोणिर्धानुरा। द्रोणपुत्रे महेष्वासे गायनानर्तनाश्रये। अस्वत्थेस्तु प्रतिष्ठंति तपांनश्रूयते ध्वनि

॥ विंदानुविंदयोः सायं शिबिरे यो महाध्वनिः। श्रूयते सोद्य न तथा केकयानां च वेश्मसु। नित्यं प्रमुदितानां च तालगीतस्वनो

महान्। नृत्यतां श्रूयते तात गणानां सो घनध्वनिः॥ सप्ततंतून्वितन्वाना यमुपासंति याजकाः॥ सोमदत्तिं श्रुतिनिधिं तेषां न श्रूय

ते ध्वनिः॥ ज्याघोषो ब्रह्मघोषश्च तोमरासिरथध्वनिः॥ द्रोणस्यासीदविरतो गृहे तन्न शृणोम्यहं। नानादेशसमुत्थानां गीतानां यो

महास्वनः॥ वादित्रनादितानां च सो घनः श्रूयते महान्। यदाप्रभृत्युपप्लव्याच्छांतिमिच्छन् जनार्दनः। आगतः सर्वभूताना

मनुकंपार्थमच्युतः॥ ततोहं सूतदुर्बुद्धिं मन्ये दुर्योधनं तदा। वासुदेवेन तीर्थेन पुत्र संशाम्य पांडवैः॥ कालप्राप्तमहं मन्ये मा

च दुर्योधनात्मजाः। शमं चेद्याचमानं वै प्रत्याख्यास्यति केशवं। हितार्थमभिजल्पंतं न तवास्त्यपराजयः॥ प्रत्याचष्ट स दाशा

र्हं ऋषभं सर्वधन्विनां। अनुनेयानि जल्पंतमनयान्नावबुध्यत॥ ततो दुःशासनस्यैव कर्णस्य च मतं द्वयोः॥ अन्ववर्त्तत ११२

कालग्रासं समयार्पितं। अनुनेयानि अनुकूलानि॥

असस्थाः कुरवः॥ साधनस्वीकरणे॥

तं हि चामां कुरवः कालेन दुर्मतिः॥ नमहं द्यूतमिच्छामि विदुरो न प्रशंसति। सैंधवो नेच्छति द्यूतं भीष्मो न द्यूतमिच्छति। शल्यो भूरि

श्रवाश्चैव पुरुमित्रो जयस्तथा। अश्वत्थामा कृपो द्रोणो द्यूतं नेच्छंति संजय। एतेषां मतमाज्ञाय यदि वर्तेत पुत्रकः। सज्ञातिमित्रः ससु

हृत्सुखं चिरं जीवेदनामयः॥ श्लक्ष्णा मधुरसंभाषा ज्ञातिमध्ये प्रियंवदाः॥ कुलीनाः संमताः प्राज्ञाः सुखं प्राप्स्यंति पांडवाः॥ धर्मा

पेक्षो नरो नित्यं सर्वत्र लभ्यते सुखं। प्रेत्यभावे च कल्याणं प्रसादं प्रतिपद्यते॥ अर्हंत्येते पृथिवीं भोक्तुं समर्थाः साधनेपि च॥ तेषामपि

समुद्रांता पितृपैतामही मही॥ नियुज्यमानाः स्थास्यंति पांडवा धर्मवर्त्मनि। संति नो ज्ञातयस्तात येषां श्रोष्यंति पांडवाः॥ शल्यस्य

सोमदत्तस्य भीष्मस्य च महात्मनः॥ द्रोणस्याथ विकर्णस्य बाल्हीकस्य कृपस्य च। अन्येषां चैव वृद्धानां भरतानां महात्मनां॥ त्वद

र्थं ब्रुवतां तात ननं ते युर्वचनाति वः। कं वा त्वं मन्यसे तेषां यस्त्वा ब्रूयादतोन्यथा॥ कृष्णो न धर्मं संजह्यात् सर्वे ते च त्वदन्वयाः॥ मया

नं पि चोक्ता न्वीरा वचनं धर्मसंहितं। नान्यथा प्रकरिष्यंति धर्मात्मानो हि पांडवाः॥ इत्येवं विलपन्सूत बहुशः पुत्रमुक्तवान्।

न च मे श्रुतवान्मूढो मन्ये कालस्य पर्ययात्॥ वृकोदरार्जुनौ यत्र वृष्णिवीरश्च सात्यकिः॥ उत्तमौजाश्च पांचाल्यो युधामन्युश्च

दुर्जयः॥ धृष्टद्युम्नश्च दुर्धर्षः शिखंडी चापराजितः॥ अश्मकाः केकयाश्चैव क्षत्रधर्मा च सौमकिः॥ चैद्यश्च चेकितानश्च

चाकारुण्यस्य वा विभो॥ दीर्घदर्शिनो नागतानुपसंधानात्‌। यत्नतः उपायात्‌ प्रत्ययमगात्‌। महत्वत्वार्थी तेषां मध्ये॥

द्रोण

वः कारुण्यस्य वा विभुः॥ द्रौपदेया विराटश्च द्रुपदश्च महारथः॥ यमौ च पुरुषव्याघ्रौ मंत्री च मधुसूदनः॥ कृपणा रज्ञा उ युधेन लो

कस्मिन्‌ विजिजीविषुः॥ दिव्यैरस्त्रैर्विकुर्वाणात्‌ कः सहेत रणे रिपुः माद्रे अन्यो दुर्योधनात्‌ कस्मिन्‌ कुरुनाथात्‌ पितामहो बलात्‌। द्रोणस

नच उपायिनां नान्यं पश्यामि पंचमं॥ एषां वीर्यं प्रभुत्वं स्याद्धि युद्धे चैतेन ज्ञानात्‌ नाहंतिः॥ मनस्वी चार्जुनो योद्धा तेषां नास्ति पराजयः॥ तेषां म

म विला यानां नहि द्रायाधनः स्मारत्‌ इमो द्विपुरुषव्याघ्रो भीष्मद्रोणौ महात्मना॥ तेषां विदुर वाक्यानामुक्तानां दीर्घदर्शि

नां॥ दृष्ट्वा मां फलं निर्विद्य मन्ये शोचे नितुवका॥ सेनां दृष्ट्वा निवृत्तां॥ मे शैनेयेनार्जुनेन चाघ्नन्त्या दृष्ट्वा रथोपस्थान्‌ मन्ये शोचं नित्र

वका॥ हिमात्यये यथा कक्षं शुष्कं वातेरितो महान्‌॥ अग्निर्दहेत्‌ तथा सेनां मामिकां सधनंजयः॥ आचक्ष्व ममतत्सर्वं कुशलो ह्य

सि संजय॥ यदुपायात्‌ तु सायाह्ने कृत्वा पार्थस्य किल्बिषं॥ अभिमन्यौ हते तात कथमासीन्मनो हि वः॥ न शक्यं तस्य कर्माणि यु

धि गांडीवधन्वनः॥ अपकृत्य महत्तात सोढुं शक्ष्यंति मामकाः॥ किं नु दुर्योधनः कृत्यं कर्णः कृत्यं किमब्रवीत्‌॥ दुःशासनः

सौबलश्चैव तथा समवेतेष्वपि॥ सर्वेषां समवेतानां पुत्राणां मम संजय॥ यद्वृत्तं तात संग्रामे मंदस्यापनयैर्भृशं॥ लोभानु

गस्य दुर्बुद्धेः क्रोधेन विकृतात्मनः॥

यै १ ११३

रागो निमानः॥ ॥नेत्र॥ बुद्धेर्व्यभिचारं विषमं॥ उपलप्स्यंत्युत्तर विप्यंति॥ अनेन वृत्तवर्त्म्ये। मन्ये नेव क्रमन्यते॥ ॥

राज्यकामस्य मूढस्य रागोपहतचेतसः॥ दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व संजय॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥संज

य उवाच॥ ॥हंत ते संप्रवक्ष्यामि सर्वं प्रत्यक्षदर्शिवान्‌॥ शुश्रूषस्व स्थिरो राजन्‌ तव ह्यपनयो महान्‌॥ गतोदके सेतुबंधो

यादृक्तादृगयं तव॥ विलापो निष्फलो राजन्‌ मा शुचो भरतर्षभ॥ अनतिक्रमणीयोयं कृतांतस्याद्भुतो विधिः॥ मा शुचो न र

तश्रेष्ठ दृष्टमेतत्‌ पुरातने॥ यदि त्वं हि पुरा द्यूतात्‌ कुंतीपुत्रं युधिष्ठिरं॥ निवारयिष्यः पुत्रांश्च न त्वां विष्वगजन्तुस्य॥ युद्धकाले पुनः प्रा

प्ते वेलेनवतां यदि॥ निवर्तिताः स्युः संरब्धा न त्वां व्यसनमाव्रजेत्‌॥ दुर्योधनं चाविधेयं बध्नीतेति पुरा यदि कुरूनचोदयिष्य

स्तेन त्वां व्यसनमाव्रजेत्‌॥ न ते बुद्धिव्यभिचारमुपलप्स्यंति पांडवाः॥ पांचाला वृष्णयः सर्वे ये चान्ये च नराधिपाः॥ स कृ

त्वा पितृकर्म त्वं पुत्रं संस्थाप्य सत्पथे॥ वर्तेथा यदि धर्मेण न त्वां व्यसनमाव्रजेत्‌॥ त्वं तु प्राज्ञतमो लोके हित्वा धर्मं सनातनं

॥ दुर्योधनस्य कर्णस्य शकुनेश्चान्वगा मतं॥ तत्ते विलपितं सर्वं मया राजन्निशामितं॥ अर्थान्निविशमानस्य विषमिश्रं

यथा मधु॥ न तथा मन्यते कृष्णो राजानं पांडवं पुरा॥ न भीष्मं नैव च द्रोणं यथा त्वां मन्यते नृप॥ व्यजानीत यदा तु त्वां राजधर्मा

दधःस्थितं॥ तदा प्रभृति कृष्णस्त्वां न तथा बहुमन्यते॥ परुषाण्युच्यमानांश्च यदा पार्थानुपेक्षसे॥ तस्यानुबंधः प्राप्तस्त्वां

अपहृतं संग्रामिकं। अथ वध्येव नाकरिष्यः ——— अंतराज्ञे स्वसरवेदिनि॥ ॥पातालपाथितोस्कान्॥

द्रोण सुता एणं राज्यकामुक। पित्र्यं पैतामहं राज्यमपहर्तुं तदानघ। अथ पार्थैर्जितां कृत्स्नां पृथिवीं सप्त्यपद्यथाः। पांडुना निर्जितं रा
ज्यं कौरवाणां यशस्तथा। न तथाप्यधिकं त्वयः पांडवैर्धर्मचारिभिः। तेषां तत्राहृतोऽधर्मं त्वामामाप्य घृतनिष्फला यत्पित्र्याद्भ्रंशिता
राज्या त्वयैवाभिषट्ट्विना। यस्त्वं तद्वृत्तकाले तु उत्तरान्नार्ह यसन्तु पावकः धर्मव्याहृत्स्वोपान्न तदद्योपपद्यता न निहिरद्वं निराज्ञा
नो युध्यंतो जीवितं रणे। वहुविग्राह्य पार्थानां युध्यं तत्र क्षत्रियधर्मनाः। यो वै रुक्मार्जुनो मतनायां मात्यकिं हाकादरो रक्षंति कौंते
नां युध्येव स्वमन्यत्र कौरवैः। येषां या चायुद्धा केशवो येषां मंत्री जनार्दनः। येषां च सात्यकिर्गोप्ता येषां गोप्ता वृकोदरः। को हि तान् विस
हेयो युद्धमर्त्यधर्माधिपुरंदरः। अन्यत्र कौरवेया पन्यो येच्चा तेषां वशानुगाः। यावत्तु शक्यते कर्तुं माननराज्ञे जनाधिपे। तत्र धर्मपि
रिम्य रिराव कुर्वीति कौरवाः। यथा तु पुरुषव्याघ्रो युद्धं परमसंकटे। कर्मणा पांडवैः सार्द्धं तन्सर्वं शृणु तत्त्वतः॥ ॥इति द्रोण
पर्वणि तृतीयो युद्धदिवसः॥ ॥संजय उवाच॥ ॥तस्यां निशायां व्युष्टायां द्रोणः शस्त्रभृतां वरः। स्वान्यनीकानि सर्वाणि
प्राक्रामद्व्यूहितुं ततः। शूराणां गर्जतां राजन् संक्रुद्धानाममर्षिणां। श्रूयंते स्म गिरश्चित्राः परस्परवधैषिणां। विस्फार्य च धनूंष्यन्ये ज्याः
करैः परिमृजंश्चापि निश्वसंतः क्वासौ धनंजयः। विकोषान्सुत्सरूनन्ये कृतधारान्समाहितान्। पीतानाकाशसंकाशानसीन् १२५

कश्चिति। चकारइत्यष्टौ इत्याहुर्यंतदन्यद्वयः। त्रिमात्रासु त्रिमेखलासु शिल्पाद्विसर्पा॥

विक्षिचिक्षिपुः। चरंतस्त्वसिमार्गांश्च शिक्षया। संग्राममनसः शूरा दृश्यंते स्म सहस्रशः। सघंटाश्चंदनादिग्धाः स्वर्णवज्रवि
भर भूषिताः। समुत्क्षिप्य गदाश्चान्ये पर्यपृच्छंत पांडवं। अन्ये बलमदोन्मत्ताः परिघैर्बाहुशालिनः। चक्रुः संबाधमाकाशमुच्छ्रितेंद्रध्व
जोपमैः। नानाप्रहरणैश्चान्ये विचित्रस्रगलंकृताः। संग्राममनसः शूरास्तत्र तत्र व्यवस्थिताः। क्वार्जुनः क्व स गोविंदः क्व च
मानी वृकोदरः। क्व च ते सुहृदस्तेषामाह्वयंतो रणे तदा। ततः शंखमुपाध्माय त्वरयन्वाजिनः स्वयं। इतस्ततस्तान्रचयन्द्रो
णश्चरति वेगितः। तेष्वनीकेषु सर्वेषु स्थितेष्वाहवनंदिषु। भारद्वाजो महाराज जयद्रथमथाब्रवीत्। त्वं चैव सौमदत्तिश्च कर्णश्
चैव महारथः। अश्वत्थामा च शल्यश्च वृषसेनः कृपस्तथा। शतं चाश्वसहस्राणां रथानामयुतानि षट्। द्विरदानां प्रभिन्नानां स
हस्राणि चतुर्दश। गव्यूतिं पदातीनां सहस्राण्येकविंशतिः। गव्यूतिषु त्रिमात्रासु मामनासाद्य तिष्ठत। तत्र
स्थं त्वां न संसोढुं शक्ता देवाः सवासवाः। किं पुनः पांडवाः सर्वे समाश्वसिहि सैंधव। एवमुक्तः समाश्वस्तः सिंधुरा
जो जयद्रथः। संप्रायात्सह गांधारैर्वृतस्तैश्च महारथैः। वर्मिभिः सादिभिर्यत्तैः प्रासपाणिभिरास्थितैः। चामरापी
डिनः सर्वे जांबूनदविभूषिताः। जयद्रथस्य राजेंद्र हयाः साधुप्रवाहिनः। ते चैव सप्तसाहस्रा द्विसाहस्राश्च सैंधवाः।
मत्तानामधिरूढानां हस्त्यारोहैर्विशारदैः। नागानां भीमरूपाणां वर्मिणां रौद्रकर्मिणां। अध्यर्द्धेन सहस्रेण पुत्रो ड।

पश्चार्द्धे पद्मस्यार्द्धं पंचगव्यूतिरथ्यात् । चक्रशकटः चक्रगर्भः शकटः ॥ अद्भुतान्तु रूपमाश्चर्य्यवचनं ॥

 मर्षणस्तव व्यग्रतः सर्वसैन्यानां युध्यमानो व्यवस्थितः ॥ तमातो दुःशासनस्तथैव विकर्णश्च ततो व्यवस्थितौ ॥ सिंधुराजा
र्थसिद्ध्यर्थमग्रानीकव्यवस्थितौ । दीर्घो द्वादशगव्यूतिः पश्चार्द्धे पंचविस्तृतः । व्यूहः सचक्रशकटो भारद्वाजेन नि
र्मितः ॥ नानानृपतिभिर्वीरैस्तत्र तत्र व्यवस्थितैः ॥ रथाश्वगजपत्त्यौघैर्द्रोणेन विहितः स्वयं । पश्चार्द्धे तस्य पद्मस्तु गर्भ
व्यूहः सुदुर्भिदः ॥ सूचीपद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः ॥ एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः ॥ सूचीमुखे महे
ष्वासः कृतवर्मा व्यवस्थितः ॥ अनंतरं च काम्बोजो जलसंधश्च मारिष । दुर्योधनः सहामात्यस्तदनंतरमेव च ॥ ततः शतस
हस्राणि योधानामनिवर्तिनां । व्यवस्थितानि सर्वाणि शकटे स्म विरक्षिणः ॥ तेषां च पृष्ठतो राजा बलेन महता वृतः ॥ जयद्र
थस्ततो राजन् सूचीपार्श्वे व्यवस्थितः ॥ शकटस्य तु राजेन्द्र भारद्वाजो मुखे स्थितः ॥ अनु तस्याभवद्भोजो जुगोपैनं ततः स्वयं ॥ श्वे
तवर्माम्बरोष्णीषो व्यूढोरस्को महाभुजः ॥ धनुर्विस्फारयन् द्रोणस्तस्थौ क्रुद्ध इवान्तकः ॥ पताकिनं शोणहयं वेदीकृष्णाजि
नध्वजं । द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवोऽभवन् ॥ द्रोणेन विहितं दृष्ट्वा व्यूहं क्षुब्धार्णवोपमं ॥ सशैलसागरवनां नानाजन
पदाकुलां । ग्रसेद्व्यूहः क्षितिं सर्वामिति भूतानि मेनिरे ॥ बहुरथमनुजाश्वपत्तिनागं प्रतिभयनिःस्वनमद्भुताकृतिरूपं । अ

अभिहारयत्सु सन्नह्यमानेषु । अभियुज्यमानेषु वा । प्रदरः स्थितिः केचित् । शतं शतेर्हः शासदः खे ॥ निरुक्तो वसानागमः ॥

हितहृदयदं तं महद्धि शकटमवेक्ष्य कृतं ननंद राजा ॥ ॥ द्रोणपर्वणि जयद्रथवधे ॥ ॥ संजय उवाच ॥ ततो व्यू
ढेष्वनीकेषु समुत्क्रुष्टेषु पार्थिव । ताड्यमानासु भेरीषु मृदंगेषु नदत्सु च ॥ अनीकानां च संह्रादे वादित्राणां च निःस्व
ने । प्रध्मापितेषु शंखेषु संनादे लोमहर्षणे ॥ अभिहारयत्सु शनकैर्भरतेषु युयुत्सुषु ॥ रौद्रे मुहूर्ते संप्राप्ते सव्य
साची व्यदृश्यत ॥ बलानां वायसानां च पुरस्तात्सव्यसाचिनः ॥ बहुलानि सहस्राणि प्राक्रीडंस्तत्र भारत ॥ मृगाश्च घोरसंनादाः
शिवाश्चाशिवदर्शनाः ॥ दक्षिणेन प्रयातानामस्माकं प्राणदंस्तदा ॥ सनिर्घाता ज्वलंत्यश्च पेतुरुल्काः सहस्रशः ॥ चचा
ल च मही कृत्स्ना भये घोरे समुत्थिते ॥ विष्वग्वाताः सनिर्घाता रूक्षाः शर्करवर्षिणः ॥ ववुरायाति कौंतेये संग्रामे समुपस्थि
ते ॥ नाकुलिस्तु शतानीको धृष्टद्युम्नश्च पार्षतः ॥ पांडवानामनीकानि प्राज्ञौ तौ व्यूहतुस्तदा ॥ ततो रथसहस्रेण द्विरदा
नां शतेन च । त्रिभिरश्वसहस्रैश्च पदातीनां शतैः शतैः ॥ अध्यर्द्धमात्रे धनुषां सहस्रे तनयस्तव । अग्रतः सर्वसैन्यानां स्थि
त्वा दुर्मर्षणोऽब्रवीत् ॥ अद्य गांडीवधन्वानं तपंतं युद्धदुर्मदं ॥ अहमावारयिष्यामि वेलेव मकरालयं ॥ अद्य पश्यंतु संग्रा
मे धनंजयममर्षणं । विषक्तं मयि दुर्धर्षमश्मकूटमिवाश्मनि ॥ तिष्ठध्वं रथिनो ह्यद्य संग्राममभिकांक्षिणः ॥ युध्या
मि संहतानेतान्यशो मानं च वर्द्धयन् ॥ एवं ब्रुवन्महाराज महात्मा स महाद्युतिः ॥ महेष्वासैर्वृतो राजन् महेष्वासो व्य

जयोनाम्ना॥समाक्षिप्तिम्संधम — वलितिः॥

द्रोण वस्थितः॥ततोनकश्चक्रुद्धःसवज्रइववासवः॥दंडपाणिरिवासह्योमृत्युःकालेनचोदितः॥शूलपाणिरिवासह्योन्योव
रुणःपाशवानिव॥युगांताग्निरिवार्चिष्मान्प्रधक्ष्यन्विपुनःप्रजाः॥क्रोधामर्षबलोद्धूतोनिवातकवचांतकः॥जयोजेता
स्थितःसत्येपारयिष्यन्महाव्रतं॥आमुक्तकवचःखड्गीजांबूनदकिरीटभृत्॥शुभ्रमाल्यांबरधरःस्वंगदश्चारुकुंडलः॥र धरः ३
स थंवरमास्थायनरोनारायणानुगः॥विधुन्वन्गांडिवंसंख्येबभौसूर्यइवोदितः॥सोग्रानीकस्यमहतइषुपातेधनंजयः
॥व्यवस्थाप्यरथंसर्वंशंखंदध्मौप्रतापवान्॥असंभ्रांतोयथाकृष्णःपार्थेनसहमारिष॥प्राध्मापयत्पांचजन्यंशंखप्रवरमोज
सा॥तयोःशंखप्रणादेनतवसैन्येविशांपते॥आसन्संहृष्टरोमाणःकंपिताःगतचेतसः॥यथात्रस्यंतिभूतानिसर्वाणिप्राणि
टीं निस्वनात्॥तथात्वदीयंस्वप्रणादेनवित्रेसुस्तवसैनिकाः॥प्रसुस्रुवुःशकृन्मूत्रंवाहनानिचसर्वशः॥एवंसवाहनंसर्वं
माविग्नमभवद्बलं॥सीदंतिस्मततोराजन्शंखशब्देनमारिष॥विसंज्ञाश्चाभवन्केचित्केचिद्राजन्वितत्रसुः॥ततःकपि
र्महानादंसहभूतैर्ध्वजालयैः॥अकरोद्व्यादितास्यश्चभीषयंस्तवसैनिकान्॥ततःशंखाश्चभेर्यश्चमृदंगाश्चानकैःस
ह॥पुनरेवाभ्यहन्यंततवसैन्यप्रहर्षणाः॥नानावादित्रसन्नादैःक्ष्वेडितास्फोटिताकुलैः॥सिंहनादैःसमुत्क्रुष्टैःसमाधू ११६
तैर्महारथैः॥तस्मिन्सुतुमुलेशब्देभीरूणांभयवर्धने॥अतीवहृष्टोदाशार्हमब्रवीत्पाकशासनिः॥ ॥

॥ ॥द्रोणपर्वणिजयद्रथवधे॥ ॥अर्जुनउवाच॥ ॥चोदयाश्वान्हृषीकेशयत्रदुर्मर्षणःस्थितः॥ए
तद्भित्त्वागजानीकंप्रवेक्ष्याम्यरिवाहिनीं॥ ॥संजयउवाच॥ ॥एवमुक्तोमहाबाहुःकेशवःसव्यसाचिना
॥अचोदयद्धयांस्तत्रयत्रदुर्मर्षणःस्थितः॥सप्रहारःसुतुमुलःसंप्रवृत्तःसुदारुणः॥एकस्यचबहूनांचरथ
नागनरक्षयः॥ततःसायकवर्षेणपर्जन्यइववृष्टिमान्॥परानवाकिरत्पार्थःपर्वतानिववारिदः॥तेचापिरथिनःस
र्वेत्वरिताःकृतहस्तवत्॥अवाकिरन्बाणजालैस्ततःकृष्णधनंजयौ॥ततःक्रुद्धोमहाबाहुर्वार्यमाणःपरैर्युधि॥
शिरांसिरथिनांपार्थःकायेभ्योपाहरच्छरैः॥उद्भ्रांतनयनैर्वक्त्रैःसंदष्टौष्ठपुटैःशुभैः॥सकुंडलशिरस्त्राणैर्वसु
धासमकीर्यत॥पुंडरीकवनानीवविध्वस्तानिसमंततः॥विनिकीर्णानियोधानांवदनानिचकाशिरे॥तपनीयतनु
त्राणाःसंसिक्तारुधिरेणच॥संसक्ताइवदृश्यंतेमेघसंघाःसविद्युतः॥शिरसांपततांराजञ्छब्दोभूद्वसुधातले॥ ६८
कालेनपरिपक्वानांतालानांपततामिव॥ततःकबंधःकश्चित्तुधनुरालंब्यतिष्ठति॥किंचित्खड्गंविनिकृष्यभुजेनो
द्यम्यतिष्ठति॥पतितानिनजानंतिशिरांसिपुरुषर्षभाः॥अमृष्यमाणाःसंग्रामेकौंतेयंजयगृद्धिनः॥हयानां
मुत्तमांगैश्चहस्तिहस्तैश्चमेदिनी॥बाहुभिश्चशिरोभिश्चवीराणांसमकीर्यत॥अयंपार्थःकुतःपार्थएषपार्थ

निर्दिष्टो भूपिका। प्रतिसंचरते प्रसूजगति। यत्र स्यश्रवहितं। द्रुतं विद्रुतं। उर्विगं नीतं॥

द्रोण० इति प्रमोहो। तव सैन्यस्यायाध्यमानो पार्थेनुत्त इवाभवत्। अन्योन्यमपि चाजघ्नुरात्मानमपि चापरे। पार्थेनैतमसमन्यं तत्र गत्कालेन मो
हिताः॥ निष्टनंतः सरुधिरो विसंज्ञा गाढवेदनाः॥ शाया नाबहवो वीराः कोत्रैयंतास्वबांधवाः। सनिर्दिपालाः सप्रासाः सग्रांत्राः छिपरे
सचर्मोस्त्रिर् स्वधमाः सनिस्त्रिंशाः सशराः सतनुत्राः शराः। सबाणवर्मिनस्त्राणाः सगदाः सांगदा रणे॥ महाभुजगसंकाशा बाहवः परिघोपमाः॥
प्रपतंति उद्वेष्टंति विविवेष्टंति संवर्षंशाः वेगं कुर्वंति संरब्धा निकृत्ताः परमेषुभिः॥ यो यः स्म समरे पार्थं प्रतिसंरभते नरः। तस्य तस्या
तको बाणः शरीरमुपसर्पति॥ नृत्यतो रथमार्गेषु धनुर्व्यायच्छतस्तथा॥ न कश्चित्तत्र पार्थस्य ददर्शांतरमण्वपि॥ यत्तस्यय
तमानस्य क्षिप्रं विक्षिपतः शरान्। लाघवात्पांडुपुत्रस्य व्यस्मयंत परे जनाः॥ हस्तिनं हस्तियंतारमश्वमाश्विकमेव च।
अभिनत्फाल्गुनो बाणै रथिनं च ससारथिं। आवर्तमानमावृत्तं युध्यमानं च पांडवः। प्रमुखे तिष्ठमानं च न कंचिन्न
निहंति सः॥ यथोदयन्वै गगने सूर्यो हंति महत्तमः॥ तथार्जुनो गजानीकमवधीत्कंकपत्रिभिः॥ हस्तिभिः पातितैर्भिन्नैस्तव
सैन्यमदृश्यत। अंतकाले यथा भूमिर्विनिकीर्णा महीधरैः॥ यथा मध्यंदिने सूर्यो दुष्प्रेक्षः प्राणिभिः सदा। तथा धनंजयः क्रु ध
द्धो दुष्प्रेक्ष्यो युधि शत्रुभिः॥ तत्तथा तव पुत्रस्य सैन्यं युधि परंतप॥ प्रभग्नं द्रुतमाविग्नमतीव शरपीडितं॥ मारुतेनेव महता मेघानीकं विदा नी १२७
र्यते।

साधु वाहिति स्वहु व्यापारितिः॥ ॥पलायने कृतनक्षणोः वसरायेन। प्रतिनयो विमर्दितः॥

प्रकाल्यमानं तत्सैन्यं नाशकन्प्रतिवीक्षितुं। प्रतोदैश्चापकोटीभिर्हुंकारैः साधुवाहितैः॥ कशापार्ष्णिनिघातैश्च वाग्भि
रुग्राभिरेव च। चोदयंतो हयांस्तूर्णं पलायंते स्म तावकाः॥ सादिनो रथिनश्चैव पत्तयश्चार्जुनार्दिताः॥ पार्ष्ण्यगुष्ठांकुशै
र्नागांश्चोदयंतस्तथापरे। शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः॥ तव योधा हतोत्साहा विभ्रांतमनसस्तदा॥ ॥ द्रोणपर्वणि
जयद्रथवधे॥ ॥धृतराष्ट्र उवाच॥ ॥तस्मिन्प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना। के नु तत्र रणे वीराः प्रत्युदीयुर्धनंजयं॥ आहोस्वि
२। च्छकटव्यूहं प्रविष्टा मोघनिश्चयाः॥ द्रोणमाश्रित्य तिष्ठंतः प्राकारमकुतोभयं॥ ॥संजय उवाच॥ ॥तथार्जुनेन संभग्ने तस्मिंस्तव बले
नघाहतवीरे हतोत्साहे पलायनकृतक्षणे। पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः। न तत्र कश्चित्संग्रामे शशाकार्जुनमीक्षितुं।
२१ ततस्तव सुतो राजन्दृष्ट्वा सैन्यं तथागतं। दुःशासनः सुसंक्रुद्धो युद्धायार्जुनमभ्यगात्॥ स कांचनविचित्रेण कवचेन समावृतः। जांबू
नदशिरस्त्राणः शूरस्तीव्रपराक्रमः॥ नागानीकेन महता ग्रसन्निव महीमिमां॥ दुःशासनो महाराज सव्यसाचिनमावृणोत्
ह्रादेन गजघंटानां शंखानां निनदेन च। ज्याक्षेपनिनदैश्चैव विरावेण च दंतिनां॥ भूर्दिशश्चांतरिक्षं च शब्देनासीत्समा
वृतं॥ स मुहूर्तं प्रतिभयो दारुणः समपद्यत॥ तान्दृष्ट्वा पततस्तूर्णमंकुशैरभिचोदितान्। व्यालंबहस्तान्संरब्धान्सपक्षानिव पर्व
तान्॥ सिंहनादेन महता नरसिंहो धनंजयः॥ गजानीकममित्राणामभितो व्यधमच्छरैः॥ महोर्मिणमिवोद्धूतं श्वसनेन महार्णवं॥

द्रो०

काश्यतीतोऽतिक्रांतदृष्टिपथः ॥ दंतवेष्टेषु दंतमूलेषु ॥ कोटिषु कटिषु ॥ निवेदनमुपहारं ॥ यंत्रबद्धा यंत्रारालिंखिताः ॥

रवुर व
धनंजयशरोछिन्नाः पलायंतो बभ्रुर्गजाः ॥ किरीटी तत्कुंजरानीकं प्राविशन्मकरो यथा ॥ भूरुहं न वघ्नाश्चितिवीर्णः पर्वतानिवासव
॥ काश्यतीनड्वादित्यः प्रतपन्युगसंक्षये ॥ दृहशे दिक्षु सर्वासु पार्थः परपुरंजयः ॥ स्फुरशंखनवाद्यानां नागघोषेण तेन
च ॥ तेन चोद्घुष्टशब्देन ज्यातिनादनतेन च ॥ नानावादित्रशब्देन पांचजन्यस्वनेन च ॥ देवदत्तस्य घोषेण गांडीवनिनदेन चापं
द्वेगतनो राना नागा बभूवुस्ते विचेतसः ॥ शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्यसाचिना ॥ ते गजा विशिखैस्तीक्ष्णैर्युधि गांडीव
कि
चोदितैः ॥ अनेकशतसाहस्रैः सर्वांगेषु समर्पिताः ॥ आरावं परमं कृत्वा वध्यमानाः किरीटिना ॥ निपेतुरनिशं भूमौ छिन्नप
क्षा इवाद्रयः ॥ अपरे दंतवेष्टेषु कुंभेषु च कटेषु च ॥ शरैः समर्पिता नागाः क्रौंचवद्व्यनदन्मुहुः ॥ गजस्कंधगतानां च पुरु
म
षाणां किरीटिना ॥ छिद्यंते चोत्तमांगानि भल्लैः सन्नतपर्वभिः ॥ सकुंडलानां पततां शिरसां धरणीतले ॥ पद्मानामिव संघातैः पार्थश्चक्रे नि
वेदनं ॥ यंत्रबद्धा विकवचा व्रणार्ता रुधिरोक्षिताः ॥ भ्रमत्सु युधि नागेषु मनुष्या विललंबिरे ॥ केचिदेकेन बाणेन सुमुक्तेन सुपत्रिणा १२८
॥ द्वौ त्रयश्च विनिर्भिन्ना निपेतुर्धरणीतले ॥ अतिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः ॥ सारोहा न्यपतन्भूमौ द्रुमवंत इवाचलाः ॥

वि१ व१

मौर्वीं ध्वजं धनुश्चैव युगमीषां तथैव च ॥ रथिनां कुट्टयामास भल्लैः सन्नतपर्वभिः ॥ न संदधन्न चाकर्षन्न विमुंचन्न चोद्वहन् ॥ मंडलेनै
व धनुषा नृत्यन्पार्थः स्म दृश्यते ॥ अतिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः ॥ मुहूर्तान्न्यपतन्नन्ये वारणा वसुधातले ॥ उत्थि
तान्यगणेयानि कबंधानि समंततः ॥ अदृश्यंत महाराज तस्मिन्परमसंकुले ॥ सचापाः सांगुलित्राणाः सखड्गाः सांगदा र
णे ॥ अदृश्यंत भुजाश्छिन्ना हेमाभरणभूषिताः ॥ सूपस्करैरधिष्ठानैरीषादंडकबंधुरैः ॥ चक्रैर्विमथितैरक्षैर्भग्नैश्च बहुधा यु
गैः ॥ चर्मचापधरैश्चैव व्यवकीर्णैस्ततस्ततः ॥ स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः ॥ निहतैर्वारणैरश्वैः क्षत्रियैश्च
निपातितैः ॥ अदृश्यत मही तत्र दारुणा प्रतिदर्शना ॥ एवं दुःशासनबलं वध्यमानं किरीटिना ॥ संप्राद्रवन्महाराज व्यथि
तं सहनायकं ॥ ततो दुःशासनस्त्रस्तः सहानीकः शरार्दितः ॥ द्रोणं त्रातारमाकांक्षञ्छकटव्यूहमभ्यगात् ॥ ॥ द्रोण
पर्वणि जयद्रथवधे ॥ ॥ संजय उवाच ॥ ॥ दुःशासनबलं हत्वा सव्यसाची महारथः ॥ सिंधुराजं परीप्सन्वै
द्रोणानीकमुपाद्रवत् ॥ स तु द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितं ॥ कृतांजलिरिदं वाक्यं कृष्णस्यानुमतेऽब्र
वीत् ॥ शिवेन ध्याहि मां ब्रह्मन्स्वस्ति चैव वदस्व मे ॥ भवत्प्रसादादिच्छामि प्रवेष्टुं दुर्भिदां चमूं ॥ भवान्पितृसमो मा
मह्यं धर्मराजसमोऽपि च ॥ तथा कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते ॥ अश्वत्थामा यथा तात रक्षणीयस्तथाऽनघ ॥

व२

गिर्य्यग्राम्बुदवेश्मनां । वज्रानिलकृताशनैः ॥ चूर्णिताक्षिप्तदग्धानां इति यथासंख्यमन्वयः ॥

द्रोण तथाहमपि तत्रस्थः स देवद्विजसत्तम । तव प्रसादाद्दिव्येयं सिंधुराजानमाहवे । निहंतुं द्विषतां श्रेष्ठ प्रतिज्ञां रक्ष मे प्रभो ॥ ॥
संजय उवाच ॥ ॥ एवमुक्तस्तदाचार्य्यः प्रत्युवाच स्मयन्निव । मामजित्वा न बीभत्सो शक्यो जेतुं जयद्रथः ॥ एतावदुक्त्वा
शरैर्विधा३ तं द्रोणः शरव्रातैरवाकिरत् । सरथाश्वध्वजं तीक्ष्णैः प्रहसन्वै ससारथिं ॥ ततोऽर्जुनः शरव्रातान्द्रोणस्यावार्य सायकैः । द्रोण
मभ्यद्रवद्बाणैर्घोररूपैर्महत्तरैः । विव्याध च रणे द्रोणमनुमान्य विशांपते । क्षत्रधर्मं समास्थाय नवभिः सायकैः पुनः ।
तस्येष्विषुभिश्छित्वा द्रोणो विव्याध तावुभौ । विषाग्निज्वलितप्रख्यैरिषुभिः कृष्णपांडवौ । इयेष पांडवस्तस्य बाणैश्छेत्तुं शरा
सनं । तस्य चिंतयतस्त्वेवं फाल्गुनस्य महात्मनः । द्रोणः शरैरसंभ्रांतो ज्यां चिच्छेदाशुवीर्यवान् । विव्याध च हयानस्य ध्वजं सारथिमे
व च । अर्जुनं च शरैर्वीरः स्मयमानो न्यवाकिरत् । एतस्मिन्नंतरे पार्थः सज्यं कृत्वा महद्धनुः । विशेषयिष्यन्नाचार्यं सर्वास्त्रविदुषां
२ वरः । मुमोच षट्शतान्बाणान्गृहीत्वैकमिव द्रुतं । पुनः सप्तशतानन्यान्सहस्रं चानिवर्तिनां । चिक्षेपायुतशश्चान्यांस्तेऽघ्नन्द्रोणस्य तां
चमूं । तैः सम्यगस्तैर्बलिना कृतिना चित्रयोधिना । मनुष्यवाजिमातंगा विद्धाः पेतुर्गतासवः । विसूताश्वध्वजाः पेतुः संछिन्नायुधजी
विताः । रथिनो रथमुख्येभ्यः सहसा शरपीडिताः । चूर्णिताक्षिप्तदग्धानां वज्रानिलकृताशनैः । तुल्यरूपा गजाः पेतुर्गिर्यग्राम्बुदवेश्मनां ११७

कार्य्यं यन्नां कृत्वा वाक्कल्पं । नवतेः नाम प्राकाश्ये ॥

पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः । हंसा हिमवतः प्रस्थे वारिविप्रहता इव । रथाश्वद्विपपत्तीनां सलिलौघा इवाद्भुताः ।
युगांतादित्यरश्म्याभाः पांडवास्त्रशरैर्हताः । तं पांडवादित्यशरांशुजालं कुरुप्रवीरान्युधि निष्टपंतं । स द्रोणमेघः शरवृष्टि
वेगैः प्राच्छादयन्मेघ इवार्करश्मीन् । अथात्यर्थविसृष्टेन द्विषतामसुभोजिना । आजघ्ने वक्षसि द्रोणो नाराचेन धनंजयं । स
विह्वलितसर्वांगः क्षितिकंपे यथाचलः । धैर्यमालंब्य बीभत्सुर्द्रोणं विव्याध पत्रिभिः । द्रोणस्तु पंचभिर्बाणैर्वासुदेवमता
डयत् । अर्जुनं च त्रिसप्तत्या ध्वजं चास्य त्रिभिः शरैः । विशेषयिष्यञ्शिष्यं च द्रोणो राजन्पराक्रमी । अदृश्यमर्जुनं चक्रे निमेषा
च्छरवृष्टिभिः । प्रसक्तान्पततोऽद्राक्षं नाराचांस्तस्य सायकान् । मंडलीकृतमेवास्य धनुश्चादृश्यताद्भुतं । तेऽभ्ययुः समरे राजन्वासु
। प्रहसन्निव पुत्रस्ते योद्धुकामः समाह्वयत्। ततः प्रहृष्टो दाशार्हः पांडवश्च धनंजयः॥ व्याक्रोशतां महानादं दध्मतुश्चांबु
जोत्तमौ॥ तौ हृष्टरूपौ संप्रेक्ष्य कौरवेयाश्च सर्वशः। निराशाः समपद्यंत पुत्रस्य तव जीविते। शोकमापुः परे चैव कुरवः
सर्व एव ते। अमन्यंत च पुत्रं ते वैश्वानरगतं मुखे। तथा तु दृष्ट्वा योधास्ते प्रहृष्टौ कृष्णपांडवौ। हतो राजा हतो राजेत्यश्रुं
रवैन्नृशार्दिताः। जनस्य संनिनादं तु श्रुत्वा दुर्योधनोऽब्रवीत्। व्येतु वो भीरहं कृष्णौ प्रेषयिष्यामि मृत्यवे। इत्युक्त्वा सै
निकान्सर्वाञ्जयापेक्षी नराधिपः। पार्थमाभाष्य संरंभादिदं वचनमब्रवीत्। पार्थ यच्छिक्षितं तेऽस्त्रं दिव्यमानुष्यमेव
च। तद्दर्शय मयि क्षिप्रं यदि जातोऽसि पांडुना। यद्बलं तव वीर्यं च केशवस्य तथैव च। तत्कुरुष्व मयि क्षिप्रं पश्याम तव
पौरुषं। अस्मत्परोक्षं कर्माणि प्रवदंति कृतानि ते। स्वामिसत्कारयुक्तानि यानि तानीह दर्शय॥ द्रोणपर्वणिजे
स्वामिशंकरयुक्तानि र निवापाव॥

द्रोण० यद्रथवधे ॥ ॥संजय उवाच ॥ ॥एवमुक्त्वार्जुनं राजा त्रिभिर्मर्मातिगैः शरैः ॥ प्रत्यविध्यन्महावेगैश्चतु-
र्भिश्चतुरो हयान् । वासुदेवं च दशभिः प्रत्यविध्यत्स्तनान्तरे । प्रतोदं चास्य भल्लेन छित्वा भूमावपातयत् । तं चतुर्दश-
भिः पार्थश्चित्रपुंखैः शिलाशितैः ॥ अविध्यत्तूर्णमव्यग्रस्ते स्याभ्रश्यंत वर्मणः ॥ तेषां वैफल्यमालोक्य पुनर्नव च पं-
च च प्राहिणोन्निशितान्बाणांस्तेप्यभ्रश्यंत वर्मणः ॥ अष्टाविंशत्तु तान्बाणानस्तान्विप्रेक्ष्य निष्फलान् । अब्रवीत्परवी-
रघ्नः कृष्णोर्जुनमिदं वचः । अदृष्टपूर्वं पश्यामि शिलानामिव सर्पणं । त्वया संप्रेषिताः पार्थ नार्थं कुर्वंति पत्रिणः ॥ कच्चि-
७ द्गांडीवतः प्राणास्तथैव भरतर्षभ । मुष्टिश्च ते यथापूर्वं भुजयोश्च बलं तव । न चापकाल इदं स्यादद्य पश्चिम-
ः तवैवास्य शत्रोस्तन्ममाचक्ष्व पृच्छतः ॥ विस्मयो मे महान्पार्थ तव दृष्ट्वा शरानिमान् । व्यर्थान्निपतितान्संख्ये दुर्योधनर-
थं प्रति । वज्राशनिसमा घोराः परकायावभेदिनः । शराः कुर्वंति ते नार्थं पार्थ काद्य विडंबना ॥ ॥अर्जुन उवाच ॥
द्रोणेनैषा मतिः कृष्ण धार्तराष्ट्रे निवेशिता । अंतो ह्यस्मदस्त्राणामेषा कवचधारणा । अस्मिन्नंतर्हितं कृष्ण त्रैलोक्यमपि
वर्मणि । एको द्रोणो हि वेदैतदहं तस्माच्च सत्तमात् । न शक्यमेतत्कवचं बाणैर्भेत्तुं कथंचन । अपि वज्रेण गोविंद स्वयं मघवता १४०
युधि । जानंस्त्वमपि वै कृष्ण मां विमोहयसे कथं ॥ यद्वृत्तं त्रिषु लोकेषु यच्च केशव वर्तते । तथा भविष्यद्यच्चैव तत्

एवमुक्तो महाबाहो प्रभावे । शुक्रोऽस्मन्यप्रयुक्तो । ससंग्रहं सोपदेशं । दैवे दैवैः कृते । निर्दिष्टानि कृत्स्ना वयवान् ॥

सर्वं विदितं तव । न तथा वेद वै कश्चिद्यथा त्वं मधुसूदन । एष दुर्योधनः कृष्ण द्रोणेन विहितामिमां । तिष्ठत्यभीतवत्सं-
ख्ये बिभ्रत्कवचधारणां । यत्त्वत्र विहितं कार्यं नैष तद्वेत्ति माधव । स्त्रीवदेष बिभर्त्येनां युक्तां कवचधारणां । पश्य बाह्वो- नी
श्च मे वीर्यं धनुषश्च जनार्दन । पराजयिष्ये कौरव्यं कवचेनापि रक्षितं । इदमंगिरसे प्रादाद्देवेशो वर्म भास्वरं । पुनर्ददौ
सुरपतिर्मह्यं वर्म ससंग्रहं । दैवं यद्यस्य वर्मैतद्ब्रह्मणा वा स्वयं कृतं । नैतद्गोप्स्यति दुर्बुद्धिमद्य बाणहतं मया ॥ सं-
जय उवाच ॥ ॥एवमुक्त्वार्जुनो बाणानभिमंत्र्य व्यकर्षयत् । विकृष्यमाणांस्तेनैव धनुर्मध्यगतान्शरान् । तान-
स्यास्त्रेण चिच्छेद द्रौणिः सर्वास्त्रघातिना । तान्निकृत्तानिषून्दृष्ट्वा दूरतो ब्रह्मवादिना । न्यवेदयत्केशवाय विस्मितः
श्वेतवाहनः । नैतदस्त्रं मया शक्यं द्विः प्रयोक्तुं जनार्दन । अस्त्रं मामेव हन्याद्धि पश्य त्वद्य बलं मम । ततो दुर्योधनः कृष्णौ नव-
भिर्नतपर्वभिः । अविध्यत रणे राजञ्शरैराशीविषोपमैः । भूय एवाभ्यवर्षच्च समरे कृष्णपांडवौ । शरवर्षेण महता तता-
न्हृष्यंत तावकाः । चक्रुर्वादित्रनिनदान्सिंहनादरवांस्तथा । ततः क्रुद्धो रणे पार्थः सृक्विणी परिसंलिहन् । नापश्यद्ध-
तत्तस्यांगं यन्न स्याद्वर्मरक्षितं । ततोऽस्य निशितैर्बाणैः सुमुक्तैरंतकोपमैः । हयांश्चकार निर्देहानुभौ च पार्ष्णिसार-

क्रोशमात्रे सैंधवतो ऽभवत्॥

द्रो.प. यौ चैवरस्यापि हित्वा दस्त्रावापंचवायोवारः। रथनीकावगाहं च कर्तुं मध्यसाचाव चक्रमे। इयौ धनंजयं बाणांस्तांस्तानन्यानि
रथान्कृतान् अविध्यद्दसंततलयो कृतयो रर्जुनस्तदा। तं कृष्णमपदेशांसं दृष्ट्वा परमधन्विनं। समापेतुः परीप्संतो धनंजयं
शराहितं। तेरथैर्वकृमादस्वैः कल्पितैः कुंजरैर्दैः। पदातयो येस्य संरब्धाः परिवव्रुर्धनंजयं। अथार्जुनं गांडिव दोर
थोवापिष्यदृश्यत। स्वस्त्रवर्षेण महता गृणोनाघियस्तापि संहतां। ततोर्जुनो ऽस्त्रवर्षेण निरुध्येनां वरूथिनीं। तत्र वर्गांकृ
ताः पेतुः शरनामतरपाद्विपाः। ते हतान्यमानाश्च नाप्नुवन्तस्रंरथोत्तमं। सरथस्तस्मिन्तस्ववस्थौ क्रोशमात्रे समंततः। ततोर्जुनं
वृष्णिवीरस्त्वरितो वाक्यमब्रवीत्। धनुर्विस्फारयात्यर्थमहं ध्मास्यामि वांबुजं। ततो विस्फार्य्य बलवद्गांडीवं जघ्निवान्रि
पून्। महता शरवर्षेण तलशब्देन चार्जुनः। पांचजन्यं च बलवद्दध्मौ नारायणः। केशवः। रजसा ध्वस्तपक्ष्मांतः प्रस्विन्नवद
नो भृशं। तस्य शंखस्य नादेन धनुषो निःस्वनेन च। निःसत्वाश्च ससत्वाश्च क्षितौ पेतुस्तदा जनाः। तैर्विमुक्तो रथो राजे वा
युरितांबुदः। जयद्रथस्य गोप्तारस्ततः क्षुब्धाः सहानुगाः। ते दृष्ट्वा सहसा पार्थं गोप्तारः सैंधवस्य तु। चक्रुर्नादान्महे
ष्वासाः कंपयंतो वसुंधरां। रणेशब्दांश्च प्रापुर्विविधाश्च शंखनिःस्वनैः। पांडवश्च महात्मानः सिंहनादरवानपि। तं श्रुत्वा ति १४२
नदं घोरं तावकानां समुत्थितं। प्रदध्मतुस्तदा शंखौ वासुदेवधनंजयौ सूत्रं तमिव संक्रुद्धः प्रति विदुर्जनार्दना। कर्णः शल्यो

प्रागयः सवसमीहेत्वयः। वैयाघ्रैः व्याघ्रचर्मविचित्रैः। कोसलकाः कुलत्रदेशजाः। पार्वता यमनानलरूपिणः। आजानेयैरिति। गुड
गंधकाय समवस्त्रलक्षणकाः तयोरितिकोश्मः। सारस्वताति। तडिय कुर्वृषाघोषास्वारी। निर्नरारीरास्थपिनादः खंतानंतपिङ्कलाय

जयो। तेन शब्देन महता पूरितेयं वसुंधरा। सशैला सार्णवद्वीपा सपाताला विशांपते। स शब्दो भरतश्रेष्ठ व्याप्य सर्वा दिशो द
नर श। प्रतिसस्वान तत्रैव कुरुपांडवयोर्बले। तावका रथिनस्तत्र दृष्ट्वा कृष्णधनंजयौ। संरंभं परमं प्राप्तास्त्वरमाणा महारथाः॥
अथ कृष्णौ महात्मानौ तावकाः प्रेक्ष्य दंशितौ। अभ्यद्रवंत संक्रुद्धास्तदद्भुतमिवाभवत्॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥
संजय उवाच॥ ॥तावकास्तु समीक्ष्यैव वृष्णिसिंहकुरूत्तमौ। प्रागत्वरन्त जिघांसंतस्तथैव च ययुस्तु पराक्रमात् सुवर्णचित्रैर्वै
याघ्रैः स्वनवद्भिर्महारथैः। दीपयंतो दिशः सर्वा ज्वलद्भिरिव पावकैः। रुक्मपृष्ठैर्दुराधर्षैः कार्मुकैः पृथिवीपते
। कूजद्भिर्विपुलान्नादान् रोषितैरुरगैरिव। भूरिश्रवाः शलः कर्णो वृषसेनो जयद्रथः। कृपश्च मद्रराजश्च द्रौणिश्च
रथिनां वरः। ते पिबंत इवाकाशमश्वैरष्टौ महारथाः। व्यराजयन्दश दिशो वैयाघ्रैर्हेमचंद्रकैः। ते दंशिताः सुसंरब्धा रथैर्मे
घौघनिःस्वनैः। समावृण्वन्दिशः सर्वाः पार्थमस्यन्शितैः शरैः। कौलूतका ह्याश्चित्रा वहंतस्तान्महारथान्। व्यशोभंत तदा शी
घ्रा दीपयंतो दिशो दश। आजानेयैर्महावेगैर्नानादेशसमुत्थितैः। पार्वतीयैर्नदीजैश्च सैंधवैश्च हयोत्तमैः। कुरुयोधवरा राज

स्मार। आजानेयैर्यावनैर्निर्दिष्टा वाजिनो धीरैः। वाह्लीकपार्वतीयावला विनाः स्निग्धकेशाश्च। ह्रस्वा स्तन हठपादा महाजवास्तानि
विख्याता नदीजेर्न दीनारत्नैः। अश्वाः सकर्णिकारे नदीनीरदेशजा समुद्दिष्टाः। सर्वाङ्गिस्निग्धाः पश्चाद्धीनतनवः किंचित्।

महारथसमाज्ञातानामहारथप्रनयाप्रसिद्धा॥ प्रविद्धमादिश्यं॥

स्त्वक्षत्वं परीप्सवः॥ धनंजयरथं शीघ्रं सर्वतः समुपाद्रवन्॥ ते षट्सहस्रमश्वानां स्वाणूंदध्वजः कुरुपसत्तमाः॥ पुरस्यंतादिवं राजन्
दृष्ट्विवीयसमागतांश्चैव दध्मतुः शंखौ वासुदेवधनंजयौ॥ पप्रवीसमभिद्रुतानां सर्वशांस्ववरोन्तु वि॥ देवदत्तं च कौंतेयः पां
चजन्यं च केशवः॥ शंखस्तु देवदत्तस्य धनंजयसमीरितः॥ पृथिवीं चांतरिक्षं च दिशश्चैव समावृणोत्॥ तथैव पांचजन्योपि वासुदे
वसमीरितः॥ सर्वशब्दानतिक्रम्य पूरयामास रोदसी॥ तस्मिंस्तथा वर्त्तमाने दारुणे नादसंकुले॥ भीरूणां त्रासजनने शूराणां
हर्षवर्द्धने॥ वादित्रासु च भेरीषु कर्करेषानकेषु च॥ मृदंगेषु च राजेंद्र वाद्यमानेषु नैकशः॥ महारथाः समाज्ञाता दुर्योधनहि
तैषिणः॥ अमृष्यमाणाः संरब्धाः शब्दं तं परमं धन्विनः॥ नानादेश्या महीपालाः स्वसैन्यपरिरक्षिणः॥ अमर्षिता महाशंखान्
दध्मुर्वीरा महारथाः॥ कृते प्रतिकरिष्यंतः केशवस्यार्जुनस्य वा॥ ततः तव बलं शंखशब्दसमीरितं॥ संप्रहृष्टं महाचानद्धि
उद्विग्नं नरनागाश्वमस्वस्थमिव चाभवत्॥ तत्प्रविद्धमिवाकाशं शूरैः शंखनिनादितं॥ बभूव भृशमुद्विग्नं नरवानादितं॥ सश
ब्दः सुमहान्राजन्दिशः सर्वा विनादयन्॥ त्रासयामास तत्सैन्यं युगांत इव संहतः॥ ततो दुर्योधनोष्टौ च राजानस्तेन महारथाः॥ जयद्र
थस्य रक्षार्थं पांडवं पर्यवारयन्॥ ततो द्रौणिस्त्रिसप्तत्या वासुदेवमताडयत्॥ अर्जुनं च त्रिभिर्भल्लैर्ध्वजमश्वांश्च पंचभिः॥ तमर्जुनः पृषत्का
नां शतैः षड्भिरताडयत्॥

रूपस्याकार॥ ध्वजमयं॥

अत्यंतमिव संक्रुद्धः प्रतिविद्धे जनार्दने॥ कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिस्तथा॥ शल्यस्य सशरं चापं मुष्टौ चिच्छेद वीर्यवान्
गृहीत्वा धनुरन्यत्तु शल्यो विव्याध पांडवं॥ भूरिश्रवास्त्रिभिर्बाणैर्हेमपुंखैः शिलाशितैः॥ कर्णो द्वात्रिंशता चैव वृषसेनस्तु पंचभिः॥
जयद्रथस्त्रिसप्तत्या कृपश्च दशभिः शरैः॥ मद्रराजश्च दशभिर्विव्यधुः फाल्गुनं रणे॥ ततः शरवर्षेणा तु द्रौणिः पार्थमवाकिरत्
वासुदेवं च सप्तत्या पुनः पार्थं च पंचभिः॥ प्रहसंस्तु नरव्याघ्रः श्वेताश्वः कृष्णसारथिः॥ प्रत्यविध्यत तान्सर्वान्दर्शयन्पाणिला
घवं॥ कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिः शरैः॥ शल्यस्य समरे चापं मुष्टिदेशेन्यकृंतत॥ सौमदत्तिं त्रिभिर्विद्ध्वा शल्यं च दशभिः
शरैः॥ शितैरग्निशिखाकारैर्द्रौणिं विव्याध चाष्टभिः॥ गौतमं पंचविंशत्या सैंधवं च शतेन ह॥ पुनर्द्रौणिं च सप्तत्या शराणां सोभ्य
ताडयत्॥ भूरिश्रवास्तु संक्रुद्धः प्रतोदं चिच्छिदे हरेः॥ अर्जुनं च त्रिसप्तत्या बाणानामाजघान ह॥ ततः शरशतैस्तीक्ष्णैस्तानरीन्श्वे
तवाहनः॥ प्रत्यषेधद्द्रुतं क्रुद्धो महावातो घनानिव॥ ॥इति द्रोणपर्वणि जयद्रथवधे॥ ॥धृतराष्ट्र उवाच॥ ॥ध्वजान्बहुविधाकारान्
भ्राजमानानतिश्रिया॥ पार्थानां मामकानां च तन्ममाचक्ष्व संजय॥ ॥संजय उवाच॥ ॥ध्वजान्बहुविधाकारा
ञ्छृणु तेषां महात्मनां॥ रूपतो वर्णतश्चैव नामतश्च निबोध मे॥ तेषां तु रथमुख्यानां रथेषु विविधा ध्वजाः॥ प्रत्यदृश्यंत रा

बाणारथा॰

ध्वजाग्रं ध्वजमुख्यं। कांचनः कांचनमयः॥

द्रो॰ न्ते ज्वलिता इव पावकाः॥ कांचनाः कांचनापीडाः कांचनस्रगलंकृताः॥ कांचनानीव शृंगाणि कांचनस्य महागिरेः॥ अनेक
वर्णा विविधा ध्वजाः परमशोभनाः॥ ते ध्वजाः संवृतास्तेषां पताकाभिः समंततः॥ नानावर्णविरागाभिर्विरेजुः सर्वतो वृताः॥ पताका
श्च ततस्तास्तु श्वसनेनेरिताः पुनः॥ नृत्यमाना व्यदृश्यंत रंगमध्ये विलासिकाः॥ इंद्रायुधसवर्णाभिः पताकाभिरलंकृताः॥ दोधूयम
ना रथिनां शोभयंति महारथान्॥ सिंहलांगूलमुग्रास्यं ध्वजं वानरलक्षणं॥ धनंजयस्य संग्रामे प्रत्यदृश्यत मारिष॥ स वानर
वरो राजन्पताकाभिरलंकृतः॥ त्रासयामास तत्सैन्यं ध्वजो गांडीवधन्वनः॥ तथैव सिंहलांगूलं द्रोणपुत्रस्य भारत॥ ध्वजा
ग्रं समपश्याम बालसूर्यसमप्रभं॥ कांचनं पवनोद्धूतं शक्रध्वजसमद्युति॥ नंदनं कौरवेंद्राणां द्रौणेर्लक्ष्म समुच्छ्रितं॥ हस्ति
कक्षा पुनर्हैमी बभूवाधिरथेर्ध्वजे॥ आहवे खं महाराज ददृशे पूरयन्निव॥ पताका कांचनी स्रग्वी ध्वजे कर्णस्य संयुगे॥ नृत्य
तीव रथोपस्थे श्वसनेन समीरिता॥ आचार्यस्य पांडवानां ब्राह्मणस्य यशस्विनः॥ गोवृषो गौतमस्यासीत्कृपस्य सुपरिष्कृतः॥ स
तेन भ्राजते राजन्गोवृषेण महारथः॥ त्रिपुरारिरथो यद्वद्गोवृषेण विराजता॥ मयूरो वृषसेनस्य कांचनो मणिरत्नवान्॥ व्याहरि १४३
ष्यन्निवातिष्ठत्सेनाग्रमपि शोभयन्॥ तेन तस्य रथो भाति मयूरेण महात्मनः॥ यथा स्कंदस्य राजेंद्र मयूरेण विराजता॥

श्रस्य॥ २॥ कांतो मयूरः स्फटिकवर्णः॥ हिमवानिव वर्जिते ति तत्र किल पराशरेण वर्जितत्वात्पितः॥

यथा देवाः

मद्रराजस्य शल्यस्य ध्वजाग्रेऽग्निशिखामिव॥ सीतामपश्याम वयं सीतामप्रतिमां शुभां॥ सा सीता भ्राजते तस्य रथमास्थाय मारिष॥ स
अभिविराजते॥ र्वबीजविरूढेव यथा श्रीरतुला कृता॥ वराहः सिंधुराजस्य राजतोऽभिविराजते॥ हेमजालपरिक्षिप्तः शुशुभे केतुना स
स१ नराजते ॥ श्वेतः ... सुरेषु देवराट् शुशुभे जयद्रथः॥ सोमदत्तेः पुनर्यूपो यज्ञशीलस्य धीमतः॥ ध्वजः सूर्य इवाभाति सो पं१
मश्चात्र प्रदृश्यते॥ स यूपः कांचनो राजन्सौमदत्तेर्विराजते॥ राजसूये मखश्रेष्ठे यथा यूपः समुच्छ्रितः॥ शलस्य तु महाराज राजतो
द्विरदो महान्॥ केतुः कांचनचित्रांगैर्मयूरैरुपशोभितः॥ स केतुः शोभयत्सैन्यं तव भारतसत्तम॥ यथा श्वेतो महानागो देवराज
चमूं तथा॥ नागो मणिमयो राज्ञो ध्वजः कनकसंवृतः॥ किंकिणीशतसंह्रादो राजंश्चित्रो रथोत्तमे॥ व्यभ्राजत भृशं राजन्पुत्रस्य तव विश्रु
तः पतिः॥ ध्वजेन महता संख्ये कुरूणामृषभस्तदा॥ नवैते तव वाहिन्यामुच्छ्रिताः परमध्वजाः॥ व्यदीपयंस्ते पृतनां युगांतादित्यसंनि
भाः॥ दशमस्त्वासीदेक एव महाकपिः॥ अदृश्यतार्जुनस्यैव यशसाग्निरिव ज्वलन्॥ तस्मिन्काले ... महारथा
॥ कार्मुकाण्येव ... अर्जुनार्थे परंतपाः॥ तथैव धनुरायच्छत्पार्थः शत्रुविनाशनः॥ गांडीवं दिव्यकर्मा तद्राजन्दुर्योधनस्य ॥
नवापराधाच्छिरपानि ... नानादिग्भ्यः समाहूताः सहयाः सरथा द्विपाः॥

व्यतिक्षेपोऽन्योन्याभियानः॥ ॥कंपयंल्लोकान्बभूवमितिरोषः॥

द्रोण० नवाभासीद्धनिक्षेपो गर्जतामितरेतरं॥ दुर्योधनस्य राज्ञस्तु पांडवानां च पार्थिव॥ तव राज्ञो महत्कर्म चातवाहुर्नरं परं वक्रे कोतयःकुरुसारथि
॥ यदेको कृष्णसानिःसाहं समागच्छमानितवत्॥ अद्यौ न तु महाबाहुः गांडीवं विक्षिपं स्तदा॥ जिगीषमानो नरव्याघ्रः तूर्जिघांसु
स्तु जयद्रथं॥ तथा र्जुनो महाराज चरिते तीक्ष्णसंसन्न्यस्त॥ अन्ये त्वपानकरा घोषांत्वा वकार्न शत्रुताघ्नत॥ ततस्तेपि नरव्याघ्राः
पार्थं संववृमहारथाः॥ अद्भुतं समारब्धकुर्या याय कौ तेःसमं ततः॥ मद्रवतेनरसिंहे सिंहःकृष्णगाह्वयेनेर्जुने॥ महानासीत्समुद्र
नस्तस्य सैन्यस्य निस्वनः॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥धृतराष्ट्र उवाच॥ ॥अर्जुने सिंधुराजं प्राप्ते भारद्वाजेन संवृ
ते पंचालाः कुरुभिःसार्द्धं किमकुर्वत संजय॥ ॥संजय उवाच॥ ॥अपराह्णे महाराज संग्रामे लोमहर्षणे॥ पंचालानां कु
''श्राए'' रूणां च द्रोणाद्युत मवर्त्तत॥ पंचाला विजिघांसं तो द्रोणं संहृष्टचेतसः॥ अभ्यवर्षन्त गर्जन्तो रजा शरवर्षाणि मारिष॥ ततःसुतुमुलस्ते
षां संग्रामस्तवर्त्ता र्जुनपंचालानां कुरूणां च घोररेव सुरासुरोपम॥ सर्वे द्रोणरथं प्राप्य पांचाला पांडवैःसह॥ तदनीकं विभित्संतो
महास्त्राणि प्रदर्शयन्॥ द्रोणस्य रथपर्यंतं रथिनो रथमास्थिता॥ कंपयन्तो भ्यवर्त्तन्त वेगमास्थाय मध्यमं॥ तमभ्ययाद्बृहत्क्षत्रः
केकयानां महारथः॥ प्रवपन्निशितान्बाणान्माहेंद्रान्विसृजन्मारिष॥ तं तु प्रत्युद्ययौ शीघ्रं क्षेमधूर्त्तिर्महायशाः॥ विमुंचन्नि १४७

सोमदत्तिःशलः॥

शितान्बाणां शतशोथ सहस्रशः॥ धृष्टकेतुश्च चेदीनामृषभोतिबलोदितः॥ त्वरितोभ्यद्रवद्द्रोणं महेंद्र इव शंबरं॥ तमापतं
तं महेष्वासं व्यादितास्यमिवांतकं॥ वीरधन्वा महेष्वासस्त्वरमाणःसमभ्ययात्॥ युधिष्ठिरं महाराजं जिगीषुं समवस्थितं॥ सहानी
कं ततो द्रोणो न्यवारयत वीर्यवान्॥ नकुलं कुशलं युद्धे पराक्रांतं पराक्रमी॥ अभ्यगच्छत्समायांतं विकर्णस्ते सुतःप्रभो॥ सहदे
वं तथायांतं दुर्मुखःशत्रुतापन॥ शत्रुंजये कसाहस्रैःसमवाकिरदाशुगैः॥ सात्यकिं तु नरव्याघ्रं व्याघ्रदत्तस्त्ववारयत्॥ शरैः सु
निशितैस्तीक्ष्णैः कंकपत्रैर्मुहुर्मुहुः॥ द्रौपदेयान्नरव्याघ्रान्मुंचतःसायकोत्तमान्॥ संरब्धान्रथिनां श्रेष्ठान्सोमदत्तिरवारयत्॥
भीमसेनं तथा क्रुद्धं घोररूपं भयानकं॥ प्रत्यवारयदायांतमार्ष्यशृंगिर्महाबलः॥ तयोःसमभवद्युद्धं नरराक्षसयोर्मृधे॥ यादृगे
व पुरा वृत्तं राम रावणयोर्नृप॥ ततो युधिष्ठिरो द्रोणं नवत्यानतपर्वणां॥ आजघ्ने भरतश्रेष्ठ सर्वमर्मसु भारत॥ तं द्रोणःपंचविंशत्या
निजघान स्तनांतरे॥ रोषितो भरतश्रेष्ठ कौंतेयेन यशस्विना॥ भूय एव तु विंशत्या सायकानां समाचिनोत्॥ साश्वसूतध्व
जं द्रोणःपश्यतां सर्वधन्विनां॥ तान्शरान्द्रोणमुक्तांस्तु शरवर्षेण पांडवः॥ अवारयत धर्मात्मा दर्शयन्पाणिलाघवं॥ ततो द्रो
णो भृशं क्रुद्धो धर्मराजस्य संयुगे॥ चिच्छेद सहसा धन्वी धनुस्तस्य महात्मनः॥ अथैनं छिन्नधन्वानं त्वरमाणो महारथः॥ शरैः

हतो राजेति केचिद्दमन्यात ति ॥ष॥ स्पष्टं वं ग ॥

रनेकसाहस्रैः॥ छन्नमासीत्तु सर्वतः॥ अदृश्यं वीक्ष्य राजानं भारद्वाजस्य सायकैः॥ सर्वे ते तान्यमन्यंत हतमेव युधिष्ठिरं॥
केचिच्चैनममन्यंत तथा ते विदिशो मुखीकृतं। हतो राजेति राजेंद्र ब्राह्मणेन यशस्विना। स कृच्छ्रं परमं प्राप्य धर्मराजो युधि-
ष्ठिरः। त्यक्त्वा तत्कार्मुकं छिन्नं भारद्वाजेन संयुगे। आददेन्यद्धनुर्दिव्यं भास्वरं साधनमुत्तमं। ततस्तान्सायकान्सर्वान्द्रोण-
मुक्तान्सहस्रशः॥ चिच्छेद समरे वीरस्तदद्भुतमिवाभवत्। छित्वा च तान् शरान्राजा क्रोधसंरक्तलोचनः॥ शक्तिं जग्राह स-
मरे गिरीणामपि दारिणीं॥ स्वर्णदण्डां महाघोरां अष्टघंटां भयावहां। समुत्क्षिप्य च तां हृष्टो ननाद बलवद्बली। नादे-
न सर्वभूतानि त्रासयन्निव भारत। शक्तिं समुद्यतां दृष्ट्वा धर्मराजेन संयुगे। स्वस्ति द्रोणाय सहसा सर्वभूतान्यथाब्रु-
वन्। सा राजभुजनिर्मुक्ता निर्मुक्तोरगसन्निभा। प्रज्वालयंती गगनं दिशः सविदिशस्तथा। द्रोणांतिकमनुप्राप्ता
दीप्तास्या पन्नगी यथा। तामापतंतीं सहसा प्रेक्ष्य द्रोणो विशांपते। प्रादुश्चक्रे ततो ब्राह्मं परमास्त्रविदांवरः। तदस्त्रं भस्म-
सात्कृत्वा तां शक्तिं घोरदर्शनां। जगाम स्यंदनं तूर्णं पांडवस्य यशस्विनः। ततो युधिष्ठिरो राजा द्रोणास्त्रं तत्समुद्यतं॥ १४५
अशामयन्महाप्राज्ञो ब्रह्मास्त्रेणैव भारत। विद्ध्वाथ वरणाद्द्रोणं पंचभिर्नतपर्वभिः॥ क्षुरप्रेण सुतीक्ष्णेन चिच्छेदास्य म-

हद्धनुः। तदपास्य धनुश्छिन्नं द्रोणः क्षत्रियमर्दनः॥ गदां चिक्षेप सहसा धर्मपुत्राय मारिष। तामापतंतीं सहसा गदां
गृह्य दृष्ट्वा युधिष्ठिरः। गदामेवाग्रहीत्क्रुद्धश्चिक्षेप च परंतपः॥ ते गदे सहसा मुक्ते समासाद्य परस्परं। संघर्षा-
त्पावकं मुक्त्वा समेयातां महीतले। ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य मारिष। चतुर्भिर्निशितैस्तीक्ष्णैर्ह-
यान्जघान चारोत्तमपि॥ धनुश्चैकेन भल्लेन चिच्छेदाभ्युच्छ्रयं। केतुमेकेन चिच्छेद पांडवं चार्दयत्त्रिभिः॥ हताश्वात्तु रथा-
त्तूर्णमवप्लुत्य युधिष्ठिरः। तस्थावूर्ध्वभुजो राजा व्यायुधो भरतर्षभ॥ विरथं तं समालोक्य व्यायुधं च विशांपते॥ द्रोणो
व्यामोहयच्छत्रून्सर्वसैन्यानि च प्रभो। मुमुचे निशितान् बाणान् लघुहस्तो दृढव्रतः॥ अभिदुद्राव राजानं सिंहो मृगमिवो-
ल्बणः॥ तमभिद्रुतमालोक्य द्रोणेनामित्रघातिना। हाहेति सहसा शब्दः पांडूनां समजायत॥ हतो राजा हतो राजा भारद्वा-
जेन मारिष। इत्यासीत्सुमहाञ्छब्दः पांडुसैन्यस्य सर्वतः। ततस्तु विरथो रुष्यन् सहदेवरथं नृपः। अपायाज्जवनैरश्वैः कुंतीपुत्रो
युधिष्ठिरः॥ ॥ द्रोणपर्वणि जयद्रथवधे॥ ॥ संजय उवाच॥ ॥ बृहत्क्षत्रमथायांतं केकयं दृढविक्रमं। क्षेमधू-
र्तिर्महाराज विव्याधोरसि मार्गणैः॥ बृहत्क्षत्रस्तु तं राजन्नवत्या नतपर्वणां। आजघ्ने त्वरितो युद्धे द्रोणानीकबिभित्स-
या। क्षेमधूर्तिस्तु संक्रुद्धः केकयस्य महात्मनः॥ धनुश्चिच्छेद भल्लेन पीतेन निशितेन च। अथैनं छिन्नधन्वानं श र

णानतपर्वणा।विव्याध हृदये हृष्टः प्रवरं सर्वधन्विनां। अथान्यद्धनुरादाय हार्दिक्यो हसन्निव। व्यश्वसूतध्वजं चक्रे क्षेम
धूर्तिं महारथं। तमन्येन शरेणाशु क्षिप्रेन पीतेन निशितेन च। जहार स पातः कायाच्छिरो ज्वलितकुंडलं तच्छिन्नं सहसा
तस्य शिरः कंपितरस्फुरत्। स किरीटं महीं प्राप्य बभौ ज्योतिरिवांबरात्। तं निहत्य रणे हृष्टो हार्दिक्यो वै महारथः। स
हसात्यपतत्सैन्यं तावकं पार्थकारणात्। धृष्टकेतुमथायांतं द्रोणहेतोः पराक्रमी। वीरधन्वा महेष्वासो वारयामास
भारत। तौ परस्परमासाद्य शरदंष्ट्रौ तरस्विनौ। शरैरनेकसाहस्रैरन्योन्यमभिजघ्नतुः॥ तावुभौ नरशार्दूलौ युयुधा
ते परस्परं। महाहवे तीव्रमदौ वारणाविव यूथपौ॥ गिरिगह्वरमासाद्य शार्दूलाविव रोषितौ। युयुधाते महावीर्यौ
परस्परजयैषिणौ। तद्युद्धमासीत्तुमुलं प्रेक्षणीयं विशां पते। सिद्धचारणसंघानां विस्मयाद्भुतदर्शनं। वीरधन्वा ततः
क्रुद्धो धृष्टकेतोः शरासनं। द्विधा चिच्छेद भल्लेन प्रहसन्निव भारत। तदुत्सृज्य धनुश्छिन्नं चेदिराजो महारथः। शक्तिं
जग्राह विपुलां रुक्मदंडामयस्मयीं। तां तु शक्तिं महावीर्यां दोर्भ्यामुद्यम्य भारत। चिक्षेप सहसा यत्तो वीरधन्वरथं प्र
प्रति। स तया वीरघातिन्या शक्त्याभिहतस्तदा। निर्भिन्नहृदयस्तूर्णं निपपात रथान्महीं। तस्मिन्विनिहते शूरे १४६
त्रिगर्त्तानां महारथे। बलं तेऽभज्यत विभो पांडवेयैः समंततः॥

आयसः स्मयन्निव॥
सहदेवेन तमःप्रहिंसायांतं दुर्मुखो विशांपते। ननाद सुमहानादं तर्जयन्पांडवं रणे। माद्रेयस्तु ततः क्रुद्धो दुर्मुखं दशभिः
शरैः। नाराचानांतरमायस्तो विव्याध हसन्निव। तं रणे रभसं दृष्ट्वा सहदेवं महाबलं। दुर्मुखो नवभिर्बाणैस्ताड
यामास भारत। दुर्मुखस्य तु भल्लेन छित्वा केतुं महाबलः। जघान चतुरो वाहांश्चतुर्भिर्निशितैः शरैः। चिच्छेद सा
रथेः कायाच्छिरो ज्वलितकुंडलं। क्षुरेण च सुतीक्ष्णेन कौरव्यस्य महद्धनुः। सहदेवो रणे छित्वा तं च विव्याध सप्त
भिः। हताश्वं तु रथं त्यक्त्वा दुर्मुखो विमनास्तदा। आरुरोह रथं राजन्निरमित्रस्य भारत। सहदेवस्ततः क्रुद्धो निरमित्रं म
हाहवे। जघान पृतनामध्ये भल्लेन परवीरहा। स पपात रथोपस्थान्निरमित्रो जनेश्वरः। त्रिगर्त्तराजस्य सुतो व्यथयंस्त
व वाहिनीं। तं तु हत्वा महाबाहुः सहदेवो व्यराजत। यथा दाशरथी रामः खरं हत्वा महाबलं। हाहाकारो महानासी
त्त्रिगर्त्तानां जनेश्वर। राजपुत्रे हते दृष्ट्वा निरमित्रे महारथे। नकुलस्ते सुतं राजन्विकर्णं पृथुलोचनं। मुहूर्त्ताज्जितवा
न्संख्ये तदद्भुतमिवाभवत्। सात्यकिं व्याघ्रदत्तस्तु शरैः संनतपर्वभिः। चक्रेऽदृश्यं साश्वसूतं सध्वजं पृतनांतरे। तान्नि
वार्य शरान्शूरः शैनेयः कृतहस्तवत्। साश्वसूतध्वजं बाणैर्व्याघ्रदत्तमपातयत्। कुमारे निहते तस्मिन्मागधस्य सु
ते विभो। मागधाः सर्वतो यत्ता युयुधानमुपाद्रवन्। विसृजंतः शरांश्चैव तोमरांश्च सहस्रशः। भिंडिपालांस्तथा प्रासा

न्तु रुरान्तुसलानपि। अयोधयत्रणे शूराः मात्रतंतु इदमद्भुतं। तांस्तु सर्वाञ्छबलाद्वाग्मात्य किंचित्कुर्मदः। नातिकृच्छ्राद
द्रोण० ७२ सन्नवविजित्य कुरुपर्षभः। मागधान्दृष्ट्वा नादृष्टास्ततायाममंततः। व्रह्मात नस्पतविमोक्तुस्तुधमतरा राहितं। नाशापि
चारणो सैन्यंत्र दीयमाधावान्नम। विधुवान् तावञुः गय छवपत्वाजनमहायशाः। नत्समानं बलं दृष्ट्वा सावातिनमहात्मनो। ना
न्यवर्ततनुद्रायत्तामितं दीर्घबाहुना। ततो द्रोणोक्ष्टशंक्रुद्धः सहसोद्वृत्य चक्षुषी। सात्यकिं सत्यकर्माणं स्वयमेवाभिदु
द्राव॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥संजय उवाच॥ ॥द्रौपदेयान्मादृष्ठासा सौमदत्तिर्महायशाः। एकेकं पंच
भिर्विध्वा उनर्विव्याधसप्तभिः। ते पीडिताम्दृशं तेन रौद्रेण सहसा विभो। प्रत्युह्यातेवविविडर्ष्ट्वधे कृत्यस्मा किंचन। नाकुलि
स्तु शतानीकः सौमदत्तिं नरर्षभं। द्वाभ्यां विध्वा नदद्धृष्टः शरम्यां शत्रुतापनः। तथेतरे रणे यत्ता स्त्रिभिस्त्रिभिरजिह्मगैः
।विव्यधुः समरे तूर्णं सौमदत्तिममर्षणं। सतान्प्रति महाराज चिक्षेप पंच सायकान्। एकेकं हृदि वाजघ्ने एकेकेन
महायशाः। ततस्ते भ्रातरः पंच भिः शरैर्विद्धा महात्मना। परिवार्य रणे वीरं विव्यधुः सायकैर्भृशं। आर्जुनिस्तु हयां
स्तस्य चतुर्भिर्निशितैः शरैः। प्रेषयामास संक्रुद्धो यमस्य सदनं प्रति। भैमसेनिर्धनुश्छित्वा सौमदत्तेर्महात्मनः। न १४७
नाद बलवन्नादं विव्याध निशितैः शरैः। यौधिष्ठिरिर्ध्वजं तस्य छित्वा भूमावपातयत्। नाकुलिस्त्वाश्चयतारं रथनीडाद

श्चलेबुषं शालकटंकटं॥
पाहरत्। सारदेविस्तुतंज्ञात्वा त्वष्टभिर्विशिखैः कृतं। क्षुरप्रेण शिरो पराजविचकर्त महात्मनः। तच्छिरोन्यपतद्भूमौ तपनीय
विभूषितं। नामयंतिरणोद्देशं बालसूर्यसमप्रभं। सौमदत्तेः शिरो दृष्ट्वा निपतितं महात्मनः। वित्रस्तास्तावका राजन्सैन्यदु
द्रुवुरनेकधा। अलंबुषस्तु समरे भीमसेनं महाबलं। योधयामास संक्रुद्धो लक्ष्मणं रावणिर्यथा। संप्रयुद्धौ रणे दृष्ट्वा
तौ तोनरराक्षसौ। विस्मयः सर्वभूतानां प्रहर्षः समजायत। आर्ष्यशृंगिं ततो भीमो नवभिर्निशितैः शरैः। विव्याध प्रहस
९५ न्राजन्राक्षसेंद्रममर्षणं। तद्रक्षः समरे विद्धं कृत्वा नादं भयावहं। अभ्यद्रवत्ततो भीमं ये च तस्य पदानुगाः। स भीमं पंचभिर्वि
ध्वा शरैः संनतपर्वभिः। भीमानुगान्रथान्स्तूर्णं त्रिंशतांनमोजसा। पुनश्चतुःशतान्हत्वा भीमं विव्याध पत्रिणा। सोतिवि
द्धस्तदा भीमो राक्षसेन महाबलः। निषसाद रथोपस्थे मूर्छयाभिपरिप्लुतः। प्रतिलभ्य ततः संज्ञां मारुतिः क्रोधमूर्छितः। वि
कृष्य कार्मुकं घोरं भारसाधनमुत्तमं। अलंबुषं शरैस्तीक्ष्णैरर्दयामास सर्वतः। स विद्धो बहुभिर्बाणैर्नीलांजनचयोप
मः। शुशुभे सर्वतो राजन्प्रदीप्त इव किंशुकः। स वध्यमानः समरे भीमचापच्युतैः शरैः। स्मरन्भ्रातृवधं चैव पांड
वेन महात्मना। घोरं रूपमथो कृत्वा भीममाह नमनायत्। तिष्ठ दानीं रणे पार्थ पश्य मेद्य पराक्रमं। बकोनाम सुदुर्बुद्धे रा

द्रोण० दशप्रकाराबली॥ पुराहं मम तद्वृत्तं यत्कृतं तामिदत्तस्त्वया। एवमुक्त्वा ततो भीमम् अंतर्धानं गतस्तदा॥ महता शरवर्षेण स
म्हरांसमवाकिरत्॥ भीमस्तु समरे राजन् हृश्ये राक्षसमंततः॥ आकाशं पूरयामास शरैः सन्नतपर्वभिः॥ स वध्यमानो भी
मेन निमेषाद्रथमास्थितः॥ जगाम धरणीं क्षुद्रः खं चैव सहसागमत्॥ उच्चावचानि रूपाणि चकार सुबहूनि च॥ अणु
र्बृहत्पुनः स्थूलो नादान्मुंचन्निवांबुदः॥ उच्चावचास्तथा वाचो व्याजहार समंततः॥ निपेतुर्गगनाच्चैव शरधाराः स
हस्रशः॥ शक्तयः कणपाः प्रासाः शूलपट्टिशतोमराः॥ शतघ्न्यः परिघाश्चैव भिंदिपालाः परश्वधाः॥ शिलाः खड्गाः कु
लाश्चैव ऋष्टयो वज्राणि च विद्युतः॥ सा राक्षसविसृष्टा तु शस्त्रवृष्टिः सुदारुणा॥ जघान पांडुपुत्रस्य सैनिकान् रणमूर्द्धनि॥
तेन पांडवसैन्यानां मृदिता युधि वारणाः॥ हयाश्च बहवो राजन् पत्तयश्च तथा पुनः॥ रथेभ्यो रथिनः पेतुस्तस्य नुन्नाः स्म
सायकैः॥ शोणितोदां रथावर्त्तां हस्तिग्राहसमाकुलां॥ छत्रहंसां कर्दमिनीं बाहुपन्नगसंकुलां॥ नदीं प्रवर्त्तयामास
रक्षोगणसमाकुलां॥ वहंतीं बहुधा राजंश्चेदिपांचालसृंजयान्॥ तं तथा समरे राजन् विचरंतमभीतवत्॥ पांडवा भृशसंविग्नाः १४८
प्रापश्यंस्तस्य विक्रमं॥ तावकानां तु सैन्यानां प्रहर्षः समजायत॥ वादित्रनिनदश्चोग्रः सुमहाँल्लोमहर्षणः॥ तं श्रुत्वा निनदं घोरं तव

एवमाहत्वं बत्रावं॥ युक्तोऽत्यन्तपयुक्तो॥ स संग्रहं सोपदेशं॥ देवं दैवं कृतं॥ निहिहार निकृत्याव यथवान्॥

सैन्यस्य पांडव॥ नामृष्यत यथा नागस्तलशब्दं समीरितं॥ ततः क्रोधाभिताम्राक्षो निर्दहन्निव पावकः॥ संदधेवाष्ट्रमस्त्रं सस्व
यं त्वष्टेव मारिष॥ ततः शरसहस्राणि प्रादुरासन्समंततः॥ तैः शरैस्तव सैन्यस्य विद्रवः सुमहानभूत्॥ तदस्त्रं प्रेषितं तेन भीम
सेनेन संयुगे॥ राक्षसस्य महामायां हत्वा राक्षसमार्दयत्॥ स वध्यमानो बहुधा भीमसेनेन राक्षसः॥ संत्यज्य संयुगं नाम द्रो
णानीकमुपाद्रवत्॥ तस्मिंस्तु निर्जिते राजन् राक्षसेंद्रे महात्मना॥ अनादयन्सिंहनादैः पांडवाः सर्वतो दिशः॥ अपूजयन्मारुतिं
च संहृष्टास्ते महाबलं॥ प्रह्लादं समरे जित्वा यथा शक्रं मरुद्गणाः॥ ॥द्रोणपर्वणि जयद्रथवधे॥ ॥संजय उवाच॥ ॥अलंबुषं
तथा युद्धे विचरंतमभीतवत्॥ हैडिंबः प्रययौ तूर्णं विव्याध निशितैः शरैः॥ तयोः प्रतिभयं युद्धमासीद्राक्षससिंहयोः॥ कु
र्वंतौ विविधा मायाः शक्रशंबरयोरिव॥ अलंबुषो भृशं क्रुद्धो घटोत्कचमताडयत्॥ तयोर्युद्धं समभवद्रक्षोग्रामणिमु
ख्ययोः॥ यादृगेव पुरा वृत्तं रामरावणयोः प्रभो॥ घटोत्कचस्तु विंशत्या नाराचानां स्तनांतरे॥ अलंबुषमथो विद्ध्वा सिंहवद्व्य
नदन्मुहुः॥ तथैवालंबुषो राजन् हैडिंबं युद्धदुर्मदं॥ विद्ध्वा विद्ध्वानदद्धृष्टः पूरयन्खं समंततः॥ तथा तौ भृशसंक्रुद्धौ रा
क्षसेंद्रौ महाबलौ॥ निर्विशेषमयुध्येतां मायाभिरितरेतरं॥ मायाशतसृजौ हृष्टौ मोहयंतौ परस्परं॥ मायायुद्धकुशा

३९०

तौ मायायुद्धमस्थितां यां यां घटोत्कचो युद्धे मायां स्रक्ष्यति तत्र पातां नाम लंबुषो राजन्माययैव निजघ्निवान्। तं तथा युध्यमानं तं
मायायुद्धविशारदं। अलंबुषं राक्षसेंद्रं दृष्ट्वाक्रुध्यंत पांडवाः। तएनं भृशसंक्रुद्धाः सर्वतः प्रवरा रथैः। अभ्यद्रवंत संख्ये तं भीम
सेनादयो नृप। तएनं कोष्ठकीकृत्य रथवंशेन मारिष। सर्वतो व्यकिरन्बाणैरुल्काभिरिव कुंजरं। स तेषामस्त्रवेगं तं प्रतिहत्या
स्त्रमायया। तस्माद्विमुक्तजान्तुको वनदाहादिवद्विपः। स विस्फार्य धनुर्घोरमिंद्राशनिसमस्वनं। मारुतिं पंचविंशत्या भीमसं
निं च पंचभिः। युधिष्ठिरं त्रिभिर्विद्ध्वा सहदेवं च सप्तभिः। नकुलं च त्रिसप्तत्या द्रौपदेयांश्च मारिष। पंचभिः पंचभिर्विद्ध्वा घोरं नादं
चकार ह। तं भीमसेनो नवभिः सहदेवश्च सप्तभिः। युधिष्ठिरः शतेनैव राक्षसं प्रत्यविध्यत। नकुलस्तु ततः षष्ट्या द्रौपदेया
स्त्रिभिस्त्रिभिः। हैडिंबो राक्षसं विद्ध्वा युद्धे पंचाशता शितैः। पुनर्विव्याध सप्तत्या ननादं च महाबलः। तस्य नादेन महता कंपिते
यं वसुंधरा। सपर्वतवना राजन्सपादपजलाशया। सोतिविद्धो महेष्वासैः सर्वतस्तैर्महारथैः। प्रतिविव्याध तान्सर्वान्पं
चभिः पंचभिः शरैः। तं क्रुद्धं राक्षसं युद्धे प्रतिक्रुद्धस्तु राक्षसः। हैडिंबो भरतश्रेष्ठ शरैर्विव्याध सप्तभिः। सोतिविद्धो बलवता राक्षसें
द्रो महाबलः। व्यसृजत्सायकांस्तूर्णं स्वर्णपुंखाञ्छिलाशितान्। ते शरा नतपर्वाणो हैडिंबं विविशुस्तदा। रुषिताः पन्नगा यद्वद्गिरिशृंगं महा २६०

मर्त्यधर्मं मरणायोपपतां। आक्षिप्य हृदीतवान्। आविध्य भ्रामयित्वा। विस्फारितानि दृष्ट्वान्ध्रतानि सर्वाण्यंगानि यस्य॥

महा। ततस्ते पांडवा राजन्समंतात्त्रिशितान्वरान्। प्रेषयामासुर्हृष्टा हैडिंबश्च घटोत्कचः। स वध्यमानः समरे पांडवैर्जितका
शिभिः। मर्त्यधर्ममनुप्राप्तः कर्तव्यं नाभ्यपद्यत। ततः समरशौंडो वै भीमसेनिर्महाबलिः। समीक्ष्य तं तथावस्थं वधायास्य मनो
दधे। वेगं चक्रे महांतं वै राक्षसेंद्ररथं प्रति। दग्धाद्रिकूटशृंगाभं भिन्नांजनचयोपमं। रथाद्रथमभिद्रुत्य क्रुद्धो हैडिंबो वि
राक्षिपत्। उद्ववर्ह रथाद्वापि पन्नगं गरुडो यथा। समुत्क्षिप्य च बाहुभ्यामाविध्य च पुनः पुनः। निष्पिपेष ततः क्षिप्रं
पूर्णकुंभमिवाश्मनि। बललाघवसंपन्नः संपन्नो विक्रमेण च। भीमसेनिरणे क्रुद्धः सर्वसैन्यान्यभीषयत्। स विस्फारि
तसर्वांगः संचूर्णास्थिर्विभीषणः। घटोत्कचेन वीरेण हतः सालकंटकटः। ततः सुमनसः पार्था हते तस्मिन्निशाचरे। चुक्रु
शुः सिंहनादांश्च वासांस्याधुन्वुश्च ह। तावकाश्च हतं दृष्ट्वा राक्षसेंद्रं महाबलं। अलंबुषं नामसत्यं विशीर्णमिव पर्वतं। हा
हाकारमकुर्वंत सैन्यानि भरतर्षभ। जनाश्च तं तदा दृष्ट्वा राक्षसं कौतूहलान्विताः। यदृच्छया निपतितं भूमावंगारकं यथा॥
घटोत्कचस्तु तं हत्वा रक्षो बलवतां वरं। मुमोच बलवन्नादं बलं हत्वेव वासवः। संपूज्यमानः पितृभिः सबांधवैर्घटोत्क
तेन चः कर्मणि दुष्करे कृते। रिपुं निहत्याभिननंद वै तदा ह्यलंबुषं पक्वमलंबुषं यथा। तेषां निनादः सहसा समुत्थितः सशंखना

तस्मिन्महात्मना

नुवतंस्त्वलोकं॥ ॥इत्यलंबुषवधः॥

द्रोण०

नाविधन्वा न घोषवान्॥ निशाम्य तां ब्राह्मणस्य दंस्युकौरवाश्च ताः धनिर्जुनमयास्यशरा द्वां॥ ॥द्रोणपर्वणि जयद्रथव
धेऽलंबुषवधः॥ ॥धृतराष्ट्र उवाच॥ ॥सारथातेक एवं युयुधानोऽभ्यवारयत्। संजयाचक्ष्व तत्त्वेन परं कौतू
हलं हि मे॥ ॥संजय उवाच॥ शृणु राजन्विक्रमतां संग्रामे लोमहर्षणं। द्रोणस्य पांडवैः सार्द्धं युयुधानपुरोगमैः
। वध्यमानं बलं दृष्ट्वा युयुधानेन मारिष। अभ्यद्रवत्स्वयं द्रोणः सात्यकिं सत्यविक्रमं। तमापतंतं सहसा भारद्वाजं महार
थं॥ सात्यकिः पंचविंशत्या क्षुद्रकाणां समार्पयत्। द्रोणोऽपि युधि विक्रांतो युयुधानं समाहितः। अविध्यत्पंचभिस्तूर्णं
हेमपुंखैः शिलाशितैः। ते वर्म भित्त्वा सुदृढं द्विषत्पिशिताशनाः। अभ्यगुर्धरणीं राजञ्श्वसंत इव पन्नगाः। दीर्घबा
हुर्निर्बाणैर्यतमानमविध्यत। ततः क्षुद्रकमादाय सात्यकिमेव महाबलः। सात्वतं पीडयामास शराणां नतपर्वणां। स वध्य
मानः समरे भारद्वाजेन सात्यकिः। नान्वपद्यत कर्तव्यं किंचिदेव विशांपते। विषण्णवदनश्चापि युयुधानो नराधि
प। भारद्वाजं रणे दृष्ट्वा विसृजंतं शितान्शरान्। तं संप्रेक्ष्य तु ते पुत्राः सैनिकाश्च विशांपते। प्रहृष्टमनसो भूत्वा सिंहव
द्व्यनदन्मुहुः। तं श्रुत्वा निनदं घोरं पीड्यमानं च माधवं॥ ॥ क्रुद्धो निर्बाणैर्यतमानमविध्यत। ततः क्षुद्रकमादाय सात्व
त एव महाबलः। सात्वतं पीडयामास शराणां नतपर्वणां ४ कृष्णस्ततः क्रुद्धो वार्ष्णेयं स्वभिद्रयः। द्रोणं पंचाशता विध्य
राचिरमिसंनिवेश नारत्नजेन रणे विद्धा युयुधानेन संगरे। सात्यकिं ब४ स्तलनी उलिद॥ १५०

तस्मिन्नवसरे। कृत्वा सजयद्रथवधस्य। अनंतराध्यायः। अविशाकोषी। यः स धर्मो मे त्रीलक्षणः॥

द्रोण०

तस्मिन्द्रोणेन निहताः पांचालाः पंचविंशतिः। महारथाः समाख्याता धृष्टद्युम्नस्य संमताः। पांडूनां सर्वसैन्येष्वपि पांचालानां तथैव
च। द्रोणं स्म ददृशुः शूरं विनिघ्नंतं वरान्वरान्। केकयानां शतं हत्वा विद्राव्य च समंततः। द्रोणस्तस्थौ महाराज व्यादितास्य इ
वांतकः। पांचालान्सृंजयान्मत्स्यान्केकयान्पांडवानपि। द्रोणो जयन्महाबाहुः शतशोऽथ सहस्रशः। तान्समभवच्छ
वध्यतो द्रोणसायकैः। वनौकसामिवारण्ये दह्यतां धूमकेतुना। तत्र देवाः सगंधर्वाः सपितृपुस्थाश्च ब्रुवन्नृप। एते द्रवंति पांचाला
पांडवाश्च ससैनिकाः। तं तथा समरे द्रोणं निघ्नंतं सोमकान्रणे। न चाप्यभिययुः केचिदपरे नैव विव्यधुः। वर्तमाने
तथा रौद्रे तस्मिन्वीरवरक्षये। अशृणोत्सहसा पार्थः पांचजन्यस्य निस्वनं। पूरितो वासुदेवेन शंखराट् स्वनेन तत्र शं। यु
ध्यमानेषु वीरेषु सैंधवस्याभिरक्षिषु। नदत्सु धार्तराष्ट्रेषु विजयस्य रथं प्रति। गांडीवस्य च निर्घोषे विप्रनष्टे स
मंततः। कश्मलाभिहतो राजा चिंतयामास पांडवः। न नूनं स्वस्ति पार्थाय यथा नदति शंखराट्। कौरवाश्च यथा हृ
ष्टा विनदंति मुहुर्मुहुः। एवं संचिंतयित्वा तु व्याकुलेनांतरात्मना। अजातशत्रुः कौंतेयः सात्वतं वाक्यमब्रवीत्। बाष्प
गद्गदया वाचा मुह्यमानो मुहुर्मुहुः। कृत्यस्यानंतरापेक्षी शोनये शिनिपुंगवं॥ युधिष्ठिर उवाच॥ ॥स सधर्मो गुरुस्तु १५१

युधिष्ठिरोऽब्रवीद्राजा सर्वसैन्यानि मारिष। एष दुर्निवारो वीरः सात्यकिः सत्यकर्मकृत्। यस्मात्सुधिवीरेण नाद्य मानि
वराकृणा। ऋतिद्रवत गच्छध्वं सात्यकिर्यत्र वर्त्तते। धृष्टद्युम्नं च पांचाल्यमिदं माहुर्जनाधिप। ऋतिद्रव द्रुतं द्रोणं किं
तिष्ठसि पार्षत। न पश्यसि भयं घोरं द्रोणान्नः समुपस्थितं। ऋसौ द्रोणो महेष्वासो युयुधानेन संयुगे। क्रीडते सूत्र
बद्धेन पक्षिणा बालको यथा॥ तत्रैव सर्वे गच्छन्तु भीमसेनमुखा रथाः। त्वयैव सहिता युक्ता युयुधानरथं प्रति। पृष्ठतोऽनुग
मिष्यामि त्वामहं सहसैनिकः। सात्यकिं मोक्षयस्वाद्य यमदंष्ट्रान्तरं गतं। एवमुक्त्वा ततो राजा सर्वसैन्येन पांडवः। ऋभ्य
द्रवद्रणे द्रोणं युयुधानस्य कारणात्। तत्रारावो महानासीद्द्रोणमेकं युयुत्सतां। पांडवानां च भद्रं ते सृंजयानां च सर्वशः॥
ते समेत्य नरव्याघ्रा भारद्वाजं महारथं। ऋभ्यवर्षत तीक्ष्णाग्रैः कंकबर्हिणवाजिभिः। स्मयन्नेव तु तान्वीरान्द्रोणः प्रत्युद्ययौ स्व
यान्प्रतिथीनिव संप्राप्तान्सलिलेनासनेन च। तर्पितास्ते शरैस्तस्य भारद्वाजस्य धन्विनः। ऋतिथ्यं यद्वत्प्राप्य पतेंति पथो
यथा॥ भारद्वाजं च ते संदीप्तं शक्नुवन्ति वीक्षितुं। मध्यंदिनमनुप्राप्तं सहस्रांशुमिव प्रभो। तांस्तु सर्वान्महेष्वासान्द्रोणः शस्त्र
भृतां वरः। ऋतापयच्छरैर्दीप्तैर्गभस्तिभिरिवांशुमान्। वध्यमाना द्रोणेन पांडवाः सृंजयास्तथा। त्रातारं नाध्यगच्छन्त पंक
मग्ना इव द्विपाः॥ द्रोणस्य च व्यदृश्यंत विसर्पंतो महाशराः। गभस्तय इवार्कस्य प्रतपन्तः समंततः॥

सांपराये ऋापन्नकल्पे। वयस्यस्य स्निग्धस्य। सहायार्थे सहायप्रयोजनं। सत्यव्रतो दृढनिश्चयः॥

शिष्यशिक्षितो नियतात्मवान्। सांपराय उपकृत्वा तस्य कालो यमागतः। सार्वद्यपि च यायाधेषु चिंतयन्निति पुंगव। व्रत्रः स्तुतस्त्र
मे किं चिन्ता निजानामि सात्यके। यो हि प्राणमनानित्यक्ष्य निसमत्तवृतः। सकोऽयं सांपरायत्तुनि व्यात्म इति मम मतिः। यथा वाक
शवो नित्यं पांडवानां परायणं। तथा त्वमपि वार्ष्णेय कृष्णतुल्यपराक्रमः। सोऽहं भारं समाधास्य त्वयि तं वोढुमर्हसि। ऋभिप्रायं
च मम नित्यं न हन्तु काक्षुमर्हसि। सर्वे वादर्यमस्य मुख्ये रपि च संयुगे। कृष्णः स सहायार्थे मर्जुनस्य नरर्षभ। त्वं हि सत्यव्र
तः शूरो मित्राणामभयंकरः। लोकविख्यात सर्वकर्मभिः सत्यवागिति। यो हि शैनेय मित्रार्थे युध्यमानस्त्यजेत्त
नुं। पृथिवीं वा द्विजातिभ्यो यो दद्यात्सममिति न तत्। श्रुतास्तु बहवोऽस्माभी राजानो ये दिवं गताः। दत्वेमां पृथिवीं कृत्स्नां
ब्राह्मणेभ्यो यथा विधि। एवं त्वामपि धर्मात्मन्प्रयाचेऽहं कृताञ्जलिः। पृथिवीदानतुल्यं स्यादधिकं वा फलं विभो।
एक एव समर्थोऽस्मि मित्राणामभयंकरः। रणे संत्यजति प्राणान्द्वितीयस्त्वं च सात्यके॥ विक्रान्तस्य च वीरस्य
युद्धेऽस्यार्थपलायिनः। शूर एव महायशस्य ऋान्तरं नरः प्राकृतो जनः। ईदृशोऽपरमा हि वर्त्तमानस्य माधव। त्वत्तो
हि रणे गाथा विजयस्य न विद्यते। ऋथ त्वं च हि कर्माणि सततं तव पांडवः। मम संजनयन्हर्षं पुनः पुनरकीर्त्तयत्
लघुस्त्रश्चित्रयोधी च तथा लघुपराक्रमः। प्राज्ञः सर्वास्त्रविद्वीरः न च मुह्यति संयुगे। महास्कंधो महोरस्को महाबाहु

ऽप्यल्लवविमर्दे। सत्यस्यांगीकारस्योत्सुकं पार्थेनार्जुनात्पालननिमित्तं। संख्यादीनामनुरूपमित्यन्वयः॥

द्रो० मे हि धनुः। महाबलो महावीर्यः समरात्मा महारथः॥ शिष्यो मम सखा चैव प्रियोऽस्माकं प्रियश्च ते। युयुधानः सहायो मम युध
थिष्यति कौरवान्॥ अस्मदर्थं चरा तं इमं नत्यजेद्यदि केशवः॥ रामो वाप्यनिरुद्धो वा प्रद्युम्नो वा महारथः॥ गदो वा सारणो वापि सांबो वा
वा सहवृष्णिभिः॥ साहाय्यार्थं महाराज संग्रामोत्तममूर्द्धनि। तथाप्यहं नरव्याघ्रं शैनेयं सत्यविक्रमं। साहाय्ये विनियास्या
मि नान्यन्मेऽस्ति समः॥ इति द्वैतवने तात मामुवाच धनंजयः। परोक्षं त्वद्गुणांस्तथ्यान्कथयन्नार्यसंसदि। तस्य त्वमे
वं संकल्पं न वृथा कर्तुमर्हसि। धनंजयस्य वार्ष्णेय मम भीमस्य चोभयोः। यच्चापि तीर्थानि चरन्गतवान्द्वारकां प्रति। तत्रा
हमपि ते भक्तिमर्जुनं प्रति दृष्टवान्। न तत्सौहृदस्य वीर्यं मन्ये तु मया शैनेय लक्षितं। तथा त्वमस्मान्भजसे वर्त्तमा
नानुपप्लवे। साभिजातस्य न कश्चित्सख्युराचार्यकस्य च। सौहृदस्य च वीर्यस्य कुलीनत्वस्य माधव। सत्यस्य च महा
बाहो अनुकंपार्थमेव च। अनुरूपं महेष्वास कर्म त्वं कर्तुमर्हसि। सुयोधनो हि सहसा गतो द्रोणेन दंशितः। पूर्वमे
व तु यातास्ते कौरवाणां महारथाः। सुमहान्निनदश्चैव श्रूयते विजयं प्रति। स शैनेय जवेनाशु गंतुमर्हसि माधव॥ १५२
भीमसेनो वयं चैव संयत्ताः सहसैनिकाः। द्रोणमावारयिष्यामो यदि त्वां प्रति यास्यति। पश्य शैनेय सैन्यानि द्रवमा

महांतं महांतमर्थं॥

णानि संयुगे। महांतं च रणे शब्दं दीर्यमाणां च भारतीं। महामारुतवेगेन समुद्रमिव पर्वसु। धार्त्तराष्ट्रबलं तात विक्षिप्तं
सव्यसाचिना। रथैर्विपरिधावद्भिर्मनुष्यैश्च हयैस्तथा। सैन्यं रजः समुद्धूतमेतत्संपरिवर्त्तते। संवृतः सिंधुसौवीरैर्नखर
प्रासयोधिभिः। अत्यंतोपचितैः शूरैः फाल्गुनः परवीरहा। नैतद्बलमसंवार्य्य शक्यो हंतुं जयद्रथः। एते हि सैंधवस्या
र्थे सर्वे संत्यक्तजीविताः। शरशक्तिध्वजवरं हयनागसमाकुलं। पश्यैतद्धार्त्तराष्ट्राणामनीकं सुदुरासदं। शृणु दुंदुभिनिर्घो
षांश्च शंखशब्दांश्च पुष्कलान्। सिंहनादरवांश्चैव रथनेमिस्वनांस्तथा। नागानां शृणु शब्दांश्च पत्तीनां च सहस्रशः। सादिनां द्रवतां चै
व शृणु कंपयतां महीं। पुरस्तात्सैंधवानीकं द्रोणानीकस्य पृष्ठतः। बहुत्वाद्धि नरव्याघ्र देवेंद्रमपि पीडयेत्। अपर्यंतबले
मग्नो जह्यादपि च जीवितं। तस्मिंश्च निहते युद्धे कथं जीवेत मादृशः। सर्वथाहमनुप्राप्तः सुकृच्छ्रं त्वयि जीविते। श्यामो यु
वा गुडाकेशो दर्शनीयश्च पांडवः। लघ्वस्त्रश्चित्रयोधी च प्रविष्टस्तात भारतीं। सूर्योदये महाबाहुर्दिवसश्चातिवर्त्तते। त
न्न जानामि वार्ष्णेय यदि जीवति वा न वा। कुरूणां चापि तत्सैन्यं सागरप्रतिमं महत्। एक एव च बीभत्सुः प्रविष्टस्तात भार
तीं। अविषह्यं महाबाहुः सुरैरपि महामृधे। न च मामद्य वर्त्तते बुद्धिर्युद्धे कथंचन। द्रोणोऽपि रभसो युद्धे मम पीडयते बलं
। प्रत्यक्षं ते महाबाहो यथासौ चरते द्विजः। युगपत्समवेतानां कार्याणां त्वं विचक्षणः॥

महार्थं महांतमर्थं लघुसंयुक्तमविक्लवसंयुक्तं। वीरतायाश्च साहकरणार्थं। संभावनाभितो ज्ञाने कुलज्ञो जन्मसुतादिषु। विनी
महार्थं लघुसंयुक्तं कर्तुमर्हसि माधव। तस्मात्सर्वकार्याणि तन्मे संसद। अर्जुनस्य परित्राणं कर्तव्यमिति संयुग। ना
हं शोचामि दाशार्ह गोसारं जगतः प्रभुं। सहि शक्रो रणाच्चान्तर्वी लोकान्संगतान्। विजेतुं पुरुषव्याघ्रः सत्यमेतद्ब्रवीमि
ते। किंपुनर्धार्तराष्ट्रस्य बलमेतत्सुदुर्बलं। अर्जुनास्त्वेवं बाल यः प्रतिलोकानिबुधि। प्रजहाद संमरे रोगः प्राणान्स्त्रस्माद्धि
दामिकमलं तस्य चेप्रदवीमद्धगाविशुस्ताहृशा यथा। ताहशास्य हृश्चो काले मादशेरमिचोदितः। ऐरणो हन्मि प्रवीराणां देवे
वातिरथोस्ताते। अश्वत्थामा महाबाहुस्तेच माद्य नविशुस्त। अस्त्रैर्नारायणसमः संकर्षणसमो बले। वीरतायां नरव्याघ्र ध
नंजयसमोह्यसि। भीष्मद्रोणावतिक्रम्य सर्वयुद्धविशारदे। त्वामद्य पुरुषव्याघ्रे। किमतः प्रवच्छन्। नासाध्यं विद्यते
लोके सात्यकिरिति माधव। त्वायदन्निवस्यामि तच्छुरुश्च महाबला। संभावनादितो कस्य मम पार्थस्य चोभयोः। तान्यथा तं
महाबाहो संपूर्णकर्तुमिहार्हसि। परित्यज्य प्रियान्प्राणान्रणे चरस्य भीतवत्। नहि शैनेय दाशार्हेषु दरं संति जीवितं। अ सु
रमवयस्थाने संयामचपलायन। भीरूणां संमता मार्गो निषदाशार्ह सेवित। तवार्जुनो गुरुस्तात धर्मात्मा शिनिपुंगव। वा
सुदेवो गुरुश्चापि तवैव पार्थस्य धीमतः। कारणद्वयमेतद्धि जानंस्त्वाहमब्रुवं। मावमंस्था वचो मह्यं गुरुस्तव गुरो ह्यहं।। २५३
वा1 वि1
तवेस्नीत। अनवस्थाननात्स्थैर्यं।। ।।

सम्मतमच्युतस्य। शिनिप्रवीरोयंभवित।।

वासुदेवमतं यच्च तन्मतं चैव वार्जुनस्य च।। सत्यमेतन्मयोक्तं तद्याहि यत्र धनंजयः। एतद्वचनमाज्ञाय मम सत्यपराक्रम।। प्रवि
श तद्बलं तात धार्तराष्ट्रस्य दुर्मतेः। प्रविश्य च यथान्यायं संगम्य च महारथैः।। यथार्हमात्मनः कर्म रणे सात्वत दर्शि
य शेषणार्थं शिनिजय दुय वधे मातकिश्च वाशा।। ।।संजय उवाच।। ।।प्रीतियुक्तं च हृद्यं च मधुराक्षरमेव च। का
लयुक्तं च चित्रं च वक्तया वाभिमावित। धर्मराजस्य तद्वाक्यं निशम्य शिनिपुंगवः। सात्यकिर्भरतश्रेष्ठ प्रत्युवाच युधि
रं। श्रुतं तगदितं वाक्यं सर्वमेतन्मयाच्युत। न्याययुक्तं च चित्रं च फाल्गुनार्थे यशस्करं। एवंविधे तथा काले मादृशं प्रे
क्ष्य संमतं। वक्तुमर्हसि राजेंद्र यथा पार्थं तथैव मां। न मे धनंजयस्यार्थे प्राणा रक्ष्याः कथंचन। त्वत्प्रयुक्तः पुनरहं किंन कुर्यां
महादवे। लोकत्रयं योधयेयं सदेवासुरमानुषं। त्वत्प्रयुक्तो नरेंद्रेह किमुतैतत्सुदुर्बलं। दुर्योधनबलं चैव द्यायोधयिष्ये स
मंततः। विजेष्ये च रणे राजन्सत्यमेतद्ब्रवीमि ते। शेकुंल्यहं कुशलिनं समासाद्य धनंजयं। हते जयद्रथे राजन्पुनरेष्या
मि ते तिकं। अवश्यं तु मया सर्वं विज्ञाप्यस्त्वं नराधिप। वासुदेवस्य यद्वाक्यं फाल्गुनस्य च धीमतः। हढं त्वभिपरीतो द्य
र्जुनेन पुनः पुनः। मध्ये सर्वस्य सैन्यस्य वासुदेवस्य चैव हि। अद्य माधव राजानमप्रमत्तोनुपालय। आर्यां युद्धे
मतिं कृत्वा यावद्धन्मि जयद्रथं। त्वयि नाहं महाबाहो सुविश्रब्धो महारथ। द्रुपदिर्गं हृप्यगतेये निरपेक्षो जयद्रथं।।

द्रोण०

एवमीहणोत्रपिकायोगलं। समाधाय निक्षिप्य। एवं गतग्रहणं प्रास। व्यक्तं कदाचित्। तस्य निष्फलस्य फलं साध्यं।

जाना।। पद्विरणे द्रोणं रत्नसंग्रामसंमतं।। प्रतिज्ञां चापि तां नित्यं श्रुत्वा द्रोणस्य माधव। ग्रहणे धर्मराजस्य नारद्वा
जोत्रुं शक्ष्यति। चाकृष्टापि रणे द्रोणो निरुद्धो वै युधिष्ठिरः। एवं त्वयि समाधेय धर्मराजेन राजनि। अहमद्य गमिष्या
मि सैंधवस्य वधं प्रति। जयद्रथे मृते सत्राक्षर्वं गमिष्यामि माधव। धर्मराजं न चेद्द्रोणो निगृह्णीयाद्रणे बलात्। निह
ते नरश्रेष्ठेनारक्षाजनमाधव। सैंधवस्य वधे तस्यान्ममापि निरुध्यान्नवर्त्स। एवं गते नरश्रेष्ठ पांडवे सत्यवादिनि
अस्माकं गमनं व्यक्तं वनं प्रति भवेत्पुनः। सोयं मम जयो व्यक्तं व्यर्थ एव भविष्यति। यदि द्रोणो रणे क्रुद्धो निगृह्णी
याद्युधिष्ठिरं। स त्वमद्य महाबाहो प्रियार्थं मम माधव। जयाय च यशोर्थं च रक्ष राजानमाहवे। सनवान्मयितिः रि
पोनिहितसमन्वसाचिना। त्वा रक्षाजनयं नित्यं परपमातननतश्चनो। तस्यान्पिवमहाबाहो फल्गुनस्यरूपमिसंयुगा। त्वा
त्वां ह्यप्रतियोद्धारं रणे किं न पोद्दालश्चनो। मां वापि मन्यते कृष्णेनारक्षाजस्य धीमतः। सहसेना वना मतामाचार्यवचनं च
नतं। कृष्णं ततो नार्स्त्वेकं कुंतीं वा लज्जुमहा पतन्त्राचार्यो युधिष्ठिरस्त्वद्विवायः कवचाहतः। उपलम्य रणोक्रोडे यथा शक्र
नि तानि शिशुः। यदि कार्ष्णिं इस्तु ह्या रणो। रिरस्यामकरवज। तस्मिन्नपि विसृजेयं वै मत्वा रवेऽद्यार्जुनः। कुरुष्वेमात्मनो गु १५४
सिक्कमागसा गते मयि। यः श्रुत्वा माद्रूणं द्रोण। यो

यावत्त्वामिपार्थ गमिष्यामि अर्जुनं विषये। देवममायुपतं। योगमनिज्ञानं। कच्चिक्किंशिदति क्षिप्यत्व त्रयः। दृष्ट्वा निश्चित्य॥

यावत्त्वामिपांडव। मावत्तनयमद्यास्तु राजन्नर्जुनमं नवं। नत्रा मैत्रेमहाबाहुर्मानीरस्तु द्युम्नसाद्रति। येच सोवा रक्षा योधसत्या
सिंधवपौरवाः। उदीच्या दाक्षिणात्यास्य यवान्येपि महारथाः। येच कश्चित्स्वसाराजन्महोदाराः पकीर्तिताः। एते र्जुनस्य क्रुद्धस्य ना ई कुरवः२
ति षोडशीं। उद्युक्ता पृथिवी सर्वा ससुरासुरमानुषा। सराक्षसगणा राजन्सकिंनरमहोरगाः। जंगमा स्थावरैः सार्धं नालं पार्थ
स्य संयुगे। एवं ज्ञात्वा महाराज व्येतु ते भीः धनंजये। यत्र वीरो महेष्वासो कृष्णो सत्यपराक्रमः। न तत्र कर्म्मणो व्यापत्कथंचिदपि व्याप्यं न कि।
विद्यते। देवं कृतास्त्रे तं योगमर्मथमपि वाहवे। कृतज्ञं तं स्व्यावि वन्नातुस्त्वमत्रचिंतय। मयि चाप्युपयाते विगमाः सर्जुनं प्रति चित्पारः
द्रोणो विचार्य्यस्त्वतां संख्ये राजंस्त्वमत्रचिंतया। आचार्यो हि त्वतोंगारा जन्मिग्रहे त्वरते दृढः। प्रतिज्ञामात्मनो रक्षन्सां कर्तुं च ना
रत। कुरुष्वाद्यात्मनो गुप्तिं कस्य गोप्ता गते मयि। यस्याहं प्रत्ययात्पार्थ गच्छेयं फाल्गुनं प्रति। नह्यहं त्वां महाबाहो निक्षिप्य कौरवे डमहारणे
कविद्यास्यामि कौन्तेय मत्स्यं मत्तवामि ते। एतद्विचार्य्य बहुशो बुध्या बुद्धिमतां वर। दृष्ट्वा श्रेयः परं बुध्या ततो राजन्प्रशाधि
मां॥ ॥युधिष्ठिर उवाच॥ एवमेतन्महाबाहो यथा वदसि माधव। न तु मे शुध्यते भावः श्वेताश्वं प्रति मारिष। कर
ष्ये परं यत्नमात्मनो रक्षणं प्रति। आज्ञा कर्तुं समवज्ञातो यत्र यातो धनंजयः। आत्मसंरक्षणं संख्ये गमनं वार्जुनं प्रति। चार्ये तक्त्व
।वि

आतिष्ठ च क्रमस्व। मातुलःस्तु रुजित्। मयि मामधिकृत्यं संभ्रमस्तु हेगं॥

द्रोण० यं तु ध्यागमनं तत्राराच ये। मत्वमातिष्ठ यानाय यत्र जा।ला धनंजय:। ममापि रक्षणां नाम:करिष्यति महाहस्त:। पार्थ न त्वांसो द स॰१
य्य:द्रार्थी वास्तु महाबला:। द्रौपदेयास्तु मां तात। रक्षिष्यंति न संशय:। कैकया भ्रातर:पंच राक्षस घटोत्कच:। विराटद्रु
पदश्चैव शिखंडी च महारथ:। धृष्टकेतुश्च बलवान् कुंतिभोजश्च मातुल:। नकुल:सहदेवश्च पांचाला:सृंजयास्तथा:। ए
ते समस्ता हि तात त्वां रक्षिष्यंति न संशय:। न द्रोण:सह सैन्येन कृतवर्मा च संयुगे। समासादयितुं शक्तो न च मां धर्षयिष्यति।
धृष्टद्युम्नस्तु समरे द्रोणं क्रुद्धं परंतपा। वारयिष्यति विक्रम्य वेलेव मकरालय। यत्र स्थास्यति संग्रामे पार्षत:परवीरहा। न द्रोण
सैन्यं बलवत् क्रामेत्तत्र कथंचन। एष द्रोणविनाशाय समुत्पन्नो हुताशनात्। कवची सशर:खड्गी धन्वी च। वरभूषण:। वि
श्वासं गच्छ शैनेय मा कार्षीर्मयि संभ्रमं। धृष्टद्युम्नो रणे क्रुद्धं द्रोणमावारयिष्यति॥ ॥द्रोणपर्वणि जयद्रथवधे सात्यकि
प्रवेशे॥ ॥संजय उवाच॥ ॥धर्मराजस्य तद्वाक्यं निशम्य शिनिपुंगव:। पार्थाद्धि नयमाशंसन्परित्यागान्महीपते:।
अपवादं ह्यात्मनश्च लोकाद्रक्ष्य विशेषत:। न मां भीत इति ब्रूयुरायांतं फाल्गुनं प्रति। निश्चित्य बहुधैवं स सात्यकि।
र्युद्धदुर्मद:। धर्मराजमिदं वाक्यमब्रवीत्पुरुषर्षभ:। कृतां चेन्मन्यसे रक्षां स्वस्ति तेऽस्तु विशांपते। अनुयास्यामि बीभत्सुं करिष्ये वच १५५
नं तव। न

आसैंधववधात्सैंधववधपागव। हत्वा द्विनामरांतमशीमाय जं तं। मादृशे सहस्रप्रतिमं। एते नागा:॥

न हि मे पांडवात्कश्चित् त्रिषु लोकेषु विद्यते। यो मे प्रियतरो राजन् सत्यमेतद्ब्रवीमि ते। तस्यादं पदवीं यास्ये संदेशात्तव मानद॥
त्वत्कृते न भवेत्किंचिदकर्तव्यं कथंचन। यथा हि मे गुरोर्वाक्यं विशिष्टं द्विपदां वर। तथा तवापि वचनं विशिष्टतरमेव मे। प्रिय
हि तव वर्तेते भ्रातरौ कृष्णपांडवौ। तयो:प्रिये स्थितं चैव विद्धि मां राजपुंगव। तवाज्ञां शिरसा गृह्य पांडवार्थमहं प्रभो। नि
भिद्य दुर्भिदं सैन्यं प्रयास्ये नरसत्तम। द्रोणानीकं विशाम्येष क्रुद्धो झष इवार्णवं। तत्र यास्यामि यत्रासौ राजा जयद्रथ:स्थित:
यत्र सेनां समाश्रित्य भीतस्तिष्ठति फाल्गुनात्। गुप्तो रथवरश्रेष्ठैर्द्रौणिकर्णकृपादिभि:। इतस्त्रियोजनं मन्ये तमध्वानं वि
शांपते। यत्र तिष्ठति पार्थोऽसौ जयद्रथवधोद्यत:। अनुयास्यामि बीभत्सुं करिष्ये वचनं तव। त्रियोजनगतस्यापि तस्याद्यास्याम्य
दृढं। आसैंधववधाद्राजन्सुदृढेनांतरात्मना। अनादिष्टस्तु गुरुणा को नु युध्येत मानव:। आदिष्टस्तु यथा राजन्को न युध्ये
१ हल त मादृश:। अभिजानामि तं देशं यत्र यास्याम्यहं प्रभो। शूलशक्तिगदाप्रासचर्मखड्गष्टितोमरं। इष्वस्त्रवरसंबाधं सो
न्यसिंधुं बलार्णवं। यदेतत्कुंजरानीकं साहस्रमनुपश्यसि। कुलमंजनकं नाम यत्रैते वीर्यशालिन:। आस्थिता बहुमि
र्म्लेच्छैर्युद्धशौंडै:प्रहारिभि:। नागा मेघनिभा राजन् क्षरंत इव तोयदा:। नैते जातु निवर्तेरन्प्रेषिता हस्तिसादिभि:। अन्यत्र
हि वधादेषां नास्ति राजन्पराजय:। अथ यान्रथिनो राजन्पश्यसि त्वं महारथा:। रथेष्वस्त्रेषु च निपुणा नागेषु च विशांप
सहस्रमनुपश्यसि। एते रुक्मरथानाम॥

संपाते विहरणे। नदादिविजये। अर्जुनस्य मेरुणोपवाह्यस्य। स्निग्धनीलाम्बुदस्येव बलिनो। विष्णुलेखकरिः। सुविनक्रमस्य

दोरा० ते। धनुर्वेदे गताः पारं सुशिक्षिता इ चक्रो विरोधः गदा शुकविशेषः स्तानिसु वकुशला स्म्या। स्वरूपपूरणाशुकाः। संपाते वा मि
चमेणो। श्रुत्वा कृतविद्यास्य मर्द्धतेचपरस्परे। नित्यंच समाः राजविक्षितिगीषं तिमास्तुषाः। कर्पेन विक्षिताराजकाः यामन
मनुबना। एतां सुवासुदेवो पि रथ्यो दारान्धशंस ति। मतंतं प्रियकामादि। कर्मस्थैतेवशे स्थिताः। तस्य वक्वनाशसमि द
श्रीं त्वा। श्वेतवाहनात्। तेनहसनानचक्रांता हटादरणकाश्रीकाः। मदर्थ्येपिधिष्ठिताः तेश्चत्र राजस्यवाशमनुनात्। एतान्पुमप्यसंयामे
प्रियार्थे नवकोरव। प्रयास्यामितनः पश्चात्य देवी सव्यसाचिनः। यांस्तु तानपश्यन्नागा स्मश्वविंशतीनि हावकनौ समसंह ७
तान् किरातिः समधिष्ठितान्। किरातराजोयान्सादाधिक्षितः सव्यसाचिना। श्रीलकतो स्मदाश्यातिहन्तोदितमात्मनः। श्री
मन्नेतस्य रागडं स्मवर्कमेकराह्टदावामेवाद्यस्तुसुश्रोत्पप्रपकाल स्यपर्ययं। तेषामेतेमहामात्राः किरातास्तु दुर्मदाः। दृ
श्रिशिक्षाविरस्थैवसर्वे चिवाग्नियोनयः। एते विनिर्जिताः मार्वे संग्रामसव्यसाचिना। मदर्थमद्यसंयत्राडमधिनवज्ञानु
गाः। एतानभिवाशानेराजकिरातानस्तुदुर्मदान्। मिथदस्यवधेसुकृमञयास्यामि पाण्डवो येवे तेशमहानागाश्रेअन
स्यश्रेतोद्ववामकर्कशास्थ विनीताश्च प्रभिन्नकरयानुखाः। जोत्न नदमि लिन्सर्दें दे मनिः सुविन्नपिताः लक्षलक्षारगोरा १५६
जचरावणसमायुधि॥ ॥

दा?

श्रीघ॰ किरणोजनवंशाजा॥ ॥

उत्तराल्पर्वताद्धिमाचलादागतिरथान्। तेन हयेधैनेन संनाविताः। तानुदिष्टान्। पंचगुणाः पंचगुणा सामग्रीकाः। नानाशास्त्र

उत्तरास्मर्वतादेनेती। देशाईस्तुनिराश्रितानां कर्कशैः प्रवरैर्योधैः। कास्मीयसमनुहृदि। संनियोगो नयस्त्राचमंतिवानर
योनयः। अनेकयेनयस्त्रांस्पेन घामाउषयोनयः। अनीकमप्यनामतहम वसामुदीर्घ्यानाम्। स्लेच्छानां पापकर्मणां। हिमवदुर्ग
वासिनां। एतद्वविधिनोलक्षामसमग्रं राजमंडलं। रूपंचासोमदत्तिचडोणांचरथिनांवरं। सिंधुराजंतथाकर्णमेवमन्यचथा
उवाज्ञा क्रतार्थमत्यवात्मानं मन्येनेकाजनोदितः। नेत्रुसर्वविद्यासंधाग्रामममनाराव गोवरानविमोहयंतिकौ। तथयद्यपिस्तुमी
नोजवाः। नन्सिंभाविनानित्यंपार्थ्वीर्य्योपजीविनः। विनाशमुपयास्यतिमचरोपनिपीडिताः। ये त्वेतेरथिनोराजन्दृश्यंते
कांचनध्वजाः। एतेदुर्वारणानामकांबोजायविनेसुताः। शूराश्च कृतविद्याश्च धनुर्वेदेच निष्ठिताः। संहताश्च भृशं ह्येते अन्यो
न्यस्य हितैषिणः। अक्षौहिण्यश्च संरब्धा धार्तराष्ट्रस्य भारत। यत्तामदर्थं तिष्ठंति कुरुवीराभिरक्षिताः। अप्रमत्ता महा
राजमामेव प्रत्युपस्थिताः। नांस्त्वहं प्रमथिष्यामितृणानीव हुताशनः। तस्मात्सर्वानुपासंगान्सर्वोपकरणानि च। रथे कुरु
यंतुमे राजन्यथावदथकल्पकाः। अस्मिन्सुखलु संग्रामेग्राह्यं विविधमायुधं। यथोपदिष्टमाचार्यैः कार्यः पंचगुणो रथः।
कांबोजैर्हि समेष्यामि क्रुद्धैराशीविषोपमैः। नानाशस्त्रसमावायैर्विविधैर्युद्धमिश्रितैः। किरातैश्च समेष्यामि वि
स्त्राणांसमवायःसहृद्दोयत्तु॥

घि

श्रीगोपालोजय
ति

पीतान्यायितये याः॥ महाध्वजेनातिविशेषणेहतीया॥ कनकैः कुंदघटितशालाकाभिः सुरूपिणि क्वानुदानाराः॥

द्रोण० सुकल्पैः स्वारिभिः लालितेः सततं राज्ञाडुर्योधनहितेषिभिः॥ शोकेश्वापि समासाद्या भिरःकुचत्यपराक्रमैः॥ अभिकल्पैर्ह्रा
क्षार्पिभ्रद्यासिह्निपावाके॥ तथान्यैर्विविधैर्योधैः कालकल्पैर्डरासदैः समासाद्यापिरणेराजन्नवकुन्तिहुइन्दुर्मदैः॥ तस्माद्दि
वाजिनो घस्त्या विश्रांताः स्नानलसरणाः॥ उपादन्नाश्चपीतास्थ पुनर्युज्यंतुमरथे। तस्य सर्वत्रियासंगास्नवैपिकरणानिचारथेव
स्वाषर्थशजाशास्त्राणिविविधानिच॥ ततस्तान्सर्वतोडुक्त्वा सदश्वांश्चत्वाराउनाः। रमवन्त्याय यामासयानंमुदसमारणे। यी
तोपदनान्स्नातांश्च जग्धवान्नमलंकृतान्॥ विनीतशल्यांस्तुरगांश्चत्वारोदममालिनः। तांस्तदाकुरूवर्णानाहविनीतान्
शीघ्रगामिनः॥ संहृष्टमनसो व्यग्रान्विधिवत्कल्पिते रथे। महाध्वजेन सिंहेन हेमकेसरमालिना। संहतकैतनेर्हेमिमर्लि मे
विड्डमचित्रितैः पांडुराभ्रप्रकाशाभिः पताकाभिरलंकृते रथे। महाध्वजेन सिंहेन हेमकेदंडोच्छ्रितंतत्र वज्रशास्त्रपरिच्छदे। यो
जयामास विधिवत्क्षेमनांडविभूषिताः। दारुकस्यानुजोभ्राता सूतस्तस्य प्रियः सखा। न्यवेदयद्रथं युक्तं वासवस्येवमातलिः॥ ततः स्नातः
शुचिर्भूत्वा कृतकौतुकमंगलः। स्नातकानां सहस्रस्य स्वर्णनिष्कानदापयत्॥ आशीर्वादैः परिष्वक्तः सात्यकिः श्रीमतां वरः॥ ततः
समधुपर्कार्हः पीत्वा कैरातकं मधु॥ लोहिताक्षो बभौ तत्र मदविह्वललोचनः॥ आलभ्य वीरकांस्यं च हर्षेण महतान्वितः॥ द्वि १५७
गुणीकृततेजा हि प्रज्वलन्निव पावकः॥ उत्संगे धनुरादाय सशरं रथिनां वरः॥

आयत्यास्तत्रकाले। तदावेननंदनंदणे॥

कृतस्वस्त्ययनो विप्रैः कवचीसमलंकृतः॥ लाजैर्गंधैस्तथा माल्यैः कन्याभिरभिनंदितः॥ युधिष्ठिरस्य चरणावभिवाद्य कृतां
घ्रा जलिः॥ तेन मूर्ध्न्युपाघ्रात आरुरोह महारथं। ततस्ते वाजिनो हृष्टाः पुष्टा वातरंहसः॥ अजेया जविनोवहन्विकुर्वाणाः स्म सैंध
वाः। तथैव भीमसेनोऽपि धर्मराजेन पूजितः॥ प्रायात्सात्यकिना सार्धमभिवाद्य युधिष्ठिरं॥ तौ दृष्ट्वा प्रविविक्षंतौ तवसैन्यमरिंदमौ
। संयत्तास्तावकाः सर्वेतस्थुर्द्रोणमुखारणे॥ मन्त्रं दृष्ट्वा गच्छंतं हृष्टा भीमं स सात्यकिः॥ अभिनंद्याब्रवीद्वीरस्तदा हर्षकरं वचः॥ अप्राप्ति
र्घयतीतां गः सात्यकिर्भीममब्रवीत्। त्वं भीमरक्षराजानमेतत्कार्यतमं हि ते। अहं निवार्यवक्ष्यामि कालपक्वमिदं बलं। आयत्यां च
तदात्वे च श्रेयोराज्ञोभिरक्षणं। जानीषे मम वीर्यं त्वं तव चाहमरिंदम। तस्माद्भीम निवर्तस्व मम चेदिच्छसि प्रियं। तथोक्तः सात्य
किना दक्षजत्वेकार्यसिद्धये। अहं राज्ञः करिष्यामि रक्षणं पुरुषर्षभ। एवमुक्तः प्रत्युवाच भीमसेनः समाधवं। गच्छ गच्छ तु तं पा
र्थ क्षिप्रं वाद्य विजयो मम। यत्र स्निग्धेनु रक्तश्च त्वमद्यवशगः स्थितः। निमित्तानि च धन्यानि यथा भीम वदंति मां। निहते सैंध
+पो+ वे पापे पांडवेन महात्मना। परिष्वज्य धर्मराजानं धर्मात्मानं न संशयः। एतावदुक्त्वा भीमं तु विसृज्य च महामनाः॥ संप्रेक्ष्य तावकं सै
न्यं व्याघ्रो मृगगणानिव। तं दृष्ट्वा प्रविविक्षंतं सैन्यं तव जनाधिप। भूय एवाभवन्मूढं सुभृशं चाप्यकंपत॥ ततः प्रयातस्स

द्रो० सहसा सैन्यं तव समास्त सात्यकिः ॥ दिदृक्षुरर्जुनं राजन् धर्मराजस्य शासनात् ॥ ॥ द्रोणपर्वणि सात्यकिप्रवेशे ॥ ॥ संज
य उवाच ॥ ॥ प्रयाते तव सैन्ये तु युयुधाने युयुत्सया ॥ धर्मराजो महाराज स्वेनानीकेन संवृतः ॥ प्रायाद् द्रोणरथं प्रेप्सुर्यु
युधानस्य पृष्ठतः ॥ ततः पंचालराजस्य पुत्रः संग्रामदुर्मदः ॥ प्राक्रोशत् पाण्डवानीके वसुदानश्च पार्थिवः ॥ आगच्छत प्र
हरत द्रुतं विपरिधावत ॥ यथा सुखेन गच्छेत सात्यकिर्युद्धदुर्मदः ॥ महारथा हि बहवो यतिष्यंत्यस्य निर्जये ॥ इति ब्रुवंतो वे
गेन समापेतुर्बलं तव ॥ वयं प्रतिजिगीषंतस्तत्रैतान् समतिद्रुताः ॥ ततः शब्दो महानासीद् युयुधानरथं प्रति ॥ प्रकंप्यमाना महती
तव पुत्रस्य वाहिनी ॥ सात्वतेन महाबाहो शतधा व्यदीर्यत ॥ तस्यां विदीर्यमाणायां शिनेः पौत्रो महाबलः ॥ सप्त वीरान् महे
ष्वासानग्रानीकप्रमुखेऽहनत् ॥ तथान्यानपि राजेंद्र नानाजनपदेश्वरान् ॥ शरैरनलसंकाशैर्निन्ये वीरान् यमक्षयं ॥ शत
मेकेन विव्याध शतेनैकं च पत्रिणां ॥ द्विपारोहान् द्विपांश्चैव हयारोहान् हयांस्तथा ॥ रथिनः साश्वसूतांश्च जघानेशः प्रभु
र्विभुः ॥ तथाद्भुतकर्माणं शरसंपातदक्षिणं ॥ न केचनाभ्यधावंत सात्यकिं तव सैनिकाः ॥ ते भीता मृद्यमानाश्च प्रमृष्टा दीर्घ
बाहुना ॥ आयोधनं जहुर्वीरा दृष्ट्वा तमतिपौरुषं ॥ तमेकं बहुधा पश्यन् मोहितास्तस्य तेजसा ॥ संग्रामे कोविदं वीरं विचरंतमनीकशः ॥ १५८

रथैर्विमथितैस्तैश्च भग्ननीडैश्च मारिष ॥ चक्रैर्विमथितैश्छत्रैर्ध्वजैश्च विनिपातितैः ॥ अनुकर्षैः पताकाभिः शिर
स्त्राणैः सकांचनैः ॥ बाहुभिश्चंदनादिग्धैः सांगदैश्च विशांपते ॥ हस्तिहस्तोपमैश्चापि भुजगाभोगसंनिभैः ॥ ऊरुभिः पृथिवी
छन्ना मनुजानां नराधिप ॥ शशांकसन्निकाशैश्च वदनैश्चारुकुंडलैः ॥ पतितैर्ऋषभाक्षाणां बभौ भारत मेदिनी ॥ गजैश्च बहुधा छि
न्नैः शयानैः पर्वतोपमैः ॥ रराजातिभृशं भूमिर्विकीर्णैरिव पर्वतैः ॥ तपनीयमयैर्योक्त्रैर्मुक्ताजालविभूषितैः ॥ उरश्छदै
र्विचित्रैश्च व्यशोभंत तुरंगमाः ॥ गतसत्त्वा महीं प्राप्य प्रमृष्टा दीर्घबाहुना ॥ नानाविधानि सैन्यानि तव हत्वा तु सात्वतः ॥ प्रवि
ष्टस्तावकं सैन्यं द्रावयित्वा चमूं ततः ॥ तमेवानुययौ मार्गं येन यातो धनंजयः ॥ इयेष सात्यकिर्गंतुं ततो द्रोणेन वारितः ॥ भारद्वाजं
समासाद्य युयुधानस्तु मारिष ॥ नात्यवर्तत संक्रुद्धो वेलामिव जलाशयः ॥ निवार्य तु रणे द्रोणो युयुधानं महारथं ॥ विव्याध निशि
तैर्बाणैः पंचभिर्मर्मभेदिभिः ॥ सात्यकिस्तु रणे द्रोणं राजन् विव्याध सप्तभिः ॥ हेमपुंखैः शिलाधौतैः कंकबर्हिणवाजितैः ॥ तं
षड्भिः सायकैर्द्रोणः साश्वयंतारमार्दयत् ॥ स तं न ममृषे द्रोणं युयुधानो महारथः ॥ सिंहनादं ततः कृत्वा द्रोणं विव्याध सात्यकिः ॥ द
शभिः सायकैश्चान्यैः षड्भिरष्टाभिरेव च ॥ युयुधानः पुनर्द्रोणं विव्याध दशभिः शरैः ॥ एकेन सारथिं चास्य चतुर्भिश्चतुरो हयान् ॥
ध्वजं चैकेन बाणेन विव्याध युधि मारिष ॥ तं द्रोणः साश्वयंतारं सरथध्वजमाशुगैः ॥ त्वरन् प्राच्छादयद् बाणैः शलभानामिव

चाहित्वमपि। भिन्नानिष्टयम्रूतानि॥

द्रोण० द्रजिः॥ तथैव युयुधानोपि द्रोणं कृत्वा निराशुगैः॥ प्राचारयत्संख्ये तं तद्रोण उवाच तं। न वाचार्य्यो रणं हित्वा गतः क्वा उरु
गोयथा। युयुधानं नदित्यात्रुवाच प्रदक्षिणमवर्त्तताचक्षिप्रयुधते तात्त्वाजीवत्तो प्यमिमेमाधवा। यद्विमां रणं हित्वा नयास्याचा
र्यवहुतं॥ ॥सात्यकिरुवाच॥ ॥धनंजयस्य पदवीं धर्मराजस्य शासनात्। गच्छामि स्वस्ति ते ब्रह्मन्न मे कालात्ययो भवेत्
॥ ॥संजय उवाच॥ ॥एतावदुक्त्वा शैनेयो ह्याचार्य्यं परिवर्ज्जयन्। प्रयातः सहसा राजन्सारथिं चेदमब्रवीत्। द्रोणः करि
ष्यते यत्नं सर्वथा मम वारणे। यत्तो याहि रणे सूत शृणु चेदं वचो मम। एतदालोक्यते सैन्यमावंत्यानां महाप्रभं। अस्यानंतरत
स्त्वेतद्दाक्षिणात्यं महद्बलं। तदनंतरमेतच्च वाह्लिकानां बलं महत्। वाह्लिकाभ्यासतो युक्तं कर्णस्यापि महद्बलं। अन्योन्यस्य च से
न्यानि भिन्नान्येतानि सारथे। अन्योन्यं समुपाश्रित्य न त्यक्ष्यंति रणाजिरं। एतदंतरमासाद्य चोदयाश्वान्प्रहृष्टवत्। मध्यमं जवमास्था
य वह मामत्र सारथे। वाह्लिका यत्र सेवंते नानाप्रहरणोद्यताः। दाक्षिणात्याश्च बहवः सूतपुत्रपुरोगमाः। हस्त्यश्वरथसं
बाधं यच्चानीकं विलोक्यते। नानादेशसमुत्थैश्च पदातिभिरधिष्ठितं॥ एतावदुक्त्वा यंतारं ब्राह्मणं परिवर्जयन्। प व्यतीतायाद
संचारः कर्णस्य सुमहद्बलं। तं द्रोणोनुययौ क्रुद्धो विकिरन्विशिखान्बहून्। युयुधानं महाबाहुं गच्छंतमनिवर्त्तिनं। क
र्णस्य सैन्यं सुमहदभिहत्य शितैः शरैः। प्राविशद्भारतीं सेनामपर्य्यंतां स सात्यकिः॥ प्रविष्टे युयुधाने तु सैनिकेषु द्रुत १५८

संभ्रमय यथास्थानमानीय॥

युद्धायामर्षी कृतवर्मा शिनिसात्यकिं पर्यवारयत्। तमापतंतं विशिखैः षड्भिराहत्य सात्यकिः। चतुर्भिश्चतुरोस्याश्वानाजघाना
शु वीर्य्यवान्। ततः पुनः षोडशभिर्नतपर्वभिराशुगैः॥ सात्यकिः कृतवर्माणं प्रत्यविध्यत्स्तनांतरे। संबध्यमानो विशिखैर्ब
हुभिस्तिग्मतेजनैः। सात्वतेन महाराज कृतवर्मा न्यचक्षमत्। स वत्सदंतं संधाय जिह्मगानिलसंनिभं। आकृष्य राजन्नाक
र्णाविव्याधोरसि सात्यकिं। स तस्य देहावरणं भित्त्वा देहं च सायकः। सपत्रपुंखः पृथिवीं विवेश रुधिराक्तिनः॥ अथास्य ब
हुभिर्बाणैरुचितं तस्य रम्यास्त्रवित्। समार्गणगुणं राजन्कृतवर्मा शरासनं। विव्याध च रणे राजन्सात्यकिं सत्यविक्रमः। दशा
भिर्विशिखैस्तीक्ष्णैरोरसि क्रुद्धः स्तनांतरे। ततः प्रशीर्णे धनुषि शक्त्या शक्तिमतां वरः। अदयद्दक्षिणं बाहुं सात्यकिः कि
तवर्मणः॥ ततोन्यद्धनुरादाय सात्यकिः॥ व्यसृजद्विशिखांस्तूर्णं शतशोथ सहस्रशः॥ ते शराः सात्वतेनास्ताः
कृतवर्माणमाहवे। शरव्याचक्रिरे हृष्टो राजन्ताडवघोषिणः। भोदपि वारणो राजन्नृह्नाद्दिकं मासात्। किंशारेः॥ अथास्य
भेद्येन शिरः सा रथेः समकृतनत। स पपात हतः सूतो हार्दिक्यस्य महारथात्। ततस्ते यंतरि हते प्राद्रवंस्तु रयात्हरा
॥ अथ नोऽजस्त्र संभ्रांता निहत्य तुरगान्स्वयं। तस्थौ राजरथस्तुष्णां सात्तिसेन्यान्यपहतयन्। प्रयुद्धेनमिवाश्च्य स्यमद
श्वासमचोदयत्। व्यपेतभीरमित्राणां मावह्न्युमहद्भयं। सात्यकिश्चाभ्ययात्तस्मात्सतुनीमहापाडवत्। युयुधानोपि

संधाय यथास्थानमानाय्यार्य वैरकुलीनवृत्ताःकुलीनवीरा इति यावत्॥ ॥बकयुगं वक्त्वोयुग्माः संधाय दयेवा यथा।व
पबलाबलंच।अनिकाममन्तरकं।श्लो०२३६।अत्यद्भुताकारमद्भुपम संस्थानं।उरस्थाप्यागवहटः परिशीनं।लों विक्रमाय

राजेंद्रसो जानीकाङ्क्षिनिःस्तनः॥प्रयियोवृरिता यत्रकौंबोजानां महाचमूः।स्तनवकुनिःश्वारेःस त्रिस्त्दौमहारथैः।नचचा
लततदाराजन्सात्यकिःसत्यविक्रमः।संधायवचट्टं द्रोणो भोजराजेनिवकरपव।अवधपषद्रणोयातायुयुधानेयुयुत्सया।न्त्या
नमनुधवंनयुयुधनस्पष्टश्लःन्यिवारयतसंक्रुद्धः पांडुसैन्येष्ठस्वमाः।ममापायृतदाह्रिकेरपानांप्रवरंरथं।पांचाला
विगतानामाद्यानीमासनतुरागमाः॥विकम्प्यवारितारा जची रणाक्रूतवम्मणा।यतमानांश्च तांस्सर्वान्वीक्षिगतचेतसः।छ
नितमाश्वगौधेणाक्रांतवाहाश्च वारयन्तु निर्दयानास्तना।माजेनमोजाम्नीकेशवो रणे।अनिर्जिताय्यर्थवीराःपार्थचांनामृद्य
राम। ॥द्रोणपर्वणिसात्यकिप्रवेश॥ ॥धृतराष्ट्रउवाच॥ एवंबकयुगं सैन्यामदेवविदितं बलं।व्यूढामकेयथान्यायमेवं
बक्रवमंजय।नित्यंहृजितमस्माभिरनिकामंचनःसदा।श्रोढमत्यद्भुताकारंपुरस्ताद्दृष्टविक्रमा।नानिहृद्गमवालंचनंकुरो
नानिपीवरं।लघुहन्ना यतवायंसारगात्रमनामयं।आनमनाद्दसंपन्नबकवास्त्वपरिच्छदं।शस्त्रयुद्धगणविद्याश्रुबकाश्चपरिनि
ष्ठितं।आरोहपर्यवस्कंदसरणसांतरप्लुतं।सम्यक्प्रहरणे
स्यालघुना मानाहस्या।चत्रस्यायतमायानःपायःपत्युरच्चत्रामा १६७
रणाचानिविडावपदे।मारमममसार स्वान्यमितिवा।पर्यवस्कंदेस्मवारदरणा।सरणेप्रसरणा।सांतरप्लुतिप्लवनांतरिनायोगता॥ ॥

यातप्रयाणा।अपयाने:प्रसरणा।म्रत्रेननदिनमासवर्षदेयेन।धानन।गोष्ठांसेना।यस्मात्रणात्वकारणाद्राक्रातेन।उपपादि
तमुष्ठानस्मात्पितमित्यन्नुषंगः।अनाहूतंयदृष्टोपगता।वाहनानां वामितरंग परपरि व्हितयत्र।।स्वपरपो।यंत्राणि।रत्निरूपले
यानच्यपयानेवकोविदं।नागाश्वपुरुदिशोषश्चेश्रुचपरीक्षितं।परीक्ष्यचयथान्यायंवेतनेनोपपादितं।नगोष्ठानोपकारेण
नसंबंधनिमित्ततः।नानाहूतंनाप्यभृतंमसैन्यंबभूववेद।कुलीनार्थ्येत्तानापतंतुष्टपुष्टमनुद्वतं।कृतमानोपकारंचयशस्वि
चासविविष्या परेषुरेण्यवेकुमिश्रास्वकर्मभिः।लोकपालोपमैस्तातपालितंनरसत्तमैः।बकुभिः पार्थिवैर्गुप्तमस्मत्प्रि
यचिकीर्षुभिः।अस्मानभिसृतैःकामात्सबलैःसपदानुगैः॥महोदधिमिवापूर्णमापगाभिःसमंततः।अपक्षैःपक्षिसंकाशैरथै
रश्वैश्चसंवृतं।प्रभिन्नकरटैश्चैव द्विरदैर्महनंमहत्।यदहन्यत नौसैन्यंकिमन्यद्भागधेयतः।योधानक्षय्यजलंभीमंवाहनो मित
रंगिणं।क्षेपणासिगदाशक्तिशरप्रासझषाकुलं।ध्वजभूषणसंबाधंरत्नोपलसुसंचितं।वाहनैरभिधावद्भिर्वायुवेगविकंपितं।द्रो
णपातालगंभीरं कृतवर्ममहाह्रदं।जलसंधमहाग्राहं कर्णचन्द्रोदयोद्धतं।गतेसैन्यार्णवंभित्वातरसापांडवर्षभे।संजयैकर
थेनैव युयुधानेचमामकं।तत्रशेषंनपश्यामिप्रविष्टे सव्यसाचिनि।सात्वतेचरथोदारेममसैन्यस्यसंजय।तौतत्र सम
तिक्रांतौ दृष्ट्वानीकोनरस्विनौ।सिंधुराजंचसंप्रेक्ष्यगांडीवस्येषुगोचरं॥किं वाकुरवःकृत्यंविदधुःकालचोदिताः॥

अस्तु संविनेतु हुमंत्रादिनं।वाहनान्येववाप्युविगतयाकुपितानि।मनसैन्यस्याशेषमित्यन्वयः॥

दारुणौ वायवेनाघणे। नन्यगतिकेच। अकालेऽतीतसमाये। लभ्यते सिन्येनाद्यात्। इति धारणं॥

द्रोण०

दारुणे कायनकाले विकथं वा प्रतिपेदिरे। यस्मा द्विक्लेरवान्यंद्रवनालनसंयुगा। विक्रमापिरणो तयोनत प्याहृत्रपते
इह विअस्तौ संयुगमतन्नप्रविष्टो कृष्णपांडवौ। न च वारयिता कश्चित्तयोरस्तीह संजय। न्तनाश्च बहवो योधाः पराजित्य च महार
थाः। द्रोणनिनयथा याग प्रियवाक्नवाधारा। अकारणान्नृतस्त्वानमम सैन्ये न विद्यते। कर्म्मणा ह्यनुरूपेण लभ्यते तनक फलं तने
। न च योधेनाविक्रश्चिन्नम सैन्ये सुसंजय। अल्पदानन्नृतस्तात न त्वसत्कृतको नरः। सजिना हि यथाशक्त्या दानमानासने
र्म्मया। तथा तु त्रिश्रुमेतात ज्ञातिनिश्च सबांधवैः। न च प्राप्येव संग्राममनिर्जितः सव्यसाचिना। द्रोणायेन पराभृष्टाः किमन्य
द्भागधेयातः। रक्षतायेश्च संग्राममपि च संजमर क्षिणः। एकः साधकणः प्रयातरूपमसदर्च्छिति। अर्जुनं समरे दृष्ट्वा सैंधव
स्यायतः स्थितं। पुत्रो मम मनूज्ञांष्ट्र दः किं कार्यं प्रत्यपद्यत। सात्यकिं चरणे दृष्ट्वा प्रविशंतं मन्यनीतवता। किं तु दुर्य्योधनः कृत्यं प्राप्तकाल
ममन्यत। सर्वशास्त्रातिगोसेनां प्रविष्टौ रथसत्तमौ। दृष्ट्वा कां वै धृतिं युद्धे प्रतिपद्यंत मामकाः। किं दृष्ट्वा कृष्णं तु दाशार्हमर्जुनार्थे
व्यवस्थितं। शिनीनामृषभं चैव मन्ये शोचंति पुत्रकाः। दृष्ट्वा सेनां व्यतिक्रांतां सात्वतेनार्जुनेन च। पलायमानांश्च कुरून्मन्य
शोचंति पुत्रकाः। विद्रुतान्रथिनो दृष्ट्वा निरुत्साहान्द्विषत्क्षये। पलायनकृतोत्साहान्मन्ये शोचंति पुत्रकाः। शून्यान्कृतान्रथोपस्थान्सात्वतेना २६२

ना

व्यमादस्थानकाया मार। अव्यया रत्नलायनेकमन समइतिवा॥

र्जुनेन च हतांश्च योधान्संदृश्य मन्ये शोचंति पुत्रकाः। व्यश्वनागरथान्दृष्ट्वा तत्र वीरान्सहस्रशः। धावमानान्रणे व्यग्रान्मन्ये शोचं
ति पुत्रकाः। विदीर्णांश्च रथेनाश्वान्विरथांश्च कृतान्नरान्। तत्र सात्यकिपार्थाभ्यां मन्ये शोचंति पुत्रकाः। महानागान्विद्रुतान्दृष्ट्वार्जु
नशराहतान्। पतितान्पततश्चान्यान्मन्ये शोचंति पुत्रकाः। हयौघांश्च निहतान्दृष्ट्वा द्रवमाणांस्ततस्ततः। रणे सात्वतपार्थाभ्याम
न्ये शोचंति पुत्रकाः। पत्तिसंघान्रणे दृष्ट्वा धावमानान्समंततः। निराशा विजये सर्वे मन्ये शोचंति पुत्रकाः। द्रोणस्य समतिक्रां
तावनीकमपराजितौ। क्षणेन दृष्ट्वा तौ वीरौ मन्ये शोचंति पुत्रकाः। संमूढोऽस्मि भृशं तात श्रुत्वा कृष्णधनंजयौ। प्रविष्टौ मामकं
सैन्यं सात्वतेन सहाच्युतौ। तस्मिन्प्रविष्टे पृतनां शिनीनां प्रवरे रथे। भोजानीकं व्यतिक्रांते कथमासन्हि कौरवाः। तथा द्रो
णेन समरे निगृहीतेषु पांडुषु। कथं युद्धमभूत्तत्र तन्ममाचक्ष्व संजय। द्रोणो हि बलवाञ्छूरः कृतास्त्रो दृढविक्रमः। पांचाला
स्तं महेष्वासं प्रत्ययुध्यन्कथं रणे। बद्धवैरास्ततो द्रोणे धर्मराजजयैषिणः। भारद्वाजस्तथा तेषु बद्धवैरो महाबल
ः। अर्जुनश्चापि यच्चक्रे सिंधुराजवधं प्रति। तन्मे सर्वं समाचक्ष्व कुशलो ह्यसि संजय॥ ॥जयद्रथवधे सात्यकिप्रवेशा
॥ ॥संजय उवाच॥ ॥आत्मापराधसंभूतं व्यसनं भरतर्षभ। प्राप्य प्राकृतवद्वीर न त्वं शोचितुमर्हसि। पुरा यदुच्यसे प्रा
ज्ञैः सुहृद्भिर्विदुरादिभिः। मा हार्षीः पांडवान्राजन्निति तन्न त्वया श्रुतं। सुहृदां हितकामानां वाक्यं यो न शृणोति हि। स महद्व्यसनं

न१

निर्गुणां तु रणे विषमं। हिडिंबा नावमनिश्चयं। निर्ययं नियतं स्वभावं॥

पाण्डवैश्चैव तेविग्रहमानवाः॥ पार्थिवे तौ सितराराजन्द्रोणार्दीनामपहान्। नवनं तत्पथवा कामं वक्त्रं कर्णो महायशाः॥ तव निर्गुणतां
ज्ञात्वा पक्षपातं सुते तथा। द्वैधीभावं तथा धर्मे पांडवेषु च मत्सरं। तव जिह्ममभिप्रायं विदित्वा पांडवान्प्रति। वासुदेवस्तु नाथ
हमिदं घोरमयोजयत्। न चैव विनयाज्ञान्वा समस्तजनस्य॥ नैनं दुर्योधने दोषं कर्तुमर्हसि मानद। न हि ते सुकृतं किंचिद
दौ मध्ये च भारत। त्वया ह्यनेहसा दृष्टं तच्छ्वेव न्मूलो द्विपराजय॥ आर्त्तप्रलापानिहनाक्रूरुमाष्ट्रेषु। नितहस्पात्साधु गता। सारिव
मंडनं। तस्मादपि स्थिरो भूत्वा ज्ञात्वा शोकस्य निर्णयं॥ शृणु युद्धं यथा वृत्तं घोरं देवासुरोपमं। प्रविष्टे तव सैन्यं तु शैनेये सत्य
विक्रमे। भीमसेनमुखाः पार्थाः प्रतीयुर्वाहिनीं तव॥ आगच्छतस्तान्सहसा क्रुद्धरूपान्महात्मनः। दधारैको रणे
पाण्डून्कृतवर्मा महारथः॥ यथोद्वृत्तं वारयति वेला वै सलिलाशयं। पांडुसैन्यं तथा संख्ये हार्दिक्यः समवारयत्। तत्रा
द्भुतमपश्याम हार्दिक्यस्य पराक्रमं। यदेनं सहसा पार्था नातिचक्रमुराहवे। ततो भीमस्त्रिभिर्विद्ध्वा कृतवर्माणमा
शुगैः॥ शंखं दध्मौ महाबाहुर्हर्षयन्सर्वपांडवान्। सहदेवस्तु विंशत्या धर्मराजश्च पंचभिः॥ शतेन नकुलश्चापि
हार्दिक्यं समविध्यत। द्रौपदेयास्त्रिसप्तत्या सप्तभिश्च घटोत्कचः॥ धृष्टद्युम्नस्त्रिभिश्चापि कृतवर्माणमार्दयत्॥ २६२

सर्वतः सर्वाङ्गि हिधमस्थानहाय॥ भीमसेनो पहार्दिक्ये शक्तिं चिक्षेप दारुणां ६

विराटो द्रुपदश्चापि याज्ञसेनिश्च पंचभिः। शिखंडी चापि हार्दिक्यं विद्ध्वा पंचभिराशुगैः॥ पुनर्विव्याध विंशत्या सायकानां
हसन्निव। कृतवर्मा ततो राजंस्तान्सर्वांस्तान्महारथान्। एकैकं पंचभिर्विद्ध्वा भीमं विव्याध सप्तभिः॥ धनुर्ध्वजं च संयत्तो रं
थाद्भूमावपातयत्। अथैनं छिन्नधन्वानं त्वरमाणो महारथः॥ आजघानोरसि क्रुद्धः सप्तत्या निशितैः शरैः। स गाढ
विद्धो बलवान्हार्दिक्यस्य शरोत्तमैः॥ चचाल रथमध्यस्थः क्षितिकंपे यथाचलः॥ भीमसेनं तथा दृष्ट्वा धर्मराजपुरोगमाः॥ विसृजंतः शरान्घोरान्कृतवर्माणमार्दयन्। तं तथा कोष्टकीकृत्य रथवंशेन मारिष॥ विव्य
धुः सायकैर्हृष्टा रक्षार्थं मारुतेर्मृधे। प्रतिलभ्य ततः संज्ञां भीमसेनो महाबलः॥ शक्तिं जग्राह समरे हेमदंडामयस्मयीं।
चिक्षेप च रथात्तूर्णं कृतवर्मरथं प्रति॥ सा भीमभुजनिर्मुक्ता निर्मुक्तोरगसंनिभा। कृतवर्माणमभितः प्रजज्वाल
सुदारुणा। तामापतंतीं सहसा युगांताग्निसमप्रभां। द्वाभ्यां शराभ्यां हार्दिक्यो निचकर्त द्विधा तदा। सा छिन्ना पतिता भू
मौ शक्तिः कनकभूषणा। द्योतयंती दिशो राजन्महोल्केव नभश्च्युता। शक्तिं विनिहतां दृष्ट्वा भीमश्चुक्रोध वै भृशं। ततो
न्यद्धनुरादाय वेगवत्सुमहास्वनं। भीमसेनो रणे क्रुद्धो हार्दिक्यं समवाकिरत्। अथैनं पंचभिर्बाणैराजघान स्तनांतरे॥
भीमो भीमबलो राजंस्तव दुर्मंत्रितेन ह। भोजस्तु क्षतसर्वांगो भीमसेनेन मारिष। रक्ताशोक इवोत्फुल्लो व्यराजत रणे॥

कर्म्मेनरैवः कर्म्मनखाकृतिफलाके॥

द्रोण० निरा। ततः क्रुद्धस्त्रिभिर्बाणैर्भीमसेनं स्मयन्निव। अभिद्रुत्य दृढं युद्धे सर्वांस्तानभ्यविध्यत। त्रिभिस्त्रिभिर्महेष्वासान्यतमाना
न्महारथान्। तपितंघत्स्वविध्यंतमसमनि। समसनि। शरैः। शिखंडिनस्ततः क्रुद्धः क्षुरेण महारथः। धनुश्छिच्छेद समरे प्रहस
७ शि न्निव सात्वतः। शिखंडी तु ततः क्रुद्धश्छिन्ने धनुषि सत्वरं। असिं जग्राह समरे शतचंद्रं च भास्वरं। भ्रामयित्वा महच्चर्म चामीक
रविभूषितं। तमसिं प्रेषयामास कृतवर्मरथं प्रति। स तस्य सशरं चापं छित्वा संख्ये महानसिः। अभ्यगाद्धरणीं राजंश्च्युतं ज्यो
तिरिवांबरात्। एतस्मिन्नेव काले तु त्वरमाणौ महारथौ। विव्यधुः सात्यकेर्गाढं कृतवर्माणमाहवे। अथान्यद्धनुरादाय स्या
त्कातद्दनुशिखा। विशीर्णमिरतश्रेष्ठ हार्दिक्यः परवीरहा। विव्याध पांडवान्युद्धे त्रिभिस्त्रिभिरजिह्मगैः। शिखंडिनं च
विव्याध त्रिभिर्नवभिरेव च। धनुरन्यत्समा विला [illegible] परवीरहा। ववद्रा यक्कमनिखरासुगैर्हार्दिकात्मजं। ततः
क्रुद्धो रणे राजन्हार्दिकस्यात्मसंभवः। अभि [illegible] नथा। ज्ञामिनि महारथं। ततो भ्यस्य समरे राजन्दृत्योर्हिंसं महात्म
नः। विदूरी मतयल्लेमरः शार्दूलविव कुंजरौ। तौ दिशागजसंकाशौ ज्वलिताविव पावकौ। समापेततुरन्योन्यं शरसंघैर १६३
रिंदमौ। विधुन्वानौ धनुःश्रेष्ठे संदधानौ च सायकान्। विसृजंतौ च शतशो गभस्तीनिव भास्करौ। तापयंतौ शरैस्तीक्ष्णैरन्योन्यं तौ महारथौ।

हार्दिक्येनतावकिसुशव्यमाणइत्यचयः॥

युगांतप्रतिमौ वीरौ रेजतुर्भास्कराविव। कृतवर्मा तु समरे याज्ञसेनिं महारथं। विद्ध्वा त्रिसप्तत्या पुनर्विव्याध सप्त
भिः सम्यग्विद्धो व्यथितो रथोपस्थ उपाविशत्। विसृजन्सशरं चापं मूर्छयाभिपरिप्लुतः। तं विषण्णं रणे दृष्ट्वा तावकाः सु
खसर्षभ। हार्दिक्यं पूजयामासुर्वासांस्याडुधुवुश्च ये हा। शिखंडिनं ततो ज्ञात्वा हार्दिक्यशरपीडितं। अपोवाह रणाद्यंता त्व
रमाणो महारथं। सादितं तु रथोपस्थे दृष्ट्वा पार्थाः शिखंडिनं। परिवव्रू रथैस्तूर्णं कृतवर्माणमाहवे। तत्राद्भुतं परं चक्रे
कृतवर्मा महारथः। यदेकः समरे पार्थान्वारयामास सानुगान्। पार्थाञ्जित्वाजयच्चेदीन्पांचालान्सृंजयानपि। कैकेयांश्च महा
वीर्यान्कृतवर्मा महारथः। ते वध्यमानाः समरे हार्दिक्येन स्म पांडवाः। इतश्चेतश्च धावंतो नैव चक्रुर्धृतिं रणे। जित्वा पांडुसुतान्यु
द्धे भीमसेनपुरोगमान्। हार्दिक्यः समरे तिष्ठन्विधूम इव पावकः। ते द्राव्यमाणाः समरे हार्दिक्येन महारथाः। विमुखाः समपद्यंत शर
वृष्टिभिरर्दिताः॥ ॥ द्रोणपर्वणि जयद्रथवधे सात्यकिप्रवेशे॥ ॥ संजय उवाच॥ ॥ शृणुष्वैकमना राजन्यन्मां त्वं परि
पृच्छसि। द्राव्यमाणे बले तस्मिन्हार्दिक्येन महात्मना। लज्जयावनते चापि प्रहृष्टैश्चापि तावकैः। द्वीपो य आसीत्पांडूनामगा
धे गाधमिच्छतां। श्रुत्वा तु निनदं भीमं तावकानां महाहवे। शैनेयस्त्वरितो राजन्कृतवर्माणमभ्ययात्। कृतवर्मा तु हार्दिक्यः

द्रो० शैनेयं निशितैः शरैः।अवाकिरत्सुसंक्रुद्धस्ततो क्रुध्यत सात्यकिः॥अथो सुतीक्ष्णं भल्लं शैनेयः कृतवर्मणः॥विषया मा
स समरे शरांश्च धनुरोपराच।ते तत्यजद्धि रेवाहान्महत्वेनास्याविहद्धनुः॥दृष्टरक्तं तथास्तम विद्ध्यन्निशितैः शरैः॥ततस्तं विर
थं कृत्वा सात्यकिः सत्यविक्रमः।सेनामभ्यार्दयामास शरैः सन्नतपर्वभिः॥अभज्यन्तास्य पृतना शैनेयशरपीडिता।ततः प्राया
त्त्वरितः सात्यकिः सत्यविक्रमः॥शृणु राजन्यदकरोत्तव सैन्ये स वीर्यवान्॥अतीत्य स महाराज द्रोणानीकं महार्णवंप
राजित्य नु संहृष्टः कृतवर्माणमाहवे।यन्तारमब्रवीच्छूरः शनैर्याहीत्यसंभ्रमं।दृष्ट्वा तु तव तत्सैन्यं रथाश्वद्विपसंकुलं।पदा
तिजनसंपूर्णमब्रवीत्सारथिं पुनः॥यदेतन्मेघसंकाशं द्रोणानीकस्य सव्यतः।सुमहत्कुंजरानीकं यस्य रुक्मरथो मुखं।एते हि
बहवः शूरा दुर्निवाराश्च संयुगे। दुर्योधनसमादिष्टा मदर्थे त्यक्तजीविताः॥राजपुत्रा महेष्वासाः सर्वे विक्रान्तयोधिनः।त्रिगर्त्ता
नां रथोदाराः सुवर्णविकृतध्वजाः॥मामेवाभिमुखा वीरा योत्स्यमाना व्यवस्थिताः॥अत्र मां प्रापय क्षिप्रमश्वांश्चोदय सारथे।त्रि
गर्तैः सह योत्स्यामि भारद्वाजस्य पश्यतः॥ततः प्रायाच्छनैः सूतः सात्वतस्य मते स्थितः।रथेनादित्यवर्णेन भास्वरेण पताकिना
।तमूहुः सारथेर्वश्या वल्गामाताद्दयोत्तमाः॥वायुवेगसमाः संख्ये कुंदेंदुरजतप्रभाः॥आपतन्तं रणे तं तु शंखवर्णैर्हयोत्तमैः। परि २६४

पिंडिकागंडं।कंवस्त्रं सरं॥

वृणुस्ततः शूरा गजानीकेन सर्वतः।किरन्तो विविधांस्तीक्ष्णान्नाराचान्लघुयोधिनः॥सात्वतो पि शितैर्बाणैर्गजानीकम
योधयत्।पर्वतानिव वर्षेण तपान्ते जलदो महान्।वज्राशनिसमस्पर्शैर्वध्यमानाः शरैर्गजाः॥प्राद्रवन्रणमुत्सृज्य शि।
निवीरसमीरिताः।शीर्णदन्ता विरुधिरा भिन्नमस्तकपिंडिकाः॥विशीर्णकर्णास्यकरा विनियन्तृपताकिनः॥संभिन्नवर्मघंटा
श्च विनिकृत्तमहाध्वजाः।हतारोहा दिशो राजन्भेजिरे भ्रष्टकंबलाः॥रुवन्तो विविधान्नादाञ्जलदोपमनिस्वनाः॥नाराचैर्वत्स
दंतैश्च भल्लैरंजलिकैस्तथा॥क्षुरप्रैरर्धचंद्रैश्च सात्वतेन विदारिताः॥क्षरन्तोऽसृक्तथा मूत्रं पुरीषं च प्रदुद्रुवुः।बभ्रमुश्च
स्खलुश्चान्ये पेतुर्मम्लुस्तथा परे।एवं तत्कुंजरानीकं युयुधानेन तापितं।शरैरग्न्यर्कसंकाशैः प्रदुद्राव समंततः॥तस्मिन्हृ
ते गजानीके जलसंधो महाबलः।यत्तः संप्रापयन्नागं रजताश्वरथं प्रति।रुक्मवर्णकरः शूरस्तपनीयांगदस्तथा।कुंड
ली मुकुटी शंखी रक्तचंदनरूषितः॥शिरसा धारयन्दीप्तां तपनीयमयीं स्रजं।उरसा धारयन्निष्कं कंठसूत्रं च भास्वरं॥
चापं च रुक्मविकृतं विधुन्वन्गजमूर्द्धनि।अशोभत महाराज सविद्युदिव तोयदः॥तमापतंतं सहसा मागधस्य गजोत्तमं
।सात्यकिर्वारयामास वेलेवोद्धृतमर्णवं।नागं निवारितं दृष्ट्वा शैनेयस्य शरोत्तमैः॥अक्रुध्यत रणे राजन्जलसंधो महा

ततोयहृणानंतरं।आविध्यभ्रामयित्वा।वध्रुधराधरात्पर्वतात्॥

द्रोण बलः॥ततःक्रुद्धोमहेष्वासोमार्गणोभरिसाधनि॥आविध्यताशितैःपीतंजलसंधोमहोरसि।ततोऽपरेणभल्लेनपीतेननि
शितेनच।अस्यतोवृष्णिवीरस्यविचकर्तशरासनं।सात्यकिंछिन्नधन्वानंप्रहसन्निवभारत।आविध्यन्मार्गणैर्वीरःपं
चाशद्भिःशितैःशरैः।सविद्धोबहुभिर्बाणैर्जलसंधेनवीर्यवान्।नाकंपतमहाबाहुस्तदद्भुतमिवाभवत्।अचिंत
यित्वाशरांस्तांस्त्वत्यर्थंसंभ्रमाकुली।धनुरन्यत्समादायतिष्ठतिष्ठेतिचावदत्।एतावदुक्त्वाशैनेयोजलसंधंमहोरसि।विव्या
धषष्ट्यासुतीक्ष्णाग्रैःशराणांप्रहसन्निव।क्षुरप्रेणचपीतेनमुष्टिदेशेमहद्धनुः।जलसंधस्यचिच्छेदविव्याधचत्रिभिःशरैः।ज
लसंधस्तुतत्यक्त्वासशरंवैशरासनं।तोमरंव्यसृजत्तूर्णंसात्यकिंप्रतिमारिष।सनिर्भिद्यभुजंसव्यंमाधवस्यमहारणे
।अभ्यगाद्धरणींघोरःश्वसन्निवमहोरगः।निर्भिन्नेतुभुजेसव्येसात्यकिःसत्यविक्रमः।त्रिंशताविशिखैस्तीक्ष्णैर्ज
प्र लसंधमताडयत्।प्रगृह्यतुततःखड्गंजलसंधोमहाबलः।आर्षभंचर्मसुमहत्शतचंद्रकसंकुलं।तत्आविध्यतंखड्गंसात्वतायोत्स
सर्जह।शैनेयस्यधनुश्छित्वासखड्गोऽन्यपतद्भुवि।अलातचक्रवच्चैवव्यरोचतमहीगतः।अथान्यद्धनुरादायसर्वकाया
वदारणं।शालस्कंधप्रतीकाशमिंद्राशनिसमस्वनं।विस्फार्यविव्याधक्रुद्धोजलसंधंशरेणतु।ततःसाभरणौबाहूक्षुराभ्यांमा १६५
धवोत्तमः।सांगदौजलसंधस्यचिच्छेदप्रहसन्निव।तौबाहूपरिघप्रख्यौपेततुर्गजसत्तमात्।वसुंधराधराद्भ्रष्टौपंचशीर्षाविवो

रगौ॥ततःसुदंष्ट्रंसुनसंचारुकुंडलमुन्नसं।क्षुरेणास्यतृतीयेनशिरश्छिच्छेदसात्यकिः।तत्पातितशिरोबाहुकबंधंभीमदर्शनं॥
द्विरदंजलसंधस्यरुधिरेणाभ्यषिंचत।जलसंधंनिहत्याजौत्वरमाणस्तुसात्वतः।नैषादिंपातयामाससगजस्कंधाद्विशांपते
।रुधिरेणावसिक्तांगोजलसंधस्यकुंजरः।विगाह्यमानमवहत्संश्लिष्टंपरमासनं।शरार्दितःसात्वतेनमर्द्यमानःस्ववाहिनीं।
घोरस्मार्तस्वरंकृत्वाविदुद्राववमहागजः।हाहाकारोमहानासीत्तवसैन्यस्यमारिष।जलसंधंहतंदृष्ट्वावृष्णीनामृषभेणतु
।विमुखाश्चाभ्यधावंततवयोधाःसमंततः।पलायनकृतोत्साहानिरुत्साहाद्विषज्जये।एतस्मिन्नंतरेराजन्द्रोणःशस्त्रभृ
तांवरः।अभ्ययाज्जवनैरश्वैर्युयुधानंमहारथं।तमुदीर्णंतथादृष्ट्वाशैनेयंकुरुपुंगवाः।द्रोणेनैवसहक्रुद्धाःसात्यकिम
भ्यद्रवन्।ततःप्रववृतेयुद्धंकुरूणांसात्वतस्यच।द्रोणस्यचरणेराजन्घोरंदेवासुरोपमं॥ ॥द्रोणपर्वणिसात्यकिप्रवेशे
जलसंधवधः॥ ॥संजयउवाच॥ ॥तेकिरंतःशरव्रातान्सर्वेयत्ताःप्रहारिणः।त्वरमाणामहाराजयुयुधानमयोधयन्।तं
द्रोणःसप्तसप्तत्याजघाननिशितैःशरैः।दुर्मर्षणोद्वादशभिर्दुःसहोदशभिःशरैः।विकर्णश्चापिनिशितैस्त्रिंशताकं
कपत्रिभिः।विव्याधसव्येपार्श्वेतुस्तनयोरंतरेतथा।दुर्मुखोदशभिर्बाणैस्तथादुःशासनोऽष्टभिः।चित्रसेनश्चशैनेयंद्वाभ्यांवि

चंदनो रक्तचंदनतरुः॥

द्रोण व्याघ्रमारिष। दुर्योधनस्तु सहसा शरवर्षेण माधवं। अपीडयंद्दृणो राजंश्छूराश्चान्ये महारथाः॥ सर्वतः प्रतिविद्धस्तु तव पुत्रैर्महीर
रथैः। तान्प्रत्यविध्यच्छैनेयः पृथक् पृथगजिह्मगैः॥ भारद्वाजं त्रिभिर्बाणैर्हार्दिक्यं दशभिः शरैः॥ विकर्णं पंचविंशत्या चित्रसे
नं सप्तदशभिः। दुर्मर्षणं द्वादशभिश्चित्रसेनं विविंशतिं। सत्यव्रतं च नवभिर्विजयं दशभिः शरैः॥ ततो रुक्मांगदं चापं विधुन्वा
नो महारथः। अभ्ययात्सात्यकिस्तूर्णं पुत्रं तव महारथं। राजानं सर्वलोकस्य सर्वशस्त्रभृतां वरं। शरैरभ्यहनद्गाढं ततो युद्धमभू
तै त्तयोः। विमुंचतोः शरांस्तीक्ष्णान् संदधानौ च सायकान्। अदृश्यं समरेऽन्योन्यं चक्रतुस्तौ महारथौ। सात्यकिः कुरुराजेन निर्वि
द्धो बह्वशोभत। अस्रवद्रुधिरं भूरि स्वरसं चंदनो यथा। सात्वतेन च बाणौघैर्निर्विद्धस्तनयस्तव। शातकुंभमयापीडो बभौ यू
प इवोच्छ्रितः। माधवस्तु रणे राजन् कुरुराजस्य धन्विनः। धनुश्चिच्छेद सहसा क्षुरप्रेण हसन्निव। अथैनं छिन्नधन्वानं शरैर्ब
हुभिराचिनोत्। निर्भिन्नस्तु शरैस्तेन द्विषता क्षिप्रकारिणा। नामृष्यत रणे राजा शत्रोर्विजयलक्षणं। अथान्यद्धनुरादाय हेमपृ
त्य ष्ठं दुरासदं। विव्याध सात्यकिं तूर्णं सायकानां शतेन ह। सोऽतिविद्धो बलवता तव पुत्रेण धन्विना। अमर्षवशमापन्नस्तव पुत्रम १६६
पीडयत्। पीडितं नृपतिं दृष्ट्वा तव पुत्रा महाबलाः। सात्वतं शरवर्षेण छादयामासुरंजसा। स छाद्यमानो बहुभिस्तव पुत्रैर्महारथैः।

एकैकं दशभिर्विद्ध्वा पुनर्विव्याध सप्तभिः। दुर्योधनं च त्वरितो विव्याधाष्टभिराशुगैः। प्रहसंश्चास्य चिच्छेद कार्मुकं रिपुभीष
णं। नागं मणिमयं चैव शरैर्ध्वजमपातयत्। अहत्वा च चतुरो वाहांश्चतुर्भिर्निशितैः शरैः। सारथिं पातयामास क्षुरप्रेण महाय
शाः। एतस्मिन्नंतरे चैव कुरुराजं महारथं। अवाकिरच्छरैर्हृष्टो बहुभिर्मर्मभेदिभिः। स वध्यमानः समरे शैनेयस्य शरोत्तमैः
। प्राद्रवत्सहसा राजन् पुत्रो दुर्योधनस्तव। आप्लुतश्च ततो यानं चित्रसेनस्य धन्विनः। हाहाभूतं जगच्चासीद्दृष्ट्वा राजानमाहवे
। ग्रस्यमानं सात्यकिना खे सोममिव राहुणा। तं तु शब्दं महच्छ्रुत्वा कृतवर्मा महारथः। अभ्ययात्सहसा तत्र यत्रास्ते माधवः प्र
भुः। विधुन्वानो धनुःश्रेष्ठं चोदयंश्चैव वाजिनः। भर्त्सयन्सारथिं चोग्रं याहि याहीति सत्वरं। तमापतंतं संप्रेक्ष्य व्यादितास्य
मिवांतकं। युयुधानो महाराज यंतारमिदमब्रवीत्। कृतवर्मा रथेनैष द्रुतमापतते शरी। प्रत्युद्याहि रथेनैनं प्रवरं सर्व
धन्विनां। ततः प्रजवितांश्वेन विधिवत्कल्पितेन वा। आससाद रणे भोजं प्रतिमानं धनुष्मतां। ततः परमसंक्रुद्धौ ज्वलि
ताविव पावकौ। समेयातां नरव्याघ्रौ व्याघ्राविव तरस्विनौ। कृतवर्मा तु शैनेयं षड्विंशत्या समार्पयत्। निशितैः साय
किस्तीक्ष्णैर्यंतारं चास्य सप्तभिः। चतुरश्च हयान्दांतांश्चतुर्भिः परमेषुभिः। अविध्यत्साधुदांतान्वै धवान्त्वतस्य सः
सैं न्सा

दंष्ट्रायतस्ते। यस्यास्तु दृशाने स्यः समुच्छ्रिता॥ सिंहदंष्ट्रः स गदितश्चतुर्दंष्ट्रस्य स्तरिन्निः॥ ९२

द्रो० धनोरुक्मपृष्ठं महद्विस्फार्य कार्मुकं। रुक्मांगदी रुक्मवर्मा रुक्मपुंखैरवाकिरत्॥ ततो शीनिर्शिनेः पौत्रः सायकान्कृत
वर्मणो। प्राहिणोत्त्वरयायुक्तो दृष्टुकामो धनंजयं॥ सो ति विद्धो बलवता शात्रुणा शत्रुतापनः॥ समपतदुर्धर्षः क्षितिकंपे य
थाचलः॥ त्रिषष्ट्या चतुरोस्याश्वान्सप्तभिः सारथिं शरैः॥ विव्याध निशितैस्तूर्णं सात्यकिः कृतवर्मणः॥ सुवर्णपुंखं विशिखं
समाधाय स सात्यकिः॥ व्यसृजत्तं महाज्वालं संक्रुद्धमिव पन्नगं॥ सो विशत्कृतवर्माणं यमदंडोपमः शरः॥ जांबूनदविचित्रं
च वर्म निर्भिद्य भानुमत्॥ अभ्यगाद्धरणीमुग्रो रुधिरेण समुक्षितः॥ संजातरुधिरश्चासौ सात्वतेषुभिरर्दितः॥ सचापं स
शरं त्यक्त्वा न्यपतत्स्यंदनोत्तमात्॥ स सिंहदंष्ट्रो जानुभ्यां पतितो मितविक्रमः॥ शरार्दितः सात्यकिना रथोपस्थे नरर्षभः॥ सह
मि स्रबाहोः सदृशमक्षोभ्यमिव सागरं॥ निवार्य कृतवर्माणं सात्यकिः प्रययौ ततः॥ खड्गशक्तिधनुःकीर्णां गजाश्वरथसंकु
लां। प्रवर्तितोग्ररुधिरां शतशः क्षत्रियर्षभैः॥ प्रेक्षतां सर्वसैन्यानां मध्येन शिनिपुंगवः॥ अभ्यगाद्वाहिनीं भित्वा वृत्रहेवासु
रीं चमूं॥ समाश्वास्य च हार्दिक्यो गृह्य चान्यद्धनुः॥ तस्थौ तत्रैव बलवान्वारयन्युधि पांडवान्॥ ॥ इति श्री द्रोणपर्वणि १६९
जयद्रथवधे सात्यकिप्रवेशे॥ ॥संजय उवाच॥ ॥ काल्यमानेषु सैन्येषु शिनेयेन ततस्ततः॥ भारद्वाजः शरव्रातैर्मह

द्भिस्तमवाकिरत्॥ स संप्रहारस्तुमुलो द्रोणसात्वतयोरभूत्॥ पश्यतां सर्वसैन्यानां बलिवासवयोरिव॥ ततो द्रोणः शि
नेः पौत्रं चित्रैः सर्वायसैः शरैः॥ त्रिभिराशीविषाकारैर्ललाटे समविध्यत॥ तैर्ललाटार्पितैर्बाणैर्युयुधानः स्वलंकृत न
॥ व्यरोचत महाराज त्रिशृंग इव पर्वतः॥ ततोस्य बाणानपराणिंद्राशनिसमस्वनान्॥ भारद्वाजोंतरप्रेक्षी प्रेषयामास
संयुगे॥ तान्द्रोणचापनिर्मुक्तान्दाशार्हः पततः शरान्॥ द्वाभ्यां द्वाभ्यां सुपुंखाभ्यां चिच्छेद परमास्त्रवित्॥ तामस्य लघुतां
द्रोणः समवेक्ष्य विशांपते॥ प्रहस्य सहसाविध्यद्विंशत्या शिनिपुंगवं॥ पुनः पंचाशतेषूणां शतेन च समार्पयत्॥ लघु
तां युयुधानस्य लाघवेन विशेषयन्॥ समुत्पतंति वल्मीकाद्यथा क्रुद्धा महोरगाः॥ तथा द्रोणरथाद्राजन्नुत्पतंति तनु
छिदः॥ तथैव युयुधानेन सृष्टाः शतसहस्रशः॥ अवाकिरन्द्रोणरथं शरा रुधिरभोजनाः॥ लाघवं द्विजमुख्यस्य सात्वत
स्य मारिष॥ विशेषं नाध्यगच्छाम समावास्तां नरर्षभौ॥ सात्यकिस्तु ततो द्रोणं नवभिर्नतपर्वभिः॥ आजघान भृशं क्रुद्धो
ध्वजं च निशितैः शरैः॥ सारथिं च शतेनैव भारद्वाजस्य पश्यतः॥ लाघवं युयुधानस्य दृष्ट्वा द्रोणो महारथः॥ सप्तत्या सा
त्यकिं विद्ध्वा तुरंगांश्च त्रिभिस्त्रिभिः॥ ध्वजमेकेन विव्याध माधवस्य रणाजिरे॥ अथापरेण भल्लेन हेमपुंखेन पत्रिणा॥
धनुश्चिच्छेद समरे माधवस्य महात्मनः॥ सात्यकिस्तु ततः क्रुद्धो धनुस्त्यक्त्वा महारथः॥ गदां जग्राह महतीं भारद्वाजा

रथात्क्षिपत।तामापतंतींसहसापट्टबद्धामयस्मयीं।त्वरार्च्छरैशीर्णैर्बहुभिर्बहुरूपिभिः।अथान्यद्धनुरादायसा
त्यकिःसत्यविक्रमः।विव्याधबहुभिर्वीरोनाराचैःसंशितैःशरैः।विद्धाचसमरेद्रोणंसिंहनादममुंचत।तंविनममृषेद्रोण
ःसर्वशस्त्रभृतांवरः।ततःशक्तिंगृहीत्वातुरुक्मदंडामयस्मयीं।त्वरयाप्रेषयामाससमाधवस्यरथंप्रति।अनासाद्य
तुशैनेयंसाशक्तिःकालसंनिभा।भित्वारथंजगामोग्राधरणींरुद्रोणस्वना।ततोद्रोणंशिनेःपौत्रोराजन्विव्याधपत्रि
णा।दक्षिणंभुजमासाद्यपीडयन्भरतर्षभ।द्रोणोपिसमरेराजन्माधवस्यमहद्धनुः।अर्धचंद्रेणचिच्छेदरथशक्त्या
चसारथिं।मुमोहसारथिस्तस्यरथशक्त्यासमाहतः।सरथोपस्थमासाद्यमुहूर्तंविन्यषीदत।चकारसात्यकीराजंस्त
त्रकर्मातिमानुषं।अयोधयच्चयद्रोणंरश्मीन्जग्राहचस्वयं।ततःशरशतेनैवयुयुधानोमहारथः।अविध्यद्ब्रा
ह्मणंसंख्येहृष्टरूपोविशांपते।तस्यद्रोणःशरान्पंचप्रेषयामासभारत।तेतस्यकवचंभित्वापपुःशोणितमाहवे।
निर्विद्धस्तुशरैर्घोरैरक्रुध्यत्सात्यकिर्भृशं।सायकान्व्यसृजच्चापिवीरोरुक्मरथंप्रति।ततोद्रोणस्ययंतारंविनिपा
त्यपृथग्भुवि।अश्वान्व्यद्रावयन्बाणैर्हतसूतान्महात्मनः।सरथःप्रद्रुतःसंख्येमंडलानिसहस्रशः।चकारराज १६८
तोराजन्भ्राजमानइवांशुमान्।अभिद्रवतगृह्णीतहयान्द्रोणस्यधावत।इतिस्मचुक्रुशुःसर्वेराजपुत्राःसराजकाः॥
॥ रथशक्त्याकेतुमपन्नाकारमुखयाशक्त्या॥ ॥

तेसात्यकिमपास्याशुराजन्युधिमहारथाः।यतोद्रोणस्ततःसर्वेसहसासमुपाद्रवन्।तान्दृष्ट्वाप्रद्रुतान्संख्येसात्वतेन
शराहितान्।प्रभग्नंपुनरेवासीत्तवसैन्यंसमाकुलं।व्यूहःसर्वःपुनर्द्वारंगत्वाद्रोणोव्यवस्थितः।वातायमानैस्तैरश्वै
र्हृतोवृष्णिशराहितैः।पांडुपांचालसंभग्नंव्यूहमालोक्यवीर्यवान्।शैनेयेनाकरोद्यत्नंव्यूहमेवाभ्यरक्षत।निवार्य
पांडुपांचालान्द्रोणाग्निःप्रदहन्निव।तस्थौक्रोधाग्निसंदीप्तःकालसूर्यइवोदितः॥ ॥द्रोणपर्वणिसात्यकि
प्रवेशेद्रोणपराजयः॥ ॥संजयउवाच॥ ॥द्रोणंसजित्वापुरुषप्रवीरस्तथैवहार्दिक्यमुखांस्त्वदीयान्।प्रह
स्यन्सूतमिदंबभाषेशिनिप्रवीरःकुरुपुंगवाग्र्यः।निमित्तमात्रंवयमत्रसूतदग्धारयःकेशवफाल्गुनाभ्यां।हतान्निहन्मे
हनरर्षभेणवयंसुरेशात्मसमुद्भवेन।तमेवमुक्त्वाशिनिपुंगवस्तदामहाहवेसोग्र्यधनुर्धरोरिहा।किरन्समंतात्सहसा
शरान्बलीसमापतच्छ्येनइवामिषाशया।तंयांतमश्वाःशशिशंखवर्णाविगाह्यसैन्यंपुरुषप्रवीरं।नाशक्नुवन्वार
यितुंसमंतादादित्यरश्मिप्रतिमंनराग्र्यं।असह्यविक्रांतमदीनसत्वंसर्वेगणाभारतयेत्वदीयाः।सहस्रनेत्रप्रतिम
प्रभावंदिवीवसूर्यंजलदव्यपाये।अमर्षपूर्णस्त्वतिचित्रयोधीशरासनीकांचनवर्मधारी।सुदर्शनःसात्यकिमापतं
तंन्यवारयद्राजवरःप्रसह्य।तयोरभूद्भारतसंप्रहारःसुदारुणस्तंसमभिप्रशंसन्।योधास्त्वदीयाश्चहिसोमकाश्च

म१

ऽध्याये च धसनंकम्मी॥ ॥

द्रोण हत्विंद्र योर्युद्धमिवारिसंघ्वाञ्चारिः सुतीक्ष्णैः शतशो यैन्य विद्धन्सुदर्शनः सात्वतमुख्यमाजौ। अनागतानेव तु तान्पृषत्का
ञ्छिच्छेद बाणैः शिनिपुंगवोपि। तथैव शक्रप्रतिमोपि सात्यकिः सुदर्शनेयान्क्षिपति स्म सायकान्। द्विधा त्रिधा तानक
रोत्सुदर्शनः शरोत्तमैः स्यंदनवर्य्यमास्थितः। संप्रेक्ष्य बाणान्निहतांस्तदानीं सुदर्शनः सात्यकिबाणवेगैः। क्रोधात्स
नृत्यन्निव तिग्मतेजाः शरानमुंचत्तपनीयचित्रान्। पुनः स बाणैस्त्रिभिरग्निकल्पैराकर्णपूर्णैर्निशितैः पृषत्कैः। सु
दर्शनैः। विव्याध देहावरणं विभिद्य ते सात्यकेराविविशुः शरीरं। तथैव तस्यावनिपालपुत्रः संधाय बाणैरपरैर्ज्वलद्भि
ः। आजघ्निवांस्तान्रजतप्रकाशान्स्तु उर्भिरश्वांश्चतुरः प्रसह्य। तथा तु तेनाभिहतस्तरस्वी नप्ता शिनेरिंद्रसमानकल्पः। सु
दर्शनस्येषुगणैः सुतीक्ष्णैर्हयान्निहत्याशु ननाद नादं। अथास्य सूतस्य शिरो निकृत्य भल्लेन शक्राशनिसन्निभेन। सुदर्श
नस्यापि शिनिप्रवीरः क्षुरेण चिच्छेद शिरः प्रसह्य। सकुंडलं पूर्णशशिप्रकाशं भ्राजिष्णु वक्त्रं निचकर्त देहात्। यथा यथा वज्र
धरः प्रसह्य बलस्य संख्ये तिबलस्य राजन्। निहत्य तं पार्थिवपुत्रपौत्रं रणे यदूनामृषभस्तरस्वी। मुदा समेतः परया महात्मा
रराजराजेन्द्र सुरराजतुल्यः। ततो ययावर्जुनमेव येन निवार्य्य सेनां तव मार्गणौघैः। सदश्वयुक्तेन रथेन नृत्यन्लोकान्विसि १६८
स्मापयिषुर्नृवीरः। तच्चास्य विस्मापयनीयमग्र्यमपूजयन्योधवराः समेताः। यद्वर्तमानानिषुगोचरेरीन्ददाह बाणैर्हुतभु
ग्यथैव॥

विंशेनयन्नाध्यायः॥

॥ ॥ द्रोणपर्वणि जयद्रथवधे सात्यकिप्रवेशे सुदर्शनवधः॥ ॥ संजय उवाच॥ ॥ ततः स सात्यकिर्धीमान्महात्मा वृ
ष्णिपुंगवः। सुदर्शनं निहत्याजौ यंतारमिदमब्रवीत्। रथाश्वनागकलिलं शरशक्त्यूर्मिमालिनं। खड्गमत्स्यं गदाग्राहं शूरा
युधमहास्वनं। प्राणापहारिणं रौद्रं वादित्रोत्क्रुष्टनादितं। योधानामसुखस्पर्शं दुर्द्धर्षमजयैषिणां। तीर्णाः स्म दुस्त
रं तात द्रोणानीकमहार्णवं। जलसंधबलेनाजौ पुरुषादैरिवावृतं। अतोन्यं पृतनाशेषं मन्ये कुनदिकामिव। तर्तव्या लिरा
स्या मल्पसलिलां चोदयाश्वानसंभ्रमात्। हस्तप्राप्तमहं मन्ये सांप्रतं सव्यसाचिनं। निर्जित्य दुर्द्धरं द्रोणं सपदानुगमाहवे।
हार्दिक्यं योधवर्यं च प्राप्तं मन्ये धनंजयं। न हि मे जायते त्रासो दृष्ट्वा सैन्यान्यनेकशः। वह्नेरिव प्रदीप्तस्य ग्रीष्मे शुष्कतृणो
लपे। पश्य पांडवमुख्येन यातां भूमिं किरीटिना। पत्त्यश्वरथनागौघैः पतितैर्विषमीकृतां। द्रवते तद्यथा सैन्यं तेन
तेन महात्मना। रथैर्विपरिधावद्भिर्गजैरश्वैश्च मारिष। कौशेयारुणसंकाशमेतदुद्धूयते रजः। अभ्यासस्थमहं मन्ये श्वे
ताश्वं कृष्णसारथिं। एष निःस्वनते शार्ङ्गी गांडीवस्यामितौजसः। यादृशानि निमित्तानि मम प्रादुर्भवंति वै। अनस्तंगत आ
दित्ये हंता सिंधुपमर्जुनः। शनैर्विश्रमयन्नश्वान्याहि यत्तो रिपून्प्रति। यत्रैते सतनुत्राणाः सुयोधनपुरोगमाः। दंशितात्क्रू

श्वेताश्वस्य सकाशे कृतमन्यस्तु मार्गमिमं शिक्षामाचार्यस्य द्रोणस्य दर्शयिष्यामीत्यवयाः॥ अथ वाचाचार्यस्य विशेषो पदे हुः
द्रोण० रकभगिणः कांबोजा युद्धदुर्मदाः॥ शरवाणा मनधराय वनास्त्रप्रहारिणः॥ शकाः किराता दरदा बर्बरास्ताम्रलिप्तकाः॥ अन्ये च बहवो
म्लेच्छा विविधायुधपाणयः॥ मामेवाभिमुखाः सर्वे तिष्ठन्ति समरार्थिनः॥ एतान्सरथनागाश्वान्निहत्याजौ सपत्तिनः॥ इदं सुगमम्
द्वारं ते समीनापध्वस्य॥ ॥कृष्ण उवाच॥ न संत्रासो मे वार्ष्णेय विद्यते सत्यविक्रम। यद्यपि स्यात्सुसंक्रुद्धो द्रोणो मद्ध्ये यतः
स्थितः॥ द्रोणो वा रथिनां श्रेष्ठः कृपो मद्रेश्वरः पिता। तथापि संत्रमे नास्त्यात्वामाश्रित्य महाभुज। त्वया तु बहवो युद्धे निर्जिता
श्चास्तु सूदनः। न च मे संभ्रमः कश्चिद्भूतपूर्वः कथंचन। किं पुनस्त्वं समासाद्य वीर संयुगगोष्पदे। आयुष्मन्कतरेणाहं प्रयामि
धनंजयं। केषां क्रुद्धोसि वार्ष्णेय केषां मृत्युरुपस्थितः॥ केषां संयमनीमद्य गन्तुमुत्सहते मनः। केषां युधिपराक्रान्तं कालान्त बो॥
कयमोपमं। दृष्ट्वा विक्रमसंपन्नं विद्रविष्यन्ति संयुगे। केषां वै वस्वतो राजा स्मरते द्य महाभुज॥ सात्यकिरुवाच॥ मुंडाने
ता हनिष्यामि दानवानिव वासवः॥ प्रतिज्ञां पारयिष्यामि कांबोजानेव मा वह। अद्यैषां कदनं कृत्वा क्षिप्रं यास्यामि पांडवं।
अद्य द्रक्ष्यन्ति मे वीर्यं कौरवाः ससुयोधनाः॥ मुंडानीके हते सूत सर्वसैन्येषु चासकृत्। अद्य कौरवसैन्यस्य दीर्यमाणस्य संयु
गे॥ श्रुत्वा विरावं बहुधा संतप्स्यति सुयोधनः॥ अद्य पांडवमुख्यस्य श्वेताश्वस्य महात्मनः। आचार्यस्य कृतं मार्गं दर्शयिष्यामि
संयुगे। अद्य मद्बाणनिहतान्योधमुख्यान्सहस्रशः। दृष्ट्वा दुर्योधनो राजा पश्चात्तापं गमिष्यति। अद्य मे क्षिप्रहस्तस्य क्षिपत १७०
श्चेतान्सुरस्य दर्शयिष्यामि तिसामान्यकर्मकं॥ ॥पारयिष्यामि समापयिष्यामि॥

द्विरर्जुनं सावर्जुनो यत्र निरुक्तो वल्गमम॥ होन्यायसानि शातानि नायाम यातिसुदर्शयतातिसूक्तैः॥ अकर्णेपुस्व
सायकोत्तमाः॥ अलातचक्रप्रतिमं धनुर्द्रक्ष्यति कौरवाः॥ मत्सायकचितांगानां रुधिरं स्रवतां बहु। सैनिकानां व
धं दृष्ट्वा संतप्स्यति सुयोधनः॥ अद्य मत्क्रुद्धरूपस्य निघ्नतश्च वरान्वरान्। द्विरर्जुनमिमं लोकं मंस्यति सुयोधनः।
ध अद्य राजसहस्राणि निहतानि मया रणे। दृष्ट्वा दुर्योधनो राजा संतप्स्यति महामृधे। अद्य स्नेहं च भक्तिं च पांड
वेषु महात्मसु। दवाराजसहस्राणि दर्शयिष्यामि राजसु॥ ॥संजय उवाच॥ ॥एवमुक्तस्तदा सूतः शिक्षितान्सो
दुवाहितान्। शशांकसन्निकाशान्वै वाजिनो हेमभूषितान्॥ ते पिबंत इवाकाशं युयुधानं हयोत्तमाः॥ प्रापयन्यवनान्
शीघ्रं मनःपवनरंहसः॥ सात्यकिं ते समासाद्य पृतनास्वनिवर्तिनं। बहवो लघुहस्ताश्च शरवर्षैरवाकिरन्॥ तेषामिषून
थास्त्राणि वेगवन्नतपर्वणां॥ अछिनत्सात्यकी राजन्नैनं ते प्राप्नुवञ्छराः॥ रुक्मपुंखैः सुनिशितैर्गार्ध्रपत्रैरजिह्मगैः॥
उच्चकर्त शिरांस्युग्रो यवनानां भुजानपि। शैक्यायसानि वर्माणि कांस्यानि च समंततः॥ भित्वा देहांस्तथा तेषां शरा जग्मु
र्महीतलं। ते हन्यमाना वीरेण म्लेच्छाः सात्यकिना रणे॥ शतशो न्यपतंस्तत्र व्यसवो वसुधातले। सुपूर्णायतनिर्मुक्ते
पिंडितैः पावः॥ रव्यवच्छिन्नगामिभिः॥ पंच षट् सप्त चाष्टौ च विव्याध युगपद्बली। इति यवनकांबोजैः किरातसहबर्बरैः॥ पराति मित्र
ह॥ अव्यवच्छिन्न।पिंडितैः॥ अनवच्छिन्न संबद्धैः॥

द्रोण०

वारणासावृतेनहतैरणे।पतितैरन्नवत्राजन्संहतारणान्तमयः।एवंतद्यवनानीकंहत्वाविव्राचमाधवः।अभ्यगम्यद्रू
पांदृष्टिवांमांसशोणितकर्दमां।कृतवांस्तव्रशेशीतयः।सूपयंस्तावकंबलं।दस्यूनांसशिरस्त्राणैःशिरोभिर्लूनमूर्द्धजैः
।तत्रतत्रमहीकीर्णाविबर्हैरंडजैरिव।रुधिराक्तैस्तथागात्रैस्तदायोधनमाबभौ।कबंधैःसंहतमस्त्रत्तासामात्रैःरव
मिवाहृतं।दीसारानिसमस्मद्भिःस्वपर्वनिरजिह्मगैः।तमसाश्रुयानातिवत्ताःसमानवकुवसुंधरा।अल्पावशिष्टाःसंनग्ना
।कांबोजानांविचेतसः।जिताःसंख्येमहाराजयुयुधानेनतत्सुताः।पार्ष्णिनिष्ठुकशापाणिस्ताडयंतस्तुरंगमान्।जवमु
त्तममास्थायसर्वतःप्राद्रवन्भयात्।कांबोजसैन्यंविद्राव्यदुर्जयंयुधिमारिष।यवनानांचतत्सैन्यंशकानांचमहाबलं।
ततःसपुरुषव्याघ्रःसात्यकिःसत्यविक्रमः।प्रहृष्टःपुरुषव्याघ्रःसूतंयाहीत्यचोदयत्।सतस्यसमरेकर्म्मदृष्ट्वान्यैरकृ
तंपुरा।चारणाःसहगंधर्वाःपूजयांचक्रिरेभृशं।तंयांतंपृष्ठगोप्तारमर्जुनस्यमहाहवे।नाकचिदन्यवर्त्तततावकाश्
शिनिनंदनं।। ।।द्रोणपर्वणिजयद्रथवधेसात्यकिप्रवेशे।। ।।संजयउवाच।। ।।जित्वायवनकांबोजान्युयु
धानस्ततोर्जुनं।जगामतवसैन्यस्यमध्येनरथिनांवरः।शरदंष्ट्रोनरव्याघ्रोविचित्रकवचध्वजः।मृगान्व्याघ्रइवाजि १७१
घ्रंस्तवसैन्यमभीषयत्।सरथेनचरन्मार्गान्धनुरभ्रामयद्भृशं।रुक्मपृष्ठंमहावेगंरुक्मकाढिमद्भुतं।रुक्मांगदशिरस्त्रा

संहृतपाठः

णःरुक्माभरणभूषितः।रुक्मध्वजवरःशूरोमेरुशृंगमिवाबभौ।सधनुर्मंडलःसंख्येतेजोभास्वररश्मिवान्।शरदीवो
दितःसूर्योनृसूर्योविरराजह।वृषभस्कंधविक्रांतोवृषभाक्षोनरर्षभः।तावकानांबभौमध्येगवांमध्येयथावृषः।मत्तमातंग
संकाशंमत्तद्विरदगामिनं।प्रभिन्नमिवमातंगंयूथमध्येव्यवस्थितं।व्याघ्राइवजिघांसंतस्तावकाःसुसुपाद्रवन्।द्रोणानी
कमतिक्रांतंभोजानीकंचदुस्तरं।जलसंधार्णवंतीर्त्वाकांबोजानांचवाहिनीं।हार्दिक्यमकरान्मुक्तंतीर्णंवैसैन्यसागरं।
परिवव्रुःसुसंक्रुद्धास्त्वदीयाःसात्यकिंरथाः।दुर्योधनश्चित्रसेनोदुःशासनविविंशती।शकुनिर्दुःसहश्चैवयुवादुर्मर्षणो
ःक्रथः।अन्येचबहवोराजन्सेनामुख्याधनुर्धराः।दृष्टतःसात्यकिंयांतमभ्यधावन्नमर्षिताः।ततःशब्दोमहानासीत्तवसैन्य
स्यमारिष।मारुतोद्धूतवेगस्यसमुद्रस्येवपर्वणि।तानभिद्रवतःसर्वान्सहृष्ट्वाशिनिनंदनः।शनैर्याहीतियंतारमब्रवीत्प्र
हसन्निव।इदमेतिसमुद्धूतंधार्तराष्ट्रंमहद्बलं।मामेवाभिमुखंतूर्णंगजाश्वरथपत्तिमत्।नादयन्वैदिशःसर्वारथघो
षेणसारथे।पृथिवींचांतरिक्षंचकंपयन्सागरानपि।एतद्बलार्णवंतातवारयिष्येमहारणे।पौर्णमास्यामिवोद्धूतंवे
लेवसरितांपतिं।पश्यमेसूतविक्रांतमिंद्रस्येवमहामृधे।एषसैन्यानिशत्रूणांविधमामिशितैःशरैः।निहतानींदेवे

द्रो० पञ्चपञ्चाशत्पत्रि रथद्विपानामच्छेरिर निमेषकाच्छिन्नदेहाः सहस्रशः ॥ इत्येवं वदतस्तस्य सात्यकेरमितौजसः ॥ समीपं से विदेहास्त्र मंततः पावः॥
निकास्तेऽदर्शयन्मीश्वरसुत्सवः ॥ उच्चावचैर्गिरो वाग्भिश्छिन्धि निर्धीति वादिनः ॥ तानेवं वदतो वीरान्सात्यकिर्निशितैः शरैः ॥ ज
घान त्रिशता नार्यान्निकुञ्जरांश्च वज्रैः शतान् ॥ समं प्रहारस्तु सुरलस्तस्येत घाच धन्विनां ॥ प्राहरत्तं महाराज देवासुररणोप
मः ॥ मेघजालसमं सैन्यं तत्रस्यत वतन्महत् ॥ नृत्यरक्ताविनेनेघा महावात इवाम्बुदान् ॥ सञ्चारि रेनलस्य शिराकल्पीदनि ॥
चादितः ॥ असंभ्रमं महस्मिन्वरस्तावकानवधीद्कुरुः ॥ आश्चर्ये तत्र राजेन्द्र सुमहद्दृष्टवानहं ॥ नमोघः सायकः सायकः क
श्चित्सात्यकेरभवत्प्रभो ॥ रथनागाश्वकलिलं पदात्त्यूर्मिसमाकुलं ॥ शैनेयवेलामासाद्य स्थितं तत्तव बलार्णवं ॥ संभ्रांतनरना
गाश्वमावर्तितमुहुर्मुहुः ॥ तत्सैन्यमिषुभिस्तेन वध्यमानं समंततः ॥ रथिनः पत्तिनागाश्च सादिनश्च शराहताः ॥ बभ्रमुस्तत्र तत्रै
वो व गावौ व्याघ्रभयादिव ॥ पदातिनं रथं नागं सादिनं तुरगं तथा ॥ सर्वमाविद्धमद्राक्षं सिंतं तैः सात्वतेषुभिः ॥ न तादृक् कदनं राजन्
कृतवान्नर्जुनो युधि ॥ यादृक् चक्रे शिनेर्नप्ता कालेन कदनं महत् ॥ अत्यर्जुनं तं महाराज युयुधे यदुपुंगवः ॥ वीतभीर्लघिमोपे १९२
तः कृतित्वं संप्रदर्शयन् ॥ ततो दुर्योधनो राजा सात्वतस्य त्रिभिः शरैः ॥ विव्याध सूतं निशितैश्चतुर्भिश्चतुरो हयान् ॥ सात्यकिं च

त्रिभिर्विद्ध्वा पुनर्विव्याध सोऽष्टभिः ॥ दुःशासनः षोडशभिर्विव्याध शिनिपुंगवं ॥ शकुनिः पंचविंशत्या चित्रसेनश्च पञ्चभिः ॥ दु
ःसहः पंचदशभिर्विव्याधोरसि सात्यकिं ॥ विहसन्नथ वृष्णीनां शार्दूलस्तान् बाणैः समाहतः ॥ तान् विध्यन्महाराज सर्वानेव त्रिभिस्त्रि
भिः ॥ गाढविद्धानरीन्कृत्वा बाणैर्भृशं विनेदिभिः ॥ श्येनवद्व्यचरत्संख्ये शैनेयो लघुविक्रमः ॥ सौबलस्य धनुश्छित्त्वा हस्ता
वापं निकृत्य च ॥ दुर्योधनं त्रिभिर्बाणैरभ्यविध्यत्स्तनांतरे ॥ चित्रसेनं शतेनैव दशभिर्दुःसहं तथा ॥ दुःशासनं च विंशत्या
विव्याध शिनिपुंगवः ॥ अथान्यद्धनुरादाय स्यालस्तव विशांपते ॥ अष्टभिः सात्यकिं विद्ध्वा पुनर्विव्याध पंचभिः ॥ दुर्मुखोऽथ
दशभिः दुःसहश्च त्रिभिः शरैः ॥ दुःशासनश्च दशभिर्भीराज विव्याध सात्यकिं ॥ दुर्योधनस्त्रिसप्तत्या विद्ध्वा भारत माधवं ॥ ततो
स्य निशितैर्बाणैस्त्रिभिर्विव्याध सारथिं ॥ तान् सर्वान् सहितान् शूरान् यतमानान्महारथान् ॥ पंचभिः पंचभिर्बाणैः पुनर्विव्याध
सात्यकिः ॥ ततः स रथिनां श्रेष्ठस्तव पुत्रस्य सारथिं ॥ आजघानाशु भल्लेन स हतः प्रापतद्भुवि ॥ पातिते सारथौ तस्मिन्नुगतोऽसौ रथ
स्तव ॥ वातायमानैरश्वैः स राजापकृतो रणात् ॥ अथापरे तव सुताः सैनिकाश्च नराधिप ॥ राज्ञो रथमभिप्रेक्ष्य प्राद्रवंश्च शतशो
दिशः ॥ ततस्तत्र द्रुतं सैन्यं दृष्ट्वा भारत सात्यकिः ॥ अवाकिरच्छरैस्तीक्ष्णैः रुक्मपुंखैर्महारथः ॥ विद्राव्य सर्वसैन्यानि तावकानि
समंततः ॥ जगाम सात्यकी राजन् श्वेताश्वस्य रथं प्रति ॥ तमरीन्नाशयंतं च रक्षंतं च स्वसारथिं ॥ आत्मानं मोचयंतं च तावकाः समपू

द्रोण

जयत्॥ ५१॥ इति श्रीद्रोणपर्वणि जयद्रथवधे सात्यकिप्रवेशे दुर्योधनापयाने॥ ॥धृतराष्ट्र उवाच॥ ॥संप्रमृद्य महासैन्यं यांतं
सात्यकिमर्जुनं। निर्ह्रीका मम ते पुत्राः किमकुर्वत वै तदा। कथं चैषां तदा युद्धे धृतिरासीन्मुमूर्षतां। शैनेयसमनुप्राप्ते सदृशे
सव्यसाचिनः। किं वक्ष्यंति नु ते क्षात्रं सैन्यमध्ये पराजिताः। कथं च सात्यकिर्युद्धे व्यतिक्रांतो महायशाः। कथं च मम पुत्राणां
जीवतामिह संजय। शैनेयोऽभिययौ युद्धे तन्ममाचक्ष्व तत्त्वतः। अत्यद्भुतमिदं तात त्वत्सकाशाच्छृणोम्यहं। एकस्य बहुभिर्युद्धं
शत्रुभिः सुमहारथैः। विपरीतमिदं दैवं तत मन्ये सुतान्प्रति। यत्रावध्यंत समरे सात्वतेन महारथाः। एकस्यापि हि नापर्या
प्तं मामकं तस्य संजय। क्रुद्धस्य युयुधानस्य सर्वे तिष्ठंतु पांडवाः॥ निर्जित्य समरे द्रोणं कृतिनं युद्धदुर्मदं। यथा पशुगणा
न्सिंहो विनिघ्नन्मम सैनिकान्। कृतवर्मादिभिः शूरैर्यत्तैर्बहुभिराहवे। युयुधानो न शक्तितो जेतुं जेष्यति मे सुतान्नान
चितदीदृशं कर्म कृतवांस्तत्र फाल्गुनः। यादृशं कृतवान्कर्म यदुवीरः प्रतापवान्॥ ॥संजय उवाच॥ ॥त्वदपुत्रा
त्संग्राममनश्वाजिगजरूपं दुर्योधनापनीतेन तव दुर्मंत्रितेन च। ते पुनः संन्यवर्तंत कृत्वा संसप्तकान्मिथः। परां यूद्धे मतिं
कृत्वा पुत्रस्य तव शासनात्। त्रीणि सादिसहस्राणि दुर्योधनपुरोगमाः। शकाः कांबोजबाह्लीका यवनाः पारदास्तथा। कु १५२
लिंदास्तंगणांबष्ठाः पैशाचाश्च समंदराः। पार्वतीयाश्च राजानः क्रुद्धाः पाषाणपाणयः। अभ्यद्रवंत शैनेयं शलभा इव

दुःशासनश्च कृतेन कर्मणा मतिकृत्वेत्यन्वयः॥ वामनस्य यमोपवाह्यस्य॥ चंडाः कांतशिराग्रीवा॥ नीचोस्थवीमनस्वि
नः॥ व्यूढोरस्काः स्तुतिविद्धः वामनान्वयजा गजाः॥ सुप्रतीकस्य ईशोपवाह्यस्य॥ सुविभक्तमहाकायाः बाजीस्तनमहाश
-माकक। सकाः पंचाशता राजंछैनेयमुपाद्रवन्। नानारथसहस्राणि ततः तेन द्विरदानां सहस्रेण द्विपा
हानश्च वाजिभिः। शरवर्षाणि मुंचंतो विविधानि महारथाः। अभ्यद्रवंत शैनेयं संख्येयाः परंतप। तांश्च संनोदयन्सर्वा
न्हतैनमिति भारत। दुःशासनो महाराज सात्यकिं पर्यवारयत्। तत्राद्भुतमपश्याम शैनेयचरितं प्रभो। यदेको बहु ६
भिः सार्धमसंभ्रांतमयुध्यत। अवधीच्च रथानीकं द्विरदानां च तद्बलं। सादिनश्चैव तान्सर्वान्दस्यूनपि च सर्वशः। तत्र च
क्रैर्विमथितैर्भग्नैश्च बहुधा शुभैः। अक्षैश्च बहुभिर्भग्नैरीषादंडकबंधुरैः। कुंजरैर्मथितैश्चैव ध्वजैश्च विनिपातितैः। वर्मभि
श्चर्मभिश्चैव विनिकीर्णा समंततः। स्रग्भिराभरणैर्वस्त्रैरनुकर्षैश्च मारिष। संबभौ वसुधा तत्र शरदि द्यौर्ग्रहैरिव। गिरिरूप
धराश्चापि पतिताः कुंजरोत्तमाः। अंजनस्य कुले जाता वामनस्य च भारत। सुप्रतीककुले जाता महापद्मकुले तथा॥

द्रो

इना॥ ऐरावतहस्तावलितः सुप्रतीककुलोद्भवाः। महापद्मस्य कुमुदकुले॥ कौचंडाः समायतत्वचाः सुबद्धा बलिनोपि
वा महापद्मान्वयभवा गजयुद्धप्रिया गजाः॥

द्रो॰

श्वेतवालनखाः शूराः श्वेतवक्त्रा महाबलाः ॥ तद्वद्यावर्षविंतःष्ठा गजा ऐरावतोद्भवाः ॥ अन्ये पुंडकुले पुंडरीकस्तु यद्दंते
सार्वभौमी यस्य स्थिराः स्थूलशिरा दंताग्निशोकोवलितापिच्छस्तु कवलमिवाः शूराः पुंडरीकोद्भवा गजाः ॥

ऐरावतकुले चैव तथान्यस्य कुलेषु च ॥ जाता ये च गिरिराजैः रक्तेरष्टदंता युधि ॥ वानायुजान्पार्वतीयान् कांबोजान् बाह्लि
कांस्तथा ह्यवरोगा जन्मर्षीन समात्यकि ॥ नानादेशोद्भवान्वी नानाजातीश्च सर्वशः ॥ उग्रान समात्यकिस्त्रवशा तृणो यम
दस्वच ॥ तस्य प्रकाल्यमानस्तु दस्यन्तु ग्रामसमानाद्भवात ॥ निविविशमधमञ्जायुध्यद्धे किंस्तते नवां तंस्थानिमर्सान्संप्रेदयत गा
विष्णुःशासनस्तवः पाषाणयोधिनः शूरान्पार्वतीयानचोदयत् ॥ अश्ममुष्टिकृतकपालानि तत्ता नानिमात्यकिः ॥ अश्मयुद्धम
जानंतं हतीतं दृढकार्षकं ॥ तास्ये वक्रस्वः सार्वनायप्रमहुष्टविशास्त्राः ॥ अभिहन्तमालिष्ठत वः पाश्यति सात्यकिः ॥ तेपार्व
तीया राजानं सार्विपाषाणपाणयः ॥ अन्यद्दक्षशेन यराजान मिषमेविएगः ॥ ताता भज्ञशिरः ष राध्येकपलैः ॥ शिलवामिन्न रु
यातिस्तु युधनस्य दुरस्त्रे तत्सुरादृविक्षेपणं येस्त्र याप्यन्येमात्वतस्य वपोविणः ॥ चोदिता नस्त्र वपुत्रेणसर्वतो रुरुधुर्दि
शः ॥ तेषामापततामेव शिला शुद्धविकोपितो ॥ सात्यकिः प्रतिसंधस्य विशातं पादिशो नराः ॥ ताम नयम हृष्टिंतु सुलापा
र्वतीयः समीरितः ॥ १२४

मवेद्यशाना स्थंडालं बोष्याशारूदर्शनाः पीनायनाननकराः पुष्पदंतोद्भवा गजाः ॥ मेडलाकुत
याः शूराः सुवपाणः शुद्धदर्शनाः पानायतास्याः एए प्राणाः सार्वभौमकुलोद्भवाः ॥ स्वप्राणो ये सात्त्रे ॥

श्यातस्तुस्वाः गज्जवविशेषाः ॥ अद्रीणांश्च स्तदानां ॥ कुंजरामन्निवर्त्तंतियुयुधानरथं प्रति पाव ॥

चिविदोरगसंकाशैर्नाराचैः शितितुंगवः ॥ तिरश्चमहं देदीप्यद्भिः स्वघोतानामिव ब्रजैः ॥ प्रायः सैन्यान्यदन्यंत हाहाकृ
तानि मारिष ॥ ततः ये चाज्ञाताः शूराः सप्तद्यतमहाशिलाः ॥ निकृत्तबाहवो राजन्निपेतुर्धरणीतले ॥ पुनर्द्दृष्टाः रतास्तान्य
श्वान मार्हस्त्रिएगस्त्र याः ॥ स्मायलि वक्रिसि च्छिद्रिः प्रपुरश्वाप्सात्यकिः ॥ पाषाणयोधिनः शूरान्पतमानानवस्थितान् न्
वधीद्दक्रमाह्सांस्त दद्भुतमिवाभवत् ॥ ततः पुनस्तु संनूयते अमहर्षीः समततः ॥ अयाहस्ताः शूलहस्ताः दरदास्त
गणाः खसाः ॥ लंपाकाश्च कुलिंदाश्च चिक्षिपुस्तांश्च सात्यकिः ॥ नाराचैः प्रतिचिच्छेद प्रतिपत्तिविशारदः ॥ अद्रीणां भि
द्यमानानां मंतरिक्षे शितैः शरैः ॥ शब्देन प्राद्रवन्संख्ये रथाश्वगजपत्तयः ॥ अश्ममहं देवाकीर्णमन्युष्यगजवाजिनः ॥
नाशक्नुवन्नवस्थातुं भ्रमरैरिव दंशिनाः ॥ हतशिष्टाः सुरुधिरा भिन्नमस्तकपिंडिकाः ॥ कुंजरा वर्जयामासुर्युयुधानरथं
तदा ॥ ततः शब्दः समभवत्तव सैन्यस्य मारिष ॥ माधवेनार्द्यमानस्य वपवरिग ॥ तंशब्दं तुमुलं श्रुत्वा द्रोणो यंतारमब्रवीत्
एषस्तरणक्रुद्धः सात्वतानां महारथः ॥ दारयन्बहुधा सैन्यं रणे चरति कालवत् ॥ यत्र शब्दस्तु तत्रास्त्र सृत रथं न
य ॥ पाषाणयोधिभिर्नूनं युयुधानः समागमत् ॥ तथा हि रथिनः सर्वे ह्रियन्ते विद्रुतैर्हयैः ॥ विशस्त्रकवचा रुग्णास्तत्र तत्र
पतंति च नरा भुवि ॥ न शक्नुवन्ति यंतारः संयंतुं तुमुले हयान् ॥ इत्येतद्वचनं श्रुत्वा भारद्वाजस्य सारथिः ॥ प्रत्युवाच ततो द्रोणं ॥

स्यात्तनुद्द४

समाधस्व आदिश।।

द्रोण० सर्वशस्त्रभृतांवरं।।सैन्यं द्रवति चाप्युग्रं कौरवेयं समंततः।।पद्मपयोधमत्रगोनम्रान्ध्नवतांवितनतस्तानः।।इ
मिचसंदृताःशूराःपांचालिःपांडवैःसह।वामिवदिशिघांसंतश्चाद्रवंतिसमंततः।।तत्रकार्यंसमाधस्वप्रा
प्तकालमरिंदम।स्थानंवागमनंवापिद्रंमातस्मात्सात्यकिः।।तथाचवदतस्तस्यभारद्वाजस्यमारिषेः।प्रत्यद्
श्यततशैनेयोनिघ्नन्रथवरान्।।तवध्यमानाःसमरेयुयुधाननतेनवैः।।युक्तस्त्वयंसंचरन्तीद्रोणानीकाय
ऽद्रुद्रुवुः।।येसुदुःशासनःस्वसैःसार्द्धमन्वद्रवत्तेनैतानाःममकायतेसर्वद्रोणरथंप्रति।। ।।द्रोणपर्वणि
सात्यकिप्रवेशे।। ।।संजयउवाच।। ।।दुःशासनरथंदृष्ट्वासमीपपर्यवस्थितंभारद्वाजस्ततोवाक्यं
दुःशासनमथाब्रवीत्।दुःशासनरथाःसर्वेकस्मादेतेप्रविद्रुताः।।कच्चित्क्षेमंतुनृपतेःकच्चिज्जीवतिसैं
धवः।।राजपुत्रोभवानत्रराजभ्राताऽमहारथः।।युद्धाद्द्रवसिकस्मात्त्वंयौवराज्यमवाप्यहि।दासीजितासिद्यू
तेत्वंयथाकामचरीतव।वाससांवाहिकाराज्ञोभ्रातुर्ज्येष्ठस्यमेभव।नसंतिपतयःसर्वेतेद्यषंढतिलैःसमाः।
दुःशासनैवमुक्त्वात्वंपूर्वंकस्मात्पलायसे।स्वयंवैरंमहत्कृत्वापंचालैःपांडवैस्तथा।एकंसात्यकिमासाद्य
कस्माद्भीतोसिसंयुगे।नजानीषेपुरात्वंतुगृह्णन्नक्षान्दुरोदरे।शराह्येतेभविष्यंतिदारुणाशीविषोपमाः।। १२५
अप्रियाणांचवचनंपांडवेषुविशेषतः।।द्रौपद्याश्चपरिक्लेशस्त्वन्मूलोह्यभवत्पुरा।क्वतेमानश्चदर्पश्चक

मामसंप्रावनीचां।।

चतद्गर्जितं।आशीविषसमान्पार्थान्कोपयित्वाक्वयास्यसि।शोच्येयंभारतीसेनाराजाचैवसुयोधनः।।यस्यत्वं
कर्कशोभ्रातापलायनपरायणः।।ननुनामत्वयावीरदीर्यमाणाभयार्दिता।स्वबाहुबलमास्थायरक्षितव्यावरूथि
नी।सत्वमद्यरणंत्यक्त्वाभीतोहर्षयसेपरान्।विद्रुतेत्वयिसैन्यस्यनायकेशत्रुसूदन।कोन्यःस्थास्यतिसंग्रामेभी
तोभीतेव्यपाश्रये।।एकेनसात्वतेनाद्ययुध्यमानस्यचानघ।पलायनेतवमतिःसंग्रामाद्धिप्रवर्त्तते।यदागांडीवध
न्वानंभीमसेनंचकौरव।युधिद्रष्टासिचायमौतदाकिंवैकरिष्यसि।एतेफाल्गुनबाणानांसूर्याग्निसमतेजसां।न
तुल्याःसात्यकिशरायेभ्योभीतःपलायसे।यदितावत्कृताबुद्धिःपलायनपरायणा।पृथिवीधर्मराजायशमेनैवप्रदी
यतां।यावत्फाल्गुननाराचानिर्मुक्तोरगसंनिभाः।नाविशंतिशरीरंतेतावत्संशाम्यपांडवैः।यावत्तेपृथिवीं
पार्थाहत्वाभ्रातृशतंरणे।नाक्षिपंतिमहात्मानस्तावत्संशाम्यपांडवैः।यावन्नक्रुध्यतेराजाधर्मपुत्रोयुधिष्ठिरः
।।कृष्णश्चसमरश्लाघीतावत्संशाम्यपांडवैः।यावद्भीमोमहाबाहुर्विगाह्यमहतींचमूं।सोदरांस्तेनगृह्णातितावत्
संशाम्यपांडवैः।पूर्वमुक्तश्चतेभ्रातानीष्मेणससुयोधनः।अजेयाःपांडवाःसंख्येसौम्यसंशाम्यतैःसह।नचतत्
कृतवान्मंदस्तवभ्रातासुयोधनः।सयुद्धेधृतिमास्थायपत्नात्युध्यस्वकौरव।गच्छतूर्णंरथेनात्रयत्रतिष्ठतिसात्य

द्रोण

क्षिप्रं त्वया हीनं बलं ह्येतद्विद्रविष्यति भारत। आत्मार्थं योधय द्रोणं सात्यकिं सत्यविक्रम। एवमुक्तस्तव सुतो नो
वाच यत्किंचिद्दृश्यामि। श्रुतमप्यश्रुतं कृत्वा प्रायाद्येन स सात्यकिः। सिनेनैव महता युक्तो नागानामनिवर्त्तिनां। आ
साद्य च रणे यत्तो युयुधानमयोधयत्। द्रोणोपि रथिनां श्रेष्ठः पांचालान्पांडवांस्तथा। अभ्यद्रवत्सुसंक्रुद्धो
जवमास्थाय मध्यमं। प्रविश्य च रणे द्रोणः पांचालानामनीकिनीं। द्रावयामास योधान्वै शतशोथ सहस्रशः। त
तो द्रोणो महाराज नाम विश्राव्य संयुगे। पांडुपांचालमत्स्यानां प्रचक्रे कदनं महत्। तं जयंतमनीकानि भारद्वाजं त
तस्ततः। पांचाल्यपुत्रो बलवान्वीरकेतुः समभ्ययात्। स द्रोणं पंचभिर्विद्ध्वा बाणैः सन्नतपर्वभिः। ध्वजमेकेन विव्या
ध सारथिं चास्य सप्तभिः। तत्राद्भुतं महाराज दृष्टवानस्मि संयुगे। यद्द्रोणो रभसो युद्धे पांचाल्यं नाभ्यवर्त्तत। सन्निरु
द्धं रणे द्रोणं पांचाल्या वीक्ष्य मारिष। आवव्रुः सर्वतो राजन् धर्मराजजयैषिणः। ते शरैरग्निसंकाशैस्तोमरैश्च स
हस्रशः। शस्त्रैश्च विविधै राजन्द्रोणमेकमवाकिरन्। निहत्य तान्बाणगणान्द्रोणो राजन्समंततः। महाजलधरान्व्यो
म्नि मातरिश्वा विवानिव। ततः शरं महाघोरं सूर्यपावकसन्निभं। संदधे परवीरघ्नो वीरकेतो रथं प्रति। स भित्त्वा तु शरो १९६
राजन्पांचाल्यकुलनंदनं। अभ्यगाद्धरणीं तूर्णं लोहितार्द्रो ज्वलन्निव। ततोपतद्रथात्तूर्णं पांचाल्यकुलनंदनः॥

पर्वताग्रादिव महान्चंपको वायुपीडितः। तस्मिन्हते महेष्वासे राजपुत्रे महारथे। पांचालास्त्वरिता द्रोणं समंतात्पर्यवा
रयन्। चित्रकेतुः सुधन्वा च चित्रवर्मा च भारत। तथा चित्ररथश्चैव व्यसनकर्शिताः। अभ्यद्रवंत सहिता भारद्वाजं
युयुत्सवः। मुंचंतः शरवर्षाणि वर्षास्विव बलाहकाः। स वध्यमानो बहुधा राजपुत्रैर्महारथैः। क्रोधमाहारयत्ते
षामभावाय द्विजर्षभः। ततः शरमयं जालं द्रोणस्तेषामवासृजत्। ते हन्यमाना द्रोणस्य शरैराकर्णचोदितैः। कर्त्तव्यं ना
भ्यजानन्वै कुमारा राजसत्तम। तान्विमूढान्रणे द्रोणः प्रहसन्निव भारत। व्यश्वसूतरथांश्चक्रे कुपितः कंकपत्रिभिः। अ
थापरैः सुनिशितैस्तेषां भल्लैर्महायशाः। पुष्पाणीव विचिन्वानस्तदुत्तमांगान्यपातयत्। ते रथेभ्यो हताः पेतुः क्षितौ
राजन्सुवर्चसः। देवासुरे पुरा युद्धे यथा दैतेयदानवाः। तान्निहत्य रणे राजन्भारद्वाजः प्रतापवान्। कार्मुकं भ्रामया
मास हेमपृष्ठं दुरासदं। पांचालान्निहतान्दृष्ट्वा देवकल्पान्महारथान्। धृष्टद्युम्नो भृशं क्रुद्धो नेत्राभ्यामश्रुपातयत्। अभ्य
वर्त्तत संग्रामे क्रुद्धो द्रोणरथं प्रति। ततो हा हेति सहसा नादः समभवन्नृप। पांचालेन रणे दृष्ट्वा द्रोणमावरितं शरैः।
स छाद्यमानो बहुधा पार्षतेन महात्मना। न विव्यथे ततो द्रोणः स्मयन्निव व्ययुध्यत। ततो द्रोणं महाराज पांचाल्यः क्रोध
मूर्छितः। आजघानोरसि क्रुद्धो नवत्या नतपर्वणां। स गाढविद्धो बलिना पार्षतेन द्विजर्षभः। निषसाद रथोपस्थे क

द्रोण द्यमलं च जगामह।।तं वितथागतं दृष्ट्वा धृष्टद्युम्नप्रतापवान्।।समुत्सृज्य धनुस्तूर्णमसिं जग्राह वीर्यवान्। अवप्लुत्य रथा
च्चैव त्वरितः स महारथः॥ आरुरोह रथं तूर्णं भारद्वाजस्य मारिष। हर्तुमिच्छञ्छिरः कायात्क्रोधसंरक्तलोचनः। लब्धसं
स्त्रतो द्रोणश्चापमादाय वीर्यवान्। आसन्नमागतं दृष्ट्वा धृष्टद्युम्नं जिघांसया। शरैर्वैतस्तिकै राजन्विव्याधासन्नयो
धिभिः॥ योधयामास समरे धृष्टद्युम्नं महारथं।ते हि वैतस्तिका नाम शरा आसन्नयोधिनः॥ द्रोणस्य विदिता राजन्धृष्टद्यु
म्नमाक्षिणोत्। स वध्यमानो बहुभिः सायकैस्तैर्महारथः॥ हतसंकल्पस्तु विष्टः प्राद्रवच्च रथं प्रति। ततः स्वरथमारु
ह्य प्रगृह्य च महद्धनुः॥ विव्याध समरे द्रोणं कंकपत्रैः शिलाशितैः। द्रोणश्चापि महाराज शरैर्विव्याध पार्षतं। तदद्भुतम
भूद्युद्धं द्रोणपांचाल्ययोस्तदा। त्रैलोक्यकांक्षिणोरासीच्छक्रप्रह्रादयोरिव। मंडलानि विचित्राणि यमकानीतराणि च
। चरंतौ युद्धमार्गज्ञौ ततक्षतुरथेषुभिः। मोहयंतौ मनांस्याजौ योधानां द्रोणपार्षतौ। सृजंतौ शरवर्षाणि वर्षास्विव
बलाहकौ। छादयंतौ महात्मानौ शरैर्व्योम दिशो महीं। तदद्भुतं तयोर्युद्धं भूतसंघा ह्यपूजयन्। क्षत्रियाश्च महारा १३३
ज ये चान्ये तत्र सैनिकाः॥ अवश्यं समरे द्रोणो धृष्टद्युम्नेन संगतः। वशमेष्यति नो राजन्पांचाला इति चुक्रुशुः॥ द्रोणस्तु
त्वरितो युद्धे धृष्टद्युम्नस्य सारथेः॥ शिरः प्रच्यावयामास फलं पक्वं तरोरिव। ततस्ते प्रद्रुता वाहाः॥ पार्षतस्य महात्मनः।

तेषु प्रद्रुतेष्वश्वेषु पांचालान्सृंजयांस्तथा। व्यद्रावयच्छरैर्द्रोणस्तत्र तत्र पराक्रमी॥ विजित्य पांडुपांचालान्भारद्वाजप्र
तापवान्। स्वं व्यूहं पुनरास्थाय प्रत्यतिष्ठदरिंदमः। न चैनं पांडवा युद्धे जेतुमुत्सेहिरे तदा॥ ॥ द्रोणपर्वणि जयद्रथवधे
सात्यकिप्रवेशे॥ ॥संजय उवाच॥ ॥ ततो दुःशासनो राजन्शैनेयं प्रत्यवारयत्। रथव्रातेन महता नानादेशोद्भ
वेन हा सर्वतो भरतश्रेष्ठ विसृजन्सायकान्बहून्। पर्जन्य इव घोषेण नादयन्वै दिशो दिशः। तमापतंतमालोक्य सा
त्यकिः कौरवं रणे। अभिद्रुत्य महाबाहुश्छादयामास सायकैः। ते छाद्यमाना बाणौघैर्दुःशासनपुरोगमाः॥ प्राद्र
वन्समरे भीतास्तव पुत्रस्य पश्यतः। तेषु द्रवत्सु राजेंद्र पुत्रो दुःशासनस्तव। तस्थौ व्यपेतभी राजन्सात्यकिं चार्दयच्छरैः
। चतुर्भिर्वाजिनस्तस्य सारथिं च त्रिभिः शरैः। सात्यकिं च शतेनाजौ विद्ध्वा नादं मुमोच सः॥ ततः क्रुद्धो महाराज माधव
स स्तस्य संयुगे। रथं सूतं ध्वजं तं च चक्रेऽदृश्यमजिह्मगैः॥ मशकं समनुप्राप्तमूर्णनाभ इवोर्णया। त्वरन्समावृणोद्बाणैर्दुः
शासनमरिंदमं। दृष्ट्वा दुःशासनं राजा तथा तं शरचितं। त्रिगर्तांश्चोदयामास युयुधानरथं प्रति। ते गत्वा युयुधा
नस्य समीपं क्रूरकर्मिणः। त्रिगर्तानां त्रिसाहस्रा रथा युद्धविशारदाः। तं तु ते रथवंशेन महता पर्यवारयन्। स्थिरां कृत्वाम

तिं प्रमुहे मरणाय प्रत्यज्यायवा। तेषामापततां संख्ये शरवर्षाणि मुञ्चतां। योधानां त्वरमाणानां सुख्यानां यातीके व्यपोथ्य यत्नानिपतं
न्निहता बाणैः सात्वतस्य नराधिप। महामारुतवेगेन सम्भग्ना इव सद्रुमाः। राथिस्थाः कुञ्जिस्थाः निष्ठाः जिह्वैव विद्यापते। हयै
स्थकनकापीडैः पतितैस्तत्र मेदिनी। छिन्नैर्यशरसंकुलैः शोणितौघपरिप्लुतिः। शुशुभे हतम महाराज किंशुकैरिव पुष्पितै
ः। ते वध्यमानाः समरे युयुधानेन तावकाः। त्रातारं नाध्यगच्छन्त पंकमग्ना इव द्विपाः। ततस्ते पर्य्यवर्त्तन्त सर्वे द्रोणरथं प्रति
। भयात् पतगराजस्य गर्त्तानीव महोरगाः। ततस्तान्हतविध्वस्तान् कृत्वा योधान्सहस्रशः। प्रायाच्छ्रानकिवीरो धनंजयर
थं प्रति। तं प्रयान्तं नरश्रेष्ठं पुत्रो दुःशासनस्तव। विव्याध नवभिस्तूर्णं शरैः सन्नतपर्वभिः। स तु तं प्रति विव्याध पंचभिर्निशि
तैः शरैः। रुक्मपुंखैर्महेष्वासो गार्ध्रपत्रैरजिह्मगैः। सात्यकिं तु महाराज प्रहसन्निव भारत। दुःशासनस्त्रिभिर्विद्ध्वा पु
नर्विव्याध पञ्चभिः। शैनेयस्तव पुत्रं तु विद्ध्वा पंचभिराशुगैः। धनुश्चास्य रणे छित्वा विस्मयन्नर्जुनं ययौ। ततो दुःशासनः क्रु
द्धो वृष्णिवीर... प्रयावते। सर्वपारशवीं शक्तिं विससर्ज जिघांसया। तां तु शक्तिं तदा घोरां तव पुत्रस्य सात्यकिः। चिच्छेद शतध १७८
राजन्निशितैः कंकपत्रिभिः। अथान्यद्धनुरादाय पुत्रस्तव जनेश्वर। सात्यकिं दशभिर्विद्ध्वा सिंहनादं चकार ह। सात्यकिस्तु र

णे क्रुद्धो मोहयित्वा सुतं तव। शरैरग्निशिखाकारैराजघानस्तनान्तरे। सर्वायसैस्तीक्ष्णवक्त्रैः पुनर्विव्याध चाष्टभिः
। दुःशासनस्तु विंशत्या शरैः सात्यकिमार्दयत्। सात्वतोपि महाराज तं विव्याध स्तनान्तरे। त्रिभिरेव महावेगैः शरैः सन्नत
पर्वभिः। ततोस्य वाहान्निशितैस्सूतं जिरवधीच्छरैः। सारथिं तु सुसंक्रुद्धस्त्रिभिः सन्नतपर्वभिः। धनुरेकेन भल्लेन हस्ता
वापं च पंचभिः। ध्वजं च रथशक्तिं च भल्लाभ्यां परमास्त्रवित्। चिच्छेद विशिखैस्तीक्ष्णैस्तथोभौ पार्ष्णिसारथी। स विच्छिन्नधनुश्चा
विरथो हताश्वो हतसारथिः। सच्छिन्नधन्वा विरथो हताश्वो त्रिगर्तसेनापतिना स्वरथेनापवाहितः। तं प्राप्य समपि शैनेयः प्रद्रुतं तु
दुःशासनं रणे। शिनेयो नरतश्रेष्ठ भीमसेनवचः स्मरन्। भीमसेनेन हि वधः पुत्राणां तव भारत। प्रतिज्ञातः सभामध्ये सर्वेषा
मेव संयुगे। तथा दुःशासनं जित्वा सात्यकिः सुधवीर्यवान् जगाम त्वरितो राजन्येन यातो धनंजयः॥ ॥ इति द्रोणपर्वणि ज
यद्रथवधे सात्यकिप्रवेशे॥ ॥धृतराष्ट्र उवाच॥ ॥किं तस्यां मम सेनायां नासन्केचिन्महारथाः। ये न यां सात्यकिं यां
तं निवार्य्याप्यवारयन्। यत्कृतं हस्तिवीरेण कर्म संग्रामे रणे। नित तु सहते कर्त्तुं कर्म शक्रोपि संजय। अश्रद्धेयमचिं
त्यं च कर्म तस्य महात्मनः। वृष्ण्यन्धकप्रवीरस्य श्रुत्वा मे व्यथितं मनः। एकेन बहुला सेना यथा तासुदिता रणे। न संतित

३१

त्र्याकृतेषुसमुचितेषु॥

स्मात्तुत्वामेवपृच्छामिसंजयतात्पर्यसमकथंयुध्यमानानामभिक्रांतोमहात्मनां।एकोवकुंतांविनेयस्तन्ममाचक्ष्वसंजय॥ ॥संज
यउवाच॥ ॥राजन्बलसमुद्योगोरथनागाश्वपत्तिमान्तुमुलस्तवसेनायांक्षत्रियाणांनदानवत।आरुतेषुसमस्तेषुन
वासिन्यस्यमारिषा।नास्तिलोकेसमःकश्चित्समूहइतिमेमतिः।तत्रदेवाःस्मनाथंतेचारणाश्चसमागताः।एतदंताःसमूहा
विभविष्यंतिमहीतले।नचैवतादृशःकश्चिद्व्यूहआसीद्विशांपते।याद्दग्जयद्रथवधेद्रोणेनविहितोभवत।चंडवातानिप
न्नानांसमुद्राणामिवस्वनः।रणेभवद्बलौघानामन्योन्यमभिधावतां।पार्थिवानांसमेतानांवकुन्यासंस्तवानद्यासैन्यानि
पांडवानांवशान्तवोघ्नसहस्रशः।संरब्धानांप्रवीराणांसमरेदृढकर्मणां।तत्रासीत्सुमहान्शब्दस्तुमुलोलोमहर्षणः।
अथाक्रंदीद्भीमसेनोधृष्टद्युम्नश्चपार्षतः।नकुलःसहदेवश्चधर्मराजश्चपांडवः।आगच्छतप्रहरतद्रुतंविपरिक्षवता।प्रवि
ष्टावरिसेनांतांवीरोफाल्गुनमाधवौ।यथाशुस्थवगवेतांजयद्रथवधेप्रति।तथाप्रकुरुतक्षिप्रमितिसैन्यान्यचोदयन्।
तयोरभावेकुरवःकृतार्थाःस्युर्वयंजिताः।तेयूयंसहितान्तूत्वातूर्णमेतद्बलार्णवं।क्षोभयध्वंमहावेगाःपवनाःसागरंयथा।
।भीमसेनेनतेराजन्पांचालैनिचवोदिताः।आजघ्नुःकौरवान्संख्येत्यक्त्वासन्नात्मनःप्रियान्।इच्छंतोनिधनंयुद्धेशस्त्रैरुत्तमतेजसः। १३५
स्वर्गेप्सवोमित्रकार्येनाभ्यरक्षंतजीवितं।तथैवतावकाराजन्प्रार्थयंतोमहद्यशः।आर्यांयुद्धेमतिंकृत्वायुद्धायैवावत
स्थिरे।तस्मिंस्तुतुमुलेयुद्धेवर्तमानेभयावहे।जित्वासर्वाणिसैन्यानिप्रायात्सात्यकिरर्जुनं।कवचानांप्रभास्तत्रसूर्यरश्मि

लक्ष्म्येतिविशेषणोतृतीयां॥ ॥मद्वेनपन्नेकं॥

विराजिताःदृष्टीःसंख्येसैनिकानांप्रतिजघ्नुःसमंततः।तथाप्रियतमानांपांडवानांमहात्मनां।दुर्योधनोमहाबाहुःर
वगाहेततद्बलं।ससन्निपातस्तुमुलस्तेषांतस्यचभारत।अभवत्सर्वभूतानामभावोकरणोमहान्॥ ॥धृतराष्ट्रउवा
च॥ ॥तथायातेषुसैन्येषुःतथारुग्णगतःस्वयं।कच्चिद्दुर्योधनःसूतनाकार्षीत्पृष्ठतोरणं।एकस्यचबहूनांचसन्नि
२॥ पातोमहाहवे।विशेषतोनृपतेविषमःप्रतिभातिमे।सोत्यंतसुखसंवृद्धोलक्ष्म्यालोकस्यचेश्वरः।एकोबहून्समासाद्य
कच्चिन्नासीत्पराङ्मुखः॥ ॥संजयउवाच॥ ॥राजन्संग्राममाश्चर्यंतवपुत्रस्यभारत।एकस्यबहुभिःसार्द्धंशृणुष्व
गदतोमम।दुर्योधनेनसमरेपृतनापांडवीरणे।नलिनीद्विरदेनेवसमंतात्प्रतिलोडिता।ततस्तांप्रहतांसेनांदृष्ट्वापुत्रेण
तेनृप।भीमसेनपुरोगास्तुपांचालाःसमुपाद्रवन्।सभीमसेनंदशभिःशरैर्विव्याधपांडवं।त्रिभिस्त्रिभिर्यमौवीरौधर्म
राजंचसप्तभिः।विराटद्रुपदौषड्भिःशतेनचशिखंडिनं।धृष्टद्युम्नंचविंशत्याद्रौपदेयांस्त्रिभिस्त्रिभिः।शतशश्चापरान्
योधान्सद्विपान्सरथान्रणे।शरैरवचकर्तोग्रैःक्रुद्धोंतकइवप्रजाः।नसंदधद्विमुंचन्वामंडलीकृतकार्मुकः।अदृ
श्यतरिपून्निघ्नन्शिक्षयास्त्रबलेनवा।तस्यनाविघ्नतःशत्रून्देमपृष्ठंमहद्धनुः।अजस्रंमंडलीभूतंददृशुःसमरेजनाः॥

द्रोण ततो युधिष्ठिरो राजा मद्रात्स्यामपि तद्धनुः॥ तव पुत्रस्य कौरव्य पतमानस्य संयुगे॥ विव्याध चैनं दशभिः सम्यगस्तैः शरोत्तमैः
वर्म चास्य तदा साद्य ते मग्ना क्षितिमाविशन्॥ ततः प्रमुदिताः पार्थाः परिवव्रुर्युधिष्ठिरं॥ यथा वृत्रवधे देवाः पुरा शक्रं महर्द्धय
॥ ततोऽन्यद्धनुरादाय तव पुत्रः प्रतापवान्॥ तिष्ठ तिष्ठेति राजानं ब्रुवन्पांडवमभ्ययात्॥ तमायांतमभिप्रेक्ष्य तव पुत्रं महामृधे।
प्रत्युद्ययुः प्रमुदिताः पांचाला जयगृद्धिनः॥ तान्द्रोणः प्रतिजग्राह परीप्सन्युधि पांडवं॥ चंडवातोद्धुतान्मेघान्गिरिरश्ममयो
यथा॥ तत्र राजन्महानासीत्संग्रामो लोमहर्षणः॥ पांडवानां महाबाहो तावकानां च संयुगे॥ रुद्रस्याक्रीडसदृशः संहारः
सर्वदेहिनां॥ ततः शब्दो महानासीद्यतो यतो धनंजयः॥ अतीव सर्वशब्देभ्यो लोमहर्षकरः प्रभो॥ अर्जुनस्य महाबाहो तावका
नां च धन्विनां॥ मध्ये भारत सिंधुस्य माधवस्य महारणे॥ द्रोणस्यापि परैः सार्द्धं व्यूहद्वारे महारणे॥ एवमेष क्षयो वृत्तः पृथि
व्यां पृथिवीपते॥ क्रुद्धेऽर्जुने तथा द्रोणे सात्वते च महारथे॥ ॥इति जयद्रथवधे सात्यकिप्रवेशः॥ ॥संजय उवाच॥
अपराह्णे महाराज संग्रामः सुमहानभूत्॥ पर्जन्यसमनिर्घोषः पुनर्द्रोणस्य सोमकैः॥ शोणाश्वं रथमास्थाय नरवीरः समा
हितः॥ समभ्ययाद्रणे पांडूञ्जवमास्थाय मध्यमं॥ तव प्रियहिते युक्तो महेष्वासो महारथः॥ चित्रपुंखैः शितैर्बाणैः कलशोत्तमसंभ १८०
वः॥

वरान्वरान्हि योधानां विचिन्वन्निव भारत॥ क्रीडन्निव रणे द्रोणो जघानारीन्वरान्वरान्॥ तमभ्ययाद्बृहत्क्षत्रः कैकयानां म
हारथः॥ भ्रातृणां वै पंचानां ज्येष्ठः समरकर्कशः॥ विमुंचन्विशिखांस्तीक्ष्णानाचार्यं छादयन्भृशं॥ महामेघो यथा वर्षं वि
मुंचन्गंधमादने॥ तस्य द्रोणो महाराज स्वर्णपुंखाञ्शिलाशितान्॥ प्रेषयामास संक्रुद्धः सायकान्दश पंच च॥ तांस्तु द्रोणधनु
र्मुक्तान्क्रुद्धाशीविषसन्निभान्॥ एकैकं पंचभिर्बाणैर्युधि चिच्छेद हृष्टवत्॥ तदस्य लाघवं दृष्ट्वा प्रहस्य द्विजपुंगवः॥ प्रेष
यामास विशिखानष्टौ सन्नतपर्वणः॥ तान्दृष्ट्वा पततस्तूर्णं द्रोणचापच्युताञ्शरान्॥ अवारयच्छरैरेव तावद्भिर्निशितैर्मृधे
॥ ततोऽभवन्महाराज तव सैन्यस्य विस्मयः॥ बृहत्क्षत्रेण तत्कर्म कृतं दृष्ट्वा सुदुष्करं॥ ततो द्रोणो महाराज बृहत्क्षत्रं विशेष
यन्॥ प्रादुश्चक्रे रणे दिव्यं ब्राह्ममस्त्रं सुदुर्जयं॥ कैकेयोऽस्त्रं समालोक्य मुक्तं द्रोणेन संयुगे॥ ब्रह्मास्त्रेणैव राजेंद्र ब्रा
ह्ममस्त्रमशातयत्॥ ततोऽस्त्रे निहते ब्राह्मे बृहत्क्षत्रस्तु भारत॥ विव्याध ब्राह्मणं षष्ट्या स्वर्णपुंखैः शिलाशितैः॥ सारथिं
चास्य बाणेन तृतीयं मर्मसु ताडयत्॥ द्रोणस्तु बहुभिर्विद्धो बृहत्क्षत्रेण मारिष॥ असृजद्विशिखांस्तीक्ष्णान्कैकयस्य
रथं प्रति॥ व्याकुलीकृत्य तं द्रोणो बृहत्क्षत्रं महारथं॥ अश्वांश्चाष्टाभिर्न्यविधीद्ध्वजं चास्य पतत्रिभिः॥ सारथिं चास्य बाणेन

रुस

द्रोण

रथनीडाद्यथाहरता।ताभ्यांध्वजंचबलवांश्चछित्वाभूमावपातयत्॥ततःसाधुविसृष्टेननाराचेनद्विजर्षभः।हृद्यविध्य
ष्टद्युम्नंसचसभिन्नहृदयोपतत्।हृदद्युम्नेहतेराजन्केकयानांमहारथे।चेदिपालिरभिक्रुद्धोयंतारमिदमब्रवीत्।
सारथेयाहियत्रैषद्रोणस्तिष्ठतिदंशितः।विनिघ्नन्केकयान्सर्वान्पांचालानांचवाहिनीं।तस्यतद्वचनंश्रुत्वासारथी
रथिनांवरं।द्रोणायप्रापयामासकांबोजैर्जवनैर्हयैः।धृष्टकेतुश्चेदीनामृषभोतिबलान्वितः।वधायाभ्यद्रव
द्द्रोणंपतंगइवपावकं।सोविध्यततद्रोणंषष्ट्यासाश्वरथध्वजं।पुनश्चान्यैःशरैस्तीक्ष्णैःसुप्तंव्याघ्रंतुदन्निव।तस्य
द्रोणोधनुर्मध्येक्षुरप्रेणशितेनह।चकर्तगार्ध्रपत्रेणयतमानस्यशुष्मिणः।अथान्यद्धनुरादायशिशुपालिर्महा
रथः।विव्याधसायकैर्द्रोणंकंकबर्हिणवाजितैः।तस्यद्रोणोहयान्हत्वाचतुर्भिश्चतुरःशरैः।सारथेश्चशिरःका
यादुच्चकर्तप्रहसन्निव।अथैनंपंचविंशत्यासायकानांसमार्पयत्।अवप्लुत्यरथाच्चैद्योगदामादायसत्वरः।भा
रद्वाजायचिक्षेपरुषितामिवपन्नगीं।तामापतंतीमासाद्यकालरात्रीमिवोद्यतां।अश्मसारमयींगुर्वींतपनीय १८२
विभूषितां।शरैरनेकसाहस्रैर्भारद्वाजोव्यशातयत्।साछिन्नाबहुभिर्बाणैर्भारद्वाजेनमारिष।गदापपातकौर
व्यनादयंतीधरातलं।गदांविनिहतांदृष्ट्वाधृष्टकेतुरमर्षणः।तोमरंव्यसृजद्वीरःशक्तिंचकनकोज्ज्वलां।तोमरंप

चाषःस्वर्णकारः।निष्टानकःकष्टस्वनः।ऊरुग्राहऊरुस्तंभः॥

चनिच्छित्वाशक्तिंचिच्छेदसप्तभिः।तोजग्मतुर्महींछिन्नौसर्पाविवगरुत्मता।ततोस्यविशिखंतीक्ष्णंवधायवधकां
क्षिणः।प्रेषयामाससमरेभारद्वाजःप्रतापवान्।सतस्यकवचंभित्वाहृदयंचामितौजसः।अभ्यगाद्धरणींबाणो
हंसःपद्मवनंयथा।पतंगंहिग्रसेच्चाषोयथाराजन्बुभुक्षितः।तथाद्रोणोग्रसेशूरोधृष्टकेतुंमहाहवे।निहते
चेदिराजेतुतत्खंडंपित्र्यमाविशत्।अमर्षवशमापन्नःपुत्रोस्यपरमास्त्रवित्।तमपिप्रहसन्द्रोणःशरैर्निन्येयमक्ष
यं।महाव्याघ्रोमहारण्येमृगशावंयथाबली।तेषुप्रक्षीयमाणेषुपांडवेयेषुभारत।जरासंधसुतोवीरःस्वयंद्रो
णमुपाद्रवत्।सतुद्रोणंमहाबाहुःशरधाराभिराहवे।अदृश्यमकरोत्तूर्णंजलदोभास्करंयथा।तस्यतल्लाघ
वंदृष्ट्वाद्रोणःक्षत्रियमर्दनः।व्यसृजत्सायकांस्तूर्णंशतशोथसहस्रशः।छादयित्वारणेद्रोणोरथस्थंरथिनांव
रं।जारासंधिंजघानाशुमिषतांसर्वधन्विनां।योयोविलीयतेतत्रतंतंद्रोणोंतकोपमः।आदत्तसर्वभूतानिप्राप्ते
कालेयथांतकः।ततोद्रोणोमहाराजनामविश्राव्यसंयुगे।शरैरनेकसाहस्रैःपांडवेयान्समावृणोत्।तेतुना
मांकिताबाणाद्रोणेनास्ताःशिलाशिताः।नरान्नागान्हयांश्चैवनिजघ्नुःशतशोमृधे।तेवध्यमानाद्रोणेनश
क्रेणेवमहासुराः।समकंपंतपांचालागावःशीतार्दिताइव।ततोनिष्टानकोघोरःपांडवानामजायत।द्रोणेन

द्रोण

वध्यमानेषु सैन्येषु भरतर्षभ।मोहिताश्शरजालेन शारद्वतेन संयुगे॥कुरुयात्तद्गृहीतानां पंचालानां महारथाः।चेद
यश्च महाराज संजयाः काशिकोशलाः॥ अभ्यद्रवत संहृष्टा भारद्वाजं युयुत्सया। ब्रुवंतश्च रणेऽन्योन्यं चेदिपांचालसृं
ञ्जयाः॥ हत द्रोणं हत द्रोणमिति ते द्रोणमभ्ययुः। ते यतंतो नरव्याघ्राः सर्वशक्त्या महाद्युतिं। निनीषवो युधि द्रोणं
यमस्य सदनं प्रति। यतमानांस्ततः शूरान् भारद्वाजः शिलीमुखैः। यमाय प्रेषयामास चेदिमुख्यान्विशेषतः। तेषु प्र
क्षीयमाणेषु चेदिमुख्येषु सर्वशः। पांचालाः समकंपंत द्रोणसायकपीडिताः॥ प्राक्रोशन्भीमसेनं ते धृष्टद्युम्नं च
भारत। दृष्ट्वा द्रोणस्य कर्माणि तथा रूपाणि मारिष। ब्राह्मणेन तपो नूनं चरितं दुश्चरं महत्। तथा हि युधि संक्रुद्धो
दहति क्षत्रियर्षभान्। धर्मो युद्धं क्षत्रियस्य ब्राह्मणस्य परं तपः॥ तपस्वी कृतविद्यश्च प्रेक्षितेनापि निर्दहेत्।
द्रोणास्त्रमग्निसंकाशं प्रविष्टाः क्षत्रियर्षभाः॥ बहवो दुस्तरं घोरं यत्राधक्ष्यंत भारत। यथाबलं यथोत्साहं यथा
सत्वं महाद्युतिः। मोहयन्सर्वभूतानि द्रोणो हंति बलानि नः। तेषां तद्वचनं श्रुत्वा क्षत्रधर्मा व्यवस्थितः। अर्द्धचं
द्रेण चिच्छेद क्षत्रधर्मा महाबलः॥ क्रोधसंविग्नमनसो द्रोणस्य सशरं धनुः॥ स संरब्धस्ततो भूत्वा द्रोणः प्रहरतां वरः। १८२
अन्यत्कार्मुकमादाय वेगवत्तरमाधनं। शरं संधाय कालाग्नं परानीकविदारणं। आकर्णपूर्णमाचार्यो बलवा क॥
नभ्यवासृजत्। स जीवितमुपादाय क्षात्रद्युम्नेः शरोत्तमः। आशीविष इव क्रुद्धो जगाम धरणीतलं। स भिन्नहृदयो वाहात्पपत
मेदिनीतले॥

आसंनं त्वपगतं कस्माद्द्रोणो वृद्धं यस्य। वयसा कालपिंडसंयोगतः अशीतिका परः अति हद्दतः॥ अशीतिपंचकः चतुःश

नतः सैन्यान्यकंपंत धृष्टद्युम्नसुते हते। अभ्यद्रोणं समासाद्य चेकितानो महारथः॥ व्यसृजत्समरे बाणान् त्रस्तमिव द्वि
षामया। साश्वग्राणं दशभिर्बाणैः प्रत्यविध्यत्तेनान्तरा। पंचभिः सारथिं चास्य चतुर्भिश्चतुरो हयान्। तमाचार्यस्त्रि
भिर्बाणैर्बाह्वोरुरसि चार्दयत्। ध्वजं सप्तभिरुन्मथ्य यंतारमवधीत्त्रिभिः। तस्य सूते हते तेऽश्वा रथमादाय विद्रुताः॥
समरे शरसंवीता भारद्वाजेन भारत। चेकितानरथं दृष्ट्वा विद्रुतं हतसारथिं। पांचालाः पांडवाश्चैव महद्भयमथावि
शत्। तान्समंतात्रणे शूरांश्चेदिपांचालसृंजयान्। समंताद्द्रावयन्द्रोणो बह्वशोभत भारत। आकर्णपलितः श्यामो वयसा आसंनपादः
॥कापरःपा शीतिपंचकः। रणे पर्यचरद्द्रोणो वृद्धः षोडशवर्षवत्। अथ द्रोणं महाराज विचरंतमभीतवत्। वज्रहस्तममन्यंत शा
वः॥ त्रवः शत्रुसूदन। ततोऽब्रवीन्महाराज द्रुपदो बुद्धिमान्नृप। संरब्धान्क्षत्रियान्दृष्ट्वा व्याघ्रः क्षुद्रमृगानिव। कृच्छ्रान्दुर्योधनो
कोपात्पा लोकान्पापः प्राप्स्यति दुर्मतिः। यस्य लाभाद्धि निहता बलिनः क्षत्रियर्षभाः। शतशः शेरते भूमौ निकृत्ता गोवृषा इवा रु
वः॥ धिरेण परिक्लिन्नाः श्वशृगालादनीकृताः। एवमुक्त्वा महाराज द्रुपदोऽक्षौहिणीपतिः। पुरस्कृत्य रणे पार्थान्द्रोणमा
भ्यद्रवद्द्रुतं॥ द्रोणपर्वणि जयद्रथवधे सात्यकिप्रवेशः॥ संजय उवाच॥ व्यूहेष्वालोड्यमानेषु पांडवा
नां ततस्ततः। सुदूरमन्वयुः पार्थाः पांचालाः सोमकैः सह। वर्तमाने तथा रौद्रे संग्रामे लोमहर्षणे। प्रक्षय
ताश इति वा पार्थान्नपनयत्॥

वानरर्षभलक्षणं वानरध्वजं॥ व्रवातरकेननमितिपावेवा॥ सत्योहृढप्रतिज्ञः॥

जगतस्त्रीडसुगांत इव स्तारत। द्रोणे युधि पराक्रांते तन्दीमाने सुकुर्वेषु॥ वध्यमानेषु योधेषु पांडवेयेषु भारत। नापश्य-
रथं कंचिद्धर्मराजो युधिष्ठिरः॥ चिंतयामास धर्मात्मा कथमेतद्भविष्यति॥ स तावीत्पदिशः सर्वाः सव्यसाचिदिदृक्षया॥
युधिष्ठिरो ददर्शाथ नैव पार्थं न माधवं॥ सो पश्यन्नरशार्दूलं वानरर्षभलक्षणं। गांडीवस्य च निर्घोषमश्रुण्वद्व्यथि-
तेंद्रियः॥ अपश्यन्सात्यकिं चैव वृष्णीनां प्रवरं रथं॥ चिंतयाभिपरीतांगो धर्मराजो युधिष्ठिरः॥ नाध्यगच्छत्तदा शांतिं
तावपश्यन्नरर्षभौ॥ लोकोपक्रोशभीरुत्वाच्चिंतयामास महायशाः॥ अचिंतयन्महाबाहुः शैनेयस्य रथं प्रति। प्रहितो
प्रितश्चैव फाल्गुनस्य मया हृष्टे गतः स पुरुषव्याघ्रो मित्राणामभयंकरः॥ द्वे च चित्ते मिदं मेद्य यथा यै सात्यकोयाः कृता सात्य-
किश्चाहिमजयः पांडवश्च धनंजयः॥ सात्यकिं प्रेषयित्वा तु पांडवस्य पदानुगं॥ सात्वतस्यापि कं युद्धे प्रेषयिष्ये पदानुगं
॥ करिष्यामि प्रयत्नेन भ्रातुरन्वेषणं यदि। युयुधानमनन्विष्य लोको मां गर्हयिष्यति॥ भ्रातुरन्वेषणं कृत्वा धर्मराजो युधिष्ठिरः
बा२ परित्यजति वार्ष्णेयं सात्वतं सत्यविक्रमं॥ बालाकोपरागभीरुत्वात्सोहं पार्थं वृकोदरं॥ प्रेषयिष्यामि माधवस्य महा- १८३
त्मनः॥ यथैव च मे प्रीतिरर्जुने शत्रुसूदने॥ तथैव वृष्णिवीरेपि सात्वते युद्धदुर्मदे॥ अतिभारे नियुक्तश्च मया शैने- यु

सात्वतं प्रति च तिविस्मृतं न कृतिनिन्द्य नयः॥

यनेहनः॥ स तु मित्रोपरोधेन गौरवाच्च महानघः॥ प्रविष्टो भारतीं सेनां मकरः सागरं यथा॥ असौ हि श्रूयते शब्दः शूराणा-
मनिवर्तिनां॥ मिथः संयुध्यमानानां वृष्णिवीरेण धीमता॥ प्राप्तकालं हि बलवन्निश्चित्य बहुधा हि मे॥ तत्र वे पांडवे-
यस्य भीमसेनस्य धन्विनः॥ गमनं रोचते मह्यं यत्र यातौ महारथौ॥ न चाप्यसह्यं भीमस्य विद्यते भुवि किंचन॥ शक्तो एष
रणे हंतुं पृथिव्यां सर्वधन्विनः॥ स्वबाहुबलमास्थाय प्रतिव्यूहमरिंदमः॥ यस्य बाहुबलं सर्वे समाश्रित्य महात्मनः॥ वनवा-
सान्निवृत्ताः स्मो न च युद्धेषु निर्जिताः॥ इतो गते भीमसेने सात्वतं प्रति पांडवे॥ सनाथौ भविता रो हि युधि सात्वतफाल्गु-
नौ॥ काममशोचनीयौ तौ रणे फाल्गुनसात्यकी॥ रक्षितौ वासुदेवेन स्वयं शस्त्रविशारदौ॥ अवश्यं तु मया कार्यमा-
त्मनः शोकनाशनं॥ तस्माद्भीमं नियोक्ष्यामि सात्वतस्य पदानुगं॥ ततः प्रतिकृतं मन्ये विधानं सात्वतं प्रति॥ एवं निश्चित्य म-
नसा धर्मपुत्रो युधिष्ठिरः॥ यंतारमब्रवीद्राजा भीमं प्रति नयस्व मां॥ धर्मराजवचः श्रुत्वा सारथिर्हयकोविदः॥ रथं हेमप-
रिष्कारं भीमांतिकमुपानयत्॥ भीमसेनमनुप्राप्य प्राप्तकालमनुस्मरन्॥ कश्मलं प्राविशद्राजा बहु तत्र समादिशन्॥ स कश्-
मलं समाविष्टो भीममाहूय पार्थिवः॥ अब्रवीद्वचनं राजा कुंतीपुत्रो युधिष्ठिरः॥ यः स देवान्सगंधर्वान्दैत्यांश्चैकरथोजय-
त्॥ तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते॥ तमब्रवीन्महाबाहुः कुंतीमासनो युधिष्ठिरं॥ नैवाद्राक्षं न चाश्रौषं तव क-

चकोरनेत्रो रक्तांतायतनयनः। ताम्रास्यो रक्तगौरश्च सुखः॥ विध्यच्छिपः॥

द्रो० समजमीढस्य। पुरा हि पुरुषव्याघ्राणिनिंमवाचोरत्नरायणं। अविहत्यस्य कौंतेय युधः कृत्यमनंतरं न ह्यकार्यमिमं धर्मं वा विद्यते मम मा
नदराज्ञा-ज्ञायस्कृकृष्णेच्छया। हि किंकर वाणी। तामपिस्थित नरव्याघ्र माच शोक मनः कृथाः। नम ब्रवीद्युस्तु हृस्सीः कृष्णो राजश्व
श्वसन्नामीमसत्तमिदं वाक्यं प्रह्लानवदनो हयः। यथा लिपां च तन्यस्पृष्टाय तानिन्दोमहाज्ञः। हृशितावास्तु दावनसंरक्षेनतर
२४ स्त्रिवानो। हनमरुदतः। शोततवन्यानो धनंजयः। अस्मिन्त्रिनिहितं हृनं युध्यतां सो जनो हि नः। यस्य सत्त्ववतां वीर्यं स्तुपजीवं
तिपांडवाः। यं न यथेश्निगवंति सत्त्वाहि मिवामराः। स सुरासेयवधे सुरविद्याश्रारतीवह। तस्य विगमनं वि प्रोमी मनावन्नी
नं पुनः। यया मोसुवासुदाकेशो दर्शनी योमहासुज। सूहोरस्कोहृ पस्कंधो मत्तवारणविक्रमः। चकोरनेत्रस्ताम्रास्यो विषता भा
मयवर्ज्जितात दिदं ममनंत। तथा कस्मान मरिदमाः अर्जुनो यो महावादोसावतस्य चकारणात्। वर्द्धते हविषे वाग्निरिध्यमा
नः पुनः पुनः। तस्य लक्ष्मणपश्यामि तेन विदामि कश्मलं। तं तिष्ठि पुरुषव्याघ्रं सावृतं च महारथं। स तं महारथं प्र
त्यादस्त्रमातस्तयातुजं। नमपश्यन्महाबाहुम दंविंदा मिकश्मलं। यत्र तस्मिन्हतिचेवृष्टध्यानतरं समय
रणा। सहायायानास्य विकृश्चि न्नविंदामि कश्मलं। तस्मिन्नकृप्सादृतत्रहनं युध्यते रणे। का विदः। यस्य।
वीर्यवतां वीर्यं पपजीवंति पांडवाः। नहि दृष्ट्वा ध्यतिमनावत्यायारवपरंतप। सतत्र गच्छ कौंतेय १८४

सविदंज्ञापनं। श्वेतेषितं श्वेतिश्यितं। द्विशाश्वेनिपुरवीकरणे। एवं मनंतरोक्तं॥

यत्रयातो धनंजयः। सात्यकिश्च महाबाहुः कर्त्तव्यं यदिमन्यसे। वचनं मम धर्मज्ञ ज्येष्ठो भ्राता भवामि ते। न तेर्जुनस्तथा ज्ञेयो
ज्ञातव्यः सात्यकिर्यथा। चिकीर्षुर्मत्प्रियं पार्थं प्रयातः सव्यसाचिनः। पदवीं दुर्गमां घोरामगम्यामकृतात्मभिः। दृष्ट्वा कुशलि
नौ कृष्णौ सात्वतं चैव सात्यकिं। संविदं मम कुर्यास्त्वं सिंहनादेन पांडव॥ ॥भीमसेन उवाच॥ ॥ब्रह्मेशानेन्द्रवरुणान
वहद्यः पुरा रथः। तमास्थाय गतौ कृष्णौ न तयोर्विद्यते भयं। आज्ञां तु शिरसा बिभ्रदेष गच्छामि मा शुचः। समेत्य तान्नरव्या
घ्रांस्तव दास्यामि संविदं॥ ॥संजय उवाच॥ ॥एतावदुक्त्वा प्रययौ परिदाय युधिष्ठिरं। धृष्टद्युम्नाय बलवान्सुहृद्य
श्च पुनः पुनः। पार्षतं चाब्रवीद्वीरो भीमसेनो महाबलः। विदितं ते महाबाहो यथा द्रोणो महारथः। ग्रहीतुं धर्मराजं वै सर्वो
पायैरतीप्सति। नचमे गमने कृत्यं तादृक्पार्षत विद्यते। यादृक्संरक्षणे राज्ञः कृत्यतमं हि नः। एवमुक्तोस्मि पार्थे
न प्रतिवक्तुं च नोत्सहे। धर्मराजस्य वचने स्थातव्यमिति पार्षत। यास्यामि पदवीं भ्रातुः सात्वतस्य च धीमतः। सोद्य यत्तो र
ए णे वीर परिरक्ष युधिष्ठिरं। एतद्धि सर्वकृत्यानां परमं कृत्यमाहवे। तमब्रवीन्महाबाहुर्धृष्टद्युम्नो वृकोदरं। ईप्सितं ते क
रिष्यामि गच्छ पार्थाविचारयन्। नामयित्वा जीवतिकौंतेयमारहाजं कथंचन। निग्रहं धर्मराजस्य न करिष्यति संयुगे। ततो नि

६२

अनगौ लोगो हिरंरांपयदूर्वा गोरोचनामृतं। अक्षतं दधि चेत्याद्यिमंगलानि च कृत्वा। विजयोत्पादस्वस्तिवतः स्वस्तिवि
द्रौण क्षिप्य राजानं धृष्टद्युम्नमहात्मनि। अग्नि वायुगुरुं ज्येष्ठं भ्रातरं मारुतात्मजं॥ राज्ञा मूर्ध्नि चाघ्रातः परिष्वक्तश्च ज्ञानुद्या
। विजयाभेद्धिनीस्तोत्पाद्यावितश्चाशिषः शुभाः। कृत्वा प्रदक्षिणां विप्रान्नर्चितांस्तु समातमात्। अलस्य मंगलान्य दृष्टा पी
त्वा किरातकं मधु। द्विगुणद्रविणो वीरो मदरक्तांतलोचनः। विप्रैः कृतस्वस्त्ययनो विजयोत्पादस्वस्तिवतः॥ पश्चान्निवात्म
बु॥ नो बुद्धिं विजयानंदकारिणीं। अनुलोमानिलिंग्यानि शुभदेशितजयोदयां। भीमसेनो महाबाहुः कवची चारुकुंडलः॥
सांगदः सतलत्राणः सरथीरथिनां वरः॥ तस्य कार्ष्णायसं वर्म हेमचित्रं महर्द्धिमत्। विबभौ पर्वतश्लिष्टं सविद्युत्तोयदो
पमं। पीतरक्तासितसितैर्वासोभिश्च विभूषितः। कंठत्राणेन च बभौ सेंद्रायुध इवांबुदः॥ प्रयाते भीमसेने तु तव सैन्यं
युयुत्सया। पांचजन्यरवो घोरः पुनरासीद्विशांपते। तं श्रुत्वा निनदं घोरं त्रैलोक्यत्रासनं महत्। पुनर्भीमं महाबाहुं ध
र्मपुत्रोभ्यभाषत। एष वृष्णिप्रवीरेण ध्मातः सलिलजो भृशं। पृथिवीं चांतरिक्षं च निनादयति शंखराट्। नूनं व्यसनमा
स॥ पन्ने सुमहत्सव्यसाचिनि। कुरुभिर्युध्यते वीरः सर्वैः सह गदाधरः॥ नूनमार्यापि मे कुंती पापमद्य निदर्शनं। द्रौपदी च सु १८५
भद्रा च पश्यंति सह बंधुभिः। सभीम त्वरया युक्तो याहि यत्र धनंजयः। मुह्यंतीव हि मे सर्वा धनंजयदिदृक्षया। दिशः सप्र
॥ जयोत्पादः॥ आर्या मातुर्यां मातेति यावत्। निदर्शनं निमित्तं। मुह्यंति मोहेन व्रियंते॥

आरुजन् रुजतः। विरुजन् विध्यन्। अनिकर्षन्नत्यर्थं कर्षन्। विकर्षन् विक्षिपन्॥

दिशश्चैव पार्थस्य त्वत्कारणात्। एवं संचोदितस्तेन धर्मपुत्रेण संयुगे। भीमसेनो महाबाहुः कवची दंशितो बली।
गाबगावेतिगुरुणा सोनुज्ञातो वृकोदरः। ततः पांडुसुतो राजन् भीमसेनः प्रतापवान्। बद्धगोधांगुलित्राणः प्रगृहीत
शरासनः। ज्येष्ठेन प्रहितो भ्रात्रा भ्रातुः प्रियंकरः। आहत्य दुंदुभिं भीमः शंखं प्रध्माप्य चासकृत्। विनद्य सिंहना
दं वक्त्रं ज्याशब्दमेव च। तेन शब्देन वीराणां पातयित्वा मनांस्युत। दर्शयन् घोरमात्मानममित्रान्सहसाभ्ययात्। त
तमूहुर्जवना॥ मूहुर्जवनोदांता विकुर्वाणा हयोत्तमाः। संगृहीता विशोकेन मनोमारुतरंहसः। आरुजन्विरुजन्पार्थो ज्यां स्पृशंश्चै
व पाणिना। सोनुकर्षन्विकर्षंश्च सेनाग्रमवलोडयत्। तं प्रयांतं महाबाहुं पांचालाः सहसोमकाः। पृष्ठतोनुययुः शू
राः मघवंतमिवामराः। तं समेनामहाराज सोदर्याः पर्यवारयन्। दुःशासनश्चित्रसेनः कुंडभेदी विविंशतिः। दुर्मुखो
दुःसहश्चैव विकर्णश्च शलस्तथा। विंदानुविंदौ सुमुखो दीर्घबाहुः सुदर्शनः। वृंदारकः सुहस्तश्च सुषेणो दीर्घलो
चनः। अभयो रौद्रकर्मा च सुवर्मा दुर्विमोचनः। विविधै रथिनां श्रेष्ठाः स्वसैन्यैः सपदानुगैः। संयत्ताः समरे शूरा भी
मसेनमुपाद्रवन्। तैः समंताद्वृतः शूरः समरे समहारथः। निरीक्ष्य तान्सं कुरून्भीमसेनः प्रतापवान्। अभ्यवर्तत
वेगेन सिंहः क्षुद्रमृगानिव। ते महास्त्राणि दिव्यानि तत्र वीरा व्यदर्शयन्। वादयंतः शरैर्भीमं मेघाः सूर्यमिवोदितं

इतिकृत्वा॥

द्रोण सत्यानतीत्यवेगेन द्रोणानीकमुपाद्रवत्॥ अथ तस्य राजानीकं शरवर्षैरवाकिरत्॥ सोऽचिरेणैव कालेन हत्वा तज्जानीकमाशु
मेः। दिशः सर्वाः समं व्यस्य व्यधमत्पवनात्मजः। त्रासिताः शरैस्तस्य व्याघ्रेणेव वने मृगाः प्राद्रवन्सिंहत्रस्ता। सर्वैस्तस्मिन्भेरवा
नवाना पुनस्थातीत्यवेगेन द्रोणानीकमुपाद्रवत्। तमावारयदाचार्यो वेलेव समुद्रासवं। ललाटे ताडयच्छिन्नं नाराचेन
हसन्निवाक्रुद्ध इरिमरिवादित्यो विवासितः तेन पांडवः। समस्यमानस्त्वाचार्यो ममायं फाल्गुनो यथा। भीमः करिष्यते पूजा
मित्युवाच वृकोदरं। भीमसेन त्वयाशक्यं प्रवेष्टुमरिवाहिनीं। मामतिक्रम्य कौंतेय शत्रुमध्ये महाहवे। यथा सौ तेनु
जः कृष्णः प्रविष्टोऽनुमते मम। अनीकं न तु शक्यं हि प्रवेष्टुमिह वै त्वया। अथ भीमस्तु तच्छ्रुत्वा गुरोर्वाक्यमभीतवत्। क्रु
द्रोणप द्धः प्रोवाच विद्रोणं रक्तापांगो क्रुधा। त्वत्सकाशाद्वार्जुनो नानुमते ब्रह्मबंधो रणाजिरं। प्रविष्टः स हि दुर्धर्षः शक्रस्य
पि विशेद्बलं। तेन वै परमां पूजां कुर्वता मानितो ह्यसि। नार्जुनोऽहं घृणी द्रोण भीमसेनोऽस्मि ते रिपुः। पिता नस्त्वं गुरु
र्बंधुस्तथा पुत्रास्तु ते वयं। इति मन्यामहे सर्वे भवंतं प्रणताः सदा। अद्य तद्विपरीतं ते वदतो स्मासु दृश्यते। यदि शत्रुं
त्वमात्मानं मन्यसे तत्तथास्त्विदं। एष ते सदृशं शत्रोः कर्म भीमः करोम्यहं। अथोद्भ्राम्य गदां वीरः कालदंडमिवांतकः। द्रो १८६
णाय प्राहिणोद्राजन्स रथाद्वप्लुवे। साश्वसूतध्वजं यानं द्रोणस्यापोथयत्तदा। अमृद्नाच्च बहून्योधान्वायुर्वृक्षानिवौ

जसा। तं पुनः परिवव्रुस्ते तव पुत्रा महारथाः। अन्यं तु रथमास्थाय द्रोणः प्रहरतां वरः। व्यूहद्वारं समासाद्य युद्धाय स
मवस्थितः। ततः क्रुद्धो महाराज भीमसेनः प्रतापवान्। अग्रतः स्यंदनानीकं शरवर्षैरवाकिरत्। ते वध्यमानाः समरे
तव पुत्रा महारथाः। भीमं भीमबलं युद्धे योधयंतो जयैषिणः। ततो दुःशासनः क्रुद्धो रथशक्तिमथाक्षिपत्। सर्वपा
रशवीं तीक्ष्णां जिघांसुः पांडुनंदनं। आपतंतीं तु तां शक्तिं तव पुत्रभुजेरितां। द्विधा चिच्छेद कौंतेयो भल्लेनानतपर्वणा
अथान्यान्निशितैर्बाणैः पांडवः कुंडभेदिनं। सुषेणं दीर्घनेत्रं च त्रिभिस्त्रीनवधीद्बली। ततो वृंदारकं वीरं कुरूणां
कीर्तिवर्धनं। पुत्राणां तव शूराणां युध्यतामवधीत्पुनः। अभयं रौद्रकर्माणं दुर्विमोचनमेव च। त्रिभिस्त्रीनवधी
द्भीमः पुनरेव सुतांस्तव। वध्यमानास्तु महाराज पुत्रास्तव बलीयसा। भीमं मृत्युनदं कृत्वा समावव्रुर्वृकोदरं। ते शरै
र्भीमकर्माणं ववृषुः पांडवं युधि। मेघा इवातपापाये धाराभिर्धरणीधरं। स तद्बाणमयं वर्षमश्मवर्षमिवाचलः। प्र
तीच्छन्पांडुदायादो न प्राव्यथत शत्रुहा। ततो विंदानुविंदौ तु सुधर्माणं च ते सुतान्। प्रहसन्निव कौंतेयः शरैर्निन्ये यम
क्षयं। ततः सुदर्शनं वीरं पुत्रं ते भरतर्षभ। तोमरेण निहत्याजौ प्रेषयामास मृत्यवे। सोऽचिरेणैव कालेन तद्रथानीक
माशुगैः। दिशो विद्रावयामास नीहारमिव भास्करः। ततो विरथघोषेण गर्जितेन मृगा इवावध्यमानास्तथा तेन सिंहे

वलमायया बलाद्विक्रमेण ना। उद्यच्छन्नप्यदीनवान्॥

द्रोण॰ निवस्तुतानु राधा द्रवन्स्त्र रथाः सर्वे भीमसेनभयार्दिताः॥ अथ यायत्तु कौंतेयः पुत्राणां ते महद्बलं॥ विद्राव्य समरे राजन्कौ
रवेयांस्ततस्ततः॥ वध्यमाना महाराज भीमसेनेन तावकाः॥ त्यक्त्वा भीमं रणं जग्मुश्चोदयंतो हयोत्तमान्॥ तान्विनिर्जि
त्य संग्रामे भीमो भीमपराक्रमः॥ सिंहनादं रवं चक्रे बाहुशब्दं च निस्वनं॥ तलशब्दं च सुमहत्कृत्वा भीमो महाबल
॥ भीषयित्वा रथानीकं हत्वा योधान्वरान्वरान्॥ व्यतीत्य रथिनश्चैव द्रोणानीकमुपाद्रवत्॥ ॥द्रोणपर्वणि ज
यद्रथवधे भीमप्रवेशे द्रोणपराजयः॥ ॥संजय उवाच॥ ॥तं जिघांसंतमायांतं पांडवं रथिसत्तमं॥ विवा
रयिषुराचार्यः शरवर्षैरवाकिरत्॥ पिबन्निव शरौघांस्तान्द्रोणचापपरिच्युतान्॥ सोऽभ्यद्रवत सोदर्यान्मोहयन्बल
मायया॥ तं हर्षवेगमास्थाय पुत्राः परमधन्विनः॥ चोदितास्तव पुत्रेण सर्वतः पर्यवारयन्॥ स तैस्तु संवृतो राजन्स्मयन्नि
वभारत॥ उद्यच्छद्गदां तेभ्यः सुघोरां सिंहवन्नदन्॥ अवासृजच्च वेगेन तान्सुतान्प्रमथ्य वै॥ वज्रशनिरिवाद्रीणां वृदि
तामहतीं गदां॥ प्रमथ्नान्महाराज सैनिकास्तव संयुगे॥ घोषेण महता राजन्पूरयंतीव मेदिनीं॥ ज्वलंती तेजसा भीमा
त्रासयामास ते सुतान्॥ तां पतंतीं महावेगां दृष्ट्वा तेजोभिसंवृतां॥ प्राद्रवंस्तावकाः सर्वे नदंतो भैरवान्रवान्॥ तं तु दृष्ट्वा १८७
मसंसह्यं तस्याः संदृश्य मारिष॥ प्रापतन्मनुजाः सर्वे रथेभ्यो रथिनस्तदा॥ ते त्वं भीमेन गदाहस्तेन तावकाः॥ प्राद्रवंत र

देजा

णे भीता व्याघ्राघ्राता मृगा इव॥ स तान्विद्राव्य वेगेन संख्येमित्रान्दुरासदान्॥ सुपर्ण इव कौंतेयः पक्षिराडभ्यगाद्ध्रुवं॥
तं विप्रकुर्वाणं रथयूथपयूथपं॥ भारद्वाजो महाराज भीमसेनं समभ्ययात्॥ द्रोणस्तु समरे भीमं वारयित्वा शरोर्मि
भिः॥ अकरोत्सहसा नादं पांडूनां भयवर्धनं॥ तद्युद्धमासीत्सुमहद्घोरं देवासुरोपमं॥ द्रोणस्य च महाबाहोर्भीमस्य च
महात्मनः॥ यदा तु विशिखैस्तीक्ष्णैर्द्रोणचापवरातिगैः॥ वध्यंते समरे वीराः शतशोथ सहस्रशः॥ ततो रथादवप्लु
त्य वेगमास्थाय पांडवः॥ निमील्य नयने राजन्पदातिर्द्रोणमभ्ययात्॥ यथा हि गोवृषो वर्षं प्रतिगृह्णाति लीलया॥ तथा भीमो
महाराज शरवर्षं समग्रहीत्॥ स वध्यमानः समरे रथं द्रोणस्य मारिष॥ ईषायां पाणिना गृह्य प्रचिक्षेप महाबलः॥ द्रोणस्तु स
त्वरो राजन्क्षिप्तो भीमेन संयुगे॥ रथमन्यं समास्थाय व्यूहद्वारमयाद्ययौ॥ तस्मिन्क्षणे च संयत्ते तूर्णमश्वानचोदयत्
॥ भीमसेनस्य कौरव्य तदद्भुतमिवाभवत्॥ ततः स्वरथमास्थाय भीमसेनो महाबलः॥ अभ्यद्रवत वेगेन तव पुत्रस्य वाहि
नीं॥ स मृद्नन्क्षत्रियानाजौ वातो वृक्षानिवोद्धतः॥ अगच्छद्दारयन्सेनां सिंधुवेगो नगानिव॥ भोजानीकं समासाद्य हार्दिक्ये
नाभिरक्षितं॥ प्रमथ्य तरसा वीरस्तदत्यतिबलोऽभ्ययात्॥ संत्रासयन्ननीकानि तलशब्देन पांडवः॥ अजयत्सर्वसैन्यानि शार्दू
ल इव गोवृषान्॥ भोजानीकमतिक्रम्य दरदानां च वाहिनीं॥ तथा म्लेच्छगणानन्यान्बहून्युद्धविशारदान्॥ सात्यकिं चि

द्रोण० विसंघेस्य प्रयुध्यमानं महारथं। रथेन यत्तः कौंतेयो वेगात ययौ ततः॥ भीमसेनो महाराज उद्युक्तो मो धनंजयं। ज्ञातीन्स्य
समरे योधसत्तावकान्पांडुनंदनः॥ स पश्यन्नर्जुनं तत्र युध्यमानं महारथं। सैंधवस्य वधार्थं हि पराक्रांतं पराक्रमं। नद
ह्यातुरूपव्याघ्रस्तु कौरवा मह तारवान्॥ आहृक्वा लिमत्या राजन् हिंद्रिव बलाहकः। तं तस्य निनदं घोरं पार्थः शुश्राव नर्द
तः। वासुदेवश्च कौरव्य भीमसेनस्य संयुगे। ततो शुश्राव गपदेरो निनदं तस्य शुष्मिणः। श्रुत्वा श्रुत्वा तु नः प्रागारतां द्विहत
तीह्रा कादरं। ततः पार्थो महानादं मुमोच वेमाधवस्वनं। अश्रूयातां महाराज नर्दतो गोवृषाविव। भीमसेनरवं श्रु वं
त्वा फाल्गुनस्य च धन्विनः। अहृष्यत महाराज धर्मपुत्रो युधिष्ठिरः॥ विशोकश्चाभवद्राजा श्रुत्वा तं निनदं तयोः। धनंजयस्य
च रणे जयमाशास्तवान् विभुः॥ तथा तु नर्दमाने तु भीमसेने मदोत्कटे। स्मितं कृत्वा महाबाहुर्धर्मपुत्रो युधिष्ठिरः। हृज्ज
तं मनसा ध्यात्वा ध्यात्वा धर्मभृतां वरः। दत्ता भीम त्वया संविक्तं गुरुवचस्त्वया। नहि तेषां जयो युद्धे येषां द्वेष्टासि पांडव।
दिष्ट्या जीवति संग्रामे सव्यसाची धनंजयः। दिष्ट्या च कुशली वीरः सात्यकिः सत्यविक्रमः। दिष्ट्या शृणोमि गर्जंतौ वा
सुदेवधनंजयौ। येन शक्रं रणे जित्वा तर्पितो हव्यवाहनः। स हंता द्विषतां संख्ये दिष्ट्या जीवति फाल्गुनः। यस्य बा १८८
हुबलं सर्वे वयमाश्रित्य जीविताः। स हंता रिपुसैन्यानां दिष्ट्या जीवति फाल्गुनः। निवातकवचा येन दानवा देवदुर्ज
याः।

निर्जिता धनुषैकेन दिष्ट्या पार्थः स जीवति। कौरवान्सहितान्सर्वान् गोग्रहार्थे समागतान्। योऽजयन्मत्स्यनगरे दिष्ट्या
पार्थः स जीवति। कालकेयसहस्राणि चतुर्दश महारणे। योऽवधीद्भुजवीर्येण दिष्ट्या पार्थः स जीवति। गंधर्वरा
जं बलिनं दुर्योधनकृतेन वै। जितवानस्त्रवीर्येण दिष्ट्या पार्थः स जीवति। किरीटमाली बलवान् श्वेताश्वः कृष्ण
सारथिः। मम प्रियश्च सततं दिष्ट्या जीवति फाल्गुनः। पुत्रशोकाभिसंतप्तश्चिकीर्षुः कर्म दुष्करं। जयद्रथवधान्वेषी प्र
तिज्ञां कृतवान्हि यः। कच्चित्स सैंधवं संख्ये हनिष्यति धनंजयः। कच्चित्तीर्णप्रतिज्ञं हि वासुदेवेन रक्षितं। अनस्तमित आ
दित्ये समेष्याम्यहमर्जुनं। कच्चित्सैंधवको राजा दुर्योधनहिते रतः। नंदयिष्यत्यमित्रान्हि फाल्गुनेन निपातितः। क
च्चिद्दुर्योधनो राजा फाल्गुनेन निपातितं। दृष्ट्वा सैंधवकं संख्ये शममस्मासु धास्यति। दृष्ट्वा विनिहतान्भ्रातॄन्भीमसेनेन सं श्री
युगे। कच्चिद्दुर्योधनो मंदः शममस्मासु धास्यति। दृष्ट्वा चान्यान्महायोधान्पातितान्धरणीतले। कच्चिद्दुर्योधनो मंद
ः पश्चात्तापं गमिष्यति। कच्चिद्भीष्मेण नो वैरा मामाकं नयास्यति। शेषस्य रक्षणार्थं च संधास्यति सुयोधनः। एवं
बहुविधं तस्य राज्ञश्चिंतयतस्तदा। कृपयाभिपरीतस्य घोरं युद्धमवर्तत॥ ॥द्रोणपर्वणि भीमसेनप्रवेशे यु
धिष्ठिरप्रमोदः॥ ॥धृतराष्ट्र उवाच॥ ॥निनदंतं तथा तं तु भीमसेनं महाबलं। पर्जन्यरवनिर्घोषं के वीराः पर्य

युयुत्समानस्य व्यापारयत्। सा वेगं सत्वरं॥

द्रोण वारयन् वा। न हि पश्यामहे तं वै त्रिषु लोकेषु कंचन। क्रुद्धस्य भीमसेनस्य यस्तिष्ठेदग्रतो रणे। यदा युयुत्समानस्य कालस्येव महा

वीर्यवतः। न हि पश्याम्यहं तात यस्तिष्ठेदग्रतः। युमानार्थं रथे तयोर्हत्वा कुंजरं कुंजरारणे। कस्तस्य समरे स्थाता साक्षादपि पुरंद

रः। क्रुद्धस्य भीमसेनस्य मम पुत्रान्दिजिघांसतः। दुर्योधनहिते युक्ताः समतिष्ठंत के पुनः। भीमसेनदवाग्नेस्तु मम पुत्रतृणोलपा

ता। प्रदहन्तो रणे युद्धे के तिष्ठन्न्यपतीन् नराः। कालेनेव यथा प्रजाः सर्वाः के भीमं पर्य्य

वारयन्। न मे कर्णो न चाहं यं तात हृष्टकृत्स्नामपि च सात्वताः। कुन्तीपुत्र न्मनो नेव याहद्भीमाद्भयं मम। भीमसंक्रुद्धः प्रदीप्तस्य म

मपुत्रान्दिधक्षतः। के शूरा पर्यवर्तंत तन्ममाचक्ष्व संजय॥ ॥संजय उवाच॥ ॥तथा तु नर्दमानं तं भीमसेनं महाबलं

। उत्तुलेनेव शब्देन कर्णोप्यभ्यद्रवद्बली। आक्षिप्य सुमहच्चापमतिमात्रममर्षणः। कर्णः स युद्धमाकांक्षन्दर्शयिष्यन्बलं

मृधे। रुरोध मार्गं भीमस्य वातस्येव महीरुहः। भीमोपि दृष्ट्वा सावेगं पुरो वैकर्तनं स्थितं। चुकोप बलवद्वीरश्चिक्षेपास्य शिला

शितान्। तान्प्रत्यगृह्णात्कर्णोपि प्रतीपं प्रेषयच्छरान्। ततस्तु सर्वयोधानां यततां प्रेक्षतां तदा। प्रावेपन्निव गात्राणि कर्णभी

मसमागमे। रथिनां सादिनां चैव तयोः श्रुत्वा तलस्वनं। भीमसेनस्य निनदं श्रुत्वा घोरं महात्मनः। खं च भूमिं च संरुद्धां मे १८९

निरे तव सैनिकाः। केषां चिदल्पसत्वानां तं श्रुत्वा निनदं युधि। शस्त्राणि वा पतन्भूम्यां केषां चिद्व्यसवो ऽभवत्। वित्रस्ता

संरुद्धमेकतामाप्य वा॥

नि च सर्वाणि शकृन्मूत्रं प्रसुस्रुवुः। वाहनानि च सर्वाणि बभूवुर्विमनांसि च। प्रादुरासन्निमित्तानि घोराणि सुबहूनि च।

गृध्रकाकबलिश्चासीदंतरिक्षं समावृतं। तस्मिंस्तु तुमुले राजन्कर्णभीमसमागमे। ततः कर्णस्तु विंशत्या शराणां भीममार्द

यत्। विव्याध चास्य त्वरितः सूतं पंचभिराशुगैः। प्रहस्य भीमसेनोपि कर्णं प्रत्यार्दयद्रणे। सायकानां चतुःषष्ट्या क्षिप्रकारी

महायशाः। तस्य कर्णो महेष्वासः सायकांश्चतुरः क्षिपत्। असंप्राप्तांश्च तान्भीमः सायकैर्नतपर्वभिः। चिछेद बहुधा राजन्द

र्शयन्पाणिलाघवं। तं कर्णश्छादयामास शरव्रातैरनेकशः। संछाद्यमानः कर्णेन बहुधा पांडुनंदनः। चिछेद चापं क

र्णस्य मुष्टिदेशे महारथः। विव्याध चैनं बहुभिः सायकैर्नतपर्वभिः। अथान्यद्धनुरादाय सज्यं कृत्वा च सूतजः। विव्याध

समरे भीमं भीमकर्मा महारथः। तस्य भीमो भृशं क्रुद्धस्त्रीन्शरान्नतपर्वणः। निचखानोरसि तदा सूतपुत्रस्य पार्थिव।

तैः कर्णो राजतश्चारु रोमध्यगैस्तदा। महीधर इवोदग्रस्त्रिशृंगो भरतर्षभ। सुस्रुवे चास्य रुधिरं विद्धस्य परमेषुभिः।

धातुप्रस्रवसंदिग्धः शैलाद्यथा गैरिकराजयः। किंचिद्विचलितः कर्णः सुप्रहाराभिपीडितः। आकर्णपूर्णमाकृष्य भी

मं विव्याध सायकैः। चिक्षेप च पुनर्बाणं शतशोथ सहस्रशः। स शरैरर्दितस्तेन कर्णेन दृढधन्विना। धनुर्ज्यामछिन

व्यायतं प्रहरन्तं॥ ॥संरंभात्त्वरणयुक्तो धात्॥

द्रोण तूर्णं भीमस्तस्य क्षुरेण हासारथिं वास्य भल्लेन रथनीडादपाहरत्॥ वाहांश्च चतुरस्तस्य व्यसृजत्केसहारथः॥ अनन्ता
नुरथात्कर्णः समाप्लुत्य विशांपते॥ स्पंदनं वृषसेनस्य तूर्णमारुरुहे नयात्॥ निर्जित्य तु रणे कर्णं भीमसेनः प्रतापवा
न्॥ ननाद बलवान्नादं पर्जन्य इव निनदोपमं॥ तस्य तं निनदं श्रुत्वा प्रहृष्टोऽभूद्युधिष्ठिरः॥ कर्णं पराजितं मत्वा भीमसे
नेन संयुगे॥ सबाणशंखनिनदं हर्षाच्छ्राजाश्च वाहिनी॥ चक्रे युधिष्ठिरः संख्ये हर्षनादिश्च संकुलात्॥ शत्रुसेनाध्वनिं श्रु
त्वा तावका ह्यनदन् भृशं॥ गांडीवं व्याक्षिपत्पार्थः कृष्णोऽप्यमवादयत्॥ अंतर्धीय निनादं तं भीमस्य नदतो ध्वनिः॥ अ
श्रूयत तदा राजन् सर्वसैन्येषु दारुणः॥ ततो व्यायतं वीरौ पृथक्पृथगरिंदमौ॥ मृदुपूर्वं च राधेयो दृढपूर्वं च पांडव
॥ ॥द्रोणपर्वणि भीमसेनप्रवेशे कर्णपराजयः॥ ॥तस्मिन्विप्लुलिते सैन्ये सिंधवार्थार्जुने गते॥ सात्यकौ भीमसेने च
पुत्रस्ते द्रोणमभ्ययात्॥ त्वरन्नेकरथेनैव बहुकृत्यं विचिंतयन्॥ स रथस्तव पुत्रस्य त्वरया परया युतः॥ तूर्णमभ्यद्रवद्द्रोणं
मनोमारुतवेगवान्॥ द्रोणांतिकमुपागम्य राजा रक्तांतलोचनः॥ ससंरंभमिदं वाक्यमब्रवीत्कुरुनंदनः॥ अर्जुनो भीमसेन १९५
श्च सात्यकिश्चापराजितः॥ विजित्य सर्वसैन्यानि सुमहांति महारथाः॥ संप्राप्ताः सिंधुराजस्य समीपमनिवारिताः॥ व्यायच्छंति च तत्र

तजरीयानष्टान् अक्षाय त्रमत्यमानः प्राग्लहतश्च्यन्वयः॥ अत्र समायां। नेमी॥ वृकोदरं द्यूतकारिणां॥ अत्र रणे॥

पि सर्व एव महारथाः॥ यदि तावद्रणे पार्थो व्यतिक्रांतो महारथः॥ कथं सात्यकिभीमाभ्यां व्यतिक्रांतोऽसि मानद॥ आश्चर्य
भूतो लोकेऽस्मिन् समुद्रस्येव शोषणं॥ निर्जयस्तव विप्राग्र्य सात्वतेनार्जुनेन च॥ तथैव भीमसेनेन लोके ख्यातिं गमिष्यति॥ क
थं द्रोणो जितः संख्ये धनुर्वेदस्य पारगः॥ इत्येवं ब्रुवते योधाः अश्रद्धेयमिमं तव॥ नाश एव तु नूनं मे मंदभाग्यस्य संयुगे॥ यत्र
त्वां पुरुषव्याघ्र व्यतिक्रांतास्त्रयो रथाः॥ एवं गते तु यत्तेऽस्मिन् ब्रूहि यत्ते मनोगतं॥ यद्गतं गतमेवेदं शेषं चिंतय मानद॥ यत्कृ
धु त्यं सिंधुराजस्य प्राप्तकालमनंतरं॥ तस्मिन्विधीयतां क्षिप्रं साधु संचिंत्यतो द्विज॥ ॥द्रोण उवाच॥ ॥चिंत्यं बहुविधं तात यत्कृ
द्र त्यं तच्छृणुष्व मे॥ त्रयो हि समतिक्रांताः पांडवानां महारथाः॥ यावदेव भयं पश्चात्तावदेव पुरःसरं॥ तज्जरीयस्तरं मन्ये यत्र कृ
ष्णधनंजयौ॥ सा पुरस्ताच्च पश्चाच्च गृहीता भारती चमूः॥ तत्र कृत्यमहं मन्ये सैंधवस्याभिरक्षणं॥ स नो रक्ष्यतमस्तात क्रुद्धाद्भी
तो धनंजयात्॥ गतौ च सैंधवं वीरौ युयुधानवृकोदरौ॥ संप्राप्तं तदिदं द्यूतं यत्तच्छकुनिबुद्धिजं॥ न सभायां जयो वृत्तो नापि ता
त्र पराजयः॥ इह नो ग्लहमानानामद्य तात जयाजयौ॥ यान्स्म तान्ग्लहते घोरान् शकुनिः कुरुसंसदि॥ मन्यते तेऽक्षनिशिताः घोरा
ः शरा युष्मन्तु विद्॥ यत्र ते बहवस्तात कौरवेया व्यवस्थिताः॥ सेनां दुरोदरं विद्धि शरानक्षान्विशांपते॥ ग्लहं च सैंधवं राजन्नत्र

वाहेन पार्थेन॥

ह्यूतस्य तिष्ठयः॥ सिंधवेत्तु महद्यूतं ममाशंके परिः महा। अत्र सर्वे महाराज त्यक्ता जीवितमात्मनः। सिंधवस्य रणे रक्षां विधिव
त्कर्तुमर्हथ। तत्र नो ग्लहमानानां ध्रुवं विजयपराजयौ। यतेत परमेष्वासाः यथा रक्षंति सिंधवं। तत्र गाढस्वयं शीघ्रैः ताश्चक्र
स्वरक्षिणः॥ इति वचस्माज्ञिष्य विषयिष्यामि वा परान्। निरोत्स्यामि च पांचालान् सहितान्पांडुसृंजयैः। ततो दुर्योधनो गव
न्त्सर्गमाचार्यशासनात्। ऊर्ध्वमात्मानमुग्राय कर्मणे समपद्यत। चक्ररक्षौ तु पांचाल्यौ युधामन्यूत्तमौजसौ। बाह्येन से
नामध्येत्य जग्मतुः सव्यसाचिनं। तौ तु पूर्वं महाराज वारितौ कृतवर्म्मणा। प्रविष्टे त्वर्जुने राजंस्तव सैन्यं युयुत्सया। पा
र्श्वे निन्वाय सूर्यवीरौ प्रतिष्ठितौ तव वाहिनीं। ताभ्यां दुर्योधनः सार्द्धमकरोद्युधसंकुलं। त्वरितस्त्वरमाणाभ्यां भ्रातृभ्यां भारतो
बली। तावेनमभ्यद्रवतामुमाद्युद्यतकार्मुकौ। महारथसमाख्यातौ क्षत्रियप्रवरौ युधि। तमविध्यद्युधामन्युस्त्रिंशता
कंकपत्रिभिः। विंशत्या सारथिं चास्य चतुर्भिश्चतुरो हयान्। दुर्योधनो युधामन्योर्ध्वजमेकेषुणाच्छिनत्। एकेन कार्मुकं चास्य
चकर्त तनयस्तव। सारथिं चास्य भल्लेन रथनीडादपातयत्। ततो विध्यच्छरैस्तीक्ष्णैश्चतुर्भिश्चतुरो हयान्। युधामन्युश्च १५१
संक्रुद्धः शरांस्त्रिंशतमाहवे। व्यसृजत्तव पुत्रस्य त्वरमाणस्तनांतरे। तथोत्तमौजाः संक्रुद्धः शरैर्हेमविभूषितैः। अविध्य

त्सारथिं चास्य प्राहिणोद्यमसादनं। दुर्योधनोऽपि राजेंद्र पांचाल्यस्योत्तमौजसः। जघान चतुरश्चाश्वानुभौ च पार्ष्णिसारथी। श्री
उत्तमौजा हताश्वस्तु हतसूतश्च संयुगे। आरुरोह रथं भ्रातुर्युधामन्योरभित्वरन्। स रथं प्राप्य तं भ्रातुर्दुर्योधनस्य वा
जिनः। बहुभिस्ताडयामास ते हताः प्रापतन्भुवि। हयेषु पतितेष्वस्य चिच्छेद परमेषुणा। युधामन्युर्धनुः शीघ्रं शरावापं च सं
युगे। हताश्वसूतात्स रथादवतीर्य नराधिपः। गदामादाय ते पुत्रः पांचाल्यावभिसमाद्रवत्। तमापतंतं संक्रुद्धं संकु
द्धं कुरुपतिं तदा। अवप्लुतौ रथोपस्थाद्युधामन्यूत्तमौजसौ। ततः स हेमचित्रांगं गदया स्यंदनं गदी। संक्रुद्धः पोथया
मास साश्वसूतध्वजं नृप। हत्वा रथं स पुत्रस्ते हताश्वो हतसारथिः। मद्रराजरथं तूर्णमारुरोह परंतपः। पांचालानां तु
तौ मुख्यौ राजपुत्रौ महारथौ। रथावन्यौ समारुह्य बीभत्सुमभिजग्मतुः॥ ॥ द्रोणपर्वणि जयद्रथवधे भीमसे
नप्रवेशो॥ ॥ संजय उवाच॥ ॥ वर्त्तमाने महाराज संग्रामे लोमहर्षणे। व्याकुलेषु च सैन्येषु पीड्यमानेषु सर्वशः
॥ राधेयो भीममासाद्य युद्धाय भरतर्षभ। यथा नागो वने नागं मत्तो मत्तमिव द्रवत्॥ ॥ धृतराष्ट्र उवाच॥ ॥ यौ तौ
कर्णश्च भीमश्च संप्रयुद्धौ महाबलौ। अर्जुनस्य रथोपांते कीदृशः सोऽभवद्रणः॥ पूर्वं हि निर्जितः कर्णो भीमसेनेन सं
युगे। कथं भूयः स राधेयो भीममागान्महारथः। भीमो वा सूतनयं प्रत्युद्यातः कथं रणे। महारथः समाख्यातः पृथि

द्रोण

पूर्वं तु योगदर्शितं तन्मुदा वितं॥ आहवे त्वं कुंत्या वाक्यं चतुर्णामवधात्मनः। स्मरन् चानुस्मरंस्तस्य च यः घृणी विचिकित्सुः सन्नपि

वां प्रवरं रथं। द्रोणभीष्मावतिक्रम्य धर्मराजो युधिष्ठिरः। नात्यतो भयमादत्त यथा कर्णान्महारथात्। मया ह्युस्ममहा

बाहोर्न शाते बहुभाः समाः। चिंतयन्निय शो वीर्यं राधेयस्य महात्मनः। तं कथं सूतपुत्रं तु भीमो ह्ययोधयत् रणे ब्रह्म

ण्यं वीर्यसंपन्नं समरेष्वनिवर्तिनं। कथं कर्णं युधां श्रेष्ठं योधयामास पांडवः। यो ऽसौ समीयतुर्वीरौ वैकर्तनवृकोदरौ

।कथं नु तावयुध्येतां महाबलपराक्रमौ। आहवे दर्शितं पूर्वं घृणी चापि सुतस्त्वजः। कथं भीमेन युयुधे कुंत्या वाक्य

मनुस्मरन्। भीमो वा सूतपुत्रेण स्मरन्वैरं पुराकृतं। अयुध्यत कथं शूरः कर्णेन सह संयुगे। आशास्ते वै सदा सूत दु

र्योधनो मम। कर्णो जेष्यति संग्रामे समस्तान्पांडवानिति। जयाशा यत्र पुत्रस्य मम मंदस्य संयुगे। स कथं भीमक

र्माणं भीमसेनमयोधयत्। यं समाश्रित्य पुत्रैर्मे कृतं वैरं महारथैः। तं सूततनयं तात कथं भीमो ह्ययोधयत्। अनेका

न्विप्रकारांश्च सूतपुत्रसमुद्भवान्। स्मरमाणः कथं भीमो युयुधे सूतसूनुना। यो ऽजयत्पृथिवीं सर्वां रथेनैकेन वी

र्यवान्। तं सूतपुत्रं समरे कथं भीमो ह्ययोधयत्। यो जातः कुंडलाभ्यां वै कवचेन सह वीरवान्। तं सूतपुत्रं समरे भीमः

कथमयोधयत्। यथा तयोर्युद्धमभूद्यश्चासीद्विजयी तयोः। तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि संजय॥ ॥संजय १५२

उवाच॥ ॥भीमसेनस्तु राधेयमुत्सृज्य रथिनां वरं। इयेष गंतुं यत्रोभौ वीरौ कृष्णधनंजयौ। तं प्रयांतमभि

अभितः संमुखे॥

तु त्वराधेयः कंकपत्रैः शितैः। अभ्यवर्षन्महाराज मेघो वृष्ट्येव पर्वतं। फुल्लतापंकजेनेव वक्त्रेण विहसन्बली। आजुहाव

रणे यांतं भीममाधिरथिस्तदा॥ ॥कर्ण उवाच॥ ॥भीमाहितैस्तव रणे स्वप्नेपि न विभावितं। तद्दर्शयसि कस्मात्त्वं पृ

ष्ठं पार्थ दिदृक्षया। कुंत्याः पुत्रस्य सदृशं नेदं पांडववत्तदा। तेन मामभितः स्थित्वा शरवर्षैरवाकिर। भीमसेनस्तदाह्वा

नं कर्णान्नामर्षयद्युधि। अर्धमंडलमावृत्य सूतपुत्रमयोधयत्। अवक्रगामिभिर्बाणैरभ्यवर्षन्महायशाः। दंशितं द्वैर

थे यांतं सर्वशस्त्रविदां वरः। विधित्सुः कलहस्यांतं जिघांसुः कर्णमक्षिणोत्। तं च हत्वेतरान्सर्वान्हंतुकामो महाबलः।

तस्मै प्रासृजदुग्राणि विविधानि परंतपः। अमर्षी पांडवः क्रुद्धः शरवर्षाणि मारिष। तस्य तानीषुवर्षाणि मत्तद्विरद

गामिनः। सूतपुत्रोस्त्रमायाभिरग्रसत्परमास्त्रवित्। स यथावन्महाबाहुर्विद्यया वै सुपूजितः। आचार्यवन्महेष्वासः

कर्णः पर्यचरद्बली। युध्यमानं तु संरंभाद्भीमसेनं हसन्निव। अभ्यपद्यत कौंतेयं कर्णो राजन्वृकोदरं। तन्नामृष्यत

कौंतेयः कर्णस्य स्मितमाहवे। युध्यमानेषु वीरेषु पश्यत्सु च समंततः। तं भीमसेनः संप्राप्तं वत्सदंतैः स्तनांतरे। वि

व्याध बलवान्क्रुद्धस्तोत्रैरिव महाद्विपं। पुनश्च सूतपुत्रं तु स्वर्णपुंखैः शिलाशितैः। सुमुक्तैश्चित्रवर्माणं निर्बिभेद त्रि

[illegible]

व्यधमत्ताञ्जर्जरीकृतवान्। इष्टैरिव वातमिाजौ तामा वय इवुरिति वापावः॥

द्रो० सप्ततिः। कर्णो जांबूनदैर्जालैः संछन्नान्वातरंहसः। हयान्विव्याध भीमस्य पंचभिः शरैः। ततो बाणमयं जालं भीमसे भि०शि०
नरथं प्रति। कर्णेन विहितं राजन्निमेषार्द्धाददृश्यत। सरथः सध्वजस्तत्र ससूतः पांडवस्तदा। प्राच्छादयत्तमहाराज कर्ण
चापच्युतैः शरैः। तस्य कर्णस्तु तं दृष्ट्वा व्यधमत्कवचं दृढं। क्रुद्धश्चाप्यवधीत्पार्थं नाराचैर्मर्मभेदिभिः। ततोऽचिंत्य महावे
७४ गान्कर्णकार्मुकच्युतान्। समाश्लिष्यदसंभ्रांतः सूतपुत्रं वृकोदरः। स कर्णचापप्रभवानिषूनाशीविषोपमान्। बिभ्रद्भीमो
महाराज न जगाम व्यथां रणे। ततो द्वात्रिंशता भल्लैर्निशितैस्तिग्मतेजनैः। विव्याध समरे कर्णं भीमसेनः प्रतापवान्। अय
त्नेनैव तं कर्णः शरैः क्रुद्धमवाकिरत्। भीमसेनं महाबाहुं सैंधवस्य वधैषिणं। मृदुपूर्वं तु राधेयो भीममाजावयोधयत्
। क्रोधपूर्वं तथा भीमः पूर्ववैरमनुस्मरन्। तं भीमसेनो नामृष्यदवमानममर्षणः। स तस्मै व्यसृजत्तूर्णं शरवर्षममित्रहा। ते
शराः प्रेषिता राजन्भीमसेनेन संयुगे। निपेतुः सर्वतो वीरे कूजंत इव पक्षिणः। हेमपुंखाः प्रसन्नाग्रा भीमसेनधनुश्च्युताः।
राधे प्राच्छादयंस्ते रा° °गं शलभा इव पावकं। कर्णस्तु रथिनां श्रेष्ठश्छाद्यमानः समंततः। राजन्व्यसृजदुग्राणि शरवर्षाणि ३
भारत। तस्य तानशनिप्रख्यानिषून्समरशोभिनः। चिच्छेद बहुभिर्भल्लैरसंप्राप्तान्वृकोदरः। पुनश्च शरवर्षेण छादयामा १८५
स भारत। कर्णो वैकर्तनो युद्धे भीमसेनमरिंदमः। तत्र भारत भीमं तु दृष्टवंतः स्म मायिकाः। समाचिततनुं संख्ये श्वावि

दं शल्लिरिव द्विपम्। स तु स्वान्बिलाधौतान्कर्णचापच्युतांछरान्। दधार समरे वीरः स्वरश्मीनिव भास्करः। रुधिरोक्षि
तसर्वांगो भीमसेनो व्यराजत। महत्कुसुमापीडो वसंते शोकवृक्षवत्। तत्तु भीमो महाबाहोः कर्णस्य चरितं रणे। ना
मृष्यत महाबाहुः क्रोधादुद्वृत्तलोचनः। स कर्णं पंचविंशत्या नाराचानां समार्पयत्। महीधरमिव श्वेतं गूढपादैर्वि
विषोल्बणैः। तं तरेवनवरचि। व्याध षड्भिः साष्टैर्निरेव च। मर्मस्व मरविक्रांतः सूतपुत्रं तनुत्यजं। पुनरन्येन बाणेन भीमसे
नः प्रतापवान्। चिच्छेद कार्मुकं तूर्णं कर्णस्य प्रहसन्निव। जघान चतुरश्चाश्वान्सूतं च त्वरितं शरैः। नाराचैरर्करश्मा
भैः कर्णं विव्याध चोरसि। ते जग्मुर्धरणीं तूर्णं कर्णं निर्भिद्य पत्रिणः। यथा जलधरं भित्त्वा दिवाकरमरीचयः। स विक
७५ ल्पमहत्त्वाप्य छिन्नधन्वा शरार्दितः। तथा पुरुषमानी स प्रत्यपायाद्रथांतरं॥ ॥ द्रोणपर्वणि जयद्रथवधे भीमसेनप्रवे
शे कर्णपराजयः॥ ॥धृतराष्ट्र उवाच॥ ॥यस्मिञ्जयाशा महती पुत्राणां मम संजय। तं दृष्ट्वा विमुखं भीमात्किं
नु दुर्योधनोऽब्रवीत्। कथं च युयुधे भीमो वीर्यश्लाघी महारथः। कर्णो वा समरे तात महत्कार्षीत्ततः परं। भीमसेनं र
णे दृष्ट्वा ज्वलंतमिव पावकं॥ ॥संजय उवाच॥ ॥रथमन्यं समास्थाय विधिवत्कल्पितं पुनः। अभ्ययात्पांडवं कर्णो
वातोद्धूत इवार्णवः। क्रुद्धमाधिरथिं दृष्ट्वा पुत्रास्तव विशांपते। भीमसेनमसन्यंत वैश्वानरमुखे हुतं। चापशब्दं ततः

श्रेए

कृत्वात वलज्ञाह्यं च निरवं। अथ वसेन राधेयो भीमसेनरथं प्रति। पुनरेव ततो राजंस्तयोरासीत्समागमः। विकर्ण
तस्य सूरस्य भीमस्य च महौजसः। संरब्धौ हि महाबाहू परस्परवधैषिणौ। अन्योन्यं वीक्ष्य संक्रुद्धौ ते दहंताविव।
लोचनैः। क्रोधरक्तेक्षणौ तौ ते निश्वसंतौ विवोरगौ। सूरावन्योन्यमासाद्य तत्रक्षतुररिंदमौ। व्याघ्राविव सुसं
रब्धौ श्येनाविव च शीघ्रगौ। शरभाविव संक्रुद्धौ युयुधाते परस्परं। ततो भीमः स्मरन् क्लेशान् अक्षद्यूते वनेपि च। वि
राटनगरे चैव दुःखं प्राप्तमरिंदमः। राज्ञ्यां स्फीतरत्नानां हरणं च तवात्मजैः। सततं च परिक्लेशान् सपुत्रेण त्वया कृ
तान्। दग्धुमैच्छत्स यः कुंतीं सपुत्रां त्वमनागसं। कृष्णायाश्च परिक्लेशं सभामध्ये दुरात्मभिः। केशपक्षग्रहं चैव
दुःशासनकृतं तथा। परुषाणि च वाक्यानि कर्णेनोक्तानि भारत। पतिमन्यं परीप्स त्वं न संति पतयस्तव। पतिता नरके
पमा४ पार्थाः सर्वे षंढतिलोपमाः। समक्षं तव कौरव्य यदूचुः कुरवस्तदा। दासीभोगेन कृष्णां च भोक्तुकामाः सुतास्तव। यच्चा
पि तान् प्रव्रजतः कृष्णाजिननिवासिनः। परुषाण्युक्तवान् कर्णः सभायां संनिधौ तव। तृणीकृत्य च यत्पा
र्थांस्तव पुत्रो ववल्ग ह। विषमस्थान् समस्थो हि संरब्धो गतचेतनः। बाल्यात्प्रभृति चारिघ्नः स्वानि दुःखानि १९५४
चिंतयन्। निरविद्यत धर्मात्मा जीवितेन वृकोदरः। ततो विस्फार्य सुमहद्धेमपृष्ठं दुरासदं।

कार्केःश्चोतेः समाऊंवंगं। एकस्य वि त। एकस्य नान्यस्य॥

चापं भरतशार्दूल त्यक्त्वात्मानमात्मना मन्यत सायकमधिज्यं लिभीम कर्णरथं प्रति। मातु मडिः शिलाधौतैर्नैनोप्र
च्छादयत्तदा। ततः प्रहस्याधिरथिस्तूर्णमस्यच्छिलाशितैः। मव्यधत् भीमसेनस्य शस्त्रजालानि पत्रिणः। महारथो महाबा
हुर्महाबाणैर्महाबलः। विव्याधाधिरथिर्भीमं नवभिर्निशितैः शरैः। तेनाहतो सनाद्वैरिधमातंगवाध्यमानः पतत्रिभिः।
अभ्यधावदसंभ्रांतः सूतपुत्रं वृकोदरः। तमापतंतं वेगेन रभसं पांडवर्षभं। कर्णः प्रत्युद्ययौ युद्धे मत्तो मत्तमिव द्वि
पं। ततः शंखप्रणादेन भेरीशतसमस्वनेः। अक्षुभ्यत तद्बलं हर्षादुद्धूत इव सागरः। तदुद्धतं बलं दृष्ट्वा नागाश्वरथप
त्तिमत्। भीमः कर्णं समासाद्य छादयामास सायकैः। अश्वानृष्यभवर्णांस्तु हंसवर्णैर्हयोत्तमैः। व्यामिश्रयद्रणे कर्णः
पांडवं छादयन्शरैः। ऋष्यवर्णान् हयान् कार्ष्णेर्मिश्रान् मारुतरंहसः। निरीक्ष्य तव पुत्राणां हाहाकृतमभूद्बलं। ते हया
व्यशोभंत मिश्रिता वातरंहसः। सितासिता महाराज यथा व्योम्नि बलाहकाः। संरब्धौ क्रोधरक्ताक्षौ प्रेक्ष्य कर्णवृकोदरौ।
संत्रस्ताः समकंपंत त्वदीया वै महारथाः। यमराष्ट्रोपमं घोरमासीदायोधनं तयोः। दुर्दर्शं भरतश्रेष्ठ प्रेतराजपुरं यथा।
समाजमिव तच्चित्रं प्रेक्षमाणा महारथाः। नालक्षयन् जयं व्यक्तमेकैकस्य तदा रणे। तयोः प्रैक्षंत संमर्दं संनिकृष्ट
महास्त्रयोः। तव दुर्मंत्रिते राजन् सपुत्रस्य विशांपते। छादयंतौ हि शत्रुघ्नावन्योन्यं सायकैः शितैः। शरजालावृतं व्यो

बाणं द्रागादरथाग्राद्ध्रुता॥ ज्ञपच्चयो नंग॥

द्रोण०
मवक्त्रौ लघुविक्रमौ। तावन्योन्यं जिघांसन्तौ शरैस्तीक्ष्णैर्महारथौ। प्रेक्षणीयतरावास्तां वृष्टिमन्ताविवाम्बुदौ। सुव
र्णपुङ्खैर्नाराचैः शिलाधौतैस्तु चेरतुः। नादयन्तौ व्योम बाणैरुल्काभिरिव भूतलम्। ताभ्यां मुक्ताः शरा राजन् गार्ध्रप
त्राः शिलाशिताः। आकाशे शरदि मत्तानां सारसानामिवाम्बरे। संसक्तं ददृशे तत्र नाना ... ममर्दतुः॥ ... तिनारमसान्य
तौ रामेकत्र धनंजययोस्तात ... रश्मिभीमान्याशरैस्तीक्ष्णैर्हृष्टैस्तोला॥ इच्छया ममति कम्पयेतुस्थिरद्विषा॥ पति
तिस्थान्येतानि सुमिरने कशः॥ कृतोमहान्महारणस्तुमुलो लोमहर्षणः॥ महाबाणजिनागानां शरीरेर्गतजीवितैः॥ द्र
ष्टौ ततः भूमिः संजज्ञे संहृतानरर्षभ॥ ॥द्रोणपर्वणि जयद्रथवधपर्वणि भीमप्रवेशे॥ ॥धृतराष्ट्र उवाच॥ ॥अत्यद्भु
तमहं मन्ये भीमसेनस्य विक्रमम्। यत्कर्णं योधयामास समरे लघुविक्रमम्। त्रिदशानपि चोद्युक्तान्सर्वशस्त्रधरान्युधि। वार
येद्यो रणे कर्णः सयक्षासुरमानवान्। स कथं पाण्डवं युद्धे भ्राजमानमिव श्रिया। नातरत्संयुगे तात तन्ममाचक्ष्व संजय। क
३ थं च युद्धमभवत्तयोः प्राणदुरोदरे। अत्र मन्ये समायत्तो जयो वा अजयोऽपि वा। कर्णं प्राप्य रणे सूत मम पुत्रः सुयो
धनः। जेतुमुत्सहते पार्थान्सगोविन्दान्ससात्वतान्। श्रुत्वा तु विजितं कर्णमसकृद्भीमकर्मणा। भीमसेनेन समरे विक्रम्य
मोह आविशतीव माम्। विनष्टान्कौरवान्मन्ये मम पुत्रस्य दुर्नयैः। न हि कर्णो महेष्वासान्पार्थाञ्जेष्यति संज १२५५

य। कृतवान्यानि युद्धानि कर्णः पाण्डुसुतैः सह। सर्वत्र पाण्डवाः कर्णमजयन्त रणाजिरे। अजय्याः पाण्डवा
स्तात देवैरपि सवासवैः। न च तद्बुध्यते मन्दः पुत्रो दुर्योधनो मम। धनं धनेश्वरस्येव हृत्वा पार्थस्य मे सुतः।
मधुप्रेप्सुरिवाबुद्धिः प्रपातं नावबुध्यते। निकृत्या निकृतिप्रज्ञो राज्यं तेषां महात्मनाम्। जितमित्येव मन्वान
ः पाण्डवानवमन्यते। पुत्रस्नेहाभिभूतेन मया चाप्यकृतात्मना। धर्मे स्थिता महात्मानो निकृताः पाण्डुनन्दनाः।
शमकामः सदा पार्थो दीर्घप्रेक्षी युधिष्ठिरः। अशक्त इति मन्वानैः पुत्रैर्मम निराकृतः। तानि दुःखान्यनेका
नि विप्रकारांश्च सर्वशः। हृदि कृत्वा महाबाहुर्भीमोऽयुध्यत सूतजम्। तस्मान्मे संजय ब्रूहि कर्णभीमौ यथा रणे। अ
युध्येतां युधि श्रेष्ठौ परस्परवधैषिणौ॥ ॥संजय उवाच॥ ॥शृणु राजन्यथा वृत्तः संग्रामः कर्णभीमयोः। पर
२४ स्परवधप्रेप्सोर्वने कुञ्जरयोरिव। राजन्वैकर्तनो भीमं क्रुद्धः क्रुद्धमरिंदमम्। पराक्रान्तं पराक्रम्य विव्याध त्रिंशता श
रैः। महावेगैः प्रसन्नाग्रैः शातकुम्भपरिष्कृतैः। आहनद्भरतश्रेष्ठ भीमं वैकर्तनः शरैः। तस्यास्यतो धनुर्भीम
श्चकर्त निशितैः शरैः। रथनीडाच्च यन्तारं भल्लेनापातयत्क्षितौ। स काङ्क्षन्भीमसेनस्य वधं वैकर्तनो वृषा। श
क्तिं कनकवैडूर्यचित्रदण्डां परामृशत्। प्रगृह्य च महाशक्तिं कालशक्तिमिवापराम्। समुत्क्षिप्य च राधेयः संधाय च महा

द्रोण बलः॥ विक्षेप भीमसेनाय जीवितांतकरीमिव॥ किंचिद्विस्मापयंश्चैवं पुरंदर इवाशनिं। ननाद सुमहानादं बलवान्
ततंरथः॥ तं च नादं तदा श्रुत्वा उन्मत्तैरुपिलाभवत्। तां कर्णभुजनिर्मुक्तां अर्कवैश्वानरप्रभां॥ किंचिद्विययतिच्छि
च्छेद भीमः सप्तभिराशुगैः॥ छित्वा शक्तिं तदा भीमो निर्मुक्तोरगसन्निभां। मार्गमाणइव प्राणान् सूतपुत्रस्य मारिष॥ प्राहि
णोत्क्रुद्धसंरंभः शरान्बर्हिणवाससः। स्वर्णपुंखाञ् शिलाधौतान् यमदंडोपमान् मृधे॥ कर्णोप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरा
सदं॥ विकृष्य च महातेजा व्यसृजत् सायकान् बहून्॥ तान्पांडुसुतः छिच्छेद नवभिर्नतपर्वभिः॥ वसुषेणेन निर्मुक्तान्
व्रजान् महाशरान्। छित्वा भीमो महाराज नादं सिंह इवानदत्॥ तौ वृषाविव नर्दंतौ बलिनौ वाशितांतरे॥ शार्दूला वि
व चान्योन्यं समभित्राच्छ्य गर्जतां। अन्योन्यं प्रजिहीर्षंतौ अन्योन्यस्यांतरैषिणौ॥ अन्योन्यमभिवीक्षंतौ गोष्ठेष्विव महर
षभौ॥ महागजाविवासाद्य विषाणाग्रैः परस्परं। शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः॥ निर्दहंतौ महाराज शरव
ष्ट्या परस्परं। अन्योन्यमभिवीक्षंतौ कोपाद्विवृत्तलोचनौ॥ प्रहसंतौ तथान्योन्यं भर्त्सयंतौ मुहुर्मुहुः॥ शंखशब्दं च च
क्रतुर्युयुधाते परस्परं। तस्य भीमः पुनश्चापं मुष्टौ चिच्छेद मारिष॥ शंखवर्णांश्च तानश्वान् बाणैर्निन्ये यमक्षयं॥ त १७६
था सूतं तदा हत्वा कर्णं दुर्योधनो नृपः। वेपमानइव क्रोधाद्व्यादिदेशाथ दुर्जयं॥ गच्छ दुर्जय राधेयं पुरा ग्रसति पांडवः।

जहि तुवरकं क्षिप्रं कर्णस्य बलमादधत्॥ एवमुक्तस्तथेत्युक्त्वा तव पुत्रस्तवात्मजं। अभ्यद्रवद्भीमसेनं व्यासक्तं वि
किरन् शरैः॥ स भीमं नवभिर्बाणैरश्वानष्टाभिरार्पयत्। षड्भिः सूतं त्रिभिः केतुं पुनस्तं चापि सप्तभिः॥ भीमसेनोपि सं
क्रुद्धः साश्वयंतारमाशुगैः। दुर्जयं भिन्नमर्माणमनयद्यमसादनं॥ स्वलंकृतं क्षितौ क्षुण्णं चेष्टमानं यथोरगं। रुदन्ना
र्तस्तव पुत्रं कर्णश्चक्रे प्रदक्षिणं॥ स तु तं विरथं कृत्वा स्मयन्नत्यंतवैरिणं। समाचिनोद्बाणगणैः शतघ्नीमिव शं
कुभिः॥ तथाप्यतिरथः कर्णो भिद्यमानस्य सायकैः॥ न जहौ समरे भीमं क्रुद्धरूपं परंतपं॥ ॥ इति श्रीद्रोणपर्वणि जय
द्रथवधे भीमसेनप्रवेशे॥ ॥ संजयउवाच॥ ॥ स तथा विरथः कर्णः पुनर्भीमेन निर्जितः। रथमन्यं समास्थाय
सद्यो विव्याध पांडवं॥ महागजाविवासाद्य विषाणाग्रैः परस्परं। शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः॥
अथ कर्णः शरव्रातैर्भीमसेनं समार्पयत्। ननाद च महानादं पुनर्विव्याध चोरसि॥ तं भीमो दशभिर्बाणैः प्र
त्यविध्यदजिह्मगैः। पुनर्विव्याध विंशत्या शराणां नतपर्वणां॥ कर्णस्तु नवभिर्भीमं विद्ध्वा राजन् स्तनांतरे। ध्वज
मेकेन विव्याध सायकेन शितेन ह। सायकानां ततः पार्थस्त्रिषष्ट्या प्रत्यविध्यत। तोत्रैरिव महानागं कशाभिरि
व वाजिनं॥ सोतिविद्धो महाराज पांडवेन यशस्विना। सृक्किणी लेलिहन् वीरः क्रोधसंरक्तलोचनः॥ ततः शरं

रुक्मपत्राणिवेगवन्त्येषां॥

द्रो० महाराजसर्वकायावदारणं।प्राहिणोद्भीमसेनायबलायेंद्रइवाशनिं।सानिर्भिद्यरणेपार्थंसूतपुत्रधनुश्च्यु
ता॥अगच्छद्दारयद्भूमिंचित्रपुंखःशिलीमुखः।ततोभीमोमहाबाहुःक्रोधसंरक्तलोचनः॥सर्वशैक्यांचतुष्किष्कुं
गुर्वींरुक्मांगदांगदां।प्राहिणोत्सूतपुत्रायषडस्रामविचारयन्।तयाजघानाधिरथेःसदश्वान्साधुवाहिनः
गदयाभारतःक्रुद्धोवज्रेणेंद्रइवासुरान्।ततोभीमोमहाबाहुःक्षुराभ्यांभरतर्षभ।ध्वजमाधिरथेश्छित्वासूतम
भ्यहनच्छरैः॥हताश्वसूतमुत्सृज्यसरथंपतितध्वजं।विस्फारयन्धनुःकर्णस्तस्थौभारतदुर्मनाः॥तत्राद्भुतमप
श्यामराधेयस्यपराक्रमं।विरथोरथिनांश्रेष्ठोवारयामासयद्रिपुं।विरथंतुनरश्रेष्ठंदृष्ट्वाधिरथिमाहवे।दुर्योध
नस्ततोराजन्नभ्यभाषतदुर्मुखं।एषदुर्मुखराधेयोभीमेनविरथीकृतः॥तंरथेननरश्रेष्ठंसंपादयमहारथं।ततो
दुर्योधनवचःश्रुत्वाभारतदुर्मुखः।त्वरमाणोऽभ्ययात्कर्णंभीमंचावारयच्छरैः।दुर्मुखंप्रेक्ष्यसंग्रामेसूतपुत्रपदानु
गं।वायुपुत्रःप्रहृष्टोभूत्सृक्किणीपरिलेलिहन्।ततःकर्णंमहाराजवारयित्वाशिलीमुखैः।दुर्मुखायरथंशी
घ्रंप्रेषयामासपांडवः।तस्मिन्क्षणेमहाराजनवभिर्नतपर्वभिः।सुपुंखैर्दुर्मुखंभीमःशरैर्निन्येयमक्षयं।ततः १८७
स्तमेवाधिरथिःस्यंदनंदुर्मुखेहते।आस्थितःप्रबभौराजन्दीप्यमानइवांशुमान्॥शयानंभिन्नमर्माणंदुर्मुखं

सुरुक्मपत्राणिवेगवन्त्येषां॥

शोणितोक्षितं।दृष्ट्वाकर्णोऽश्रुपूर्णाक्षोमुहूर्तंनाभ्यवर्तत।तंगतासुमतिक्रम्यकृत्वाकर्णःप्रदक्षिणं।दीर्घमुष्णं
श्वसन्वीरोनकिंचित्प्रत्यपद्यत।तस्मिंस्तुविवरेराजन्नाराचान्गार्ध्रवाससः।प्राहिणोत्सूतपुत्रायभीमसेनश्चतुर्दश
।तेतस्यकवचंभित्वास्वर्णचित्रंमहौजसः।हेमपुंखामहाराजव्यद्योतंतदिशोदश।तेपिबन्सूतपुत्रस्यशोणितंर
क्तभोजनाः।क्रुद्धाइवमनुष्येंद्रभुजगाःकालचोदिताः।प्रसर्पमाणामेदिन्यांतेव्यरोचंतमार्गणाः।अर्द्धप्रविष्टा
ःसंरब्धाबिलानीवमहोरगाः।तंप्रत्यविध्यद्राधेयोजांबूनदविभूषितैः।चतुर्दशभिरत्युग्रैर्नाराचैरविचारयन्
।तेभीमसेनस्यभुजंसव्यंनिर्भिद्यपत्रिणः।प्राविशन्मेदिनींभीमाःक्रौंचंपत्ररथाइवाते व्यरोचंतनाराचाःप्र
विशंतोवसुंधरां।गच्छत्यस्तंदिनकरेदीप्यमानइवांशवः।सनिर्भिन्नोरणेभीमोनाराचैर्मर्मभेदिभिः।सुस्रुवेरुधिरंभू
रिपर्वतःसलिलंयथा।सभीमस्त्रिभिरायत्तैःसूतपुत्रंपतत्रिभिः।सुपर्णवेगैर्विव्याधसारथिंचास्यसप्तभिः।सविह्व
लोमहाराजकर्णोभीमबलाहतः।प्राद्रवज्जवनैरश्वैरणंहित्वामहायशाः।भीमसेनस्तुविस्फार्यचापंहेमप
रिष्कृतं।आहवेतिरथोतिष्ठज्वलन्निवहुताशनः॥ ॥द्रोणपर्वणिजयद्रथवधेभीमप्रवेशः॥ ॥धृतराष्ट्रउवाच
॥ ॥दैवमेवपरंमन्येधिक्पौरुषमनर्थकं।यत्राधिरथिरायस्तोनातरत्पांडवंरणे।कर्णःपार्थान्सगोविंदान्जेतुमु

द्रोण यमः संयमनव्यापारः। कालः कलयनव्यापारः। अंतको मारणव्यापारः। आरोहत। आसदत॥
असदते रणे। न च कर्णसमं योधं लोकेऽपश्यामि कंचन। इति दुर्योधनस्याहं समश्रौषं जल्पतो मुहुः। कर्णो हि
बलवान् शूरो दृढधन्वा जितक्लमः। इति मामब्रवीत् सूत मंदो दुर्योधनः पुरा। वसुषेणसहायं मां नालं देवापि सं
युगे। किमु पांडुसुता राजन् गतसत्वा विचेतसः। तत्र तं निर्जितं दृष्ट्वा भुजंगमिव निर्विषं। युद्धात् कर्णमपक्रांतं किं
स्विद् दुर्योधनो ब्रवीत्। अहो दुर्मुखमेवैकं युद्धानामविशारदं। प्रावेशयद् हुतवहं पतंगमिव मोहितः। अश्वत्था
मा मद्रराजः कृपः कर्णश्च संगताः। न शक्ताः प्रमुखे स्थातुं नूनं भीमस्य संजय। तेऽपि चास्य महाघोरं बलं नागायुतो
पमं। जानंतो व्यवसायं च क्रूरं मारुततेजसः। किं मर्षं क्रूरकर्माणं यमकालांतकोपमं। बलसंरंभवीर्यज्ञाः
कोपयिष्यंति संयुगे। कर्णस्त्वेको महाबाहुः स्वबाहुबलमाश्रितः। भीमसेनमनादृत्य रणेऽयुध्यत सूतजः। यो
जयत् समरे कर्णं पुरंदर इवासुरान्। न स पांडुसुतो जेतुं शक्यः केनचिदाहवे। द्रोणं यः संप्रमथ्यैकः प्रविष्टो मम
वाहिनीं। भीमो धनंजयान्वेषी कस्तमर्छेज्जिजीविषुः। को हि संजय भीमस्य स्थातुमुत्सहतेऽग्रतः। उद्यताशनिहस्तस्य महेंद्र
स्येव दानवाः। प्रेतराजपुरं प्राप्य निवर्तेतापि मानवः। न भीमसेनं संप्राप्य निवर्तेत कदाचन। पतंगा इव वह्निं ते प्राविशन्न १२५८
ल्पचेतसः। ये भीमसेनं संक्रुद्धमन्वधावन् विमोहिताः। यत्तत्सभायां भीमेन मम पुत्रवधाश्रयं। शूरसंरंभिणोग्रेण कुरूणां शृण्व
तां तदा॥

तन्नूनमभिसंचिंत्य दृष्ट्वा कर्णं च निर्जितं। दुःशासनः सहभ्रात्रा भयाद् भीमादुपारमत्। यश्च संजय दुर्बुद्धिर्बलवां समितौ मु
हुः। कर्णो दुःशासनोऽहं च जेष्यामो युधि पांडवान्। स नूनं विरथं दृष्ट्वा कर्णं भीमेन निर्जितं। प्रत्याख्यानाच्च कृष्णस्य भृशं
तप्यति संजय। दृष्ट्वा भ्रातॄन् हतान् युद्धे भीमसेनेन दंशितान्। आत्मापराधात् सुमहन्नूनं तप्यति पुत्रकः। को हि जीवितमन्वि
च्छन् प्रतीपं पांडवं व्रजेत्। भीमं भीमायुधं क्रुद्धं साक्षात्कालमिव स्थितं। वडवामुखमध्यस्थो मुच्येतापि हि मानवः। न भी
ममुखसंप्राप्तो मुच्येतेति मतिर्मम। न पार्था न च पांचाला न च केशवसात्यकी। जानंति युधि संरब्धा जीवितं परिरक्षितुं।
अहो मम सुतानां हि विपन्नं सूत जीवितं॥ ॥संजय उवाच॥ ॥यत् शोचसि कौरव्य वर्तमाने महाभये। त्वम
स्य जगतो मूलं विनाशस्य न संशयः। स्वयं वैरं महत्कृत्वा पुत्राणां वचने स्थितः। उच्यमानो न गृह्णासि मर्त्यः पथ्य
मिवौषधं। स्वयं पीत्वा महाराज कालकूटं सुदुर्जरं। तस्येदानीं फलं कृत्स्नमवाप्नुहि नरोत्तम। यत्तु कुत्सयसे योधान् फलं
युध्यमानान् यथाबलं। तत्र ते वर्तयिष्यामि यथा युद्धमवर्तत। दृष्ट्वा कर्णं तु पुत्रास्ते भीमसेनपराजितं। नामृष्यंत
महेष्वासाः सोदर्याः पंच भारत। दुर्मर्षणो दुःसहश्च दुर्मदो दुर्धरो जयः। पांडवं चित्रसन्नाहास्ते प्रतीपमुपाद्रवन्।
ते समंतान्महाबाहुं परिवार्य वृकोदरं। दिशः शरैः समावृण्वन् शलभानामिव व्रजैः। आगच्छतस्तान् सहसा के
भा

द्रो० मारान्हेमस्वरूपिणः ॥ प्रतिजग्राह समरे भीमसेनो हसन्निव ॥ तव दृष्ट्वा तु तनयान्भीमसेनस्तरेगतान् ॥ अभ्यवर्तत
राधेयो भीमसेनं महाबलं ॥ विसृजन्विशिखांस्तीक्ष्णान्स्वर्णपुंखाञ्छिलाशितान् ॥ तं भीमो न्यवारयत्कर्णं वार्यमाणः
सुतैस्तव राजन्कर्णस्तु ततः कर्णं परिवार्य समंततः ॥ अवाकिरन्भीमसेनं ते शरैः सन्नतपर्वभिः ॥ ततो बाणैः पंचविंशत्या साश्वा
न्राजन्नरर्षभान् ॥ ससूतान्भीमधनुषो भीमो निन्ये यमक्षयं ॥ प्रपतन्स्यंदनेभ्यस्ते सार्द्धं सूतैर्गतासवः ॥ चित्रपुष्पधरा नगा
वातेन इव महाद्रुमाः ॥ तत्राद्भुतमपश्याम भीमसेनस्य विक्रमं ॥ संवार्याधिरथिं बाणैर्यज्जघान तवात्मजान् ॥ स वार्यमाणो
भीमेन शितैर्बाणैः समंततः ॥ सूतपुत्रो महाराज भीमसेनमवैक्षत ॥ तं भीमसेनः संरंभात्क्रोधसंरक्तलोचनः ॥ वि
र स्फार्य सुमहच्चापं मुहुः कर्णमवैक्षत ॥ ॥ द्रोणपर्वणि जयद्रथवधपर्वणि भीमप्रवेशे ॥ ॥ संजय उवाच ॥ तवात्मजांस्तु प
तितान्दृष्ट्वा कर्णः प्रतापवान् ॥ क्रोधेन महताविष्टो निर्विण्णोऽभूत्स जीवितात् ॥ आगस्कृतमिवात्मानं मेने चाधिरथिस्तदा ॥ भी
मसेनस्ततः क्रुद्धः कर्णमभ्यद्रवत्संभ्रमात् ॥ भीमं पंचभिर्विव्याध राधेयः प्रहसन्निव ॥ पुनर्विव्याध सप्तत्या स्वर्णपुंखैः शिलाशि
तैः ॥ अविचिंत्य च तान्बाणान्कर्णेनास्तान्वृकोदरः ॥ रणे विव्याध राधेयं शतेन नतपर्वणां ॥ पुनश्च विशिखैस्ती २५५
क्ष्णैर्विद्ध्वा मर्मसु पंचभिः ॥ धनुश्चिच्छेद भल्लेन सूतपुत्रस्य मारिष ॥ अथान्यद्धनुरादाय कर्णो भारत दुर्मनाः ॥

प्रतिकृतप्रतिकर्माणं कृतमतीत्य वयः ॥ अवारोहत्सा आसदत् ॥ संरब्धमनिशुक्रं ॥ चित्रोपचित्रश्चित्रउपचित्रश्च ॥
इषुभिश्छादयामास भीमसेनं परंतपः ॥ तस्य भीमो रथाद्दृष्ट्वा विविद्ध्यस्य च मारिष ॥ उज्जहार महाहासं कृते प्रतिकृते पुनः ॥
इषुभिः कार्मुकं चास्य चकर्त पुरुषर्षभः ॥ सोऽपातयन्महाराज कर्णः प्रहृष्टं महास्वनं ॥ अवारोहद्रथात्तस्माद्रथ कर्णो महारथः ॥ ग
दां सो वा समरे भीमाय प्राहिणोद्रुषा ॥ तामापतंतीं भीमस्तु भीमसेनो महागदां ॥ शरैरवारयद्राजन्सर्वसैन्यस्य पश्यतः ॥ त
तो बाणसहस्राणि प्रेषयामास पांडवः ॥ सूतपुत्रवधाकांक्षी त्वरमाणः पराक्रमी ॥ तानिषूनिषुभिः कर्णो वारयित्वा महामृधे ॥ कव
चं भीमसेनस्य पातयामास सायकैः ॥ अथैनं पंचविंशत्या नाराचानां समार्पयत् ॥ पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥ त
तो भीमो महाबाहुर्नवभिर्नतपर्वणां ॥ प्रेषयामास संक्रुद्धः सूतपुत्रस्य मारिष ॥ ततस्य कवचं भित्वा तथा बाहुं च दक्षिणं ॥ अभ्य
गाद्धरणीं बाणो वल्मीकमिव पन्नगः ॥ स बाध्यमानो बाणौघैर्भीमसेनधनुश्च्युतैः ॥ पुनरेवाभवत्कर्णो भीमसेना
त्पराङ्मुखः ॥ तं पराङ्मुखमालोक्य पदातिं सूतनंदनं ॥ कौंतेयशरसंछन्नं राजा दुर्योधनोऽब्रवीत् ॥ त्वरध्वं सर्वतो यत्ता राधे ॥ रथं पाव ॥
यस्य रथं प्रति ॥ ततस्तव सुता राजन्श्रुत्वा भ्रातुर्वचोऽद्भुतं ॥ अभ्ययुः पांडवं युद्धे विसृजंतः शिलीमुखान् ॥ चित्रोपचित्र
श्चित्राक्षश्चारुचित्रः शरासनः ॥ चित्रायुधश्चित्रवर्मा समरे चित्रयोधिनः ॥ तानापतत एवाशु भीमसेनो महाबलः ॥ एकैके मह
ज मही घोरा अभिरामा नवा वधूरिव॥ मज्जामेदः कर्दमिनीं शोणितौघतरंगिणीं॥ ममीर्स्थितिरंघ्रां धीवके शाद्वलाकु रौ
कुलां॥ शिरोबाहूपलतटां रुक्मकेडाविसंकटां॥ चित्रध्वजपताकाढ्यां त्रया यो स्मिमालिनीं॥ क्षितितासु प्रद्धायाग
जदेहाभिसंकुलां॥ रथोडुपशतादानीं हयसंघातरोधसां॥ रथचक्रयुगेषाक्षकूबरैरतिदुर्गमां॥ प्रासासिशातप
रश्वधिशिखाहिदुरासदां॥ वलकंकमहानकांगोमायुगमकरोत्कटां॥ शुद्धोदसहायांश्चाविलतनिरयां॥ तत्व दु तैं
सूतपिशाचादिभूतैः कीर्णां सहस्रशः॥ गतासुयोधनिःश्रेष्टशरीरशतवाहिनीं॥ महाप्रतिभयां रौद्रां रौद्रां तां वैतर
णीमिव॥ नदीं प्रवर्त्तयामास भीरूणां भयवर्द्धिनीं॥ तद्दृष्ट्वास्य विक्रांतमंतकस्यैव रूपिणः॥ अभूतपूर्वं कुरुषु

कदंबीकृत्य कदंबकुसुमानिव रुबी॥

यमागाद्रणाजिरे। ततेश्चा हाथवा राणामस्त्रेरस्त्राणि पांडवः। आत्मानं रोक्षमाच हरो ह कर्म्माणि निष्ठितः। ततो रथेष्वचरं स्त्रूसंपेत्रु
णयोधनंजयः। त्वमेतद्वस्त्रस्त्रेवराच्चाजन्म तिकामर्जुनः। मोदयन्निवना राधेकर्णमश्वत्थविधेत्सया। विसृजन्निषुसंघांश्च
राजन्सितमारुधिः। स रथेष्वचरत्रूर्णं वै हनन् योधनंजयः। त्वमेतद्वस्त्रस्यगारवानाः सदस्त्रशाश्च हत्यपतोनरेंद्रस्त्रावां
नशोघ्रसद्स्त्रशः। आददानं मदृष्ट्वा संसंदधत्तं च सायकान्। विसृजंतं च कौंतेयं नाद्रक्ष्याम कदाचन। तथा समविदिशो राजन्
न्मवीरस्य धन्विनो रणे। व्योकुलीकृत्य कौंतेयो जयद्रथमुपाद्रवत्। सिंधवाभिमुखं यांतं त्याक्ष्य संवेक्ष्य पार्थिवं। त्ववत्र्
दृष्ट्वा हाराविराद्गाहस्त्यनीविते। यो योस्य धन्वदाकं दत्ताव कः पांडवं रणे। तस्य तस्यांतगो बाणाः शरीरस्य च तत्स्यतो।
कबंधबद्धलं बकृतवान्स न्यूपमहारथः। अर्जुनो जयतोध्येशः गारेर्कर्णिश्रुसत्रिलिसां। एवं तु तव राजेंद्र चतुरंगबलं तदा। व्या
कुलीकृत्य कौंतेयो जयद्रथमुपाद्रवत्। द्रौणिं पंचाशता विध्वा वृषसेनं त्रिभिः शरैः। कृपायमाणः कौंतेयः कृपं नवभि
रार्दयत्। शल्यं षोडशभिर्बाणैः कर्णं द्वात्रिंशता परैः। सैंधवं चतुःषष्ट्या विद्धा सिंहनादं ननाद ह। सैंधवस्तु तथा विद्धः
शरैर्गांडीवधन्वना। न चक्षमे सुसंक्रुद्धस्तोत्रार्दित इव द्विपः। स वराहध्वजस्तूर्णं गार्ध्रपत्रानजिह्मगान्। क्रुद्धाशी
विषसंकाशान्कर्मारपरिमार्जितान्। मुमोच निशितान्संख्ये सायकान्सव्यसाचिनः। त्रिभिस्तु विद्ध्वा गोविंदं नाराचैः ष २२०

ड्भिरर्जुनं। अष्टाभिर्वाजिनो विध्वा ध्वजं चैकेन पत्रिणा। स विक्षिप्यार्जुनस्तूर्णं सैंधवप्रहितान्शरान्। युगपत्तस्य चिच्छेद
शराभ्यां सैंधवस्य ह। सारथेश्च शिरः कायाद्ध्वजं च समलंकृतं। स छिन्नयष्टिः सुमहान्ध्वजः शरहतः। वराहः सिंधु
राजस्य पपाताग्निशिखोपमः। एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे। अब्रवीत्पांडवं राजंस्त्वरमाणो जनार्दनः। एष
मध्ये कृतः षड्भिः पार्थ वीरैर्महारथैः। जीवितेप्सुर्महाबाहो भीतस्तिष्ठति सैंधवः। एताननिर्जित्य रणे षड्रथान्पुरु
षर्षभ। न शक्यः सैंधवो हंतुं यत्नो निर्व्याजमर्जुन। योगमत्र विधास्यामि सूर्यस्यावरणं प्रति। अस्तंगत इव व्यक्तं द्रक्ष्यत्येकः
ससिंधुराट्। हर्षेण जीविताकांक्षी विनाशार्थं तव प्रभो। न गोप्स्यति दुराचारः स आत्मानं कथंचन। तत्र छिद्रे प्रहर्त
व्यो गतोऽस्तमिति भास्करः। एवमस्त्विति बीभत्सुः केशवं प्रत्यभाषत। ततोऽसृजत्तमः कृष्णः सूर्यस्यावरणं प्रति। योगी
योगेन संयुक्तो योगानामीश्वरो हरिः। सृष्टे तमसि कृष्णेन गतोऽस्तमिति भास्करः। हृष्टा योधास्तव विभो पार्थनाशान्नरा
धिप। ते प्रहृष्टा रणे राजन्नापश्यन्त दिवाकरं। उन्नाम्य वक्त्राणि तदा स च राजा जयद्रथः। वीक्षमाणस्तदा तस्मिन्सिंधु
राजो दिवाकरं। पुनरवाङ्वीक्ष्य धनंजयमिदं वचः। पप्रच्छ सिंधुपतिर्वीरस्समागे दिवाकरं। तथा विपुलसुरूपस्तत्रोम
वीर

द्रो०

रतसत्तम। अयं कालो महाबाहो वधयास्य जयसत्तम॥ विधि स्पृष्टो नमस्याशु कुरुसा फल्गुमात्मनः॥ इत्येवं केशवेनोक्त
ः पाण्डुपुत्रः प्रतापवान्॥ अवधीत्तावकं सैन्यं शरैरग्निशिखोपमैः॥ कृपं विव्याध विंशत्या कर्णं पंचाशता शरैः॥ शल्यं
दुर्योधनं चैव षड्भिः षड्भिरताडयत्॥ वृषसेनं तथाष्टाभिः षष्ट्या सैंधवमेव च॥ तथैवान्यान्महाबाहुः कौरव्यस्त्वदीयान्
दुर्जनः॥ गाढं विद्धा शरै राजन् जलदभ्र पांडववत्॥ ते समीपस्थितं दृष्ट्वा लेलिहानमिवानलं॥ जयद्रथस्य गोप्ता
रः संशयं परमं गताः॥ ततः सर्वे महाराज त... यायोधा जयेषिणः॥ सिषिचुः शरधाराभिः पाकशासनिमाहवे॥
संछाद्यमानः कौंतेयः शरजालैरनेकशः॥ अक्रुध्यत महाबाहुः कुरुनंदनः॥ ततः शरमयं जालं तुमुलं पा
कशासनिः॥ व्यसृजत्पुरुषव्याघ्रस्तव सैन्यजिघांसया॥ ते वध्यमाना वीरेण योधा राजन्न तेन तव॥ प्रजह्रुः सैंधवं
भीता द्वौ समं नापसर्पताम्॥ नचाद्भुतमपश्याम कुंतीपुत्रस्य विक्रमं॥ ताहृग्भावी न्नो वा भवत्कार महायशाः॥ द्विपान्द्विपवरां
श्चैव हयान्हयगतानपि तथा मारथिनश्चैव न्यहनत्कपिध्वजः॥ निदानं नतं समं रथकेतुर्न्मयो दृष्टो नराधिप॥ गजो वाजी नरो वापि योधपार्थ
शरानाहत॥ रजसा तमसा चैव योधाः संछन्न चक्षुषः॥ कश्मलं प्राविशन्घोरं नान्यजानन्परस्परं॥ ते शरैर्भिन्नमर्माणः सैनिकाः पार्थ २२१

चोदिताः॥ बभ्रमुश्चस्खलुःपेतुः से दुर्म्मम्लुश्च भारत॥ तस्मिन्महति संग्रामे कल्पांते क्षयमिव संक्षये॥ रणे महति दुष्पारे वर्त्तमाने
सुदारुणे॥ शोणितस्य प्रसेकेन शीघ्रत्वादनिलस्य च॥ अशाम्यत रजो भौमं मस्तके सिक्ते धरातले॥ आनाभि निरमज्जंश्च रथ
चक्राणि शोणिते॥ मत्तावेगवत्तो गजंश्चावकानां रणांगणे॥ हस्तिनश्च हता राजन् दारितांगाः महस्वराः॥ स्वान्यनीकानि हत्वा
दंतैश्चान्येनाः॥ इ ह हु दुद्रुवुः द्रव्याश्च पतिताः राजन्॥ पत्तयश्च नराधिप॥ हुडुहुडु नेया राजन् रथनं नयवसाद॥ शत्रून्कुकुंकेशा विकवचा
ः स्वरंतः कृतं कंपितो॥ प्रयत्नापयंतं से रजसा स्पर्क्षा रणं शिरो ततः॥ जरूया सहदीनाश्चके चित्रनामवद्भुविः ह ताना चापरे मध्ये
हि स्थानां निलिल्पिरे॥ एवं तव च लेन जर्द्राव यिचा धनंजयः॥ न्यवधीशायकैघोरैः सिंधुराजस्य रक्षिणः॥ कर्णं द्रोणिं कृपं शल्य
ल्यं वृषसेनं सुयोधनं॥ ताद्यामाममती भुणाशरजालेन पांडवः॥ न प्रस्फत्व व्क्रियत्रां जनत्रं च तत्रापि सन्दधत॥ अदृश्यतार्जु
नः संस्यशीघ्रास्त्रत्वाक प्रचलं॥ धनुर्म्मंडलमेवास्य दृश्यते स्म समंततः॥ सायकाश्च व्यदृश्यंत निश्चरंतः ततः॥ कर्णस्य   तसमं४
चेषुड्भिर्वा हषसनस्य विद्धा शल्यस्य च तं मालन रथनी डाद पादरत॥ गाढविद्धा च्युतो रुक्मा शरैः स्वस्रा यमा
त्वर्लि॥ अर्जुनो जयतां श्रेष्ठो द्रोणिमाजाह तीरणा॥ एवं तान्व्याकुली कृत्य त्वदीयान्समहारथान्॥ उग्रमादाय शरं घोरं पा
वकानलसंनिभं॥ इंद्राशनिसमप्रख्यं दिव्यमंत्राभिमंत्रितं॥ सर्वभारसहं शश्वद्गंधमाल्याभिपूजितं॥ वज्रेणास्त्रेण

आलक्षितःश्रमिदः

द्रोण० संग्रामे विधिवत्स कुरुनंदनः ॥ समारब्धस्तदा बाहुर्गांडीवाद्विप्रमर्जुनः ॥ तस्मिंसंधीयमाने तु हताश्चलननात उसि। अंतरिक्षे
महानादो देवतानां च भानव्रजः। अब्रवीच्च तदा नरवर माणेनना हीनः ॥ अस्त्रेम होधश्रेष्ठ पि यास तिदिवाकरः। श्रृणुचेत
च कार्यमिदं ये द ष्वधंक्षति। हृदयस्य ॥ सेंधवस्य पिता जगति विश्रुतः ॥ सकालेनेह महता सेंधवं प्राप्तवान्सुतं जयद्रथ
ममित्रघ्नं चोवाच नराहृपा। अंतर्हिता तदा वाणी मेघदुंदुभिनिःस्वना ॥ तवात्मजो मनुष्येंद्र कुलशीलसमादिभिः ॥ ग्रुणै
र्भविष्यति विप्रो सदृशो वंशयाद्वयोः ॥ क्षत्रियप्रवरो लोके नित्यंशूराभिसत्कृतः ॥ शत्रुभिर्युध्यमानस्य संग्रामे तस्य ध
न्विनः ॥ शिरश्छेत्स्यति संक्रुद्धः शत्रुरालक्षितो भुवि ॥ एतच्छ्रुत्वा सिंधुराजः क्षणं ध्यात्वा चिरं परिंतपः ॥ ज्ञातीन्सर्वानुवाचेदं पुत्रस्ने
हाभिचोदितः ॥ संग्रामे युध्यमानस्य वहतो महतीं धुरं ॥ धरण्यां मम पुत्रस्य पातयिष्यति यः शिरः ॥ तस्यापि शतधा मूर्धा फ
लिष्यति न संशयः ॥ एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथं ॥ वृद्धक्षत्रो वनं यातस्तपश्चोग्रं समाश्रितः ॥ स तप्यत्येव तेजस्वी तपो
घोरं दुरासदं ॥ समंतपंचकादस्माद्बहिर्वानरकेतन ॥ तस्माज्जयद्रथस्य त्वं शिरश्छित्वा महाहवे ॥ दिव्येनास्त्रेण रिपुघ्न
घोरेणाद्भुतकर्मणा ॥ सकुंडलं सिंधुपतेः प्रभंजनसुतानुज ॥ उत्संगे पातयाद्याशु वृद्धक्षत्रस्य भारत ॥ अथ त्वमस्य
मूर्धानं पातयिष्यसि भूतले ॥ तवापि शतधा मूर्धा फलिष्यति न संशयः ॥ यथा चेदं न जानीयात्स राजा तपसि स्थितः ॥ तथा २२२

कुरु कुरुश्रेष्ठ दिव्यमस्त्रमुपाश्रितः ॥ न ह्यसाध्यमकार्यं वा विद्यते तव किंचन ॥ समस्तेष्वपि लोकेषु त्रिषु वासवनंदन ॥ ए
तच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन् ॥ इंद्राशनिसमस्पर्शं दिव्यमस्त्राभिमंत्रितं ॥ सर्वभारसहं शश्वद्गंधमाल्यार्चितं शरं ॥ वि
ससर्जार्जुनस्तूर्णं सेंधवस्य वधे धृतं ॥ तत्तु धनंजयेनाशु प्रेरितं भास्करद्विषं ॥ अर्जुनेनाशु शिरः कायात्सेंधवस्य महात्मनः ॥ स पा
र्थेन निर्मुक्तः शरः श्येन इवाशुगः ॥ छित्वा शिरः सिंधुपतेरुत्पपात विहायसं ॥ तच्छिरः सिंधुराजस्य शरैरूर्ध्वमवाहयत् ॥ योध
यामास तान्सर्वान्पांडवः परमस्त्रवित् ॥ तत्र सुमहदाश्चर्यं तच्चापश्याम भारत ॥ समंतपंचकाद्बाह्ये शिरस्तदहरत्ततः ॥ एतस्मि
न्नेव काले तु वृद्धक्षत्रो महीपतिः ॥ संध्यामुपास्ते तेजस्वी संबंधी तव मारिष ॥ उपासीनस्य तस्याथ कृष्णकेशं सकुंडलं ॥ सिंधुरा
जस्य शिरस्तच्च उत्संगे समपातयत् ॥ तस्योत्संगे निपतितं तच्छिरश्चारुकुंडलं ॥ वृद्धक्षत्रस्य नृपतेरलक्षितमरिंदम ॥ तालानीतस्य
तस्याथ वृद्धक्षत्रस्य भारत ॥ उत्तिष्ठतस्ततस्तस्य सहसा शिरो गतं धरातले ॥ ततस्तस्य नरेंद्रस्य पुत्रमूर्धनि भूतलं ॥ गते तस्यापि शि
रः शतधागमदरिंदम ॥ ततः सर्वाणि भूतानि विस्मयं जग्मुरुत्तमं ॥ वासुदेवं च बीभत्सुं प्रशशंसुर्महारथं ॥ ततो विनिहते
राजन्सिंधुराजे किरीटिना ॥ तमस्तद्वासुदेवेन संहृतं भरतर्षभ ॥ पश्चाज्ज्ञातं महीपाल तव पुत्रैः सहानुगैः ॥ वासुदेवप्रयु
क्तेयं मायेति नृपसत्तम ॥ एवं स निहतो राजन्पार्थेनामिततेजसा ॥ अक्षौहिणीरष्टौ हत्वा जामाता तव सैंधवः ॥ हतं जय

इति जयद्रथवधः॥

द्रोण० दृष्ट्वा हृष्टाश्च सर्वानराधिपाः कौरवा दुःखादश्रूणि मुमुचुर्निराशा जीविते जये॥ ततो जयद्रथे राजन्हते पार्थेन केशवः॥
दध्मौ शंखं महाबाहुरर्जुनश्च परंतप। भीमश्च वृष्णिसिंहश्च युधामन्युश्च मारिष। उत्तमौजाश्च विक्रांतः शंखान्दध्मुः पृथ-
क्पृथक्॥ श्रुत्वा महांतं तं शब्दं धर्मराजो युधिष्ठिरः॥ सैंधवं निहतं मेने फाल्गुनेन महात्मना॥ ततो वादित्र-
घोषेण स्वान्योधानभ्यहर्षयत्। अभ्यवर्तत संग्रामे भारद्वाजं युयुत्सया॥ ततः प्रववृते राजन्नस्तं गच्छति भास्करे। द्रोण-
स्य सोमकैः सार्धं संग्रामो लोमहर्षणः॥ ते तु सर्वप्रयत्नेन भारद्वाजं जिघांसवः॥ सैंधवे निहते राजन्नयुध्यंत महारथाः॥
अयोधयंस्तदा द्रोणं जयोन्मत्तास्ततस्ततः॥ अर्जुनोऽपि रणे योधांस्तावकान्समरे मारिष। अयोधयन्महाबाहुर्ह-
त्वा सैंधवकं नृपं। स देवराडिव देवशत्रून्किरीटमाली व्यधमत्समंतात्। यथा तमांस्यभ्युदितस्तमोघ्नः पूर्व-
प्रतिज्ञां समवाप्य वीरः॥ ॥इति द्रोणपर्वणि जयद्रथवधे समाप्तमासोहेकक्र्८त्रेवक्षश्च॥ ॥ ॥
धृतराष्ट्र उवाच॥ ॥तस्मिन्विनिहते वीरे सैंधवे सव्यसाचिना॥ मामकाः यदकुर्वंत तन्ममाचक्ष्व संजय॥ ॥
संजय उवाच॥ ॥सैंधवं निहतं दृष्ट्वा रणे पार्थेन मारिष॥ अमर्षवशमापन्नः कृपः शारद्वतस्तदा॥ महता शरव-
र्षेण पांडवं समवाकिरत्। द्रौणिश्चाभ्यद्रवद्राजन्रथमास्थाय फाल्गुनं। तावेनं रथिनां श्रेष्ठौ रथाभ्यां रथसत्तमं॥ २२३

आचार्यकं च स्वाभ्यासकौशलं। वक्तुं तेऽद्योधिन तिमित्रं॥ ॥

उभावुभयतस्तीक्ष्णैर्विशिखैरभ्यवर्षतां। स तथा शरवर्षाभ्यां सुमहद्भ्यां महाभुजः। पीड्यमानः परामार्तिमगमद्रथिनां
वरः॥ सोऽजिघांसुर्गुरुं संख्ये गुरोस्तनयमेव च। चकाराचार्यकं तत्र कुंतीपुत्रो धनंजयः॥ अस्त्रैरस्त्राणि संवार्य द्रौणे-
ः शारद्वतस्य च। मंदवेगानिषूंस्ताभ्यामजिघांसुरवासृजत्। ते वापि भृशमभ्यघ्नन्विशिखाः पार्थचोदिताः। बहुत्वात्तु
परामार्तिं शराणां ताववगच्छतां। अथ शारद्वतो राजन्कौंतेयशरपीडितः। अवासीदद्रथोपस्थे मूर्च्छामभिजगाम ह।
विह्वलं तमभिज्ञाय भर्तारं शरपीडितं। हतोऽयमिति विज्ञाय सारथिस्तमपावहत्। तस्मिन्भग्ने महाराज कृपे शा-
रद्वते युधि। अश्वत्थामाप्यपायासीत्पांडवेयाद्रथांतरं। दृष्ट्वा शारद्वतं पार्थो मूर्च्छितं शरपीडितं। रथ एव महेष्वासः
कृपणं पर्यदेवयत्। अश्रुपूर्णमुखो दीनो वचनं चेदमब्रवीत्। पश्यन्निदं महाप्राज्ञः क्षत्ता राजानमुक्तवान्। कुलां-
तकरणे पापे जातमात्रे सुयोधने। नीयतां परलोकाय साध्वयं कुलपांसनः। अस्माद्धि कुरुमुख्यानां महदुत्पत्स्यते भयं।
तदिदं समनुप्राप्तं वचनं सत्यवादिनः। तत्कृते ह्यद्य पश्यामि शरतल्पगतं कृपं। धिगस्तु क्षात्रमाचारं धिगस्तु
बलपौरुषं। को हि ब्राह्मणमाचार्यमभिद्रुह्येत मादृशः। ऋषिपुत्रो ममाचार्यो द्रोणस्य दयितः सखा। एष शेते रथोप

अन्यस्त्वाचाहवः। स्वधर्मगतेना कार्यं वद्वि द्विजानां धर्मिणां कृति स्विकर्मविगतेन। मन्त्रवन्मन्त्रे नेत्यादि गतेन मन्त्रेन यां तेन ब्रह्मा-
द्रो० स्त्रे कृपो महाराज पीडितः। अकामयानवमया विशिखैर्गर्हितोन्नतः। अवामा दद्धियोपस्त्रिपाणान्पीडयती वमो बुवशो
कान्तिव्र तनवागरे रन्य हि तनवा। कन्यस्ते बकृतिर्बाणो हेश धर्मगतेन वै। शोचयत्यपनि यतनेन्द्रयः बुद्धवधाद्धिमं
कृपणं स्वरथे सन्नं पश्यन्कृलतं घागतं। उपाकृत्य हृये विद्यामाचार्याच्चनरर्षभ। प्रयच्छन्तीह का मा त्वां देवब्रूप
यानि ता। एतु विद्यामुपादाय प्रकृन्यः बकृपाधमा। प्रेतिनान वधुर्हत्रास्त्रे विनिरयगामिनः। नहि दिनं रका या ह्मकृते क
न्मी मया कृतं। आचार्यं शरवर्षेण रथे सादयता कृपं। यवन्त्वंपुपाकृवन्नस्त्रं मामभवीत्कृपः। न कथं चन कौरव्य प्र म०टी०वं
गावि ति। नहिदं वचनं साधोराचार्यस्य महात्मनः। नानुष्ठितं तनम वा ज्ञो विशिखैरभिवर्षता। नमस्त्वास्मे द्रुहस्त्वाय गो
तमायापलायिने। धिगस्तु मम वाह्सस्य यदस्मे प्रहराम्यहं। तथा विलपमाने तु मम कृपा विनिर्त प्रति। सैंधवं निहतं दृष्ट्वा
राधेयः सभ्युपाद्रवत्। पांचाल्यौ सात्यकिश्चैव सहसा समुपाद्रवन्। उपायान्तं तु राधेयं दृष्ट्वा पार्थो महारथः। प्रहसन्दे
वकीपुत्रमिदं वचनमब्रवीत्। एष प्रयात्याधिरथिः सात्यकेः स्यन्दनं प्रति। न मृष्यति हतं रणे नूनं भूरिश्रवसमाहवे। यत्र
यात्येष तत्र त्वं चोदयाश्वाञ्जनार्दन। मा सोमदत्तिः पदवीं गमयेत्सात्यकिं वृषः॥ २२४
ननचेतयद्धिः। यथागतं याहवामवस्त्यायासं। उपाकृत्याधीत्य। कामान् इष्ठ दक्षिणाः। उपाकर्तं इत्युपदिशन्॥ ॥

यथातथायदेष ह्यं। संदेशं संकेत॥
एवमुक्तो महाबाहुः केशवः सव्यसाचिना। प्रत्युवाच महातेजाः कालयुक्तमिदं वचः। अलमेष महाबाहुः कर्णायैको
पांडव। किंपुनर्द्रौपदेयाभ्यां सहितः सात्वतर्षभः। नच तावत्क्षमः पार्थ कर्णेन तव संगमः। प्रज्वलन्ती महोल्केव ति
ष्ठत्यस्य हि वासवी। त्वदर्थं पूज्यमानैषा रक्ष्यते परवीरहन्। अतः कर्णः प्रयात्वत्र सात्वतस्य यथा तथा। अहं ज्ञास्यामि कौ
न्तेय कालमस्य दुरात्मनः। यत्रैनं विशिखैस्तीक्ष्णैः पातयिष्यसि भूतले॥ ॥धृतराष्ट्र उवाच॥ ॥योसौ कर्णेन वी
रस्य वार्ष्णेयस्य समागमः। हते तु भूरिश्रवसि सिंधवे विनिपातिते। सात्यकिश्चापि विरथः कं समारूढवान् रथं। चक्रर
क्षौ च पांचाल्यौ तन्ममाचक्ष्व संजय॥ ॥संजय उवाच॥ ॥हंत ते वर्णयिष्यामि यथावृत्तं महारणे। शुश्रूषस्व स्थिरो
भूत्वा दुराचरितमात्मनः। पूर्वमेव हि कृष्णस्य मनोगतमिदं प्रभो। विजेतव्यो यथा वीरः सात्यकिः सौमदत्तिना। अतीता
नागते राजन्स हि वेत्ति जनार्दनः। ततः सूतं समाहूय दारुकं संदिदेश ह। रथो मे युज्यतां कल्यमिति राजन्महाबलः। न
हि देवा न गंधर्वा न यक्षोरगराक्षसाः। दानवा वा विजेतारः कृष्णयोः संति कश्चन। पितामहपुरोगाश्च देवाः सिद्धाश्च
ते विदुः। तयोः प्रभावमतुलं शृणु युद्धं च तद्यथा। सात्यकिं विरथं दृष्ट्वा कर्णाभ्युद्यतं रणे। दध्मौ शंखं महानादमा
र्षभेणाथ माधवः। दारुकोऽवेत्य संदेशं श्रुत्वा शंखस्य च स्वनं। रथमन्वानयत्तस्मै सुपर्णोच्छ्रितकेतनं। स केशवस्या-

प्राप्यारुह्य । गतप्रत्यागताह्वतिरावर्तितैर्मंडलैः । काश्यपेयस्य कश्यपगोत्रस्य ॥

तुमते रथं दारुकसंयुतं । आरुरोह शिनेः पौत्रो ज्वलनादित्यसंनिभं । कामगैः शैब्यसुग्रीवमेघपुष्पबलाहकैः ॥
हयोदग्रैर्महावेगैर्हेमभांडविभूषितैः । युक्तं समारुह्य च तं विमानप्रतिमं रथं । अभ्यद्रवत राधेयं प्रवपन्सायका
न्बहून् । चक्ररक्षावपि तदा युधामन्यूत्तमौजसौ । जयद्रथरथं प्राप्य राधेयं प्रत्युदीयतुः । राधेयोपि महाराज
शरवर्षं ससर्ज ह । अभ्यद्रवत्सुसंरब्धो रणे शैनेयमच्युतं । नैव दैवं न गांधर्वं नासुरोरगराक्षसं । तादृशं भुवि वा
युद्धं दिवि वा श्रुतमच्युत । उपारमत तत्सैन्यं सरथाश्वनरद्विपं । तयोर्दृष्ट्वा महाराज कर्म संमूढचेतनं । सर्वे च सम
पश्यंत तद्युद्धमतिमानुषं । तयोर्नृवरयो राजन्सारथ्यं दारुकस्य च । गतप्रत्यागतावृत्तैर्मंडलैः संनिवर्तितैः । सारथ्य
स्तु रथस्थस्य काश्यपेयस्य विस्मिताः । नभस्तलगताश्चैव देवगंधर्वदानवाः । अतीवावहिता द्रष्टुं कर्णशैनेययोर्
रणं । मित्रार्थे तौ पराक्रांतौ शुष्मिणौ स्पर्धिनौ रणे । कर्णश्चामरसंकाशो युयुधानश्च सात्यकिः । अन्योन्यं तौ महाराज शर
वर्षैरवर्षतां । प्रममाथ शिनेः पौत्रं कर्णः सायकवृष्टिभिः । अमृष्यमाणो निधनं कौरव्यजलसंधयोः । कर्णः शोकसमा
विष्टो महोरग इव श्वसन् । स शैनेयं रणे क्रुद्धः प्रदहन्निव चक्षुषा । अभ्यधावत वेगेन पुनः पुनररिंदमः । तं तु संक्रुद्धमालो
क्य सात्यकिः प्रत्यविध्यत । महता शरवर्षेण गजः प्रतिगजं यथा ॥

राज्यस्यांगस्य च दानेन कृतां प्रतिज्ञामर्जुनवधांगीकारं परिपालयन्प्रतीक्ष्यमाणः ॥ अथवा राज्यस्य प्रदाने ।

तौ समेत्य नरव्याघ्रौ व्याघ्राविव तरस्विनौ । अन्योन्यं संततक्षाते रणेनुपमविक्रमौ । ततः कर्णं शिनेः पौत्रः सर्व
पारशवैः शरैः । बिभेद सर्वगात्रेषु पुनः पुनररिंदमः । सारथिं चास्य भल्लेन रथनीडादपातयत् । अश्वांश्च
चतुरः श्वेतान्निजघान शितैः शरैः । छित्वा ध्वजं रथं चैव शतधा पुरुषर्षभ । चकार विरथं कर्णं तव पुत्रस्य पश्य
तः । ततो विमनसो राजंस्तावकास्ते महारथाः । वृषसेनः कर्णसुतः शल्यो मद्राधिपस्तथा । द्रोणपुत्रश्च शैनेयं सर्व
तः पर्यवारयन् । ततः पर्याकुलं सर्वं न प्राज्ञायत किंचन । तथा सात्यकिना वीरे वैकर्तने विरथे कृते । हा
हाकारस्ततो राजन्सर्वसैन्येष्वभून्महान् । कर्णोपि विरथो राजन्सात्वतेन कृतः शरैः । दुर्योधनरथं तूर्णमा
रुरोह विनिःश्वसन् । मानयंस्तव पुत्रस्य बाल्यात्प्रभृति सौहृदं । कृतां राज्यप्रदानेन प्रतिज्ञां परिपालयन् । तथा
तु विरथं कर्णं पुत्रांश्च तव पार्थिव । दुःशासनमुखाञ्शूरान्नावधीत्सात्यकिर्वशी । रक्षन्प्रतिज्ञां भीमेन पार्थेन
च कृतां पुरा । विरथान्विह्वलांश्चक्रे न तु प्राणैर्व्ययोजयत् । भीमसेनेन हि वधः पुत्राणां ते प्रतिश्रुतः । पुनर्द्यूते च
पार्थेन वधः कर्णस्य संश्रुतः । वधे त्वकुर्वन्यत्नं ते तस्य कर्णमुखास्तदा । नाशक्नुवंश्च तं हंतुं सात्यकिं प्रवरा
रथाः । द्रौणिश्च कृतवर्मा च तथैवान्ये महारथाः । निर्जिता धनुषैकेन शतशः क्षत्रियर्षभाः । कांक्षता पर
नगक्छेदनेन द[illegible]कृतां प्रतिज्ञां । अर्जुनेनार्थितां परिपालयन्रक्षता । एकेन सात्यकिना ॥

स्तोकं च धर्मराजस्य च प्रियं॥ रुक्मयोः सदृशो वीर्ये सात्यकिः शत्रुतापनः॥ जितवान्सर्वसैन्यानि तावकान्विदसन्निव॥ कृष्णो
वापि न वेदन्यो के पार्थो वापि धनुर्धरः॥ शिनेयो वा नरव्याघ्रश्चतुर्थस्तु न विद्यते॥ ॥धृतराष्ट्र उवाच॥ ॥अजय्यं वा
सुदेवस्य रथमास्थाय सात्यकिः॥ विरथं कृतवान्कर्णं वासुदेवसमं युधि॥ दारुकेन समायुक्तः स्वबाहुबलदर्पि
तः॥ कच्चिदन्यं समारूढः स रथं सात्यकिः पुनः॥ एतदिच्छाम्यहं श्रोतुं कुशलो ह्यसि भाषितुं॥ असह्यं तमहं मन्ये तन्म
माचक्ष्व संजय॥ ॥संजय उवाच॥ ॥शृणु राजन्यथावृत्तं रथमन्यं महामतिः॥ दारुकस्यानुजस्तूर्णं कल्पनाविधि
कल्पितं॥ आयसैः कांचनैश्चापि पट्टैर्नद्धं सकूबरं॥ तारासहस्रखचितं सिंहध्वजपताकिनं॥ अश्वैर्वातजवैर्युक्तं हे
मभांडपरिच्छदैः॥ सैंधवैरिंदुसंकाशैः सर्वशब्दातिगैर्दृढैः॥ चित्रकांचनसन्नाहैर्वाजिभिर्वाजिमुख्य विशांपते॥ घंटाजा
लाकुलं रवं शक्तितोमरविद्युतं॥ युक्तं सांग्रामिकैर्द्रव्यैर्बहुशस्त्रपरिच्छदं॥ रथं संपादयामास मेघगंभीरनिस्वनं॥
तं समारुह्य शैनेयस्तव सैन्यमुपाद्रवत्॥ दारुकोपि यथाकामं प्रययौ केशवांतिकं॥ कर्णस्यापि सुतो राजन्शं
खगोक्षीरपांडुरैः॥ चित्रकांचनसन्नाहैः सदश्वैर्वेगवत्तरैः॥ हेमकक्षाध्वजोपेतं क्लृप्तयंत्रपताकिनं॥ अग्र्यं रथं सु
स्यंतारं बहुशस्त्रपरिच्छदं॥ उपाजह्रे ततस्तस्मै यं कर्णोऽप्यध्यरोहत॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृ २२६
च्छसि॥ भूयश्चापि निबोध त्वं तवापनयजं क्षयं॥ एकत्रिंशत्तव सुता भीमसेनेन पातिताः॥ दुर्मुखं प्रमुखे कृत्वा

एतद्वृत्तं। पारयन्निष्पादय। यद्दव्यादिवयोगात्॥

सततं चित्रयोधिनं॥ शतशो निहताः शूराः सात्वतेनार्जुनेन वा॥ भीमं प्रमुखतः कृत्वा सभादत्तं च भारत॥ एवमेष
क्षयो वृत्तो राजन्दुर्मंत्रिते तव॥ ॥महाभारते द्रोणपर्वणि॥ ॥धृतराष्ट्र उवाच॥ ॥तथा गतेषु शूरेषु तेषां
मम च संजय॥ किंस्म भीमार्जुनौ तत्र सात्यकिर्वा करोत्तदा॥ ॥संजय उवाच॥ ॥विरथो भीमसेनो वै कर्ण
वाक्शल्यपीडितः॥ अमर्षवशमापन्नः फाल्गुनं वाक्यमब्रवीत्॥ पुनः पुनस्तूवरक मूढ औदरिकेति च॥ अकृ
तास्त्रक मा योत्सीर्बाल संग्रामकातर॥ इति मामब्रवीत्कर्णः पश्यतस्ते धनंजय॥ एवं वक्ता च मे वध्यस्तेन चोक्तो
स्मि भारत॥ एतद्व्रतं महाबाहो त्वया सह कृतं मया॥ यथैतन्मम कौंतेय तथा तव न संशयः॥ तद्वधाय नरश्रे
ष्ठ स्मरैतद्वचनं मम॥ यथा भवति तत्सत्यं तथा कुरु धनंजय॥ तच्छ्रुत्वा वचनं तस्य भीमस्यामितविक्रमः॥ ततो
र्जुनोऽब्रवीत्कर्णं किंचिदभ्येत्य संयुगे॥ कर्ण कर्ण वृथादृष्टे सूतपुत्रात्मसंस्तुत॥ अधर्मबुद्धे शृणु मे यत्त्वां वक्ष्या
मि सांप्रतं॥ द्विविधं कर्म शूराणां युद्धे जयपराजयौ॥ तौ चाप्यनित्यौ राधेय वासवस्यापि युध्यतः॥ मुमूर्षुर्युयुधा
नेन विरथो विकलेंद्रियः॥ मद्वध्यस्त्वमिति ज्ञात्वा जित्वा जीवन्विसर्जितः॥ यदृच्छया रणे भीमं युध्यमानं महा
बलं॥ कथंचिद्विरथं कृत्वा यत्त्वं रूक्षमभाषिथाः॥ अधर्मस्त्वेष सुमहाननार्यचरितं च तत्॥ नारिं जित्वा विक

द्रो०

त्वं तेन व्यजल्पंति दुर्वचाः ॥ न च कर्कं च न निंदंति संतः शूरा नरर्षभाः ॥ त्वं तु प्राकृतविज्ञानस्तत्तद्वदसि सूतज । बहु बद्ध
मकंप्यं च वाप्यलादपरीक्षितं । युध्यमानं पराक्रांतं शूरमार्यव्रते स्थितं । यदवोचोप्रियं भीमं तितन्सर्हं वचस्तव
। पश्यतां सर्वसैन्यानां केशवस्य ममापि च । विरथो भीमसेनेन कृतोसि बहुशो रणे । न च त्वां परुषं किंचिदुक्त
वान्पांडुनंदनः ॥ यस्मात्त्वं बहु रूक्षं च श्रावितस्तु वृकोदरः ॥ परोक्षं यच्च सौभद्रो युष्माभिर्निहतो मम । तस्मा
त्तस्यावलेपस्य सद्यः फलमवाप्नुहि । त्वया तस्य धनुश्छिन्नमात्मनाशाय दुर्मते । तस्माद्वध्योसि मे मूढ सभृत्य
बलवाहनः ॥ कुरु त्वं सर्वकृत्यानि महत्ते भयमागतं । हंतास्मि वृषसेनं ते प्रेक्ष्यमाणस्य संयुगे । ये चान्येप्यु
पयास्यंति बुद्धिमोहेन मां नृपाः ॥ तांश्च सर्वान्हनिष्यामि सत्येनायुधमालभे । त्वां च मूढाकृतप्रज्ञमतिमानिन
माहवे । दृष्ट्वा दुर्योधनो मंदो भृशं तप्स्यति पातितं ॥ अर्जुनेन प्रतिज्ञाते वधे स्तुतस्य चामहान्सुतुमुल
ः शब्दो बभूव रथिनां तदा । तस्मिन्नाकुलसंग्रामे वर्त्तमाने महाभये । मंदरश्मिः सहस्रांशुरस्तं गिरिमुपाद्रवत् । ततो रा
जन्हृषीकेशः संग्रामशिरसि स्थितं । तीर्णप्रतिज्ञं बीभत्सुं परिष्वज्येदमब्रवीत् । दिष्ट्या संपादिता जिष्णो प्रतिज्ञा महती त्व २२१
या । दिष्ट्या विनिहतः पापो वृद्धक्षत्रः सहात्मजः ॥ धार्त्तराष्ट्रबलं प्राप्य देवसेनापि भारत । सीदेत्समरे जिष्णो नात्र कार्या विचारणा

कृ

वर्द्धयिष्यामि नंदयिष्यामि ॥
न तं पश्यामि लोकेषु चिंतयन्पुरुषं क्वचित् । य इहान्यः पुरुषव्याघ्र एतद्योधयेद्बलं । महाप्रभावा बहवस्त्वया तुल्याधिका
पि वा । समेताः पृथिवीपाला धार्त्तराष्ट्रस्य कारणात् । ते त्वां प्राप्य रणे क्रुद्धं नाभ्यवर्त्तंत दंशिताः ॥ तव वीर्यं बलं चैव रुद्रश
क्रांतकोपमं । नेदृशं शक्नुयात्कश्चिद्रणे कर्तुं पराक्रमं । यादृशं कृतवानद्य भवान्कः शत्रुतापन ॥ एवमेव हतं कर्णं सा
नुबंधं दुरात्मनि । वर्द्धयिष्यामि भूयस्त्वां विजितारिं हतद्विषं । तमर्जुनः प्रत्युवाच प्रसादात्तव केशव । प्रतिज्ञेयं मया
तीर्णा विबुधैरपि दुस्तरा । अनाश्चर्यो जयस्तेषां येषां नाथोसि केशव । त्वत्प्रसादान्महीं कृत्स्नां संप्राप्स्यति युधिष्ठिरः ।
तवैष भारो वार्ष्णेय तवैव विजयः प्रभो । वर्धनीयास्तव वयं प्रेष्याश्च मधुसूदन । एवमुक्तस्ततः कृष्णः शनकैर्वाहयन्हया
न् । दर्शयामास पार्थाय क्रूरमायोधनं महत् ॥ ॥ कृष्ण उवाच ॥ ॥ प्रार्थयंतो जयं युद्धे प्रथितं च महद्यशः । विकी
र्णशस्त्राभरणा विपन्नाश्वरथद्विपाः ॥ संछिन्नभिन्नवर्माणो वैक्लव्यं परमं गताः ॥ ससत्वा गतसत्वाश्च प्रभया परया युता
॥ सजीवा इव लक्ष्यंते गतसत्वा नराधिपाः ॥ तेषां शरैः स्वर्णपुंखैः शस्त्रैश्च विविधैः शितैः । वाहनैरायुधैश्चैव सं
पूर्णां पश्य मेदिनीं । वर्मभिश्चर्मभिर्हारैः शिरोभिश्च सकुंडलैः ॥ उष्णीषैर्मुकुटैः स्रग्भिश्चूडामणिभिरंबरैः ॥ क
ण्ठसूत्रैरंगदैश्च निष्कैरपि च सुप्रभैः ॥ अन्यैश्चाभरणैश्चित्रैर्भाति भारत मेदिनी । अनुकर्षैरुपासंगैः पताकाभिर्ध्व

क्षितिस्तथा ॥ उपस्करैरधिष्ठानैरीषादंडकबंधुरैः ॥ चक्रैः प्रमथितैश्चित्रैरक्षैश्च बहुधा रणे ॥ युगैर्योक्त्रैः कलापैश्च धनु
र्भिः सायकैस्तथा ॥ परिस्तोमैः कुथाभिश्च परिघैरंकुशैस्तथा ॥ शक्तिभिर्भिंदिपालैश्च तूणैः शूलैः परश्वधैः ॥ प्रासै
श्च तोमरैश्चैव कुंतैर्यष्टिभिरेव च ॥ शतघ्नीभिर्भुशुंडीभिः खड्गैः परशुभिस्तथा ॥ मुसलैर्मुद्गरैश्चैव गदाभिः कण
पैस्तथा ॥ सुवर्णविकृताभिश्च कशाभिर्भरतर्षभ ॥ घंटाभिश्च गजेंद्राणां भांडैश्च विविधैरपि ॥ स्रग्भिश्च नानाभरणैर्वस्त्रैश्चै
व महाधनैः ॥ अपविद्धैर्बभौ भूमिर्ग्रहैर्द्यौरिव शारदी ॥ पृथिव्यां पृथिवीहेतोः पृथिवीपतयो हताः ॥ पृथिवीमुपगूह्या
ङ्गैः सुप्ताः कांतामिव प्रियां ॥ इमांश्च गिरिकूटाभान्नागानैरावतोपमान् ॥ ऐरावतः प्रशोणितेन्द्रशिरास्त्वचे ददरीमुखैः ॥
दरीमुखैरिव गिरीन्नागैरिकांबुपरिस्रवान् ॥ नववाणाहतान्वीरपश्य निषादानलंकृतान् ॥ हयांश्च पतितान्पश्य स्वर्णभांडवि
भूषितान् ॥ गंधर्वनगराकारान्रथांश्च निहतेश्वरान् ॥ छिन्नध्वजपताकाक्षांश्छिन्नचक्रान्हतसारथीन् ॥ निकृत्तकूवरयु
गान्नग्नमादंगुलान्मो ॥ पश्य पार्थ हतान्भूमौ विमानान्यमराणिव ॥ पत्तींश्च निहतान्वीरशतशोऽथ सहस्रशः ॥ धनुर्भृ
तश्चर्मभृतश्चायानाः रुधिरोक्षितान् ॥ महीमालिंग्य सर्वांगैः पांशुध्वस्तशिरोरुहान् ॥ पश्य योधान्महाबाहो दविद्धारेर्भिन्नवि २२
ग्रहान् ॥ निपातितद्विपरथवाजिसंकुलमसृग्वसापिशितमसृक्कर्दमं ॥ निशाचरश्ववृकपिशाचहर्षणं पिशाचैर्मो

स्यंदनसलिलं नरवरप्रपद्यईशं ॥ इदं महत्त्वय्युपपद्यते विभो रणाजिरे कर्म यशोभिवर्द्धनं ॥ शतक्रतावी सदे विदिवसत्तमे
महाहवे जघ्नुषि दैत्यदानवान् ॥ संदर्शयन्नेवं किरीटिनं रिपुजनार्दनः हनेस्तामः रिनृपिमंडसांक्षजात्स्वांतुं समुपुत्रस्य पांड
वेर्निवेदयामास हतं जयद्रथं ॥ ॥ महाभारते द्रोणपर्वणि ॥ ॥ संजय उवाच ॥ ॥ ततो राजानमभ्येत्य धर्म
राजं युधिष्ठिरं ववंदाते सह कृष्णाभ्यां हते पार्थेन सैंधवे ॥ दिष्ट्या वर्द्धसि राजेंद्र हतशत्रुर्नरोत्तम ॥ दिष्ट्या निस्तीर्णवांश्चै
व प्रतिज्ञामनुजस्तव ॥ एवमुक्तः कृष्णेन हृष्टः परपुरंजयः ॥ अवतीर्य रथाद्राजा पर्यष्वजत केशवौ ॥ संप्रहृष्टमनाराज
अन्धर्मराजो युधिष्ठिरः ॥ महाहर्षेण विज्ञात्वा नानाशकवकुमाजेना ॥ पुनःस्त्रीमिव दाषीणा ऐशीं द्रवा महामतिः ॥ त
तो दर्पान्वितो राजा दर्पाश्रुपुतलोचनः ॥ उवाच परमप्रीतः स गद्गदमिदं वचः ॥ प्रियमेतदुपश्रुत्वा ते न शुक्कर लो
चनौ ॥ तं गत्वा मिदर्पस्पृतितो हि रुदधे रिवार्जुनात्पुर मिदं कर्म कृतं ते पार्थ धीमता ॥ अयातुरास्वेनगाविंद मंता पाव
जयद्रथः ॥ किंतु नात्यद्भुतं तस्य पाय पार्थस्त्वं समाश्रयः ॥ स्थितः सर्वात्मना नित्यं प्रियेषु च हिते रतः ॥ बोंधे वा रमा निराश्रि
त्य कृतं चारु समुद्यमः ॥ सुरारि वासुर वधे शक्रेणा काकुजार्दवा सेनाव्यमिदं कर्म दिवैरपि जनार्दन ॥ त्वदुदि बल
वीर्याश्रित्य वा नवफाल्गुनः ॥ बाल्यात्प्रभृति कर्माणि कृतानि सुबहूनि च ॥ अमानुषाणि दिव्यानि महांति च बहूनि ॥

शां०

प्रतिपादितो धर्मो ता। विरंचेः स्थिराना इंद्रादीनामपि नाथी एकार्थविज्ञ लब्धा सं। यपत्तामन्यका॥ एवं ह्यपंचालीते। पुराणं पुरुषस्य दृढस्या

चायदिवा उग्रहाता: स्मस्त्वयास्ते ह्यनुरागतः॥ ते देवा ज्ञासि ध्यंशाश्च तद्द्दत्तान्यामां च मेदिनी। मार्कंडेय: पुराणर्षि स्थितिज्ञस्त्वानघ। मा
हात्म्यमत्र माव च पुराको ब्रितवान्मुनि:। सृषितो देवलस्त्वैव नारदश्च महातपा:। पितामहश्च मव्यासस्त्वामाह विधिवन्नमो वेदतत्
त्वपरं ब्रह्म त्वं सत्यं परमं तप:। त्वं श्रेयस्त्वं यशश्चाद्यं कारणं जगतस्तथा। त्वयामर्वमिदं सृष्टं जगत्स्थावरजंगमं। प्रलये समनुप्राप्ते त्वं
हि निविशते पुन:॥ अनादिनिधनं देवं विश्वस्येशं प्रजापतिं। अनारमन्तमव्यक्तं माहुर्वेदविदो जना:। तं तात्मानं महात्मानं मनन्तं विश्व
तो मुखं। अपि देवा न जानंति कुतस्त्वाद्यं जगत्पतिं। नारायणं परं देवं परमात्मानमीश्वरं। ज्ञानयोनिं हरिं विष्णुं मुमुक्षूणां परायणं। पर
पुराणं परमं पुराणानां परं च यत्। एवमादि गुणानां तु कर्मणां दिवि चेह च। अतीतानागतं तत्त्वानां संख्यातातन विद्यते। सर्वतो
रक्षणीयास्त्वमशक्ताणां दिवौकसां। यस्त्वं सर्वगुणोपेत स्तुत्यत्वमुपपादितः॥ इत्येवं धर्मराजेन हरि: कृष्णो महायशा:। अभितुष्ट
मिदं वाक्यं शुश्राव जनार्दन:। नन्व तत्तस्य परमो ग्रेणाधर्मिणां परमेणाच। साधुवा हास्य वा ह्वि देवतस्या पो जयद्रथ:। अयं तु पुरुषव्याघ्र
दिव्य ध्यानं हि दिति:। त्वया यो धर्मसहस्त्राणि न्यदद्र जिष्णुर्जयद्रथ:। क्रतिश्चैवाञ्जविसेणा तथा वा समन्तमे पिच। ज्ञापिता मोघदेधिवेना

धिष्ठातारं वा। पुरुषमात्मानं। पुराणं नामादि विरूपाणां ब्रह्मादीनां च परं कारणं। परमं वरूष्टतमं। गीयते श्रुति पाद्यते। महात्मानं प २२७
रमात्मानं

श्रुत्वा स्तुतमब्रवीत। राजानं लोकात्तं जकं
स्त्रिपार्थसम: कश्चित् न द्वयं भरतश्रेष्ठ नानातत्पांडवार्जुन॥ सैन्यद्वयं रणे कृत्वा सिंधुराज। श्रिा रादरत्॥ ततो धर्मसुतो लाजिस्तं परिष्व
ज्यविशांपते। अश्रुह्रुत्य वदनं चास्य पर्यमाश्वासयत तत्र स्तुः। अतीव सुमहत्कर्म कृतवानसि फाल्गुन। अशक्यं चाविषह्यं च देवैरपिस
वासवै:। दिष्ट्या निस्तीर्णभारोसि हत्वा रिपुं। दिष्ट्या तु हतो दिष्ट्या सिंध्या प्रतिज्ञेयं कृता नाद्भ्या जयद्रथं। एवमुक्त्वा गुडाकेशं धर्मरा
जो महायशा:। पस्पर्श पुण्यगंधेन हस्तेन पार्थिव:। इत्युक्तौ तौ महात्मानौ उभौ केशवपांडवौ। तावब्रूतां तदा हृष्टौ राजानं
पृथिवीपतिं। तव क्रोधाग्निना दग्ध: पापो राजा जयद्रथ:। उदीर्णं चापि सुमहद्धार्तराष्ट्रबलं रणे। हन्यते निहतं चैव विनंक्ष्यति च
भारत। तव क्रोधहता ह्येते कौरवा: शत्रुसूदन। त्वां च वक्रुदृशा वीरं कोपयित्वा सुयोधन:। समित्रबंधु: समरे प्राणांस्त्यक्ष्यति दुर्म
ति:। तव क्रोधहता पूर्वं देवैरपि सुदुर्जय:। शरतल्पगत: शेते भीष्म: कुरुपितामह:। दुर्लभो विजयस्तेषां संग्रामे रिपुसूद
न। याता मृत्युवशं ते वै येषां क्रुद्धोसि पांडव। राज्यं प्राणा: प्रिया: पुत्रा: सौख्यानि विविधानि च। अचिरात्तस्य नश्यंति येषां क्रु
द्धोसि मानद। विनष्टान्कौरवान्मन्ये सपुत्रपशुबांधवान्। राजधर्मपरे नित्यं त्वयि क्रुद्धे परंतप। एवं भीमो महाबाहु: सात्यकिश्च
महारथ:। अभिवाद्य गुरुं ज्येष्ठं मार्गणै: क्षतविक्षतौ। स्थितावास्तां महेष्वासौ पांचाल्यपरिवारितौ। तौ दृष्ट्वा मुदितौ वीरौ प्रांजली

हार्दिक्यएवमकरत्सम्यालयात्।पांडवानात्मनश्चजयः॥

द्रो० चाप्रतःस्थितो।अन्यनेंद्रतकौंतेयस्कन्नोनाममात्मकः॥दिष्ट्यापश्यामिवार्ष्णेयविजयकोमेन्यसागमत्।द्रोणयाहस्तराधर्षयि
हिंकामकरालयात्।दिष्ट्याचनिर्जितांसंख्येपृथिव्यांसर्वपार्थिवाः॥युवांविजयिनौचापिदिष्ट्यापश्यामिसत्त्वगा॥दिष्ट्याद्रो
णोजितःसंख्येहार्दिक्यश्चमहाबलः।दिष्ट्याविकर्तनिःकर्णोरणेनीतःपराभवं।दिष्ट्याचक्रुद्धःशल्योयुवाभ्यांपुरुषर्षभौ
।दिष्ट्याप्रवांकुशलिनौसंग्रामात्पुनरागतौ।पश्यामिरथिनौश्रेष्ठौबुद्धौयुद्धविशारदौ।ममवाक्यकरौवीरौममगौरव
यंत्रितौ।सेन्यासर्वमत्तौलौदिष्ट्यापश्यामिवामहं।भ्रमस्त्वादीनौवीरौपांडलीचायत्तौस्थितौ।ममप्राणसमौवीरौदिष्ट्या
पश्यामिवामहं।इत्युक्त्वापांडवोराजाहर्षुश्वनरव्याघ्रौ।केशवौस्वेजुष्टरूपवास्यौहृष्टौशाश्वंसुमोचचातनपुष्टदिनंसर्वंबलमासी
द्धिग्रांपतापांडवानांरणेहृष्टंयुधायुधमलादधे॥ ॥महाभारतेद्रोणपर्वणि॥ ॥संजयउवाच॥ ॥सेधर्वेणिहतराज
न्पुत्रस्तवसुयोधनः।अश्रुपूर्णमुखोदीनोनिरुत्साहोद्विषज्जये।दुर्मनानिःश्वसन्भग्नदंष्ट्रइवोरगः।आगस्कृत्सर्वलोक
स्यपुत्रस्तेर्तिंपरामगात्।दृष्ट्वातत्कदनंघोरंस्वबलस्यकृतंमहत्।जिष्णुनाभीमसेनेनसात्वतेनसंयुगे।सविवर्णःकृशोदीनोबाष्प
संपूर्णलोचनः।अमन्यतार्जुनसमानयोधोऽस्तिविनिर्यातनद्रोणेनराधेयेनाश्वत्थाम्नाकृपेणच।दुर्योधनमारत्वाहतुंपर्याप्ताइतिमारि २३०

ब

धर्मोपचायिनोधर्मविलोपकस्य॥

षःनिर्जितस्यहिरणेपार्थःसर्वान्ममहारथान्।अवधीत्सैंधवंसंख्येनचकश्चिदवारयत्।सर्वथाहतमेवेदंकौरवाणांम
हद्बलं।नह्यस्यविद्यतेत्राताभ्यसादपिपुरंदरः।संग्रामेयमुपाश्रित्यकृतःशस्त्रसमुद्यमः।सकर्णोनिर्जितःसंख्येहतश्चै
वजयद्रथः।यस्यवीर्यंसमाश्रित्यपांडवानवमंस्महि।सकर्णोनिर्जितःसंख्येहतश्चैवजयद्रथः।परुषाणिमयामध्येप्रोक्ता
वान्योहियांडवाः।सकर्णोनिर्जितस्संग्रामेयोसेधन्वानिपातितः।यस्यवीर्यंसमाश्रित्यशमंयाचंतमच्युतं।तृणवत्तमहं
मन्येसकर्णोविनिर्जितोयुधि।एवमुक्त्वातमनारामनुपायाद्रोणमीक्षितुं।आगस्कृत्सर्वलोकस्यपुत्रस्तवभरतर्षभ।ततस्तत्सर्वं
मावस्यौकुरूणांवैशसंमहत्।पराविजयतश्चापिधार्त्तराष्ट्रानिमज्जतः॥ ॥दुर्योधनउवाच॥ पश्यमूर्धाभिषिक्तानां
माचार्यकदनंमहत्।कृत्वाप्रमुखतःशूरंभीष्मंममपितामहं।तंनिहत्यप्रलुब्धोयंशिखंडीपूर्णमानसः।पांचालैःसहितः
सर्वैःसेनाग्रमभिवर्त्तते।अपरश्चापिदुर्धर्षःशिष्यस्तेसव्यसाचिना।अक्षौहिणीःसप्तनिवहत्वाराजाजयद्रथः।अस्म देवापावः
द्विजयकामानांसुहृदामुपकारिणां।गंतास्मिकथमानृण्यंगतानांयमसादनं।यमस्यपरीप्संतवसुधांवसुधाधिपाः।ते
हित्वावसुधैश्वर्यंवसुधामधिशेरते।सोहंकापुरुषःकृत्वामित्राणांक्षयमीदृशं।नोत्सहेअश्वमेधसहस्रेणपापावितुंनतसुस्मादं।
ममलुब्धस्यपापस्यतथाधर्मोपचायिनः।व्यायच्छंतोजिगीषंतःप्रापाविवस्वतःक्षयं॥

पतितं वृत्तस्य विगतशीलस्य। अथ तु एतच्छ्रुत्वा अथ तु पजन्मा ॥ ×नाशकं चानुंजी ममा याथ नेहनं। ने × स्वलउली २

द्रोण० कथं पतितं वृत्तस्य पृथिव्यां सुहृदां द्रुहः। दिव्यं नायकहानु ममपार्थिवं मम ह। यो हं रुधिरसिक्तांगं राज्ञां मध्ये पितामहं। शायानं
मामनार्यो गुरुरूपेमित्र द्रुहमधर्मिकं। किमेव वक्ष्यति दुर्दर्षी मामत्परलोक जित। जलसंधं महेष्वासं पश्यमात्य कि नाहते। मदर्थ युद्ध
ते शूरं प्राणांस्त्यक्त्वा महारथं। को वो जनितहते दृष्ट्वा तथा लं मुपमव्रवा श्रेष्यावक्तु शुद्धसदोना। विना यो द्यको मम। व्यायच्छं तात
ना: शूरा मदर्थे यपराक्रुयत्र यतमाना: परं शक्त्या विजितुम हितो मम। ते षां गत्वाह मानृण्य मद्य शक्त्या परंतप। तर्पयिष्यामि ता
नेव जलेन यमुनाम नु। सत्यं ते प्रतिजानामि सर्वशस्त्रभृतां वर। इष्टापूर्तेन चैवाप वीर्येण तनुपैरपि। निहत्य पांडवान् सर्वा
न्यांचालान्यांडवैः सह। शांतिं लप्स्यामि तेषां वा रणे गंतास्मि लोकतां। न हि दानी सहाया मे गौप्तमन्य उपस्कृता:। श्रेयो हि पांडू
न्मन्यते न तथास्मान्महाभुज। स्वयं हि सत्यसंधेन मृत्युर्विहितमात्मन:। नवा तु पेक्षां कुरुते शिष्यत्वादर्जुनस्य हा। ततः
ताः स्वर्वे ये स्मरूपय चिकीर्षव:। कर्णमेव तु पश्यामि संप्रत्यस्मज्जये विणं। यो मामित्रमविज्ञाय याथातथ्येन मंदधी:। मित्रा
र्थे योजयत्यन्नं तस्य सोर्थोवसीदति। नाहशोमत्परं कुर्तमिदं मम कार्यंसुहृद्द्रुह:। मोहाल्लुब्धस्य पापस्य जिह्मकारिण: समंत
त:। हताजयद्रथश्चैव सोमदत्तिश्च वीर्यवान्। अभीषाहा: शूरसेना: शिवयो वसातय:। सोहमद्य गमिष्यामि यत्र ते

त्र ते। उचितं॥
पुरुषर्षभा: हतामदर्थं संग्रामे युध्यमाना: किरीटिना। न हि मे जीवितेनार्थस्तानृते पुरुषर्षभान्। आचार्यो पांडुपुत्राणा
मनुजानातु नोनवान्॥ ॥महाभारते द्रोणपर्वणि॥ ॥धृतराष्ट्र उवाच॥ ॥सिंधुराजे हते तात समरे सव्यसाचिना। त
थैव भूरिश्रवसि किमासीद्वो मनस्तदा। दुर्योधनेन च द्रोणस्तथोक्त: कुरुसंसदि। किमुक्तवान्परं तस्मात्तन्ममाचक्ष्व
संजय॥ ॥संजय उवाच॥ ॥निष्टानको महानासीत्सैन्यानां तव भारत। सैंधवं निहतं दृष्ट्वा भूरिश्रवसमेव च। मंत्रितं
तव पुत्रस्य तत्सर्वमवमनिरे। येन मंत्रेण निहता: शतश: क्षत्रियर्षभा:। द्रोणस्तु तद्वच: श्रुत्वा पुत्रस्य तव दुर्मना:। मुहूर्त
व मिव ध्यात्वा भृशमार्त्तोभ्यभाषत॥ द्रोण उवाच॥ ॥दुर्योधन किमेवं मां वाक्शरैरभिकृंतसि। अजय्यं सततं संख्ये ब्रु
वाणं सव्यसाचिनं। एतेनैवार्जुनं ज्ञातुमलं कौरव्य संयुगे। यच्छिखंड्यवधीद्भीष्मं पाल्यमान: किरीटिना। अवध्यं निह
तं दृष्ट्वा संयुगादेव मानुषै:। तदैवाज्ञासिषमहं नेयमस्तीति भारती। यं पुंसां त्रिषु लोकेषु सर्वशूरममंस्महि। त
स्मिन्निपतिते शूरे किं शेषं पर्युपास्महे। यानस्म ग्लहान्सहते तात शकुनि: कुरुसंसदि। अक्षान्न ते ह्यक्षा निशिता बा
त२ णास्ते शत्रुतापना:। एवं घ्नंति स्म तात विशिखा: पार्थचोदिता:। यांस्तदाख्यायमानांस्त्वं विदुरेण न बुध्यसे। यास्ता वि
लपतस्तस्य विदुरस्य महात्मन:। धीरस्य वाचो नाश्रौषी: क्षेमाय वदत: शिवा:। तदिदं वर्तते घोरमागतं वैशसं महत्।

द्रो० ७०

नाद्वेतद्धेयं नानृवित्। विषमेनान्यायेन। आहित उपस्थापितः। संयुक्तो वर्द्धितः। अत्यस्तो हृदरोकुत परास्तुतोऽयं ध्वनत इति॥

तस्मात्वमानादाक्रस्य ध्येयेधि नकुले तव। योवमन्य वचः पथ्यं सुहृदामामकारिणां। स्वगतं कृतः वृद्धस्य हितो यो विगर्हितः। यद्वेतः
केरस्यमाणानां कृष्णमानायथ सनां। अनर्दनं कुलेनानां सर्वथमत्तिचारिणां। तस्माधर्मस्य गांधारफलं प्राप्तमिदं महत्। नो चेत्यापरे
लोके त्वमष्टधैर्यास्ततो धिकं। यद्वतान्यांडवान् इति विषमेण विजितस्य। पावात्रयं स्वदारणं घोरवाजितवास वः। वृत्तायामिव वित्ते
षां धर्ममाचरतां सदा। कुलेकोत्तुनरो लोके मदन्यो ब्राह्मणब्रुवः। पांडवानामयं कोपस्त्वया शकुनिनाम वाद्यादितो धृतराष्ट्रस्य सं
मते कुरुसंसदि। दुःशासनेन संयुक्तः कर्णेन परिरक्षितः। रुवृत्तीकामनोद्यायात्युक्तः। खुतःखुतः। यत्रासादयमान्नृतां। पर्यवाग
यनार्जुनं। सिंधुराजानमाक्षित्य मन्नो मध्ये कथं ह नः। कथं वा यिव कर्ण चिकृ पेशल्ये वैज्ञावति। अश्वत्थामि वैकौरव्यमिंधनो। निधनं
गताः। यस्त्वमर्व राजानस्ते जस्तिग्मसुपासत। सिंधुराजे परित्रातुं मवोमध्येकार्यं हन्तः। मय्ये वहिविशापेणा नघाडव्यो धनत्वं यि
आशंसत परित्राणमर्जुनास्महीपतिः। ततस्तस्मिन्परित्राणमलब्धमति फाल्गुनात्। न किंचिदन्त्र पश्यामि जीवितत्राणमात्म
नः। मज्जंतमिव चात्मानं धृष्टद्युम्नस्य किल्विषे। पश्यामि हत्वा पांचालाञ्छरदतन शिखंडिना। तन्मां किमभितप्यं तं वाक्यैरर
  मिरुतंतमि॥
पराविप्रमास्त्रशाध्यात्मामातितोमे सुवर्ततस्तानि ध्मनं। किल्विषेदोङ्गन्य॥

ई५५

२२२

कर्त्तस्यातिकाकाहि वडनयत्र संदवंध्यतां। धर्मार्थकामकुशलइति त्रयाणामविरोधेनेत्यर्थः। तेषां चविरोधे कामः पीड्यमानादि
अशक्तः सिंधुराजस्य त्वं त्राणाय भारत। सो वधं सिसृत संधस्य ध्रुवमक्लिष्टकर्म्मणाः। अपवपन्नुधि नीपस्य कथमाशंस
जयं। मध्ये महारथानां च यत्तानां स्यतांसिंधवः। हातां वारिश्यवाप्त्येव किंशिषं तत्र मन्यामा। कृपामवे चेडहं यंय दिजीवन्तियार्थि
वा। योनागाः सिंधुराजस्य वर्त्मनं तहजयात्पहं। यूबापतपदनमा प्रपद्यतस्त्वुजस्यावेडः शासनस्य कौरव्य कुवालाकमडिक
रेः अवध्य कल्पसंयाम्माद् विरपि सवासवैः। अजितव कुंधरा स्तीतितदादंचिंतय नृपाइमानिपाडवानां च संजयानाचमारतां। अ
तीकान्याइवंतं मांसहितान्यस्यनारता। नाहत्वा सर्वपांचालाकवचस्यविमोक्षणं। कर्त्तास्मि समरे कर्म्म धार्त्तराष्ट्र हितं तव
। राजन्नश्वोमीः सुतं मेवमश्वत्थामानमादवान। मामकाः सोमकव्याजीवितंपरिरक्षता। यस्य पित्रानुशिष्टोस्मि तदयः प्रतिपाल
य। ब्राह्मणं स्पृदमेम सत्यत्वार्जवेच स्थिरा तव। धर्मार्थकामकुशलो धर्मार्था वप्यपीडयत्। धर्मप्रधानः कार्याणां कुर्या
स्तु तिषुतःखुतः। वक्षुमनोत्यां संतोष्य विप्राः कृत्याश्च शक्तिसतनाचेषां विधियं का येंत हि विक्लिशि स्वाथमागएपहे
मनाकानिष्ठविशात्परिस्वदन। रणायमहते राजं स्त्वयावाकल्पपीडितः। द्रवद्युर्योधनरणायदिशात्मासिपालय। रात्रावपि
हि योत्स्यंति संरब्धाः कुरुसृंजयाः। एवमुक्त्वा ततः प्रायाद्द्रोणः पांडवसृंजयान्। मुष्णन्क्षत्रियतेजांसि नक्षत्राणामिवांशुमान्॥
न द्रोणपर्वणि टीकायां धर्मार्थाविति। तयोरपि धर्म एव प्रधान इत्याह। धर्ममिति॥

भा

मिषतः। अनिमिषतः पश्यतः इति यावत्। निर्घृणानां नाम्प हीनानां॥

द्रोण० ॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥ततो दुर्योधनो राजा द्रोणेनैवं प्रचोदितः। अमर्षवशमापन्नो यु
द्धायैव मनो दधे॥ अब्रवीच्च तदा कर्णं पुत्रो दुर्योधनस्तव। पश्य कृष्णसहायेन पांडवेन किरीटिना। आचार्य्यविहितं व्यूहं भि
न्नं देवैः सुदुर्भिदं। व्यायच्छमानस्य द्रोणस्य च महात्मनः। मिषतां योधमुख्यानां सैंधवो विनिपातितः। पश्य राधेय रा
जानः पृथिव्यां पृथिवीपते। पार्थेनैकेन निहताः सिंहेनेवेतरे मृगाः। मम व्यायच्छमानस्य समरे शत्रुसूदन। कृत्वावशेषं सै
भा न्यं मे शक्रात्मजेन ह। कथं ह्यनिच्छमानस्य द्रोणस्य युधि फाल्गुनः। भिंद्यात्सुदुर्भिदं सैन्यं यतमानोपि संयुगे। प्रतिज्ञाया
श्च पारं हि सैंधवमर्जुनः। पश्य राधेय दृष्टाग्रान्पृथिव्यां पतितान्बहून्। पार्थेन निहतान्संख्ये मद्द्रोणस्य विक्रमा
त्यु अनिच्छतः कथं वा द्रोणस्य युधि पांडवः। भिंद्यात्सुदुर्भिदं व्यूहं यतमानस्य शुष्मिणः। दयितः फाल्गुनो नित्यमाचार्य्यस्य
महात्मनः। ततोस्य दत्तवान्द्वारमयुद्धेनैव शत्रुहन्। अभयं सिंधुराजाय दत्त्वा द्रोणः परंतपः। प्रादात्किरीटिने द्वारं
पश्य निर्गुणतां मयि। यद्यदास्यदनुज्ञां वै पूर्वमेव गृहान्प्रति। दृष्ट्वा तां सिंधुराजस्य नाभविष्यज्जनक्षयः। जयद्रथो गृ
हान्गन्ता जीवितार्थी नयान्सो मया नार्येण संरुद्धो द्रोणात्प्राप्याभयं रणे। अद्य मे भ्रातरः क्षीणाश्चित्रसेनादयो र २३२
णे।

दिव दिष्टं सर्वकर्म विहितं नोस्मात्। दैवोपसृष्टः देवोपहतः॥

भीमसेनं समासाद्य पश्यतां नो दुरात्मनां॥ ॥कर्ण उवाच॥ ॥आचार्य्यं मा विगर्हस्व शक्त्यासौ युध्यते द्विजः। यथा
बलं यथोत्साहं त्यक्त्वा जीवितमात्मनः। यदेनं समतिक्रम्य प्रविष्टः श्वेतवाहनः। नापि सूक्ष्मोपि दोषः स्यादाचार्य्यस्य
वा कथंचन। कृती दक्षो युवा शूरः कृतास्त्रो लघुविक्रमः। दिव्यास्त्रयुक्तमास्थाय रथं वानरलक्षणं। कृष्णेन संगृहीताश्वमभेद्य
कवचावृतः। गांडीवमजरं दिव्यं धनुरादाय वीर्य्यवान्। प्रवपन्निशितान्बाणान्बाहुद्रविणदर्पितः। यदर्जुनोत्यया द्रोणं यु
पपन्नं हि तस्य तत्। आचार्य्यः स्थविरो राजन्शीघ्रयाने तथाक्षमः। बाहुव्यायामचेष्टायामशक्तश्च नराधिप। तेनैवमस्य
तिक्रांतः श्वेताश्वः कृष्णसारथिः। तस्माद्दोषं न पश्यामि द्रोणस्यानेन हेतुना। अजय्यान्पांडवान्मन्ये द्रोणेनास्त्रविदा मृधे।
तथा ह्येनमतिक्रम्य प्रविष्टः श्वेतवाहनः। दैवदिष्टान्यथाभावान्न मन्ये विद्यते क्वचित्। यतो नो युध्यमानानां परं शक्त्या सुयु
योधन। सैंधवो निहतो युद्धे दैवमत्र परं स्मृतं। परं यत्नं कुर्वतां च त्वया सार्द्धं रणाजिरे। हत्वास्माकं पौरुषं वै दैवं प
श्चात्कृतोतिनः। सततं चेष्टमानानां निकृत्या विक्रमेण च। दैवोपसृष्टः पुरुषो यत्कर्म कुरुते क्वचित्। कृतं कृतं हि तत्तस्य
दैवेन विनिपात्यते। यत्कर्तव्यं मनुष्येण व्यवसाययुतात्मना। तत्कार्यमविशंकेन सिद्धिर्दैवे प्रतिष्ठिता। निकृत्या नि
कृताः पार्था विषयोगैश्च भारत। दग्धा जतुगृहे चापि द्यूतेन च पराजिताः। राजनीतिं व्यपाश्रित्य प्रहिताश्चैव का।

द्रोण०

यतातायतमानस्य यथावचनमुत्तमं । यत्र संवध्यते मार्गेणाम्न वितथ्येन । बुध्या विमर्षेणान्नवितथ्यं हीनं श्रमाणां कारकं । न वि-
नता । यन्नेन च कृतं तन्न दैवेन विनिपातितं । बुध्य स्वयत्नमास्थाय दृढं कृत्या निवर्तनं । यत्नन्न स्त्र वानमषां च दैवं मार्गेणाया-
स्यति । ननेषां मति पूर्वं हि सुकृतं हृष्टपालकं । चिदा । कृतं तनवचाबीरबुध्याहीनं कुरुदृश्यते । देवमाणः सर्वस्य प्रकृत-
स्य च रस्य च ॥ अन्यकर्मदैवहिंसाया गतिस्त्वयतामपि । बहूनितत्व सैन्यानि योधमुख्यबहवस्तव । नतथा पांडुपुत्रा-
लै णामेव वं युद्धमवर्तता । तिरत्वेर्देहबाहायं दृश्य नाता: प्रहारिणः । शौक दैवस्य तत्कर्म पौरुषं यत्ननाशितं । पूर्वं संप्रा-
प्रमाणानां बहुकृतन्न कृतः । धियापांडवानां मनोकामनि समदृश्यतं समंबुगाः । ततः प्रवहातं तु कुव्यतिषकर पार्थिप । ताव-
कानां परे: सार्धं राजन्कुमंत्रितेनव ॥ ॥द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥तद्दोषसंगणात्मौघं बलतवृजनता-
धियापांडुसेनामनिकुत्य योधयामास सर्वतः । पंचाला: कुरवाश्चैव योधयंत: परस्परं । यमराष्ट्राय महते परलोकाय
दीक्षिता: । शूरा: शूरैः समागम्य शरतोमरशक्तिभिः । विव्यधु: समरेन्योन्यं निन्युश्चैव यमक्षयं । रथिनां रथिभिः सार्धं रुधि-
रस्त्राव दारुणं । प्रावर्ततमहद्युद्धं निघ्नतामितरेतरं । वारणाश्च महाराज समासाद्य परस्परं । विषाणैर्दारयामासु: सुसंक्रुद्धा म- २३५
दोत्कटा: । हया हया नाराचैः प्रासशक्तिपरश्वधैः । बिभिदुस्तुमुले युद्धे प्रार्थयंतो महद्यश: । पत्तयश्च महाबाहो शतश:
शस्त्रपाणय: ॥
थान अन्यकर्मयस्य कर्मविपाक:॥ ॥परलोकायतियमराष्ट्रवर्धनं विशेषणं ॥

गोत्राणां प्रावीनस्त्ररूपाणां । कुलानां गणानां ॥

अन्योन्यमार्दयन्राजन्नित्यं यत्ता: पराक्रमं । गोत्राणां नामधेयानां कुलानां चैव मारिष । श्रवणाद्धि विजानीम: पांचा-
ला: कुरुभि: सह । तस्मोन्योन्यं समरा यात्र: शरशक्तिपरश्वधै: । प्रेषयन्परलोकाय विचरंतो ह्यनीकश: । शरैर्दश
दिशो राजंस्तेषां मुक्ति: सहस्रश: । नभ्राजंत यथा तत्र भास्करस्य कृते गाततथा । तथा प्रयुध्यमानेषु पांडवायेषु नि-
र्भय: । दुर्योधनो महाराज व्यवगाहत तद्बलं । सैंधवस्य वधेनैव भृशं दु:खसमन्वित: । मर्तव्यमिति संचिंत्य प्राविशत्त-
द्द्विषद्बलं । नादयन्रथघोषेण कंपयन्निव मेदिनीं । आयात्तत्तत्र स पांडवानामनीकिनीं । समन्निपातस्तुमुलस्तस्य तत्
पांडवै: सह । अभवत्सर्वसैन्यानां मनावकरणो महान् । यथा मध्यंदिने सूर्यं प्रतपंतं गभस्तिभि: । तथा तव सुतं मध्ये प्रत-
पंतं शरोर्मिभि: । न शेकुर्भरतश्रेष्ठ पांडवा: समुदीक्षितुं । पलायने कृतोत्साहा निरुत्साहा द्विषज्जये । पर्यधावंत पां-
चाला वध्यमाना महात्मना । रुक्मपुंखै: प्रसन्नाग्रैस्तव पुत्रेण धन्विना । अर्द्यमाना: शरैस्तूर्णं न्यपतन्पांडुसैनि-
का: । न तादृशानि कर्माणि कृतवंतस्तु तावका: । यादृशानि कृतवान्राजा पुत्रस्तव विशांपते । पुत्रेण तव सा सेना पांडवी
मथिता रणे । नलिनी द्विरदेनेव समंतात्फुल्लपंकजा । क्षीणतोया निलार्काभ्यां हतत्विडिव पद्मिनी । बभूव पां-
डवी सेना तव पुत्रस्य तेजसा । पांडुसेनां हतां दृष्ट्वा तव पुत्रेण भारत । भीमसेनपुरोगास्तु पंचाला: समुपाद्रवन् ।

द्रोण॰ ममौ मसनं दशभिर्माद्रीपुत्रौ त्रिभिस्त्रिभिः॥ विराटद्रुपदौ षड्भिः आतनच शिखंडिनं। धृष्टद्युम्नं च सप्तत्या धर्मपुत्रं च स
प्तभिः॥ केकयांश्चैव चेदींश्च बहुभिर्निशितैः शरैः। सात्वतं पंचभिर्विद्ध्वा द्रौपदेयांस्त्रिभिस्त्रिभिः॥ घटोत्कचं च समरे वि
द्ध्वा सिंहवन्नदत्। ततो बलस्य चान्यांश्चापरान्योधान्समक्षिपास्त्रान्महारणे। शरैरेव चकर्तोग्रैः क्रुद्धोऽन्तक इव प्रजाः॥
सा तेन पांडवी सेना वध्यमाना शिलीमुखैः। तव पुत्रेण संग्रामे विदुद्राव नराधिप। तं तु प्रेतमिवादित्यं कुरु
राजं महाहवे। नाशकद्वीक्षितुं राजन्पांडुपुत्रस्य सैनिकाः॥ ततो युधिष्ठिरो राजा कुपितो राजसत्तम। अभ्य
धावत्कुरुपतिं तव पुत्रं जिघांसया। तावुभौ युधि कौरव्यौ समीयतुररिंदमौ। स्वार्थहेतोः पराक्रांतौ दुर्योध
नयुधिष्ठिरौ। ततो दुर्योधनः क्रुद्धः शरैः संनतपर्वभिः॥ विव्याध दशभिस्तूर्णं ध्वजं चिच्छेद चेषुणा। इंद्रसेनं त्रिभि
र्बाणैर्ललाटे जघ्निवान्नृप। सारथिं दयितं राज्ञः पांडवस्य महात्मनः॥ धनुश्चैवापरेणास्य चकर्तास्य महारथः।
चतुर्भिश्चतुरश्चैव बाणैर्विव्याध वाजिनः॥ ततो युधिष्ठिरः क्रुद्धो निमेषादिव कार्मुकं। अन्यदादाय वेगेन कौ
रवं प्रत्यवारयत्। सशरं सधनुः सम्यक् तं मत्वा समनिवारणं। हदहलाभोमीति राजानमुक्त्वा मुंच युधिष्ठिरः। स तेनाकर्ण २३५
मुक्तेन विद्धो बाणेन कौरवेंद्रो निषसाद रथोपस्थे भृशं संप्रमुह्य चेतनाः। तस्य तान्निघ्नतः शत्रून्कक्षं महद्दहतः॥
रमा हु

समयाः प्रविष्टाः॥ हृष्टो लब्धचेतनः। उद्भूतान्। उन्नितान् छंदसः संधिः॥ धूमकेतुः उत्पातग्रहोऽग्निर्वा॥

महात्मा पांडवोऽप्येष त्रिभिश्चिच्छेद मारिष। विव्याध चैनं दशभिः सम्यगस्तैः शितैः शरैः। मर्माणि भित्वा ते सर्वे
समयाः क्षितिमाविशन्। ततः प्रमुदिता योधाः परिवव्रुर्युधिष्ठिरं। वृत्रहत्ये यथा देवाः परिवव्रुः पुरंदरं। ततो
युधिष्ठिरो राजा तव पुत्रस्य मारिष। शरं परमदुर्वारं प्रेषयामास संयुगे। स तेन भृशसंविग्नो निषसाद रथोत्तमे
। ततः पांचालसैन्यानां नादश्चासीद्वै महान्। ततो हतो राजेति राजेंद्र मुदितानां समंततः। बाणशब्दरवश्चोग्रः
शुश्रुवे तत्र मारिष। अथ द्रोणस्तु तत्रैव प्रत्यदृश्यत संयुगे। हृष्टो दुर्योधनश्चापि दृढमादाय कार्मुकं। तिष्ठ ति
ष्ठेति राजानं ब्रुवन्पांडवमभ्ययात्। प्रत्युद्ययुस्त्वरिताः पांचाला जयगृद्धिनः। तान्द्रोणः प्रतिजग्राह परीप्सन्कु
रुसत्तमं। चंडवातोद्धुतान्मेघान्निघ्नन्रश्मिमुचो यथा। ततो राजन्महानासीत्संग्रामो भूरिवर्धनः। तावकानां परे
षां च समेतानां युयुत्सया॥ ॥ द्रोणपर्वणि॥ ॥ धृतराष्ट्र उवाच॥ ॥ यत्तदा प्राविशत्पांडूनाचार्यः कुपि
तो बली। उक्त्वा दुर्योधनं मंदं मम शास्त्रातिगं सुतं। प्रविश्य विचरंतं च रणे शूरमवस्थितं। कथं द्रोणं महेष्वासं पांड
वाः प्रत्यवारयन्। केऽरक्षन्दक्षिणं चक्रमाचार्यस्य महाहवे। के चोत्तरमरक्षंत निघ्नतः शात्रवान्बहून्। नृत्य
न्रथमार्गेषु सर्वशस्त्रभृतां वरः। धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान्॥ ॥ संजय उवाच॥ ॥ सा

ह्वा।

द्रोण

घमरकाः घमरकनामानः॥ अशिवा विनाशहेतुः॥ सज्वालकवलैः सस्फुलिंगव्यादानैः॥ खुरशब्दनिपातैः॥
याकेसिं ध्वंदृष्ट्वा राजा पार्थीसमेतषु॥ सात्यकिश्च महेष्वासो द्रोणमेवाभ्यधावत॥ तथा युधिष्ठिरं स्तूसंसीमसेनश्च
पांडवः॥ तथैव नकुलो धीमान् सहदेवश्च दुर्जयः॥ धृष्टद्युम्नः शतानीको विराटश्च सकेकयः॥ मत्स्याः शाल्वेयसे-
नाश्च द्रोणमेव ययुर्युधि॥ द्रुपदश्च तथा राजा पांचालैरभिरक्षितः॥ धृष्टद्युम्नपिता राजन् द्रोणमेवाभ्यवर्तत॥
द्रौपदेया महेष्वासा राक्षसश्च घटोत्कचः॥ ससैन्यास्तेऽभ्यवर्तंत द्रोणमेव महाद्युतिं॥ प्रभद्रकाश्च पांचालाः ष-
ट्सहस्राः प्रहारिणः॥ द्रोणमेवाभ्यधावंत पुरस्कृत्य शिखंडिनं॥ तथेतरे नरव्याघ्राः पांडवानां महारथाः॥ सहि-
ताः संन्यवर्तंत द्रोणमेव द्विजर्षभं॥ तेषु शूरेषु युद्धाय गतेषु भरतर्षभ॥ बभूव रजनी घोरा भीरूणां भयवर्धिनी॥ यो-
धानामशिवा रौद्रा राजन्नंतकगामिनी॥ कुंजराश्च मनुष्याणां प्राणांतकरणी तदा॥ तस्यां रजन्यां घोरायां नदंत्यः
सर्वतः शिवाः॥ न्यवेदयन् भयं घोरं सज्वालकवलैर्मुखैः॥ उलूकाश्चाप्यदृश्यंत शंसंतो विपुलं भयं॥ विशेषतः कौ-
रवाणां ध्वजिन्यामतिदारुणाः॥ ततः सैन्येषु राजेंद्र शब्दः समभवन्महानभेरीशब्दे। नमहतामृदंगानां स्वनेन च॥ ग-
जानां गर्जितैश्चापि तुरगाणां च हेषितैः॥ खुरशब्दनिनादैश्च तुमुलः सर्वतोऽभवत्॥ ततः समभवद्युद्धं संध्या- २३६
यामतिदारुणं॥ द्रोणस्य च महाराज संजयानां च सर्वशः॥ तमसा हृते लोके न प्राज्ञायत किंचन॥ सैन्येन रजसा
चैव समंतादुत्थितेन च॥
र्ज सं

समसज्जत व्यामिश्रमभवत्॥ कश्मलेनाभिसंवृतं सैन्यमध्यात्॥ संवृतानतिवापावः॥ ककर्शसंदिका॥ फेत्काररति हर्षितविशोषणं स्वे-
डितेन महीरणो परतर्जनगर्जने॥ खे पांपरपाश्व त्वाति रुरुक्षेरुत्स्नुष्टश्च्युता॥ निशीथे निशायां॥ रथानां नागानां च बलाहका-
नरस्य अश्वस्य नागस्य समसज्जत शोणितं॥ नापश्याम रजो भौमं कश्मलेनाभिसंवृतः॥ रात्रौ तं शावनस्य वदह्यमानस्य पर्वते
॥ घोरश्चटचटाशब्दः शस्त्राणां पततामभूत्॥ मृदंगानकनिर्ह्रादैर्झर्झरीपटहैस्तथा॥ फेत्कारहेषितैः शब्दैः सर्वमेवाकु-
लं बभौ॥ नैव स्वे न परे राजन् प्राज्ञायंत तमोवृते॥ उन्मत्तमिव तत्सर्वं बभूव रजनीमुखे॥ भौमं रजोऽथ राजेंद्र शोणितेन प्रशामि-
तं॥ शातकौंभैश्च कवचैर्भूषणैश्च तमोऽभ्यगात्॥ ततः सा भारती सेना मणिहेमविभूषिता॥ द्यौरिवाभासत तदा रजन्यां भरतर्षभ॥
गोमायुबलसंघुष्टा शक्तिध्वजसमाकुला॥ दारुणाभिरुता घोरा क्ष्वेडितोत्कुष्टनादिता॥ ततोऽभवन्महाशब्दस्तुमुलो लोमहर्षणः॥ स-
माहृत्य दिशः सर्वा महेंद्राशनिनिःस्वनः॥ सा निशीथे महाराज सेनाऽदृश्यत भारती॥ अंगदैः कुंडलैर्निष्कैः शस्त्रैश्चैव
चभासिता॥ ततो नागा रथाश्चैव दंतांस्तान् दष्टिनस्त्विषितान्॥ निशायां प्रत्यदृश्यंत मेघा इव सविद्युतः॥ ऋष्टिशक्तिगदाबाणमुसलप्रासप-
ट्टिशाः॥ संपतंतो व्यदृश्यंत भ्राजमाना इवाग्नयः॥ दुर्योधनपुरोवातो रथनागवलाहकः॥ वादित्रघोषस्तनितो चापविद्युद्ध्वजैर्वृ-
तो॥ द्रोणपांडवपर्जन्यः खड्गशक्तिगदाशनिः॥ शरधाराश्रुपवनो भृशं शीतोष्णसंकुलः॥ घोरो विस्मापनो युग्यो जीवितच्छिदसप्र-
वो॥ तां प्राविशन्नतिभयां सेनां युद्धचिकीर्षवः॥ तस्मिन् रात्रिमुखे घोरे महाशब्दनिनादिते॥ भीरूणां त्रासजनने शूराणां हर्षवर्धने॥
गिरयोरसौ॥ चापविद्युद्वंतो ध्वजदुर्ध्वनिविद्युद्भिः॥ शराएव धाराअश्रूणि एव च पवनोयस्मात्॥ ततः कर्मधारयः॥ नरशामतर्षः शातेर्दृ

[illegible]

विषक्तान् मामकान्॥

द्रो० रात्रियुद्धे महाघोरे वर्त्तमाने सुदारुणे। द्रोणमभ्यद्रवन् क्रुद्धाः सहिताः पांडुसृंजयाः॥ ययैवं प्रमुखे तेषां राजन् व्यवर्त्तत महात्मनां तांश्च
योधि सुखाश्चकर्कां स्त्रिन्नियमद्राये। तानि नागसहस्राणि रथानामयुतानि च। पदातिहयसंघानां प्रयुतान्यर्बुदानि च।
द्रोणेनैकेन नाराचैर्निर्भिन्नानि निशामुखे॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥धृतराष्ट्र उवाच॥ ॥तस्मिन्प्रविष्टे दुर्धर्षे
संजयामितौजसि। अमृष्यमाणे संरब्धे कान्वोऽवेक्षमतिस्तदा। दुर्योधनं तथा पुत्रं मुक्त्वाज्ञां गौरव्यादतिगां मम। यस्मा द्विशाद
मेयात्मा किंपार्थः प्रत्यपद्यत। निहते सैंधवे वीरे भूरिश्रवसि चैव हि। यदभ्यगान्महातेजाः पांचाल्यानपराजितः। किममन्यत
दुर्द्धर्षं प्रविष्टे शत्रुतापन। दुर्योधनश्च किं कृत्यं प्राप्तकालममन्यत। के च तं वरदं वीरं मन्वयुर्द्विजसत्तमं। के वास्य दक्षिणं
चक्रं वीराः शूरस्य युध्यतः। पुरस्तात्के त्ववर्त्तंत निघ्नतः शात्रवान्रणे। मन्ये हं पांडवान्सर्वांश्चाराज्ञवशान् हितान्। शिशिरे कंप
मानान्वि कृशा गा वह्व वृत्तो। प्रविश्य स महेष्वासः पांचालानरिमर्द्दनः। कथं नु पुरुषव्याघ्रः पंचत्वमुपजग्मिवान्। सर्वेषु यो
धेषु च संगतेषु रात्रौ समेतेषु महारथेषु। संलोड्यमानेषु पृथग्विधेषु के वस्तदानीं मतिमंतआसन्। हतांश्चैव वि
षक्तांश्च पराभूतांश्च शंससि। रथिनो विरथांश्चैव कृतान्युद्धेषु मामकान्। तेषां संलाड्यमानानां पांडवैर्हतचेतसां। २३७

अंधे तमसि मग्नानामभवत्का मतिस्तदा। प्रहृष्टांश्चाप्युदग्रांश्च संतुष्टांश्चैव पांडवान्। अंसंती हाप्रहृष्टांश्च विन्नत्वा

अं धे तमसि मग्नानामभवत्का मतिस्तदा। प्रहृष्टांश्चाप्युदग्रांश्च संतुष्टांश्चैव पांडवान्। अंसंतीहाप्रहृष्टांश्च विन्नत्वां
श्चैव मामकान्। कथमेषां तदा तत्र पार्थानामपलायिनां। प्रकाशमभवद्रात्रौ कथं कुरुषु संजय॥ ॥संजय उवाच॥
रात्रियुद्धे तदा राजन्वर्त्तमाने सुदारुणे। द्रोणमभ्यद्रवन्सर्वे पांडवाः ससैनिकाः। ततो द्रोणः केकयांश्च धृष्टद्युम्नस्य चा
त्मजान्। संप्रेषयत्प्रेतलोकं सर्वानिषुभिराशुगैः। तस्य प्रमुखतो राजन्येवर्त्तंत महारथाः। तान्सर्वान्प्रेषयामास पि
तृलोकं स भारत। प्रमथंतं तदा वीरं भारद्वाजं महारथं। अभ्यवर्त्तत संक्रुद्धः शिबी राजन्प्रतापवान्। तमापतंतं संप्रेक्ष्य
पांडवानां महारथं। विव्याध दशभिर्बाणैः सर्वपारसवैः शितैः। तं शिबिः प्रतिविव्याध त्रिंशता निशितैः शरैः। सा
रथिं चास्य भल्लेन स्मयमानो न्यपातयत्। तस्य द्रोणो हयान्हत्वा सारथिं च महात्मनः। अथास्य सशिरस्त्राणं शि
रः कायादपाहरत्। ततोऽस्य सारथिं क्षिप्रमन्यं दुर्योधनो दिशत्। स तेन संगृहीताश्वः पुनरभ्यद्रवद्रिपून्। आक श्री
लिंगानामनीकेन कलिंगस्य सुतो युधि। पूर्वं पितृवधात्क्रुद्धो भीमसेनमुपाद्रवत्। स भीमं पंचभिर्विद्ध्वा पुनर्विव्या
ध सप्तभिः। विशोकं त्रिभिराजघ्ने ध्वजमेकेन पत्रिणा। कलिंगानां तु तं शूरं क्रुद्धं क्रुद्धो वृकोदरः। रथाद्रथमभिद्रु
त्य मुष्टिनाभिजघान ह। तस्य मुष्टिहतस्याजौ पांडवेन बलीयसा। सर्वाण्यस्थीनि सहसा प्रापतन्वै पृथक्पृथक्॥
२२

द्रो०ण० लंकर्णौ भ्रातरौ चास्य नाहृष्येतयपरंतप। तेनभीमासनेनाराद्वेजे युगाया विषोपमैः॥ ततोत्ताजु रथं तस्य रुक्मा भीमो कवरहेमगतः॥ अ
वं चास्यमम निर्गासुषिनासमयोध्यदत्॥ स तथा पांडुपुत्रेण बलिना निहतोपतत्॥ तं निहत्य महाराज भीमसेनो महाबलः॥ ज
यरातरथं प्राप्य युक्तः सिंह इवानदत्। जयरातमथाक्षिप्य तूर्णमभ्यनपाण्णा। नले तनाशयामास कर्णस्यैवाग्रत॥ स्थितोक
र्णस्तु पांडवं वशा क्लिंकांचनीमववास्तजत्। ततस्तामवजयाद प्रहसन् पांडुनंदनः॥ कर्णायैवव उर्दयत्स्वि तेपाजौ वृकोदरः॥ ता
मापतंतीं विचिच्छेद शाकुनिस्तैलपायिनी॥ एतत्कृत्वा महत्कर्म रणोद्भुतपराक्रमः॥ पुनः स्वरथमास्थाय दुद्राव तव वाहिनीं॥ त
मायांतं जिघांसंतं भीमं क्रुद्धमिवांतकं॥ न्यवारयन्महाबाहो तव पुत्रा विशांपते॥ महता शरवर्षेण छादयंतो महारथाः॥ दुर्मदस्य
ततो भीमः प्रहसन्निव संयुगे॥ सारथिं च हयांश्चैव शरैर्निन्ये यमक्षयं॥ दुर्मदस्तु ततो यानं दुष्कर्णस्याव पुप्लुवे॥ तावेकरथमा
रूढौ भ्रातरौ शत्रुतापनौ॥ संग्रामशिरसो मध्ये भीमं द्रावप्यधावतां॥ यथांबुपतिमित्रौ हि तारकं दैत्यसत्तमं॥ ततस्तु दुर्मदश्चै र
व दुष्कर्णश्च तवात्मजौ॥ रथमेकं समारुह्य भीमं बाणैरविध्यतां॥ ततः कर्णस्य मिषतो द्रौणेर्दुर्योधनस्य च॥ कृपस्य सो १३८
मदत्तस्य बाल्हिकस्य च पांडवः॥ दुर्मदस्य च वीरस्य दुष्कर्णस्य च तं रथं॥ पादप्रहारेण धरां प्रावेशयदरिंदमः॥ ततः सुतौ तव बलि

ष्टा सुवरा इति दृष्टयेति संबोधनं वा च्युत्स्यन्यार्थे वा इत्यनागतेनान्वयः॥ वरुणात्मजः पुष्करः महेंद्र युद्धर्माभिज्ञः॥ निमिरयमेनि
नौ शूरौ दुष्कर्णदुर्मदौ॥ मुष्टिनाहत्य संक्रुद्धो ममर्द चरणेन च॥ ततो हाहाकृतं सैन्ये दृष्ट्वा भीमं ह्यब्रुवन्नरः॥ रुद्रोयं भीमरूपेण
धार्तराष्ट्रेषु युध्यति॥ एवमुक्त्वापलायंत सर्वे भारत पार्थिवाः॥ विसंज्ञवाहा यवाहा नच वे समदृश्यत॥ ततो बले भृशलुलि त
निशामुखे सपूजितावृषपर्ष्व हर्षे वृकोदरः॥ महाबलः कमलविबुद्धलोचनो युधिष्ठिरं नृपतिमपूजयद्बली॥ ततो यमौ द्रुप
दविराटकेकया युधिष्ठिरश्चापि परां मुदं ययुः॥ वृकोदरं भृशमभिपूजयंश्च ते यथांधकप्रतिनिहते हरं सुराः॥ ततः सुता
स्तव वरुणात्मजोपमा रुषान्विताः सह गुरुणा महात्मना॥ वृकोदरं सरथपदातिकुंजरा युयुत्सवो भृशमभियुक्त्य वारयन्॥
ततानवत्मिरथनेरिवाहतमहाहवे भयदमतीवदारुणं॥ निशामुखे बकबलयष्टमागतेनं महात्मनां नृपवरयुद्धमद्भुतं॥ द
द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥प्रायोपविष्टे हते पुत्रे सात्यकिना तदा॥ सोमदत्तो भृशं क्रुद्धो सात्यकिं वाक्य
मब्रवीत्॥ क्षत्रधर्मः पुरा दृष्टो यस्तु देवैर्महात्मभिः॥ तं त्वं सात्वत संत्यज्य दस्युधर्मे कथं रतः॥ पराङ्मुखाय दीनाय न्यस्तशस्त्राय सा
त्यके॥ क्षत्रधर्मरतः प्राज्ञः कथं तु प्रहरेद्रणे॥ द्वावेव किल रथीनां तत्र ख्यातौ महारथौ॥ प्रद्युम्नश्च महाबाहुस्त्वं चैव युधिसा
त्वत॥ कथं प्रायोपविष्टाय पार्थेन छिन्नबाहवे॥ नृशंसं पतनीयं च तादृशं कृतवानसि॥ कर्मणस्तस्य दुर्वृत्त फलं प्राप्नुहि संयुगे॥

विडोधकारेः इव वाक्यालंकारः॥ ॥देवेराजर्षिः॥ ॥

पतनीयं पातकावहं॥ दानं स्वाध्यायस्तपश्च मा करणे॥ न यत परामः॥ शौचममं कर्य्यै॥ अहिंसानृतानभिद्रोहः॥ अकारकार्य्यविवर्जनं॥ ध

द्रो० र्म्यो वै स्वामिन्नहं शिराविकम्प्य विगी॥ शाप्यमात्र तपुत्रात्या मि हेन सुकृतेन च॥ अनता नामिमां रात्रिं यदि वां वीरमानि
नः॥ अरक्षमाणं पार्थेन जिष्णुना ससुतानुजं॥ न हन्यां नरके घोरे पतेयं वृष्णि पांसन॥ एवमुक्त्वा सुसंकुद्धः सोमदत्तो महाबलः॥ द
ध्मौ शंखं च तारेण सिंहनादं ननाद च॥ ततः कमलपत्राक्षः सिंहदंष्ट्रो डरामहः॥ सात्वतः सुसंक्रुद्धः सोमदत्तमथाब्रवीत्॥
कौरवेयन मैत्रासः कथं चिद पिद्यते॥ वयासार्द्धं मया नित्येक्ष युध्यता हृदि कल्मनः॥ यदि सार्द्धं ससैन्येन गुप्तामां योधयि
ष्यामि॥ तथापि न व्यथा काचिद्रणे स्यान्मम कौरव॥ युद्धसारेण वाक्येन मतामवमतेन च॥ नाहं नीषयितुं शक्यः स्वत्र वृत्तोऽस्मि न
या त्वया॥ यदि तेऽस्ति युयुत्साद्य मदा सह नराधिप॥ निर्दयो निशितैर्बाणैः प्रहर प्रहरामि ते॥ हतास्त्वरि अवावीरस्तव पुत्रो मह
रथः॥ शलश्चैव महाराज भ्रातृव्यसनकर्शितः॥ वो चाप्यद्य वधिष्यामि सपुत्रं सहबान्धवं॥ निष्ठेदानीं रणे यत्तः कौरवोऽसि मे
हारथः॥ यस्मिन्दानं दमः शौचमहिंसा ह्रीर्धृतिः क्षमा॥ अनपायीनि सर्वाणि नित्यं राज्ञि युधिष्ठिरे॥ मृदंगकेतोस्तस्य त्वं तेज
सा निहतः पुरा॥ सकर्णसौबलः संख्ये विनाशं समुपैष्यसि॥ शापे दे पं कृष्णचरणौ रिष्टापूर्तेन कौरव॥ यदि त्वां ससुतं पापं न ह
न्यां युधि राधिपिन॥ अपायास्यसि चेत्यक्त्वा ततो मुक्तो भविष्यसि॥ एवमाभाष्य चान्योन्यं क्रोधसंरक्तलोचनौ॥ प्रवृत्तौ शरसंपाते २३८

स्त्री

कचंडवाततनानिस्व साधं॥ ओदालिनायां॥

कर्तुं युद्धसमत्तमौ॥ ततो रथसहस्रेण नागानामयुतेन च॥ दुर्योधनः सोमदत्तं परिवार्य व्यवस्थितः॥ शकुनिश्च सुसंक्रुद्ध
ः सर्वशस्त्रभृतां वरः॥ पुत्रपौत्रैः परिवृतो भ्रातृभिश्चेन्द्रविक्रमैः॥ स्यालस्तव महाबाहुर्वज्रसंहननो युवा॥ साग्रं शतस
हस्रं तु हयानां तस्य धीमतः॥ सोमदत्तं महेष्वासं समंतात्पर्य्यरक्षत॥ रक्ष्यमाणश्च बलिभिश्छादयामास सात्यकिं॥ तं छाद्यमा
नं विशिखैर्दृष्ट्वा संनतपर्वभिः॥ धृष्टद्युम्नोऽभ्ययात्क्रुद्धः प्रगृह्य महतीं चमूं॥ चंडवातानिर्वृष्टानां मुद्धीनामिव स्वनः॥ आसी
द्राजन्बलौघानामन्योन्यमभिनिघ्नतां॥ विव्याध सोमदत्तस्तु सात्वतं नवभिः शरैः॥ सात्यकिर्दशभिश्चैनमवधीत्कुरुपुंगवं॥
सोऽतिविद्धो बलवता समरे दृढधन्विना॥ रथोपस्थं समासाद्य मुमोह गतचेतनः॥ तं विसंज्ञं समालक्ष्य सारथिस्त्वरयान्वितः॥
॥ अपोवाह रणाद्वीरं सोमदत्तं महारथं॥ तं विसंज्ञं समालक्ष्य युयुधानशरार्दितं॥ अभ्यवर्तत ताडणो यदुवीरजिघांस
या॥ तमायान्तमभिप्रेक्ष्य युधिष्ठिरपुरोगमाः॥ परिवव्रुर्महात्मानं परीप्संतो यदूद्वहं॥ ततः प्रववृते युद्धं द्रोणस्य सह पा यद्
ण्डवैः॥ बलिर्विबुधैः सार्द्धं त्रैलोक्यजयकांक्षया॥ ततः सायकजालेन पाण्डवानीकमावृणोत्॥ भारद्वाजो महातेजा विव्या
ध च युधिष्ठिरं॥ सात्यकिं दशभिर्बाणैर्विंशत्या पार्षतं शरैः॥ भीमसेनं च नवभिर्नकुलं पंचभिस्तथा॥ सहदेवं तथाष्टाभि
श्शतेन च शिखंडिनं॥ द्रौपदेयान्महाबाहुः पंचभिः पंचभिः शरैः॥ विराटं मत्स्यमष्टाभिर्द्रुपदं दशभिः शरैः॥ युधामन्युं त्रि

रा

द्रोण० नि: षड्भिरुत्तमौजा समाहवे॥ अन्यांश्च सैनिकान्विध्यन्युधिष्ठिरमुपाद्रवत्॥ ते वध्यमाना द्रोणेन पांडुसृंजयसै
निकाः॥ पांडवं विनयादाजन्नस्मात्रं नाददिदीगोदराः॥ क्रान्त्यमानेदुतसैन्ये दृष्ट्वा द्रोणेन फाल्गुनः॥ किंचिदागतम
न्योगुरुपाघान्ययादुतं दृष्ट्वा द्रोणं तु बीभत्सुमनि ध्वस्तमाददे॥ सर्वचर्वतः सैन्यं हतं युधिष्ठिरं दृष्ट्वा तु ता
श्म स्कंधेन द्याना नारक्षा जस्य पांडवे॥ द्रोणान्नस्तु तेरात स्वर्वतः परिवारितः॥ व्यधमत्पांडुसैन्यानि तूलराशिमिवानलः॥
तं ज्वलंतमिवास्त्रयदीप्ता नलसमद्युतिं॥ दानवं निशामस्य तं दृष्ट्वा ज्वलंतं राशाग्निं॥ मंडलीकृत्य धन्वानं तपंतमिव भास्क
रं॥ दहंतमहितान्सोत्पत्तिनं कश्चित्वारयत्तं॥ योयो हि प्रमुखे तस्य तस्थौ द्रोणस्य कृपाः तस्य तस्य शिरश्छित्वा यो द्रो
णशराः क्षितिं॥ एवं सा पांडवी सेना वध्यमाना महात्मना॥ उद्राव कृतभीता पश्यतः सव्यसाचिनः॥ संप्रनष्टं बलं दृ
ष्ट्वा द्रोणेन निशि भारत॥ गोविंदमब्रवीजिष्णुर्गच्छ द्रोण रथं प्रति॥ ततो रजत गोक्षीरकुंदेन्दुसदृशप्रभान्॥ चोदयामास
दाशार्हो ह्यान्द्रोणरथं प्रति॥ भीमसेनोपि तं दृष्ट्वा यांतं द्रोणाय फाल्गुनं॥ स्वं सारथिमुवाचेदं द्रोणानीकाय मां वह॥ सा
पि तस्य वचः श्रुत्वा विशोकोऽभ्यनयद्ध्यान्॥ पृष्ठतः सत्यसंधस्य जिष्णोर्भरतसत्तम॥ तौ दृष्ट्वा भ्रातरौ यत्तौ द्रोणानीकम २४७
भिद्रुतौ॥ पांचालाः सृंजया मत्स्याश्चेदिकारूषकोशलाः॥ अभ्यगच्छन्महाराज केकयाश्च महारथाः॥ ततो राजन्

ततोभवन्महायुद्धं घोरं रोमहर्षणं। बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः॥ महद्भ्यां रथवंशाभ्यां बलं जगृहतुस्तव॥ तौ दृष्ट्वा पुरुषव्याघ्रौ भी
मसेनधनंजयौ॥ धृष्टद्युम्नोऽभ्ययाद्राजन्सात्यकिश्च महारथः॥ चंडवाताभिपन्नानामुदधीनामिव स्वनः॥ आसीद्राजन्बलौघानां तदन्यो
न्यमभिघ्नतां॥ सौमदत्तिं वधात्क्रुद्धो दृष्ट्वा सात्यकिमाहवे॥ द्रौणिरभ्यद्रवद्राजन्वधाय कृतनिश्चयः॥ तमापतंतं संप्रेक्ष्य तथैनेयरथं
प्रति॥ भैमसेनिः सुसंक्रुद्धः प्रत्यमित्रमवारयत्॥ कार्ष्णायसमयं घोरं ऋक्षचर्मपरिच्छदं॥ युक्तं गजनिभैर्वाहैर्न हयैर्नापि वारणैः॥ वि नाई
क्षिप्तचक्रेण विहतार्धेण कूजता॥ ध्वजेनाभिवृतं तेन रथेनापततं ततः॥ लोहिताद्रैपताकं तमंत्रमालाविभूषितं॥ अष्टचक्रस
मायुक्तमास्थाय विपुलं रथं॥ शूलमुद्गरधारिण्या शैलपादपहस्तया॥ रक्षसां घोररूपाणामक्षौहिण्या समावृतः॥ समुद्य
तमहाचापं निशाम्य व्यथिता नृपाः॥ युगांतकालसमये दंडहस्तमिवांतकं॥ तत्र स्रगिरिशृंगाभं भीमरूपं भयावहं॥ दंष्ट्रा
मत्रंपगः करालोग्रवक्त्रं कुकर्णं महाहनुं॥ ऊर्ध्वकेशं विरूपाक्षं दीप्तास्यं निम्नितोदरं॥ महाश्वासं गलद्वारं किरीटच्छन्नमूर्धजं॥ त्रासनं स
र्वभूतानां व्यात्ताननमिवांतकं॥ वीक्ष्य दीप्तमिवायांतं रिपुविक्षोभकारिणं॥ तमुद्यतमहाचापं राक्षसेंद्रं घटोत्कचं॥ भया

र्ताः क्षुभिताः सर्वे राजन्पुत्रस्य ते बलं॥ वायुनोद्धूतफेनोर्मिः सघूर्णं इव सागरः। ...। महाचापं गलद्वारं महागगनाकारगराक्षितं॥ ॥

ननत्वश्वत्थामं। कन्यावस्तः॥ पासद्दोन्वा॥

द्रो० द्दिता पुत्रो द्रोणपुत्रस्य तत्ववादिनी। वायुना स्या नितावर्त्तांगं गोवाई वरं गिणा। घटोत्कचसुतकेन मिंद्दता देननीषिताः॥
त्रसुतस्तु गंजाहत्वं विक्षुब्धस्य नरान्द्रशा। नृतीरमहाहिरत्य थ्रेमः सो शत्रसमं ततः। संध्याकालाधिकबलैः ब्रसुकै
राक्षसैः क्षितो। आयसा विचक्राणि तुरुबद्धः पासताम राः। पतत्य विरत्ताः शूलाः शातघ्न्यः पट्टिशास्तथा। तदु
ग्रमति रौद्रं चहङ्घा सुहं नराधिपाः। ततयास्त्र वकसञ्ज्ञिव्यथिताः पाण्डवद्विशाः। तत्रिकोस्त्र बलश्लाघी द्रोणिर्मा
नीनविव्यथे। अथ समब्रशरैर्माया घटोत्कचविनिर्मिता। निहता यातु मायायाम मर्षीस घटोत्कचः। विसमर्ज्ज वा
रान्घोरा स्त्रे अश्वत्थामानमाविशात्। तु जगाइव वेगेन वल्मीकं क्रोधमूर्छिताः। तेशराः रुधिराक्तांगा निर्वा शार ह
तीस्तुतं। विविशुर्धरणीं शीघ्रा रुक्मपुंखाः शिलाशिताः। अश्वत्थामा तु संक्रुद्धो लघुहस्तः प्रतापवान्। घटोत्कच म
भिक्रुद्धं बिभेद दशभिः शरैः। घटोत्कचोपि विद्ध्यस्तु द्रोणपुत्रेण मर्म्मसु। चक्रं शतसहस्रारमगृह्णा द्व्यथितो
नृशं। क्षुरान्तं बालसूर्याभं मणिवज्जविभूषितं। अश्वत्थाम्नस्तु चिक्षेप भैमसेनिर्जिघांसया। वेगेन महता ग
च्छत् क्षिप्तं द्रौणिना शरैः। अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि। घटोत्कचस्ततं दृष्ट्वा चक्रं निपातितं। द्रौणिं प्राच्छादय २४१

द्बाणैः स्वर्भानुरिव भास्करं। घटोत्कचसुतः श्रीमान्भिन्नांजनचयोपमः। रुरोध द्रौणिमायांतं प्रभंजन मिवाद्रिराट्। पौ
त्रेण भीमसेनस्य शरैः सांजनपर्वणा। बभौ मेघेन धाराभिर्गिरिर्मेरुरिवावृतः। अश्वत्थामा त्वसंभ्रांतो रुद्रोपेंद्रवि
क्रमः। ध्वजमेकेन बाणेन चिच्छेदांजनपर्वणः। द्वाभ्यां तु रथयंतारं त्रिभिस्त्रिवेणुकं। धनुरेकेन चिच्छेद चतुर्भि
श्चतुरो हयान्। विरथस्योद्यतं हस्तात् हेमबिंदुभिराचितं। विशिखैः सुनिशितैः खड्गमस्य द्विधाकरोत्। गदां हे
मांगदां राजंस्तूर्णं हैडिंबसूनुना। भ्राम्योत्क्षिप्तां शरैः सापि द्रौणिनाभ्याहतापतत्। ततोंतरिक्षमुत्पत्य कालमेघइ
वोन्नदन्। ववर्षांजनपर्वा स द्रुमवर्षं नभस्तलात्। ततो मायाधरं द्रौणिर्घटोत्कचसुतं दिवि। मार्गणैरभिविव्याध घ
नं सूर्यमिवांशुभिः। सोवतीर्य पुनस्तस्थौ रथे हेमपरिष्कृते। महीगत इवात्युग्रः श्रीमानंजनपर्वतः। तमयस्मयव
र्माणं द्रौणिर्भीमात्मजात्मजं। जघानांजनपर्वाणं महेश्वर इवांधकं। अथ दृष्ट्वा हतं पुत्रमश्वत्थाम्ना महाबलं। द्रौणेः
सकाशमभ्येत्य रोषात्प्रचलितांगदः। प्राह वाक्यमसंभ्रांतो वीरं शारद्वतीसुतं। दहंतं पांडवानीकं वनमग्निमिवो
द्धतं॥ ॥घटोत्कच उवाच॥ ॥तिष्ठ तिष्ठ न मे जीवन् द्रोणपुत्र गमिष्यसि। त्वामद्य निहनिष्यामि क्रौंचमग्निसुतो यथा
॥ ॥अश्वत्थामोवाच॥ ॥गच्छ वत्स सहान्यैस्त्वं युध्यस्वामरविक्रम। न हि पुत्रेण हैडिंबे पिता न्याय्यः प्रबाधितुं। कामं

द्रोण०

रक्षुनरोपोमेरे डिबिविध्यते त्वयि। किं त्वारामाधिवितोजंत्वदन्याशत्मानमच्युत॥ ॥संजयउवाच॥ श्रुत्वेतत्क्रोधताम्राक्षः पुत्र
शोकसमन्वितः। अश्वत्थामानमायस्तो भिम त्वमनिरभाषत। किम हं कातरा द्रौणे हयत्युत्तनड् वा हवे। यन्मामीष यसे वा सिरम
दे तद्वचस्त्वया। भीमाच्च खलु मसुत्वन्नः क्रुरुणां विपुले कुले। पांडवानाम हं पुत्रः समरे घनिवर्त्तिनां। रक्षसामधिराजोऽहं
दशग्रीवसमो बले। तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि। युद्धश्रद्धामहं तेऽद्य विनाशयामि रणाजिरे। इत्युक्त्वा रोषताम्राक्षो रा
क्षसः सुमहाबलः। द्रौणिमभ्यद्रवत्क्रोधाज्जेन्द्रं सिंहवकेसरी। रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः। रथिनामृषभं द्रौणिं धाराभि
रिव तोयदः। शरवृष्टिं तु तां द्रौणिरप्राप्तां तां व्यशातयत्। ततो न रिक्षं बाणानां संग्राम अभवत्पुनः। अथाम्बरं शरवर्ष
कृतैर्विस्फुलिंगैस्तदा बभौ। विभावरीमुखे व्योम खद्योतैरिव चित्रितं। निशम्य निहतां मायां द्रौणिना रणमानिना। घटोत्कचस्त
तो मायां ससर्जान्तर्हितः पुनः। सोऽभवद्गिरिरत्युच्चः शिखरैस्तरुसंकटैः। शूलप्रासासिमुसलजलप्रस्रवणो महान्। तमंजनगिरि
प्रख्यं द्रौणिर्दृष्ट्वा महीधरं। प्रपतद्भिश्च बहुभिरस्त्रसंघैर्न चुक्षुभे। ततः स्मयन्निव द्रौणिर्वज्रमस्त्रमुदीरयत्। स तेनास्त्रेण शैलें
द्रः क्षिप्तः क्षिप्रमनश्यत। ततः स तोयदो भूत्वा नीलः सेन्द्रायुधो दिवि। अश्मवृष्टिभिरत्युग्रो द्रौणिमाच्छादयद्रणे। अथ संधाय वायव्यम
॥ स्त्रमस्त्रविदां वरः। २४२
अश्वत्थामा व्यधमद्दोणिर्नीलमेघं समुत्थितं। स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वशः। शतं रथसहस्राणां जघान द्विपदां
वरः। स दृष्ट्वा पुनरायांतं रथेनायतकार्मुकं। घटोत्कचमसंभ्रांतं राक्षसैर्बहुभिर्वृतं। सिंहशार्दूलसदृशैर्मत्तद्विर
दविक्रमैः। गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैरपि। विकृतास्यशिरोग्रीवैर्हैडिंबानुचरैः सह। पौलस्त्यैर्यातुधा
निश्च तामसैश्चोग्रविक्रमैः। नानाशस्त्रधरैर्वीरैर्नानाकवचभूषणैः। महाबलैर्भीमरवैः संरंभोद्वृत्तलोचनैः।
उपस्थितैस्ततो युद्धे राक्षसैर्युद्धदुर्मदैः। विषण्णमभिसंप्रेक्ष्य पुत्रं ते वाक्यमब्रवीत्। तिष्ठ दुर्योधनाद्य त्वं न कार्य
ः संभ्रमस्त्वया। सहैभिर्भ्रातृभिर्वीरैः पार्थिवैश्चेंद्रविक्रमैः। निहनिष्याम्यमित्रांस्ते न तवास्ति पराजयः। सत्यं ते प्र
तिजानामि पर्याश्वासय वाहिनीं॥ ॥दुर्योधन उवाच॥ ॥न त्वेतदद्भुतं मन्ये यत्ते महदिदं मनः। अस्मासु च परा
भक्तिस्तव गौतमीनंदन॥ ॥संजय उवाच॥ ॥अश्वत्थामानमुक्त्वैवं ततः सौबलमब्रवीत्। वृतः शतसहस्रेण
रथानां रणशोभिनां। षष्ट्या रथसहस्रैश्च प्रयाहि त्वं धनंजयं। कर्णश्च वृषसेनश्च कृपो नीलस्तथैव च। उदीच्याः कृ
तवर्मा च पुरुमित्रः श्रुतार्पणः। दुःशासनो निकुंभश्च कुंडभेदी पुरंक्रमः। दृढरथः पताकी हेमकंप
नः। शल्यारुणी इंद्रसेनश्च संजयो विजयो जयः। कमलाक्षः परक्राथी जयवर्मा सुदर्शनः। एते त्वामनुयास्यंति पत्तीना या॥
८३

पितामहः पौत्रयोर्वै मिथः॥ युद्धं संप्रहारः॥ महीधरस्य अंजनविशेषणं। कामं यद्यपि रुरुवेदीप्तिमकरोत। वसुरश्मि
द्रो० मप्युतानिषद्। जहि मीमं यमो चोमि धर्मराजं च मातुल। असुरानिव देवेंद्रो जयाशा मे त्वयि स्थिता। दारिता द्रौणि
नाबाणैर्नृशं विकृतविग्रहात। जहि मातुल कौंतेयानसुरानिव पावकिः॥ एवमुक्तो ययौ शीघ्रं पुत्रेण लब्धसौब
लः। पितापुत्रैस्तु तान्राजन्विधक्ष्यन्नेव पांडवान। अथ प्रवर्तते युद्धं द्रोणीराक्षसयोर्मृधे। विभावृष्यो द्रुतु स्तं श
कप्रकादयोरिव। ततो घटोत्कचो बाणैर्दशभिर्गौतमीसुतं। जघानोरसि संक्रुद्धो विषाग्निप्रतिमैर्दृढैः। सतै
रभ्याहतो गाढं शरैर्भीमसुतेरितैः। चचाल रथमध्यस्थो वातोद्धूत इव द्रुमः। द्रयश्चांजलिकेनास्य मार्गणेन म
हाप्रभं। द्रौणिर्हस्तस्थितं चापं चिच्छेदाशु घटोत्कचः। ततोन्यद्द्रौणिरादाय धनुर्भारसहं महत। ववर्ष विशिखांस्ती
क्ष्णान्वारिधारा इवांबुदः। ततः शारद्वतीपुत्रः प्रेषयामास भारत। सुवर्णपुंखान्शत्रुघ्नान्खचरान्खचरं प्र
ति। तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसां। सिंहैरिव बभौ मत्तं गजानामाकुलं कुलं। विधम्य राक्षसान्बाणैः सा
श्वसूतरथायुधान। ददाह भगवान्वह्निर्भूतानीव युगक्षये। स दग्ध्वाक्षौहिणीं बाणैर्नैर्ऋतां रुरुचे भृशं। पु
रेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः॥ युगांते सर्वभूतानि दग्ध्वेव वसुरुल्वणः॥ रराज जयतां श्रेष्ठो द्रोणपुत्रस्तवाहि २४२
तान। ततो घटोत्कचः क्रुद्धो रक्षसां भीमकर्मणां। द्रौणिं हतेति महतीं चोदयामास तां चमूं। घटोत्कचस्य तामाज्ञां प्रति

शतघ्नीः सकंटकां योधुंडाद। असीन्दंडाभीसीन। तोमरान्सप्राशान। कणपान्अग्निवानानात। कंपनान। यष्टीः। शूलानेल
गृह्यास्तु राक्षसाः दंष्ट्रोज्वलमहावक्त्रा घोररूपा भयानकाः। व्यात्तानना दीर्घजिह्वाः क्रोधताम्रेक्षणा भृशं। सिंहनादे
न महता नादयंतो वसुंधरां। कदंबुमस्पंदवंस्ते द्रौणिं नानाप्रहरणायुधाः। शक्तीः शतघ्नीः परिघानशनीः शूल
स्या पट्टिशान। खड्गान्गदा भिंदिपालान्मुसलानि परश्वधान। प्रासानसींस्तोमरांश्च कणपांश्च कंपनान। कुंलांदं शिता
। कुंतान्स्तु शुभ्रत्वमशुंडान्स्थूलाः कार्ष्णायसीस्तथा। मुद्गरांश्च महा। घोरान्समारस्त्र क्रुद्धा रणान। द्रौणिमूर्द्धन्य
सर्जंत राक्षसा भीमविक्रमाः। चिक्षिपुः क्रोधताम्राक्षाः शतशोथ सहस्रशः। तच्छस्त्रवर्षं सुमहद्द्रोणपुत्रस्य मूर्द्धनि
। पतमानं समीक्ष्याथ योधास्ते व्यथिताभवन। द्रोणपुत्रस्त्वसंभ्रांतस्तद्वर्षं घोरमुच्छ्रितं। शरैर्विध्वंसयामास वज्र
कल्पैः शिलाशितैः। ततोन्यैर्विशिखैस्तूर्णं स्वर्णपुंखैर्महामनाः। निजघ्ने राक्षसान्द्रौणिर्दिव्यास्त्रप्रतिमंत्रितैः। त
द्बाणैरर्दितं यूथं रक्षसां पीनवक्षसां। सिंहैरिव बभौ मत्तं गजानामाकुलं कुलं। ते राक्षसाः सुसंक्रुद्धा द्रोणपुत्रेण
ताडिताः। क्रुद्धाः स्म प्राद्रवन्द्रौणिं जिघांसंतो महाबलाः। तत्राद्भुतमं द्रौणिर्दर्शयामास विक्रमं। अशक्यं कर्तुम
न्येन सर्वभूतेषु भारत। यदेको राक्षसीं सेनां क्षणाद्द्रौणिर्महास्त्रवित। ददाह ज्वलितैर्बाणै राक्षसेंद्रस्य पश्य
तः। स दहन्राक्षसानीकं रराज द्रौणिराहवे। युगांते सर्वभूतानि संवर्तक इवानलः। तं दहंतमनीकानि शरैरा
गूडान। स्थूलान्स्तंभान। संवर्त्तको नाम्न॥

द्रोण शी विषोपमैः॥ विष्णुराजसहस्रेषु पांडवेयेषु भारत। तेनं निरीक्षितुं कश्चिच्छक्तो द्रोणिमाहवे। ततो घटो
त्कच बाहीराशक्रुमेंशन्महाबला। ससुतं भरतश्रेष्ठ क्रोधाद्रक्तांतलोचनः। तलं तलेन संहत्य संदश्य दशन
च्छदं। तं स तत्रमब्रवीत्क्रुद्धो द्रोणपुत्रायमावह। समयायोधारूपेण तेन जिष्णपता किना। ह्रियद्रोणपुत्रेण
पुनरप्यभिहृदतः। सविनद्य महानादं सिंहवद्भीमविक्रमः। चिक्षेपाविध्यसंग्रामे द्रोणपुत्राय राक्षसः। अष्ट
घंटां महाघोरां मशनीं देवनिर्मितां। तामवप्लुत्य जग्राह द्रौणिर्न्यस्य रथे धनुः। चिक्षेप चैनां तस्यैव स्यंद
नात्सोवप्लुत्य वै। सा स्वस्तत धजं वाहं भस्म कृत्वा महाप्रभा। विवेश धरणीं भित्वा साशनिर्भृशदारुणा। द्रोण
स्तत्कर्म दृष्ट्वा सर्वभूतान्यपूजयन्। यदवप्लुत्य जग्राह घोरां शंकरनिर्मितां। धृष्टद्युम्नरथं गत्वा भीमसेनि
स्ततो नृपः। धनुर्घोरं समादाय महदिंद्रायुधोपमं। मुमोच निशितान्बाणान्पुनर्द्रौणेर्महोरसि। धृष्टद्युम्नो
प्यसंभ्रांतो मुमोचाशीविषोपमान्। सुवर्णपुंखान्विशिखान्द्रोणपुत्रस्य वक्षसि। ततो मुमोच नाराचा
न्द्रौणिस्तांस्तु सहस्रशः। तावप्यग्निशिखाप्रख्यैर्जघ्नतुस्तस्य मार्गणान्। अतितीव्रमभूद्युद्धं तयोः पुरुष
सिंहयोः। योधानां प्रीतिजननं द्रौणेश्च भरतर्षभ। ततोऽश्वसहस्रेण द्विरदानां शतैस्त्रिभिः। षड्भिर्वाजिसहस्रै २४४
श्च भीमस्तं देशमाव्रजत्। ततो भीमात्मजं रक्षो धृष्टद्युम्नं च सानुगं। अयोधयत धर्मात्मा द्रौणिरक्लिष्टविक्रम

रथैः द्विपैश्च दलितां महत्यां वपायस्यां। कबंधैरावृक्षितमाकारितमुकुंपयस्यां सवृकोदरपार्षतानुस्त्वारा॥
॥ तत्राद्भुततमं द्रौणिर्दर्शयामास विक्रमं। अशक्यं कर्तुमन्येन सर्वभूतेषु भारत। निमेषांतरमात्रेण साश्वसूतरथद्विपां। अक्षौहि
णीं राक्षसानां चिच्छेद निशितैः शरैः। मिषतां भीमसेनस्य हैडिंबेः पार्षतस्य च। यमयोर्धर्मपुत्रस्य विजयस्याच्युतस्य च। प्रगाढ
मंजोगतिभिर्नाराचैरभिताडिताः। निपेतुर्द्विरदा भूमौ सशृंगा इव पर्वताः। निकृत्तैर्हस्तिहस्तैश्च विचलद्भिरितस्ततः। रराज
वसुधा कीर्णा विसर्पद्भिरिवोरगैः। क्षिप्तैः कांचनदंडैश्च नृपच्छत्रैः क्षितिर्बभौ। द्यौरिवोदितचंद्रार्का ग्रहाकीर्णा युगक्षये। प्र
वृद्धध्वजमंडूकां भेरीविस्तीर्णकच्छपां। छत्रहंसावलीजुष्टां फेनचामरमालिनीं। कंकगृध्रमहाग्राहां नैकायुधझषाकुलां।
विकीर्णरथपाषाणां ध्वजाश्चमकराकुलां। रथाक्षिप्तमहावप्रां पताकारुचिरद्रुमां। शरमीनां महारौद्रां प्रासशक्त्युग्रडुंडुभां। मज्जामां
समहापंकां कबंधावर्जितोडुपां। केशशैवलकल्माषां भीरूणां कश्मलावहां। नागेंद्रहययोधानां शरीरव्ययसंभवां। शोणितो
घवेगां घोरां द्रौणिः प्रावर्तयन्नदीं। योधार्तरवनिर्घोषां क्षतजोर्मिसमाकुलां। प्रायादतिमहाघोरं यमराष्ट्रमहोदधिं। निहत्य राक्ष
सान्बाणैर्द्रौणिर्हैडिंबमार्दयत्। पुनरप्यतिसंक्रुद्धः सवृकोदरपार्षतान्। सनाराचगणैः पार्थान्द्रौणिर्विध्य महाबलः। ज
घान सुरथं नाम द्रुपदस्य सुतं विभुः। पुनः श्रुतंजयं नाम सुरथस्यानुजं रणे। बलानीकं जयानीकं जयाश्वं चाभिजघ्निवान्। पुनः

द्रोण° ज्ञात्वाणतीक्ष्णेन द्रौणिः मिहङ्केवोवद्दत्। जघान स हृष्टध्वजं चन्द्रदेवं च मालिनं। कुंतिभोजसुतांश्चैव दशाचिद्दिशाव्यमिवात्। सुताक
यव राजन्द्रौणिर्निन्ये यमक्षयं। त्रिगिरिस्त्रातिसञ्जादेश्चौणिश्च सुवर्णध्वजमालिनं। शत्रुंजयं च बलिनं शक्रलोकं निनाय च॥
अश्वत्थामा सुसंक्रुद्धः संक्षयो यमतिष्ठागं। मुमोच कर्णं शूलेन धनुषा शरसन्निभं। यमदंडोपमं घोरमुद्दिश्याशु घटोत्कचं। स
निवारयंतं मद्राजस्यमदाशरगं विविरावसुधन्वानी घं स तु स्वः पृथिवीपते। तं हतं पतितं ज्ञात्वा बाह्लीकस्तु महारथः। द्रोणो
सकाशाद्राजन्द्रस्य पनिन्यरथां नरं। ततः पराङ्मुखरथः सैन्यं युधिष्ठिरस्य पराजित्य रणो वीरा द्रोणपुत्रेण ताडिताः। जितः स
र्वीकृते स्वनव प्रवेशनारतः। अथ शरव्रातैर्निकृत्तमादिदैव तनय निति। च्छदा दाबरिम्मसंतानं। निधनमुपगतमर्दितान् कलिंगे च सिंहजिरि
शिरस्तेरिव उग्रमाविरोधा। तं सिद्धगंधर्वपिशाचसंघा नागाः सुपर्णाः पितरो वयांसि रक्षोगणा भूतगणाश्च द्रौणिमपूजय
न्महस्समुराश्च॥ ॥इति द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ द्रुपदस्यात्मजान् दृष्ट्वा कुंतिभोजसुतांस्तथा द्रोणपुत्रेण नि
हतान्राजन्सहस्रशः। युधिष्ठिरो भीमसेनो धृष्टद्युम्नश्च पार्षतः। युयुधानश्च संयत्ता युद्धायैव मनो दधुः॥ सोमदत्तस्तु
नः क्रुद्धो दृष्ट्वा सात्यकिमाहवे। महता शरवर्षेण छादयामास सात्वतं। ततः समभवद्युद्धमतीव भयवर्धनं। त्वदीयानां परेषां च घो २४५

२ मि

रं विजयकांक्षिणां। तं दृष्ट्वा समुपायांतं भीमसेनं शिलाशितैः। दशभिः सात्वतस्यार्थे भीमो विव्याध कोपितः। सोमदत्तो
पि तं वीरं शतेन प्रत्यविध्यत। सात्वतस्त्वभिसंक्रुद्धः पुत्राधिभिरभिप्लुतं। वृद्धमृद्धं गुणैः सर्वैर्ययातिमिव नाहुषं। विव्याध दशभिर्नि
शितैस्तीक्ष्णैः शरैर्वज्रनिपातनैः। शक्त्या चैनं विनिर्भिद्य पुनर्विव्याध सप्तभिः। ततस्तु सात्यकेरर्थे भीमसेनो नवं दृढं। मुमो
च परिघं घोरं सोमदत्तस्य मूर्धनि। सात्वतोऽप्यग्निसंकाशं मुमोच शरमुत्तमं। सोमदत्तोरसि क्रुद्धः सुपत्रं निशितं युधि। यु
गपत्पेततुर्घोरौ घोरौ परिघमार्गणौ। शरीरे सोमदत्तस्य स पपात महारथः। व्यामोहिते तु तनये बाह्लीकः समुपाद्रवत्। वि
सृजञ्छरवर्षाणि कालवर्षीव तोयदः। भीमोऽथ सात्वतस्यार्थे बाह्लीकं नवभिः शरैः। प्रपीडयन्महात्मानं विव्याध रणमूर्ध
नि। प्रातिपीयस्तु संक्रुद्धः शक्तिं भीमस्य वक्षसि। निचखान महाबाहुः पुरंदर इवाशनिं। स तया निहतो भीमश्चकंपे च मुमो
ह च। प्राप्य चेतश्च बलवान्गदामस्मै ससर्ज ह। सा पांडवेन प्रहिता बाह्लीकस्य शिरोऽहरत्। स पपात हतः पृथ्व्यां वज्राह
त इवाद्रिराट्। तस्मिन्विनिहते वीरे बाह्लीके पुरुषर्षभे। पुत्रास्तेऽभ्यर्दयन्भीमं दश दाशरथेः समाः। नागदत्तो दृढरथो वी
रबाहुरयोभुजः। दृढः सुहस्तो विरजाः प्रमाथी उग्रयायपि। तान्दृष्ट्वा चुक्रुधे भीमो जगृहे भारसाधनान्। एकैकं समसु
द्दिश्य पातयामास मर्मसु। ते विद्धा व्यसवः पेतुः स्यंदनेभ्यो हतौजसः। चंडवातप्रभग्ना वा पर्वताग्रान्महीरुहाः। नाराचै

शानितीमस्त्राञ्छित्त्वा तवात्मजाः। कर्णस्य दयितं पुत्रं वृषसेनमवाकिरत्। ततो वृषरथो नाम भ्राता कर्णस्य विश्रुतः। ज या
नसीमेनाराच्छिन्नमप्यस्य द्धीद्दली। ततः समरथाः शूराः श्यामौला नांतवं भारत। निदस्यनीमोनाराचैः शतचंद्रमथ्पो यवु
तांश्चमर्षयं तोनि हतं शतचंद्रं महारथं। शकुनेर्भ्रातरो वीरा गजाह्वा शरभा विभुः। अनिकृत्य शरैस्तीक्ष्णैर्नीमासेन
म ताडयन्। सञ्छाद्यमानो नाराचैर्दृष्टिविनिवर्षन्। जघान पंच निर्बाणैः पंचैवानि रथान्बली। नान्हृष्ट्वान्निहता वीरा विचेलु
र्नृपसत्तमाः। ततो युधिष्ठिरः क्रुद्धस्तवानीकमशातयत्। मिषतः कुंभयोनेस्तु पुत्राणां तव चानघ। अंबष्ठान्मालवान्शूरा
स्त्रिगर्तान्सशिबीनपि। प्राहिणोन्मृत्युलोकाय क्रुद्धो युद्धे युधिष्ठिरः। अभीषाहान्शूरसेनान्बाह्लीकान्सवशातिकान्।
निकृत्य पृथिवीं राजा चक्रे शोणितकर्दमां। यौधेयान्केकराजन्यमद्रकान्गणान्युधि। प्राहिणोन्मृत्युलोकाय शूरा
न्बाणैर्युधिष्ठिरः। हताहरत गृह्णीत विध्यत व्यवकृंतत। इत्यासीत्तुमुलः शब्दो युधिष्ठिररथं प्रति। सैन्यानि द्रावयंतं तं द्रोणो
दृष्ट्वा युधिष्ठिरं। चोदितस्तव पुत्रेण सायकैरभ्यवाकिरत्। द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण पार्थिवं। विव्याध सोऽपि
तद्दिव्यमस्त्रमस्त्रेण जघ्निवान्। तस्मिन्विनिहते चास्त्रे भारद्वाजो युधिष्ठिरे। वारुणं याम्यमाग्नेयं त्वाष्ट्रं सावित्रमेव च
। चिक्षेप परमक्रुद्धो जिघांसुः पांडुनंदनं। क्षिप्तानि क्षिप्यमाणानि तानि चास्त्राणि धर्मजः। जघानास्त्रैर्महाबाहुः कुंभ

पार्थ युधिष्ठिरं। परिवव्रुस्ततो द्रोणं॥ ॥
योनेरवित्रसन्। सत्यां चिकीर्षमाणस्तु प्रतिज्ञां कुंभसंभवः। प्रादुश्चक्रेऽस्त्रमैंद्रं वै प्राजापत्यं च भारत। जिघांसुर्धर्म
तनयं तव पुत्रहिते रतः। पतिः कुरूणां गजसिंहगामी विशालवक्षाः पृथुलोहिताक्षः। प्रादुश्चकारास्त्रमहीनतेजा
माहेंद्रमन्यत्स जघान तेऽस्त्रे। विहन्यमानेष्वस्त्रेषु द्रोणः क्रोधसमन्वितः। युधिष्ठिरवधप्रेप्सुर्ब्राह्ममस्त्रमुदैरयत्।
ततो नाज्ञासिषं किंचिद्घोरेण तमसावृते। सर्वभूतानि च परं त्रासं जग्मुर्महीपते। ब्रह्मास्त्रमुद्यतं दृष्ट्वा कुंतीपुत्रो युधि
ष्ठिरः। ब्रह्मास्त्रेणैव राजेंद्र तदस्त्रं प्रत्यवारयत्। ततः सैनिकमुख्यास्ते प्रशशंसुर्नरर्षभौ। द्रोणपार्थौ महेष्वासौ स
र्वयुद्धविशारदौ। ततः प्रमुच्य कौंतेयं द्रोणो द्रुपदवाहिनीं। व्यधमत्क्रोधताम्राक्षो वायव्यास्त्रेण भारत। ते हन्यमाना
द्रोणेन पांचालाः प्राद्रवन्भयात्। पश्यतो भीमसेनस्य पार्थस्य च महात्मनः। ततः किरीटी भीमश्च सहसा संन्यवर्तता
। महद्भ्यां रथवंशाभ्यां परिगृह्य बलं तव। बीभत्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः। भारद्वाजं शरौघाभ्यां महद्भ्यामभ्य
वर्षतां। तौ तदा सृंजयाश्चैव पांचालाश्च महौजसः। अन्वगच्छन्महाराज मत्स्याश्च सह सात्वतैः। ततः सा भारती सेना
वध्यमाना किरीटिना। तमसा निद्रया चैव पुनरेव व्यदीर्यत। द्रोणेन वार्यमाणास्ते स्वयं तव सुतेन च न व्यवा

ना

द्रोण० महाराजयोभवारयिहुंतरः॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥उदीर्यमाणं तं दृष्ट्वा पांडवानां महद्बलं
।अविषह्यं च मन्वानः कर्णं दुर्योधनो ऽब्रवीत्॥ अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल। त्रायस्व समरे कर्ण सर्वान्यो
धान्महारथान्। पांचालैर्मत्स्यकैकेयैः पांडवैश्च महारथैः॥ वृतान्समंतात्संक्रुद्धैर्निःश्वसद्भिरिवोरगैः॥ एते नदंति संहृ
ष्टाः पांडवा जितकाशिनः। शक्रोपमाश्च बहवः पांचालानां रथव्रजाः॥ ॥कर्ण उवाच॥ ॥परित्रातुमिह प्राप्तो यदि पार्थं
पुरंदरः। तमप्याशु पराजित्य ततो हंतास्मि पांडवं॥ सत्यं ते प्रतिजानामि समाश्वसिहि भारत॥ हंतास्मि पांडुतनयान्पांचालांश्च स
मागतान्॥ जयं ते प्रतिजानामि वासवस्येव पावकिः। प्रियं तव मया कार्यमिति जीवामि पार्थिव॥ सर्वेषामेव पार्थानां फाल्गुनो ब
लवत्तरः। तस्यामोघां विमोक्ष्यामि शक्तिं शक्रविनिर्मितां। तस्मिन्हते महेष्वासे भ्रातरस्तस्य मानद। तव वश्या भविष्यंति व
नं यास्यंति वा पुनः॥ मयि जीवति कौरव्य विषादं मा कृथाः क्वचित्। अहं जेष्यामि समरे सहितान्सर्वपांडवान्॥ पांचाला ना
न्केकयांश्चैव वृष्णींश्चापि समागतान्॥ बाणौघैः शकलीकृत्य तव दास्यामि मेदिनीं॥ ॥संजय उवाच॥ एवं ब्रुवा
णं कर्णं तु कृपः शारद्वतो ऽब्रवीत्। स्मयन्निव महाबाहुः सूतपुत्रमिदं वचः॥ शोभनं शोभनं कर्ण सनाथः कुरुपुंगवः। त्वया २४७
नाथेन राधेय वचसा यदि सिध्यति॥ बहुशः कत्थसे कर्ण कौरवस्य समीपतः॥

विक्रमो न्यतो ऽधिकोऽस्ति किं बलमिव रसाधारणं सामर्थ्यं। तदेव स्वलिंगमनुवाप्य कुतावुसि काले। अहं व्यवसायद्वितीयः। उद्य

न तु ते विक्रमः कश्चिद्दृश्यते बलमेव वा। समागमः पांडुसुतैर्दृष्टस्ते बहुशो युधि। सर्वत्र निर्जितश्चासि पांडवैः सूतनंदन॥
ह्रियमाणे यदा कर्ण गंधर्वैर्धृतराष्ट्रजे। तदायुध्यंत सैन्यानि त्वमेकोग्रे पलायिथाः॥ विराटनगरे चापि समेताः सर्वकौरवाः। पा
र्थेन निर्जिता युद्धे त्वं च कर्ण सहानुजः॥ एकस्याप्यसमर्थस्त्वं फाल्गुनस्य रणाजिरे। कथमुत्सहसे जेतुं सकृष्णान्सह पांडवान्॥ अ
ब्रुवन्कर्ण युध्यस्व कत्थसे बहु सूतज। अकत्थित्वा विक्रमेद्यस्तद्वै सत्पुरुषव्रतं॥ गर्जित्वा सूतपुत्र त्वं शारदाभ्रमिवाजलं। नि
ष्फलो दृश्यसे कर्ण तच्च राजा न बुध्यते॥ तावद्गर्जसि राधेय यावत्पार्थं न पश्यसि। आरात्पार्थं हि ते दृष्ट्वा दुर्लभं गर्जितं भवेत्॥ त्व
मनासाद्य तान्बाणान्फाल्गुनस्य विगर्जसि। पार्थसायकविद्धस्य दुर्लभं गर्जितं भवेत्॥ बाहुभिः क्षत्रियाः शूरा वाग्भिः शूरा द्वि
जातयः॥ धनुषा फाल्गुनः शूरः कर्णः शूरो मनोरथैः॥ एवं संरोषितस्तेन तदा शारद्वतेन हि। कर्णः प्रहरतां श्रेष्ठः कृपं वाक्यम
थाब्रवीत्॥ शूरा गर्जंति सततं प्रावृषीव बलाहकाः। फलं चाशु प्रयच्छंति बीजमुप्तमृताविव॥ दोषमत्र न पश्यामि शूराणां रणमू
र्धनि। तत्तद्विकत्थमानानां भारं चोद्वहतां मृधे॥ यं भारं पुरुषो वोढुं मनसा हि व्यवस्यति। दैवमस्य ध्रुवं तत्र साहाय्यायोपपद्य
ते॥ व्यवसायद्वितीयो ऽहं मनसा भारमुद्वहन्। गर्जामि यद्यहं विप्र तव किं तत्र नश्यति॥ वृथा शूरा न गर्जंति सजला इव तोयदाः॥

ममात्र सहायः इत्येकं वाक्यं। सजला इव जलदा न शुष्काः। तोयदा इवेति उत्कानासः। शारदा इव तोयदा इति पाठे व्यतिरेकेणोदाह रणं॥

सामर्थ्यमात्मनो ज्ञात्वा ततो गर्जसि पांडवान्॥ मा वद स्वगिरो यत्नौ महितौ कृष्णपांडवौ॥ उत्सृज्य मनसा दृष्ट्वा ततो गर्जामि गोत
मा उग्र गर्जितस्यास्य फलं प्राप्स्यसि दुर्गते। दृष्ट्वा पांडुसुतानाजौ मा भैरवं प्रास्नेमदृष्टानां। युधिष्ठिराय दास्यामि श्रियं द
व कंटकां॥ ॥कृप उवाच॥ ॥मनोरथप्रलापा मे न ग्राह्यास्तव सूतज। यदा क्षिपसि वै कृष्णौ धर्मराजं च पांडवं। ध्रुवस्तत्र जयः क
र्ण यत्र युद्धविशारदौ। देवगंधर्वयक्षाणां मनुष्योरगरक्षसां। दंशितानामपि रणे अजेयौ कृष्णपांडवौ॥ ब्रह्मण्यः सत्यवाग्दा
न्तो गुरुदैवतपूजकः। नित्यं धर्मरतश्चैव कृतास्त्रश्च विशेषतः॥ धृतिमांश्च कृतज्ञश्च धर्मपुत्रो युधिष्ठिरः॥ भ्रातरश्चास्य बलिनः सर्वास्त्रे
षु कृतश्रमाः॥ गुरुवृत्तिरताः प्राज्ञा धर्मनित्या यशस्विनः॥ संबंधिनश्चेंद्रवीर्याः स्वनुरक्ताः प्रहारिणः॥ धृष्टद्युम्नः शिखंडी च दौ
र्मुखिर्जनमेजयः। चंद्रसेनो भद्रसेनः कीर्तिधर्मा ध्रुवो धरः। वसुचंद्रो दामचंद्रः सिंहचंद्रः सुवेधनः। द्रुपदस्य तथा पुत्रा द्रुप
दश्च महास्त्रवित्। येषामर्थाय संयत्तो मत्स्यराजः सहानुगः॥ सुदर्शनो गजानीकः श्रुतानीकः श्रुतध्वजः। बलानीको जयानी
को नायश्चैव रथवाहनः। चंद्रोदयः कामरथो विराटभ्रातरः शुभाः॥ यमौ च द्रौपदेयाश्च राक्षसश्च घटोत्कचः॥ येषामर्था
य युध्यंते न तेषां विद्यते क्षयः॥ कामं खलु जगत्सर्वं सदेवासुरमानवं॥ सयक्षराक्षसगणं सभूतभुजगद्विपं। निःशेषम
स्त्रवीर्येण कुर्वातां भीमफाल्गुनौ। युधिष्ठिरश्च पृथिवीं निर्दहेद्घोरचक्षुषा॥ अप्रमेयबलः शौरिर्येषामर्थाय दंशितः॥ २४८

कथं तान्संयुगे कर्ण जेतुमुत्सहसे परान्। महानपनयस्त्वेष तव नित्यं हि सूतज। यस्त्वमुत्सहसे योद्धुं समरे शौ
रिणा सह॥ ॥संजय उवाच॥ ॥एवमुक्तस्तु राधेयः प्रहसन्भरतर्षभ। अब्रवीच्च तदा कर्णो गुरुं शारद्वतं कृ
पं॥ सत्यमुक्तं त्वया ब्रह्मन्पांडवान्प्रति यद्वचः। एते चान्ये च बहवो गुणाः पांडुसुतेषु वै॥ अजय्याश्च रणे पार्था
देवैरपि सवासवैः। सदैत्ययक्षगंधर्वपिशाचोरगराक्षसैः॥ तथापि पार्थाञ्जेष्यामि शक्त्या वासवदत्तया।
ममह्यमोघा दत्तेयं शक्तिः शक्रेण वै द्विज। एतया निहनिष्यामि सव्यसाचिनमाहवे॥ हते तु पांडवे कृष्णो भ्रातर
श्चास्य सोदराः। अनर्जुना न शक्ष्यंति महीं भोक्तुं कथंचन॥ तेषु नष्टेषु सर्वेषु पृथिवीयं ससागरा। अयत्नात्कौरवे
ंद्रस्य वशस्था भविष्यति। सुनीतैरिह सर्वार्थाः सिध्यंते नात्र संशयः॥ एतमर्थमहं ज्ञात्वा ततो गर्जामि गौ
तम। त्वं तु वृद्धश्च विप्रश्च अशक्तश्चापि संयुगे। कृतस्नेहश्च पार्थेषु मोहान्मामवमन्यसे॥ यद्येवं वक्ष्यसे भूयो
ममाप्रियमिह द्विज। ततस्ते खड्गमुद्यम्य जिह्वां छेत्स्यामि दुर्मते॥ यच्चापि पांडवान्विप्र स्तोतुमिच्छसि संयुग
े भीषयन्सर्वसैन्यानि कौरवेयाणि दुर्मते। अत्रापि शृणु मे वाक्यं यथावद्वदतो द्विज। दुर्योधनश्च द्रोणश्च
सु शकुनिर्दुर्मुखो जयः। दुःशासनो वृषसेनो मद्रराजस्त्वमप्यथ। सोमदत्तश्च भूरिश्च तथा द्रौणिर्विविंशतिः॥

नरामात्रुषःसन्न॥

द्रोण० निष्टस्तु ईशिता यत्र सर्वे युद्धविशारदाः॥ जेये देवासुरैः कामं शक्रतुल्यबलो पि हि॥ द्रोणाद्युस्त्रिकृतास्त्वमपि बलि-
ष्ठवः॥ धर्मज्ञास्तु दृक्कुशला स्त्वद्युद्धशूरा न पि। एते स्थास्यति संग्रामे पांडवानां वधार्थिनः॥ जयमाकाम्माणाहि
कौरवेयस्य दंशिता॥ द्वैपायनमहेष्वासाम्य जयं तु बलिनामपि। एकभीष्मो महाबाहुः शांतनवशंतनावितः॥ विक-
र्णश्चित्रसेनस्तु बाह्लीकोथ जयद्रथः। भूरिश्रवा जयाश्चैव जलसंधः सुदक्षिणः॥ शलश्च रथिनां श्रेष्ठो भगदत्तश्च वी-
र्यवान्। एते चान्ये च राजानो देवैरपि सुदुर्जयाः॥ निहताः समरे शूराः पांडवैर्बलवत्तराः॥ किमन्यद्दैवसंयोगा-
न्मन्यसे पुरुषाधम। यांश्च तान्स्तौषि सततं दुर्योधनहिते द्विज॥ तेषामपि हताः शूराः शतशोथ सहस्रशः॥ क्षी-
यंते सर्वसैन्यानि कुरूणां पांडवैः सह॥ प्रभावं नात्र पश्यामि पांडवानां कथंचन॥ यांस्तान्बलवतो नित्यं मन्य-
से त्वं द्विजाधम॥ यतिष्ये हं यथाशक्ति योद्धुं तैः सह संयुगे॥ दुर्योधनहितार्थाय जयो दैवे प्रतिष्ठितः॥ ॥
इति द्रोण० पर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥तथा परुषितं दृष्ट्वा सूतपुत्रेण मातुलं। खड्गमुद्यम्य
वेगेन द्रौणिरभ्यपतद्द्रुतं॥ ततः परमसंक्रुद्धः सिंहो मत्तमिव द्विपं। प्रेक्षतः कुरुराजस्य समरे द्रव दमब्रवीत् २ २५७
॥ ॥अश्वत्थामोवाच॥ ॥यदर्जुनगुणांस्तथ्यान्कीर्तयानं नराधम। शूरद्वेषात्सुदुर्बुद्धे त्वं भर्त्सयसि मा-
तुलं।

कथं चिद्भुत्वदर्पं न गणयन्नित्यवयः॥ न

विकत्थमानः शौर्येण सर्वलोकधनुर्धरं। दर्पोत्सेकस्य दातार्हाकं च्छिनयन्युधि। कार्तवीर्य किवास्त्राणि ये य
च्यानिर्जित्य संयुगे॥ गांडीवधन्वा देवान्पश्यतास्त्रकपध्यां॥ यत्र साक्षान्महादेवो याधितः समरे हरः। तमिच्छसि
हंतुं राजन्सूताधम मनोरथैः॥ यं देवाश्च नसहितं सर्वे शस्त्रभृतां वरं॥ जेतुं न शक्ताः सहिताः सेंद्राश्चापि सुरासुरा
॥ लोकैकवीरमजितं तमर्जुनमहं न संयुगे॥ किं पुनस्त्वं सुदुर्बुद्धे सहैभिर्दैत्यधिपैः॥ कर्णपिशस्य दुर्बुद्धे तिष्ठेदा-
नीं नराधम। एष ते द्य शिरः कायादुद्धरामि सुदुर्मते॥ ॥संजय उवाच॥ ॥तमुद्यतं तेवेगेन राजा दुर्योधनः स्वयं॥
न्यवारयन्महाराज कृपश्च वदतां वरः॥ ॥कर्ण उवाच॥ ॥शूरोयं समरश्लाघी दुर्मतिश्च द्विजाधमः॥ आसादयतु म-
द्वीर्यं मुंचेमं कुरुसत्तम॥ ॥अश्वत्थामोवाच॥ तवैतत्क्षम्यते स्माभिः सूतात्मज सुदुर्मते। दर्पमुच्छ्रितमेतं ते फाल्गु-
नो नाशयिष्यति॥ दुर्योधन उवाच॥ ॥अश्वत्थामन्प्रसीदस्व क्षंतुमर्हसि मानद। कोपः खलु न कर्तव्यः सूतपुत्रे कथं-
चन॥ त्वयि कर्णे कृपे द्रोणे मद्रराजे ससौबले। महत्कार्यं समायत्तं प्रसीद द्विजसत्तम॥ एते ह्यभिमुखाः सर्वे राधेयेन यु-
युत्सवः॥ आयाति पांडवाः सर्वे समाह्वयंतः समंततः॥ ॥संजय उवाच॥ ॥प्रसाद्यमानस्तु तात राज्ञा द्रौणिर्महामनाः॥
प्रससाद महाराज क्रोधमन्युसमेवितः॥ ततः कृपः उवाचेदमाचार्यः सुमहामनाः॥ सौम्यस्वभावाद्राजेंद्र क्षिप्रमाग-

द्रोण० तमाह्वयः॥ ॥कृप उवाच॥ ॥तं विदित्वा तस्मात्रिःसृतास्म जत्सु उमीत। दर्प्पस्तु भि क्रमे तन्ने फाल्गुनो नाशयिष्य
ति॥ ॥संजय उवाच॥ ॥ततस्ते पांडवा राजन्पांचालाश्च यशस्विनि। आजग्मुः सहिताः कर्णं तर्जयंतः समंततः॥ क
र्णोपि रथिनां श्रेष्ठश्चापमुद्यम्य वीर्यवान्। कौरवैः परिवृतः शक्रो देवगणैरिव। पर्य्यतिष्ठत तेजस्वी स्व
बाहुबलमाश्रितः। ततः प्रववृते युद्धं कर्णस्य सह पांडवैः। संरब्धस्य महाराज सिंहनादविनादितं। ततस्ते पांडवा राज
न्पांचालाश्च यशस्विनः। दृष्ट्वा कर्णं महाबाहुमुच्चैः शब्दमथानदन्। अयं कर्णः कुतः कर्णस्तिष्ठ कर्ण महारणे। युध्यस्व स
हितोस्माभिर्दुरात्मन्पुरुषाधम। अन्ये तु दृष्ट्वा राधेयं क्रोधरक्तेक्षणा ब्रुवन्। हन्यतामयमुत्सिक्तः सूतपुत्रोल्पचेतनः। स
र्वैः पार्थिवशार्दूलैर्नानेनार्थोस्ति जीवता। अत्यंतवैरी पार्थानां सततं पापपूरुषः। एष मूलमनर्थानां दुर्योधनमते स्थि
तः। हतैनमिति जल्पंतः क्षत्रियाः समुपाद्रवन्। महता शरवर्षेण छादयंतो महारथाः। वधार्थं सूतपुत्रस्य पांडवेयेन चोदि
ताः। तांस्तु सर्वांस्तथा दृष्ट्वा धावमानान्महारथान्। न विव्यथे सूतपुत्रो न चत्रासमगत्तथा। दृष्ट्वा नगरकल्पं तमुद्धत
सैन्यसागरं। पितामहसमः शत्रूणां संग्रामेष्वपराजितः। सायकैर्नैर्बलवान्क्षिप्रकारी महाबलः। वारयामास
तत्सैन्यं समंताद्भरतर्षभ॥ ततस्तु शरवर्षेण पार्थिवास्तमवारयन्। धनूंषि ते विधु २५०

॥पिप्रीषुः प्रीतिमिच्छु॥ पिप्री

न्वानाः शतशोथ सहस्रशः। अयोधयंत राधेयं शक्रं दैत्यगणा इव। शरवर्षं तु तत्कर्णः पार्थिवैः समुदीरितं। शरव
र्षेण महता समंताद्व्यकिरत्प्रभो। तद्युद्धमभवत्तेषां कृतप्रतिकृतैषिणां। यथा देवासुरे युद्धे शक्रस्य सह दानवैः। तत्रा
द्भुतमपश्याम सूतपुत्रस्य लाघवं। यदेनं समरे यत्ता नाप्नुवंति परे युधि। निवार्य च शरौघांस्तान्पार्थिवानां महारथ
ः। युगेष्वीषासु छत्रेषु ध्वजेषु च हयेषु च। आत्मनामांकितान्बाणान्राधेयः प्राहिणोच्छितान्। ततस्ते व्याकुलीभूता
राजानः कर्णपीडिताः। बभ्रमुस्ते ततस्तत्र गावः शीतार्दिता इव। हयानां वध्यमानानां गजानां रथिनां तथा। तत्र तत्राभ्य
वेक्षाम संघान्कर्णेन ताडितान्। शिरोभिः पतितै राजन्बाहुभिश्च समंततः। आस्तीर्णा वसुधा सर्वा शूराणामनिवर्ति
नां। हतैर्हन्यमानैश्च निष्टनद्भिश्च सर्वतः। बभूवायोधनं रौद्रं वैवस्वतपुरोपमं। ततो दुर्योधनो राजा दृष्ट्वा क न॥
र्णस्य विक्रमं। अश्वत्थामानमासाद्य वाक्यमेतदुवाच ह। युध्यते सौ रणे कर्णो दंशितः सर्वपार्थिवैः। पश्यैतां द्रवतीं
सेनां कर्णसायकपीडितां। कार्त्तिकेयेन विध्वस्तामासुरीं पृतनामिव। दृष्ट्वैतां निर्जितां सेनां रणे कर्णेन धीमता। अ
निर भियातिष्ठ बीभत्सुः सूतपुत्रजिघांसया। तद्यथा पश्यमानानां सूतपुत्रं महारथं। न हन्यात्पांडवः संख्ये तथा नी
तिर्विधीयतां। ततो द्रौणिः कृपः शल्यो हार्दिक्यश्च महारथाः। प्रत्युद्ययुस्तदा पार्थं सूतपुत्रपरीप्सया। आयांतं वी

उत्तरमनंतरं कर्म॥

द्रोण ह्याकौंतेयं शक्रं दिव्यधनुर्मिवाप्रसुयद्धैर्नदा कर्णो यथा हतः सूतकं॥ ॥धृतराष्ट्र उवाच॥ ॥संरब्धं फाल्गु
नं दृष्ट्वा कालांतकयमोपमं। कर्णो वैकर्तनः सूतपुत्रः प्रत्युत् किमुत्तरं। सहस्पर्द्धेत पार्थेन नित्यमेव महारथः॥ आ
शंसति च बीभत्सुं युद्धे जेतुं सुदारुणं। स तं महारथोऽत्यंतं वैरिणं। कर्णो वैकर्तनः शूरः किमुत्तरमप
द्यत॥ ॥संजय उवाच॥ ॥आयांतं पांडवं दृष्ट्वा गजं प्रतिगजो यथा। असंभ्रांततरः कर्णः प्रत्युदीयाद्धनं
जयं। तमापतंतं वेगेन विकर्तनमजिह्मगैः। वारयामास तेजस्वी पांडवः शत्रुतापनः। तं कर्णः शरजालेन छा
दयामास भारत। विव्याध च सुसंक्रुद्धः शरैस्त्रिभिरजिह्मगैः। तस्य तल्लाघवं पार्थो नामृष्यत महाबलः। त
२ स्मै बाणान् शिलाधौतान् प्रसन्नाग्रानजिह्मगान्। प्राहिणोत्सूतपुत्राय त्रिंशतं शत्रुतापनः। विव्याध चैनं संर
ब्धो बाणेनैकेन वीर्यवान्। सव्ये भुजाग्रे बलवान्नाराचेन हसन्निव। तस्य विद्धस्य वेगेन कराच्चापं पपा
त ह। पुनरादाय तच्चापं निमेषार्द्धान्महाबलः। छादयामास बाणौघैः फाल्गुनं कृतहस्तवत्। शरवृष्टिं तु तां मु
क्तां सूतपुत्रेण भारत। व्यधमच्छरवर्षेण स्मयन्निव धनंजयः। तौ परस्परमासाद्य शरवर्षेण पार्थिव। छादयेतां २५१
महेष्वासौ कृतप्रतिकृतैषिणौ। तदद्भुतमभूद्युद्धं कर्णपांडवयोर्मृधे। क्रुद्धयोर्वाशिताहेतोर्वन्ययोर्गजयोरि

वातनः पार्थो महेष्वासो दृष्ट्वा कर्णस्य विक्रमं। मुष्टिदेशे धनुस्तस्य चिच्छेद त्वरयान्वितः। अश्वांश्च चतुरो भल्लैस्त
यद्यमसादनं। सारथेश्च शिरः कायाद् हरच्छत्रुतापनः। अथैनं छिन्नधन्वानं हताश्वं हतसारथिं। विव्याध सा
यकैः पार्थश्चतुर्भिः पांडुनंदनः। हताश्वात्तु रथात्तूर्णमवप्लुत्य नरर्षभः। आरुरोह रथं तूर्णं कृपस्य शरपीडितः॥
राधेये निर्जिते दृष्ट्वा तावका भरतर्षभ। धनंजयशरैर्भिन्नाः प्राद्रवंत दिशो दिशः। द्रवतस्तान् समालोक्य राजा दुर्यो
धनो नृप। निवर्त्तयामास तदा वाक्यं चेदमुवाच ह। अलं द्रुतेन वः शूरास्तिष्ठध्वं क्षत्रियर्षभाः। एष पार्थवधाय
हं स्वयं गच्छामि संयुगे। अहं पार्थान् हनिष्यामि सपांचालान् ससोमकान्। अद्य मे युध्यमानस्य सह गांडीवधन्वना।
द्रक्ष्यंति विक्रमं पार्थाः कालस्येव युगक्षये। अद्य मद्बाणजालानि विमुक्तानि सहस्रशः। द्रक्ष्यंति समरे योधाः श
लभानामिवायतीः। अद्य बाणमयं वर्षं सृजतो मम धन्विनः। जीमूतस्येव घर्मांते द्रक्ष्यंति युधि सैनिकाः। जेष्याम्य
द्य रणे पार्थं सायकैर्नतपर्वभिः। तिष्ठध्वं समरे शूरा भयं त्यजत फाल्गुनात्। न हि मद्वीर्यमासाद्य फाल्गुन
स्सहिष्यति। यथा वेलां समासाद्य सागरो मकरालयः। इत्युक्त्वा प्रययौ राजा सैन्येन महता वृतः। फाल्गु
नं प्रति दुर्द्धर्षः क्रोधात्संरक्तलोचनः। तं प्रयांतं महाबाहुं दृष्ट्वा शारद्वतस्तदा। अश्वत्थामानमासाद्य वा
क्यमेतदुवाच ह। एष राजा महाबाहुरमर्षी क्रोधमूर्च्छितः। पतंगवृत्तिमास्थाय फाल्गुनं योद्धुमिच्छति

सं२

द्रोण

यावन्नः पश्यमानानां प्राणान्पार्थेन संगताः।न हन्यात्पुरुषव्याघ्रस्तावद्धारय कौरवं।यावत्फाल्गुनबा
णानां गोचरं नाधिगच्छति।कौरवः पार्थिवो वीरस्तावद्धारय संयुगात्।यावत्पार्थेन निर्घोरैर्विमुक्तै रग
संचितैः।न नमस्क्रियते राजा तावद्युद्धं निवार्यतां।अपूकमिव पश्यामि तिष्ठस्व स्यामुमानद।स्वयं युध
यधाराजा पार्थीयात्सहायवान्।दुर्लभं जीवितं मन्ये कौरवस्य किरीटिना।युध्यमानस्य पार्थेन शार्दूले
नेव हस्तिना।मातुलेनेवमुक्तस्तु शिशिनः शास्त्रभृतां वरः।दुर्योधनमिदं वाक्यं त्वरितः समभाषत।मयि जी
वति गो धोरेन युद्धं गच्छ महीक्षितां मनादृत्य कौरव्य तव नित्यं हितैषिणं।न हि ते संभ्रमः कार्यः पार्थस्य
विजयं प्रति।अहमावारयिष्यामि पार्थं तिष्ठ सुयोधन॥ ॥दुर्योधन उवाच॥ ॥आचार्यः पांडुपुत्रांस्त्वं
पुत्रवत्परिरक्षति।त्वमप्युपेक्षां कुरुषे नित्यं तेषु हितो नमः।मम वा मंदभाग्यत्वान्मंदस्ते विक्रमो युधि।ध
र्मराजप्रियार्थं वा द्रोपद्या वा न विद्म तत्।धिगस्तु मम 'लुब्धस्य यत्कृते सर्वबांधवाः।सुखार्हाः परमं दुःखं
प्राप्नुवंत्यपराजिताः।को हि शस्त्रविदां मुख्यो महेश्वरसमो युधि।शत्रुं नोपेक्षते शक्तो यो न स्यात्तो तमीसुतः।अ २५२
प्रसन्नो मोन्त्प्रसीदस्व नाशयिता न मामाहितान्।तवाश्चगा वरेशक्ताः स्थातुं देवापि नानघ।पांचालान्सोमकांश्चैव जहि द्रो
ण सहानुगान्।वयं शेषान्हनिष्यामस्त्वयैव परिरक्षिताः।एते हि सोमका विप्र पांचालाश्च यशस्विनः।मम सेनेषु संक्रुध्य वि

छबा

चरंति द्रवाग्निवत्तान्वारय मंदो केकयांश्चैव नरोत्तम।पुराकुर्वंति निःशेषं रक्षमाणाः किरीटिना।अश्वत्थामंस्त्वरायुक्तो
या हि शीघ्रमरिंदम।आचार्यो वा यदि वा पश्चात्तवेदं कर्म मारिष।त्वमुत्पन्नो महाबाहो पांचालानां वधं प्रति।करिष्यति
जगत्सर्वमपांचालं किलाच्युतः।एवं सिद्धाब्रुवन्वाचो भविष्यति च तत्तथा।तस्मात्त्वं पुरुषव्याघ्र पांचालाञ्जहि सानुगा
न्।न ते स्त्रगावरेशक्ताः स्थातुं देवाः सवासवाः।किमु पार्थाः स पांचालाः सत्यमेतद्ब्रवीमि ते।संसमानं वा समर्थाः संग्रामे पांड
वाः सहसोमकैः।बलाद्योधयितुं वीर सत्यमेतद्ब्रवीमि ते।गच्छ गच्छ महाबाहो न नः कालात्ययो भवेत्।इयं हि द्रवते
सेना पार्थसायकताडिता।शक्तो ह्यसि महाबाहो दिव्येन त्वं तेजसा।निहंतुं पांडुपुत्राणां पांचालानां च मानद
॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥दुर्योधनेनैवमुक्तो द्रोणिराहवदुर्मदः।प्रत्युवाच महाबा
हुं त्वं पुनरिदं वचः।सत्यमेतन्महाबाहो यथा वदसि कौरव।प्रिया हि पांडवा नित्यं मम चापि पितुश्च मे।तथैवा
वां प्रियास्तेषां न तु युद्धे कुरूद्वह।शक्तितस्तात युध्याव त्यक्त्वा प्राणानभीतवत्।अहं कर्णश्च शल्यश्च कृपो हार्दिक्य
एव च।निमेषात्पांडवीं सेनां क्षययेम नृपोत्तम।ते चापि कौरवीं सेनां निमेषार्द्धात्कुरूद्वह।क्षययेयुर्महाबाहो न स्याम य तस्हा
दि संयुगे।युध्यतां पांडवान्शक्त्या तेषां चास्मान्सुयुत्सतां।तेजस्तेजः समासाद्य प्रशमं याति भारत।अशक्या तरसा जे

निर्वेदश्चेतसोस्मानिरुपायान्नावनाशयेः॥

द्रो॰ त्तुं पांडवानामनीकिनीं॥ जीवस्तु पांडुपुत्रेषु तद्धि सत्यं ब्रवीमि ते॥ आत्मार्थं युध्यमानास्ते समर्थाः पांडुनंदनाः॥ किम
र्थं तव सैन्यानि न हनिष्यंति मारिष॥ त्वं तु लुब्धतरो राजन्निकृतिज्ञश्च कौरव॥ सर्वाभिशंकी मानी च ततोस्मानभिशंक
से॥ अहं त्वद्य न मास्त्वाय त्वदर्थे त्यक्तजीवितः॥ एष गाबामि समरं मत्कृते कुरुसत्तम॥ योत्स्येहं शत्रुभिः सार्धं जे
ष्यामि च वरान्वरान्॥ पांचालैः सह योत्स्यामि सोमकैः केकयैस्तथा॥ पांडवेयैश्च संग्रामे त्वत्प्रियार्थमरिंदम
॥ अद्य मद्बाणनिर्दग्धाः पांचालाः सोमकास्तथा॥ सिंहेनेवार्दिता गावो विद्रविष्यंति सर्वशः॥ अद्य धर्मसुतो राजा
दृष्ट्वा मम पराक्रमं॥ अश्वत्थाममयं लोकं मंस्यते सहसोमकैः॥ आगमिष्यति निर्वेदं धर्मपुत्रो युधिष्ठिरः॥ दृष्ट्वा विनि
हतान्संख्ये पांचालान्सोमकैः सह॥ ये मां युद्धेभियोत्स्यंति तान्हनिष्यामि भारत॥ न हि ते वीर मोक्ष्यंते मद्बाह्वंतरमाग
ताः॥ एवमुक्त्वा महाबाहुः पुत्रं दुर्योधनं तव॥ अभ्यवर्तत युद्धाय द्रावयन्सर्वधन्विनः॥ चिकीर्षुस्तव पुत्राणां प्रियं
प्राणभृतां वरः॥ ततोब्रवीत्स कैकेयान्पांचालान्गौतमीसुतः॥ प्रहरध्वमितः सर्वे मम गात्रे महारथाः॥ स्थिरीभूता
श्च युध्यध्वं दर्शयंतोस्त्रलाघवं॥ एवमुक्तास्तु ते सर्वे शस्त्रवृष्टिमपातयन्॥ द्रौणिं प्रति महाराज जलं जलधरा इव॥ तान्नि २५३
हत्य शरान्द्रौणिर्दश वीरानपोथयत॥ प्रमुखे पांडुपुत्राणां धृष्टद्युम्नस्य ते प्रभो॥ ते हन्यमानाः समरे पांचालाः संजय

स्तथा॥ परित्यज्य रणे द्रौणिं व्यद्रवंत दिशो दिश॥ तान्दृष्ट्वा द्रवतः शूरान्पांचालान्सहसोमकान्॥ धृष्टद्युम्नो महारा
ज द्रौणिमभ्यद्रवद्युधि॥ ततः कांचनचित्राणां सजलांबुदनादिनां॥ वृतः शतेन शूराणां रथानामनिवर्तिनां॥ पुत्रः पंचा
लराजस्य धृष्टद्युम्नो महारथः॥ द्रौणिमित्यब्रवीद्वाक्यं दृष्ट्वा योधान्निपातितान्॥ आचार्यपुत्र दुर्बुद्धे किमन्यैर्निह
तैस्तव॥ समागच्छ मया सार्धं यदि शूरोसि संयुगे॥ अहं त्वां निहनिष्यामि तिष्ठेदानीं ममाग्रतः॥ ततस्तमाचार्यसुतं
धृष्टद्युम्नः प्रतापवान्॥ मर्मभिद्भिः शरैस्तीक्ष्णैर्जघान भरतर्षभ॥ ते तु पंक्तीकृता द्रौणिं शरा विविशुराशुगाः॥ रु
क्मपुंखाः प्रसन्नाग्राः सर्वकायावदारणाः॥ मधुलिप्सव उद्दामा भ्रमराः पुष्पितं द्रुमं॥ सोतिविद्धो भृशं क्रुद्धः पदा
क्रांत इवोरगः॥ मानी द्रौणिरसंभ्रांतो बाणपाणिरभाषत॥ धृष्टद्युम्न स्थिरो भूत्वा मुहूर्तं प्रतिपालय॥ यावत्त्वां
निशितैर्बाणैः प्रेषयामि यमक्षयं॥ द्रौणिरेवमथाभाष्य पार्षतं परवीरहा॥ छादयामास बाणौघैः समंताल्ल
घुहस्तवत्॥ स छाद्यमानः समरे द्रौणिना युद्धदुर्मदः॥ द्रौणिं पांचालतनयो वाग्भिरातर्जयत्तदा॥ न जानीषे प्रति
ज्ञां मे विप्रोत्पत्तिं तथैव च॥ द्रोणं हत्वा किल मया हंतव्यस्त्वं सुदुर्मते॥ ततस्त्वाहं न हन्म्यद्य द्रोणे जीवति संयुगे॥
इमां तु रजनीं प्राप्तामप्रभातां सुदुर्मते॥ निहत्य पितरं तेद्य ततस्त्वामपि संयुगे॥ नेष्यामि मृत्युलोकायैवं तन्मे

णाणएवद्यूतेपणोधृतंयत्र।वार्तिकाःवार्त्तावहाः।सुहृत्सूपकारं।सारथिःसहायःपाश्चुरक्त इतियावत्॥

द्रो० मनसिस्थितं।यस्तेपार्थेषुविद्वेषोयाभक्तिःकौरवेषुवा।तांदर्शयस्थिरोभूत्वानमेजीवन्विमोक्ष्यसे।योहिब्राह्म
णउत्सृज्यस्वकंक्षत्रधर्मेरतोद्विजः।सवध्यःसर्वलोकस्ययथात्वंपुरुषाधम।इत्युक्तःपरुषंवाक्यंपार्षतेनद्विजोत्तम
ःक्रोधमाहारयत्तीव्रंतिष्ठतिष्ठेतिचाब्रवीत्।निर्दहन्निवचक्षुर्भ्यांपार्षतंसोऽभ्यवेक्षत।छादयामासचशरैर्नि
श्वसन्पन्नगोयथा।सछाद्यमानःसमरेद्रौणिनाराजसत्तम।सर्वपांचालसेनानीःसंहृष्टोरथसत्तमः।नाकंपतम
हाबाहुःस्ववीर्यंसमुपाश्रितः।सायकांश्चविविधानस्थाचाक्षिप्रमोचह।तौसुतःसन्यवर्त्तेतांप्राणद्यूतपरे
रणे।निपीडयंतौबाणौघैःपरस्परममर्षिणौ।उत्सृजंतौमहेष्वासौशरवृष्टीःसमंततः।द्रौणिपार्षतयोर्युद्धं
घोररूपंभयानकं।दृष्ट्वासंपूजयामासुःसिद्धचारणवार्तिकाः।शरौघैःपूरयंतौतावाकाशंप्रदिशस्तथा।अ
लक्ष्यौसमयुध्येतांमहत्कृत्वाशरैस्तमः।नृत्यमानाविवरणेमंडलीकृतकार्मुकौ।परस्परवधेयत्तौपरस्परव
धैषिणौ।अयुध्येतांमहाबाहूचित्रंलघुचसुष्ठुच।संपूज्यमानौसमरेयोधमुख्यैःसहस्रशः।तौप्रवृद्धौरणे
दृष्ट्वावनेवन्यौगजाविव।तयोःसेनयोर्हर्षस्तुमुलःसमपद्यत।सिंहनादरवाश्चासन्दध्मुःशंखांश्चसर्वशोमारि २५४
ष।वादित्राण्यभ्यवाद्यंततत्रातत्रैवसहस्रशः।तस्मिंस्तुतुमुलेयुद्धेभीरूणांभयवर्द्धने।मुहूर्त्तमिवतद्युद्धंसमरू
पंतदाभवत्।ततोद्रौणिर्महाराजपार्षतस्यमहात्मनः।ध्वजंधनुस्तथाछत्रमुभौचपार्ष्णिसारथी।सूतमश्वांश्चचतुरो

२

निहत्याभ्यद्रवद्रणे।पांचालांश्चैवतान्सर्वान्बाणैःसन्नतपर्वभिः।व्यद्रावयदमेयात्माशतशोऽथसहस्रशः।ततस्तु
विव्यथेसेनापांडवीभरतर्षभ।दृष्ट्वाद्रौणेर्महत्कर्मवासवस्येवसंयुगे।शतेनचशतंहत्वापांचालानांमहारथः।त्रिभि
स्तुनिशितैर्बाणैर्हत्वात्रीन्वैमहारथान्।द्रौणिर्द्रुपदपुत्रस्यफाल्गुनस्यचपश्यतः।नाशयामाससपांचालान्भूयिष्ठं
येव्यवस्थिताः।तेवध्यमानाःपांचालाःसमरेसहसृंजयाः।अगच्छन्भग्नद्रौणिमुत्सृज्यविप्रकीर्णरथध्वजाः।सजि
त्वासमरेशत्रून्द्रोणपुत्रोमहारथः।ननादसुमहानादंतपांतेजलदोयथा।सनिहत्यबहून्शूरानश्वत्थामाव्यरो
चत।युगांतेसर्वभूतानिभस्मकृत्वेवपावकः।संपूज्यमानोयुधिकौरवेयैर्विजित्यसंख्येरिगणान्सहस्रशः।व्यरोचतद्रोण
सुतःप्रतापवान्यथासुरेंद्रोरिगणान्निहत्यवै॥ ॥७५ इतिद्रोणपर्वणिरात्रियुद्धे॥ ॥संजयउवाच॥ ॥ततोयुधिष्ठिर
श्चभीमसेनश्चपांडवः।द्रोणपुत्रंमहाराजसमंतात्पर्यवारयत्।ततोदुर्योधनोराजाभारद्वाजेनसंवृतः।अभ्य
यात्पांडवान्संख्येततोयुद्धमवर्त्तत।घोररूपंमहाराजभीरूणांभयवर्द्धनं।अंबष्ठान्मालवान्वंगान्शिबींस्त्रैगर्त्त
कानपि।प्राहिणोन्मृत्युलोकायगणान्क्रुद्धोयुधिष्ठिरः।अभीषाहान्शूरसेनान्क्षत्रियान्युद्धदुर्मदान्।निकृत्य
पृथिवींचक्रेभीमःशोणितकर्दमां।यौधेयारट्टराजन्यान्मद्रकान्मालवानपि।प्राहिणोन्मृत्युलोकायकिरीटीनि

दुरत्ययोऽतिक्रमः॥

द्रोण क्षितिः शरैः॥ प्रगाढमंजोगतिभिर्नाराचैरमितौजसा॥ निपेतुर्द्विरदा भूमौ द्विशृंगा इव पर्वताः॥ निरुविर्दस्थिद
लैश्च तलमालिनि रिनस्ततः॥ रराज नष्ठधाकीर्णा विसर्पद्भिरिवोरगैः॥ छिन्नैः कनकचित्रैश्च छत्रैः क्षितिर्बभौ
द्यौरिवादित्यचंद्राद्यैर्ग्रहैः कीर्णा युगक्षये॥ हत प्रहरता भीता विध्यत व्यवकृंतत॥ इत्यासीत्सुमहान्छब्दः शोणाश्व
स्य रथं प्रति॥ द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण संयुगे॥ व्यधमत्तान्महावायुर्मेघानिव दुरत्ययः॥ ते हन्यमाना द्रोणे
न पांचालाः प्राद्रवन्भयातुराः॥ ततः किरीटी भीमश्च सहसा सन्यवर्तताम्॥ महता रथवंशेन परिगृह्य बलं तव॥ बीभत्सु
र्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः॥ भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम्॥ तौ तदा सृंजयाश्चैव पांचालाश्च म
हौजसः॥ अन्वगच्छन्महाराज मत्स्याश्च सह सोमकैः॥ तथैव तव पुत्रस्य रथोदाराः प्रहारिणः॥ महत्या सेनया सा
र्द्धं जग्मुर्द्रोणरथं प्रति॥ ततः सा भारती सेना वध्यमाना किरीटिना॥ तमसा निद्रया चैव पुनरेव व्यदीर्यत॥ द्रोणेन
वार्यमाणास्तु स्वयं तव सुतेन च॥ न शक्यंते महाराज योधा वारयितुं तदा॥ सा पांडुपुत्रस्य शरैर्दार्यमाणा महाचमूः॥
तमसा संवृते लोके व्यद्रवत्सर्वतोमुखी॥ उत्सृज्य शतशो वाहांस्तत्र केचिन्नराधिपाः॥ प्राद्रवंत महाराज भयाविष्टाः समं २५५
ततः॥ ॥ इति द्रोणपर्वणि रात्रियुद्धे॥ ॥ संजय उवाच॥ ॥ सोमदत्तं तु संप्रेक्ष्य विधुन्वानं महद्धनुः॥ सात्यकिः प्राह यंतारं

बाह्लीकं बाह्लीकपुत्रं॥ स

सोमदत्ताय मां वह॥ न ह्यहत्वा रणे शत्रुं बाह्लीकं कौरवाधमं॥ निवर्तिष्ये रणात्सूत सत्यमेतद्वचो मम॥ ततः संप्रैष
यद्यंता सैंधवांस्तान्मनोजवान्॥ तुरगाञ्छंखवर्णाभान्सर्वशब्दातिगान्रणे॥ तेऽवहन्युयुधानं तु मनोमारुतरंहसः॥ यथेंद्र
हरयो राजन्पुरा दैत्यवधोद्यतं॥ तमापतंतं संप्रेक्ष्य सात्वतं रभसं रणे॥ सोमदत्तो महाबाहुरसंभ्रांतोऽभ्यवर्तत॥ वि
मुंचञ्छरवर्षाणि पर्जन्य इव वृष्टिमान्॥ छादयामास शैनेयं जलदो भास्करं यथा॥ असंभ्रांतश्च समरे सात्यकिः
कुरुपुंगवं॥ छादयामास बाणौघैः समंताद्भरतर्षभ॥ सोमदत्तस्तु तं षष्ट्या विव्याधोरसि माधवं॥ सात्यकिश्चापि
तं राजन्नविध्यत्सायकैः शितैः॥ तावन्योन्यं शरैः कृत्तौ व्यराजेतां नरर्षभौ॥ सुपुष्पौ पुष्पसमये पुष्पिताववि
व किंशुकौ॥ रुधिरोक्षितसर्वांगौ कुरुवृष्णियशस्करौ॥ परस्परमवेक्षेतां दहंताविव लोचनैः॥ रथमंडलमार्गेषु
चरंतावरिमर्दनौ॥ घोररूपौ हि तावास्तां वृष्टिमंताविवांबुदौ॥ शरसंभिन्नगात्रौ तौ सर्वतः शकलीकृतौ
॥ श्वाविधाविव राजेंद्र दृश्येतां शरविक्षतौ॥ सुवर्णपुंखैरिषुभिराचितौ तौ व्यराजतां॥ खद्योतैरावृतौ राजन्प्रा
वृषीव वनस्पती॥ संप्रदीपितसर्वांगौ सायकैस्तौ महारथौ॥ अदृश्येतां रणे क्रुद्धावुल्काभिरिव कुंजरौ॥ ततो युधि महा
राज सोमदत्तो महारथः॥ अर्धचंद्रेण चिच्छेद माधवस्य महद्धनुः॥ अथैनं पंचविंशत्या सायकानां समार्पयत्॥ त्वरमाण

त्वराकालेतुनवस्यदशभिःशरैः।अथान्यद्धनुरादायसात्यकिर्वीर्यवत्तरं।पंचभिःसायकैस्तूर्णंसोमदत्तमविध्य
त।ततोपरेणभल्लेनधनुश्चिच्छेदकांचनं।बाह्लिकस्यरणेराजन्सात्यकिःप्रहसन्निव।सोमदत्तस्त्वसंभ्रांतोदृष्ट्वाकेतुंनि
पातितं।शिनेयंपंचविंशत्यासायकानांसमाचिनोत्।सात्वतोपिरणेक्रुद्धःसोमदत्तस्यधन्विनः।धनुश्चिच्छेदसमरेक्षु
रप्रेणशितेनवा।अथैनंरुक्मपुंखानांशतेननतपर्वणां।आचिनोद्बहुधाराजन्भग्नदंष्ट्रमिवद्विपं।अथान्यद्ध
नुरादायसोमदत्तोमहारथः।सात्यकिंछादयामासशरवृष्ट्यामहाबलः।सोमदत्तंतुसंक्रुद्धोरणेविव्याधसायकैः
।सात्यकिंशरजालेनसोमदत्तोप्यपीडयत्।दशभिःसात्वतस्यार्थेभीमोहत्वाबाह्लिकात्मजं।सोमदत्तोप्यसंभ्रांतःशैने
यमवधीच्छरैः।ततस्तुसात्वतस्यार्थेभीमसेनोनवंदृढं।मुमोचपरिघंघोरंसोमदत्तस्यवक्षसि।तमापतंतंवेगेनपरि
घंघोरदर्शनं।द्विधाचिच्छेदसमरेप्रहसन्निवकौरवः।सपपातद्विधाछिन्नआयसःपरिघोमहान्।महीधरस्येवम
हच्छिखरंवज्रदारितं।ततस्तुसात्यकीराजन्सोमदत्तस्यसंयुगे।धनुश्चिच्छेदभल्लेनहस्तावापंचपंचभिः।चतुर्भि
श्चततस्तूर्णंचतुरस्तुरगान्रथात्।समीपंप्रेषयामासप्रेतराजस्यभारत।सारथेश्चशिरःकायाद्भल्लेनानतप २५६
र्वणा।जहारनरशार्दूलःप्रहसन्छिनिपुंगवः।ततःशरंमहाघोरंज्वलंतमिवपावकं।मुमोचसात्वतोराजन्स्व

म

र्णपुंखंशिलाशितं।सविमुक्तोबलवताशैनेयेनशरोत्तमः।घोरस्तस्योरसिविभोनिपपाताशुभारत।सोतिविद्धो
महाराजसात्वतेनमहारथः।सोमदत्तोमहाबाहुर्निपपातममारच।तंदृष्ट्वानिहतंतत्रसोमदत्तंमहारथाः।मह
ताशरवर्षेणयुयुधानंसमुपाद्रवन्।छाद्यमानंशरैर्दृष्ट्वायुयुधानंयुधिष्ठिरः।महत्यासेनयासार्धंद्रोणानीक
मुपाद्रवत्।ततोयुधिष्ठिरःक्रुद्धस्तावकानांमहद्बलं।शरैर्विद्रावयामासभारद्वाजस्यपश्यतः।सैन्यानिद्र
वयंतंतुदृष्ट्वाद्रोणोयुधिष्ठिरं।अभिदुद्राववेगेनक्रोधसंरक्तलोचनः।ततःसुनिशितैर्बाणैःपार्थंविव्या
धसप्तभिः।युधिष्ठिरोपिसंक्रुद्धःप्रतिविव्याधपंचभिः।सोतिविद्धोमहाबाहुःसृक्कणीपरिसंलिहन्।
युधिष्ठिरस्यचिच्छेदध्वजंकार्मुकमेवच।सच्छिन्नधन्वात्वरितस्त्वराकालेनृपोत्तमः।अन्यदादत्तवेगेनका
र्मुकंसमरेदृढं।ततःशरसहस्रेणद्रोणंविव्याधपार्थिवः।साश्वसूतध्वजरथंतदद्भुतमिवाभवत्।ततोमु
हूर्तंव्यथितःशरपातप्रपीडितः।निषसादरथोपस्थेद्रोणोभरतसत्तम।प्रतिलभ्यततःसंज्ञांमुहूर्ताद्द्विजसत्तम
ःक्रोधेनमहताविष्टोवायव्यास्त्रमवासृजत्।असंभ्रांततदापार्थोधनुराकृष्यवीर्यवान्।तदस्त्रमस्त्रेणरणेस्तं
भयामासभारत।ततोब्रवीद्वासुदेवःकुंतीपुत्रंयुधिष्ठिरं।युधिष्ठिरमहाबाहोयत्त्वांवक्ष्यामितच्छृणु।उपार

अनुमानेनलिंगदर्शनेन।संज्ञाभिःसंकेतैः॥

द्रोण मत्स्वस्रीयद्रोणाद्गुरुतस्तु मा राध्यते हि सदा द्रोणो ग्रहणं तव संयुगे। नानुरूपमहं मन्ये गुरुमस्य त्वया सह। यो
स्य सृष्टो विनाशाय स एनं श्वो हनिष्यति। परिवर्ज्य गुरुं याहि यत्र राजा सुयोधनः॥ राजा राजा हि योद्धव्यो नारा
ज्ञा युद्धमिष्यते। नीमस्वरथशार्दूलो युध्यते कौरवैः सह। वासुदेववचः श्रुत्वा धर्मराजो युधिष्ठिरः। मुहूर्तं
चिंतयित्वा तु ततो दारुणमाहवं। प्रायाद्द्रुतममित्रघ्नो यत्र भीमो व्यवस्थितः॥ विनिघ्नंस्तावकान्योधान्व्यादिता
स्य इवांतकः। रथघोषेण महता नादयन्वसुधातलं। पर्जन्य इव धर्मांते नादयन्विदिशो दश। भीमस्य निघ्नतः
शत्रून्पार्ष्णिं जग्राह पांडवः। द्रोणोपि पांडुपांचालान्व्यधमद्रजनीमुखे॥ ॥इति द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय
उवाच॥ ॥वर्तमाने तथा युद्धे घोररूपे भयावहे। तमसा संवृते लोके रजसा च महीपते। नापश्यंत रणे योधा
ना॥ :परस्परमवस्थिताः। अनुमानेन संज्ञाभिर्युद्धं तद्ववृते महत्। नरनागाश्वमथनं परमं लोमहर्षणं। द्रोणकर्णकृ
पा वीरा भीमपार्षतसात्यकाः। अन्योन्यं क्षोभयामासुः सैन्यानि नृपसत्तम। वध्यमानानि सैन्यानि समंतात्तैर्महार
थैः। रजसा तमसा चैव समंताद्विप्रदुद्रुवुः। ते सर्वतो विद्रवंतो योधा वित्रस्तचेतनाः। अहन्यंत महाराज धावमाना २५१
श्च संयुगे। महारथसहस्राणि जघ्नुरन्योन्यमाहवे। अंधे तमसि मूढानि पुत्रस्य तव मंत्रितैः। ततः सर्वाणि सैन्यानि

नघ्नते पश्यात।अमरणैः आस्थेय अतिमहार्थे तृतीया। दद्रुवुरिति कर्मापि परस्मैपदं। विक्रमीता गतागतं कुर्वाणाः॥ इति

सेनागोप्ताश्च भारत। व्ययुध्यंत रणे तत्र तमसा संवृते सति॥ ॥धृतराष्ट्र उवाच॥ ॥तेषां संलोड्यमानानां पांडवैर्निहतौजसां। अंधे तम के
सि मग्नानामासीत्का वो मतिस्तदा। कथं प्रकाशस्तेषां वा मम सैन्यस्य वा पुनः। बभूव लोके तमसा संवृते शंस संजय॥ ॥संजय उवाच॥
ततः सर्वाणि सैन्यानि हतशिष्टानि यानि वै। सेनागोप्तॄनथादिश्य पुनर्व्यूहमकल्पयत्। द्रोणः पुरस्ताज्जघने तु शल्यस्तथा द्रौणि
र्पार्श्वतः सौबलश्च। स्वयं तु सर्वाणि बलानि राजन्राजाभ्ययाद्गोपयन्वै निशायां। उवाच च सर्वांश्च पदातिसंघान्दुर्योधनः
पार्थिवसांत्वपूर्वं। उत्सृज्य सर्वे परमायुधानि गृह्णीत हस्तैर्ज्वलितान्प्रदीपान्। ते चोदिताः पार्थिवसत्तमेन ततः प्रहृ
ष्टा जगृहुः प्रदीपान्। सा भूय एव ध्वजिनी विभक्ता व्यरोचताग्निप्रभया निशायां। महाधनैराभरणैश्च दिव्यैः श
स्त्रैः प्रदीप्तैरभिसंपतद्भिः। क्षणेन सर्वे विहिताः प्रदीपाः प्रादीपयंश्च ध्वजिनीं तवाशु। सर्वास्तु सेना व्यतिसेव्यमाना
रा :पदातिभिः पावकतैलहस्तैः। प्रकाशमाना ददृशुर्निशायां यथांतरिक्षे जलदास्तडिद्भिः। प्रकाशितायां तु ततो ध्व व३
जिन्यां द्रोणोग्निकल्पः प्रतपन्समंतात्। रराज राजेंद्र सुवर्णवर्मा मध्यंगतः सूर्य इवांशुमाली। जांबूनदेष्वाभरणेषु चैव
वतिष्कमुख्येषु शरासनेषु। पीतेषु शस्त्रेषु च पावकस्य प्रतिप्रभास्तत्र ततो बभूवुः। गदाश्च शैक्याः परिघाश्च शुभ्रा
रथेषु शक्त्यश्च विवर्तमानाः। प्रतिप्रभा रश्मिभिराजमीढ पुनः पुनः संजनयंति दीपान्। छत्राणि बालव्यजनानि

प्रभारश्मिभिः प्रतिबिंबितैस्तेजोभिः संजनयंति निवर्तयंति॥

वीतैरवधूतान्युत्क्षिप्तानि परिपार्श्वगजादीनां दक्षिणवामेषु प्रदीप्तमस्त्रादिप्रभयोर्दीप्तं ॥ तेन बलेन राजाद्दिता प्रदी
द्रोण प्तवज्ञादीप्तामहोल्काश्च तथैव राजन्‌ । व्याघूर्णमानास्तु सुवर्णतैला व्यायच्छतां तत्र तदा विरेजुः ॥ अस्त्रप्रभाभिश्च विराज
मानं दीपप्रभाभिश्च तदा बलं तत्‌ । प्रकाशितं चाभरणप्रभाभिर्भृशं प्रकाशं नृपते बभूव ॥ पीतानि शस्त्राण्यसृगुक्षितानि
वीरावधूतानि तनुच्छदानि । दीप्तां प्रभां प्राजनयंत तत्र तपात्यये विद्युदिवांतरिक्षे ॥ प्रकंपितानामभिघातवेगैरभि
घ्नतां चापततां जवेन । वक्त्राण्यपकाशंत तदा नराणां वाय्वीरितानीव महांबुजानि ॥ महावने दाव इव प्रदीप्ते यथा प्र
भा भास्करस्यैव नश्येत्‌ तथा । तथा तदासीद्ध्वजिनी प्रदीप्ता महाभया भारत भीमरूपा ॥ तत्संप्रदीप्तं बलमस्मदीयं निशाम्य
पार्थास्त्वरितास्तथैव । सर्वेषु सैन्येषु पदातिसंघानचोदयंस्ते च चक्रुः प्रदीपान्‌ ॥ गजे गजे सप्त कृताः प्रदीपा रथे
रथे चैव दश प्रदीपाः । द्वावश्वपृष्ठे परिपार्श्वतोऽन्ये ध्वजेषु चान्ये जघनेषु चान्ये ॥ सेनासु सर्वासु च पार्श्वतोऽन्ये पश्चा
त्पुरस्ताच्च समंततश्च । मध्ये तथान्ये ज्वलिताग्निहस्ता व्यदीपयन्‌ पांडुसुतस्य सेनां ॥ मध्ये तथान्ये ज्वलिताग्निह
स्ताः सेनाद्वयेऽपि स्म नरा विचेरुः ॥ सर्वेषु सैन्येषु पदातिसंघा व्यामिश्रिता हस्तिरथाश्ववृंदैः ॥ व्यदीपयंस्ते ध्वजि
नीं प्रदीप्तां तथा बलं पांडवेयाभिगुप्तं ॥ तेन प्रदीप्तेन तथा प्रदीप्तं बलं तवासीद्बलवद्बलेन ॥ भाः कुर्वता भानुमता २५६
ग्रहेण दिवाकरेणाग्निरिवाभितप्तः ॥ तयोः प्रभाः पृथिवीमंतरिक्षं सर्वा व्यतिक्रम्य दिशश्च वृद्धाः ॥ तेन प्रकाशेन भृ

तेन प्रदीपशालिना बलेन चतुरंगं बलवदत्यर्थं प्रदीप्तं प्रकाशितमासीदित्यन्वयः ॥ अभितप्त उद्दीपितः ॥ तयोः सेनयोः

दिव्यकल्पमद्भुतोपमं । रथ्यादिनाकुलिहीप्तिहीनं । आकुलेति चंडवातविशेषणं ॥

शं प्रकाशं बभूव तेषां तव चैव सैन्यं ॥ तेन प्रकाशेन दिवंगमेन संबोधिता देवगणाश्च राजन्‌ । गंधर्वयक्षासुरसि
द्धसंघाः समागमन्नप्सरसश्च सर्वाः ॥ तद्देवगंधर्वसमाकुलं च यक्षासुरेंद्राप्सरसां गणैश्च । हतैश्च शूरैर्दिवमारुहद्भि
रायोधनं दिव्यकल्पं बभूव ॥ रथाश्वनागाकुलमुद्दीपदीप्तं संरब्धयोधाहतविद्रुताश्वं । महद्बलं व्यूढरथाश्वना
गं सुरासुरव्यूहसमं बभूव ॥ तच्छक्तिसंघाकुलचंडवातं महारथाभ्रं गजवाजिघोषं । शस्त्रौघवर्षं रुधिरांबुधारं नि
शि प्रवृत्तं रणदुर्दिनं तत्‌ ॥ तस्मिन्महाग्निप्रतिमो महात्मा संतापयन्‌ पांडवान्विप्रमुख्यः । गभस्तिभिर्मध्यगतो यथार्को
वर्षात्यये तद्वदभून्नरेंद्र ॥ ॥ द्रोणपर्वणि रात्रियुद्धे ॥ ॥ संजय उवाच ॥ ॥ प्रकाशिते तदा लोके रजसा तमसा
वृते । समाजग्मुरथो वीराः परस्परवधैषिणः ॥ ते समेत्य रणे राजन्‌ शस्त्रप्रासासिधारिणः । परस्परमुदैक्षंत पर
स्परकृतागसः ॥ प्रदीपानां सहस्रैश्च दीप्यमानैः समंततः । विरराज तदा भूमिर्द्युर्ग्रहैरिव भारत ॥ उल्काशतैः
प्रज्वलितै रणभूमिर्व्यराजत । दह्यमानेव लोकानामभावे वै वसुंधरा ॥ प्रादीप्यंत दिशः सर्वाः प्रदीपैस्तैः समं
ततः । वर्षाप्रदोषे खद्योतैर्वृता वृक्षा इवाबभुः ॥ असज्जंत ततो वीरा वीरेष्वेव पृथक्‌ पृथक्‌ । नागा नागैः
समाजग्मुस्तुरगाः सह वाजिभिः ॥ रथा रथवरैरेव समाजग्मुर्मुदान्विताः । तस्मिन्रात्रिमुखे घोरे तव पुत्रस्य शास

महाबाकुंनाम्ना।९

द्रोण नात्।ततोऽर्जुनो महाराज कौरवाणामनीकिनीं॥व्यधमत्त्वरयायुक्तः कृपयन्सर्वपार्थिवान्॥ ॥धृतराष्ट्रउवा
च॥ ॥तस्मिन्प्रविष्टे संरब्धे मम पुत्रस्य वाहिनीं॥ अमर्षमाणे दुर्धर्षे किं यमासीन्मनो हि वः॥ किमकुर्वंत सैन्यानि प्रवि
ष्टे तत्र वा हते॥ दुर्योधनस्य किं कृत्यं प्राप्तकालममन्यत॥ द्रोणस्य पुरतः के वै युयुधानस्य धीमतः॥ के रक्षन्दक्षिणं च
क्रं के वा द्रोणस्य सव्यतः॥ के पृष्ठतः सव्यसाचिनो वीरा वीराग्निविनिघ्नतः॥ के पुरस्तादगच्छंत निघ्नतः शात्रवान्रणे॥ यस्ता
विशन्महेष्वासः पांचालानपराजितः॥ नृत्यन्निव नरव्याघ्रो रथमार्गेषु वीर्यवान्॥ यो ददाह शरैर्द्रोणः पंचालानां र
थव्रजान्॥ धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान्॥ अव्यग्रानेव तु परान्कथयस्यपराजितान्॥ हृष्टानुदीर्णा
ंस्तथा मेन तथास्ते तु मामकान्॥ हतांश्चैव विदीर्णांश्च विप्रकीर्णांश्च संससि रथिनो विरथांश्चैव कृतान्युद्धेषु मामका
न्॥ ॥संजय उवाच॥ ॥द्रोणस्य मतमाज्ञाय योद्धुकामस्य तां निशां॥ दुर्योधनो महाराज वश्यान्भ्रातॄनुवाच ह॥ कर्ण
वृषसेनं च मद्रराजं च कौरवान् दुर्धर्षं दीर्घबाहुं च ये च तेषां पदानुगाः॥ द्रोणायत्ताः पराक्रांताः सर्वे रक्षंतु पृष्ठतः॥ हा
र्दिक्यो दक्षिणं चक्रं शल्यश्चैवोत्तरं तथा॥ त्रिगर्ताश्च रथश्रेष्ठा हतशिष्टा महारथाः॥ द्रोणं रक्षंतु पांचाल्याद्धृष्टद्यु २५९
म्नान्महारथात्॥ पांडवेयेषु सैन्येषु तं तथा पश्यामि कं च न यो योधयेद्रणे द्रोणं धृष्टद्युम्नादृते नृपाः॥ तस्मात्सर्वात्मना मे

श्री ॥दुर्धर्षं च महाबाहुं...॥

चमूमुखे सेनाप्रधाने॥ तस्माद्धेतोः धृष्टद्युम्नाद्वा एवं निवाकम्पूरणे॥

मारराजस्य रक्षणं॥ संयुक्ताः पांडवान्हत्वा सृंजयांश्च ससोमकान्॥ सृंजयेषु च सर्वेषु निहतेषु रणे युधि॥ धृष्टद्युम्नं
रणे द्रोणो हनिष्यति न संशयः॥ तथार्जुनं च राधेयो हनिष्यति महारथः॥ भीमसेनमहं चापि युद्धे जेष्यामि दंशितः॥ शे
षांश्च पांडवान्योधाः प्रसमं हीनतेजसः॥ सोयं मम जयो व्यक्तं दीर्घकालं भविष्यति॥ तस्माद्रक्षत संग्रामे द्रोणमेव
महारथाः॥ इत्युक्त्वा भरतश्रेष्ठ पुत्रो दुर्योधनस्तव॥ आदिदेश तदा सैन्यं तस्मिंस्तमसि दारुणे॥ ततः प्रववृते युद्धं रात्रौ
भरतसत्तम॥ उभयोः सेनयोर्घोरं परस्परजिगीषया॥ अर्जुनः कौरवं सैन्यमर्जुनं चापि कौरवाः॥ नानाशस्त्रस
मावापैरन्योन्यं समपीडयन्॥ द्रौणिः पंचालराजं च भारद्वाजश्च संजयान्॥ छादयामासतुः संख्ये शरैः संनत
पर्वभिः॥ पांडुपांचालसैन्यानां कौरवाणां च भारत॥ आसीन्निष्टानको घोरो निघ्नतामितरेतरं॥ नैवास्माभिर्न वा
पूर्वैर्दृष्टं पूर्वं तथाविधं॥ युद्धं वा यादृशं तत्र तदासीद्भीषणं भयानकं॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच
॥ ॥वर्तमाने तथा रौद्रे रात्रियुद्धे विशांपते॥ मनुष्यतरनामानाम ...न राधिप युधिष्ठिरोऽब्रवीद्राजा सान्
योधान्मनुजाधिपान्॥ अभिद्रवत संयात द्रोणमेव जिघांसया॥ राज्ञस्ते वचनाद्राजन्पांचालाः सृंजयास्तथा॥ द्रोणमेवा
भ्यवर्तंत नदंतो भैरवान्रवान्॥ तान्वयं प्रतिगर्जंतः प्रत्युद्याताः स्म मर्षिताः॥ यथाशक्ति यथोत्साहं यथासत्वं च स

सन्निपत्यमिलित्वा॥

द्रोण मृगे। कृतवर्मा तु हार्दिक्यो युधिष्ठिरमुपाद्रवत्। द्रोणं प्रति समायांतं मत्तो मत्तमिव द्विपं। शैनेयं शरवर्षेण वि

किरंतं समंततः। अभ्ययात् कौरवो राजन्भूरिः संग्राममूर्द्धनि। सहदेवमथायांतं द्रोणप्रेप्सुं महारथं। कर्णो वैकर्त्तनो

राजन्वारयामास पांडवं। भीमसेनमथायांतं व्यादितास्यमिवांतकं। स्वयं दुर्योधनो राजा प्रतीपं मृत्युमाव्रजत्।

नकुलं च युधां श्रेष्ठं सर्वयुद्धविशारदं। शकुनिः सौबलो राजन्वारयामास सत्वरः। शिखंडिनमथायांतं रथेन र

थिनां वरं। कृपः शारद्वतो राजन्वारयामास संयुगे। प्रतिविंध्यमथायांतं मयूरसदृशैर्हयैः। दुःशासनो महाराज

यत्तो यत्तमवारयत्। भैमसेनिमथायांतं मायाशतविशारदं। अश्वत्थामा पितुर्मानं कुर्वाणः प्रत्यषेधयत्। द्रु

पदं वृषसेनस्तु ससैन्यं सपदानुगं। वारयामास समरे द्रोणप्रेप्सुं महारथं। विराटं द्रुतमायांतं द्रोणस्य नि

धनं प्रति। मद्रराजः सुसंक्रुद्धो वारयामास भारत। शतानीकमथायांतं नाकुलिं रभसं रणे। चित्रसेनो रुरोधाशु

शरैर्द्रोणवधेप्सया। अर्जुनं च युधां श्रेष्ठं प्राद्रवंतं महारथं। अलंबुषो महाराज राक्षसेंद्रो न्यवारयत्। तथा

द्रोणं महेष्वासं निघ्नंतं शात्रवान्रणे। धृष्टद्युम्नोऽथ पांचाल्यो हृष्टरूपमवारयत्। तथान्यान्पांडुपुत्राणां समाया २६०

तान्महारथान्। तावका रथिनो राजन्वारयामासुरोजसा। गजारोहा गजैस्तूर्णं सन्निपत्य महामृधे। योधयंतः

:स्म दृश्यंते शतशोऽथ सहस्रशः। निशीथे तुरगा राजन्नाद्रवंतः परस्परं। समदृश्यंत वेगेन पक्षवंतो यथाद्रयः॥

सादिनः सादिभिः सार्द्धं प्रासशक्त्यृष्टिपाणयः। समागच्छन्महाराज विनदंतः पृथक्पृथक्। नरास्तु बहवस्तत्र

समाजग्मुः परस्परं। गदाभिर्मुशलैश्चैव नानाशस्त्रैश्च संयुगे। कृतवर्मा तु हार्दिक्यो धर्मपुत्रं युधिष्ठिरं। वारया

मास संक्रुद्धो वेलाइव महार्णवं। युधिष्ठिरस्तु हार्दिक्यं विद्ध्वा पंचभिराशुगैः। पुनर्विव्याध विंशत्या तिष्ठ तिष्ठेति

चाब्रवीत्। कृतवर्मा तु संक्रुद्धो धर्मपुत्रस्य मारिष। धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः। अथान्यद्धनुर्धर्मपुत्रो रारान

युधिष्ठिरः। हार्दिक्यं दशभिर्बाणैर्बाह्वोरुरसि चार्पयत्। माधवस्तु रणे विद्धो धर्मपुत्रेण मारिष। प्राकंपत च रोषे

ण सप्तभिश्चार्दयच्छरैः। तस्य पार्थो धनुश्छित्वा हस्तावापं निकृत्य च। प्राहिणोन्निशितान्बाणान्पंच राजन्शिलाशिता

न्। ते तस्य कवचं भित्वा हेमचित्रं महाधनं। प्राविशन्धरणीमुग्रा वल्मीकमिव पन्नगाः। अक्ष्णोर्निमेषमात्रेण सोऽन्यदा

य कार्मुकं। विव्याध पांडवं षष्ट्या सूतं च नवभिः शरैः। तस्य शक्तिममेयात्मा पांडवो भुजगोपमां। चिक्षेप भरतश्रेष्ठ

रथे न्यस्य महद्धनुः। सा हेमचित्रा महती पांडवेयप्रवेरिता। निर्भिद्य दक्षिणं बाहुं प्राविशद्धरणीतलं। एतस्मिन्ने

व काले तु प्रगृह्य पार्थः पुनर्द्धनुः। हार्दिक्यं छादयामास शरैः सन्नतपर्वभिः। ततस्तु समरे शूरो वृष्णीनां प्रवरो रथी॥

द्रोण व्यश्वसूतरथं चक्रे निमेषार्द्धाद्युधिष्ठिरं। ततस्तु पांडवो ज्येष्ठः खड्गं चर्म समाददे। तदस्य निशितैर्बाणैर्व्यधमन्माधवो
रणे। तोमरं तु ततो गृह्य स्वर्णदंडं दुरासदं। प्रेषयत्समरे तूर्णं हार्दिक्यस्य युधिष्ठिरः। तमापतंतं सहसा धर्मराजभुज ज
च्युतं। द्विधा चिच्छेद हार्दिक्यः कृतहस्तः स्मयन्निव। ततः शरशतेनाजौ धर्मपुत्रमवाकिरत्। कवचं चास्य संक्रु
द्धः शरैस्तीक्ष्णैरदारयत्। हार्दिक्यशरसंछिन्नं कवचं तन्महात्मनः। व्यशीर्यत रणे राजंस्ताराजालमिवांब
रात्। स छिन्नधन्वा विरथः शीर्णवर्म्मा शरार्द्दितः। अपायासीद्रणात्तूर्णं धर्मपुत्रो युधिष्ठिरः। कृतवर्म्मा तु नि
र्जित्य धर्मात्मानं युधिष्ठिरं। पुनर्द्रोणस्य जुगुपे चक्रमेव महाबलः॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उ
वाच॥ ॥भूरिस्तु समरे राजन् शैनेयं रथिनां वरं। आपतंतमपासेधत् प्रवणादिव कुंजरं। अथैनं सात्यकिः क्रुद्ध
पंचभिर्निशितैः शरैः। विव्याध हृदये तूर्णं प्रास्रवत्तस्य शोणितं। तथैव कौरवो युद्धे शैनेयं युद्धदुर्मदं। दशभिर्विशि
खैस्तीक्ष्णैरविध्यत भुजांतरे। तावन्योन्यं महाराज ततक्षाते शरैर्भृशं। क्रोधसंरक्तनयनौ क्रोधाद्विस्फार्य कार्मुके। तयो
रासीन्महाराज शस्त्रवृष्टिः सुदारुणा। क्रुद्धयोः सायकमुचोर्यमांतकनिकाशयोः। तावन्योन्यं शरै राजन् संछाद्य समरे २६१
स्थितौ। मुहूर्त्तं चैव तद्युद्धं समरूपमिवाभवत्। ततः क्रुद्धो महाराज शैनेयः प्रहसन्निव। धनुश्चिच्छेद समरे कौरव्यस्य
महात्मनः॥

त्वाहितं गोमंगलाः॥
अथैनं छिन्नधन्वानं नवभिर्निशितैः शरैः। विव्याध हृदये यत्तस्तिष्ठ तिष्ठेति चाब्रवीत्। सोतिविद्धो बलवता शत्रुणा शत्रुतापनः।
रु धनुरन्यत्समादाय सात्वतं प्रत्यविध्यत। स विद्ध्वा सात्वतं बाणैस्त्रिभिरेव विशांपते। धनुश्चिच्छेद भल्लेन सुतीक्ष्णेन हस
न्निव। छिन्नधन्वा महाराज सात्यकिः क्रोधमूर्छितः। प्रजहार महावेगां शक्तिं तस्य महोरसि। स तु शक्त्या विभिन्नांगो
निपपात रथोत्तमात्। लोहितांग इवाकाशाद्दीप्तरश्मिर्यदृच्छया। तं तु दृष्ट्वा हतं शूरमश्वत्थामा महारथः। अभ्यधावत
वेगेन शैनेयं प्रति संयुगे। तिष्ठ तिष्ठेति चाभाष्य शैनेयं स नराधिप। अभ्यवर्षच्छरौघेण मेरुं वृष्ट्या यथांबुदः। तमाप
तंतं संरब्धं शैनेयस्य रथं प्रति। घटोत्कचोब्रवीद्राजन्नादं मुक्त्वा महारथः। तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि। एष
त्वाद्य हनिष्यामि महिषं स्कंदराडिव। युद्धश्रद्धामहं तेद्य हरिष्यामि रणाजिरे। इत्युक्त्वा क्रोधताम्राक्षो राक्षसः परवी
रहा। द्रौणिमभ्यद्रवत्क्रुद्धो गजेंद्रमिव केसरी। रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः। रथिनामृषभं द्रौणिं धाराभिरि
व तोयदः। शरवृष्टिं तु तां प्राप्तां शरैराशीविषोपमैः। शातयामास समरे तरसा द्रौणिरुत्स्मयन्। ततः शरशतैस्ती
क्ष्णैर्मर्मभिद्भिरजिह्मगैः। समाचिनोद्राक्षसेंद्रं घटोत्कचमरिंदम। स शरैराचितस्तेन राक्षसो रणमूर्द्धनि। व्य
काशत महाराज श्वाविच्छललितो यथा। ततः क्रोधसमाविष्टो भैमसेनिः प्रतापवान्। शरैरवकान्नाग्येर्द्रौणिं व
२१

शिलावृष्टिरभूत्कष्टा कार्कफलकैः॥ कालसंनिभैः॥ मारकन्या॥

द्रोण०

ज्वाशनिवर्षैः॥ क्षुरचक्रर्ष्टिशूलनाराचैः सशिलावृष्टिभिः॥ वराहकर्णनालीकैस्तोमरैरपि विकर्णिभिः॥ नाराचैस्तु दृष्टिम
तुलावज्राशनिसमस्वनाः॥ पतंतीष्वपरिक्षुब्धो घाजेगणरव्यधिनि प्रियः॥ क्रुद्धः स हारारैर्गोरैर्दिव्यास्त्रप्रतिमंत्रितैः॥ बध
मस्त्रमहातेजा महात्मा गणवमाकृतः॥ ततो नरेंद्रो बाणानां संघामान्यद्वाभवत्। घोररूपो महाराज योधनानां हर्षवर्द्धनः॥
ततास्त्रसंघर्षकृतैर्विस्फुलिंगैः समंततः॥ नभोनिशामुखे व्योमखद्योतैरिव संवृतं॥ समार्गणगणैर्द्रौणिर्हिडिंबाश्व
हाथसवशाः॥ प्रियार्थं तव पुत्राणां राक्षसं समवाकिरत्॥ ततः प्रवृत्ते युद्धे द्रोणिराक्षसयोर्मृधे। विगाढे रजनीमध्ये शक्रप्र
ह्लादयोरिव॥ ततो घटोत्कचो बाणैर्दशभिर्द्रौणिमाहवे। जघानोरसि संक्रुद्धः कालज्वलनसंनिभैः॥ स तैरभ्यायतैर्विद्धो
राक्षसेन महाबलः॥ चचाल समरे द्रोणिर्वातनुन्न इव द्रुमः॥ स मोहमनुसंप्राप्तो ध्वजयष्टिं समाश्रितः॥ ततो हाहाकृतं सै
न्यं तव सर्वं जनाधिप। हतं स्म मेनिरे सर्वे तावकास्ते विशांपते। तं तु दृष्ट्वा तथावस्थमश्वत्थामानमाहवे। पांचालाः सृंज
याश्चैव सिंहनादान्प्रचक्रिरे॥ प्रतिलभ्य ततः संज्ञामश्वत्थामा महाबलः॥ धनुः प्रपीड्य वामेन करेण मित्रकर्शनः॥ मु
मोचाकर्णपूर्णेन धनुषा शरमुत्तमं। यमदंडोपमं घोरमुद्दिश्याशु घटोत्कचं। वामभित्वा हृदयं तस्य राक्षसस्य शरो
त्तमः॥ विवेश वसुधामुग्रः सपुंखः पृथिवीपते॥ २६२

मनसिंघावरणो। योत्स्यावारणादेवरापययो॥

सोतिविद्धो महाराज रथोपस्थ उपाविशत्। राक्षसेंद्रस्तु बलवान्द्रौणिना रणमानिना। दृष्ट्वा विसंज्ञं हैडिंबं सारथिस्तु रणाजि
रात्। द्रोणेः सकाशात्संभ्रांतस्त्वपनिन्ये त्वरान्वितः॥ तथा तु समरे विध्वा राक्षसेंद्रं घटोत्कचं। ननाद सुमहानादं द्रोणपुत्रो महाब
लः॥ पूजितस्तव पुत्रैश्च सर्वयोधैश्च भारत। वपुषा प्रतिजज्वाल मध्याह्न इव भास्करः॥ भीमसेनं तु युध्यंतं भारद्वाजरथं प्रति
। स्वयं दुर्योधनो राजा प्रत्यविध्यच्छितैः शरैः॥ तं भीमसेनो दशभिः शरैर्विव्याध मारिष॥ दुर्योधनोपि विंशत्या शराणां
प्रत्यविध्यत॥ तौ सायकैः प्रच्छन्नौ ददृशाते रणाजिरे। मेघजालसमाच्छन्नौ नभसीवेंदुभास्करौ॥ अथ दुर्योधनो राजा
भीमं विव्याध पत्रिभिः॥ पंचभिर्भरतश्रेष्ठ तिष्ठ तिष्ठेति चाब्रवीत्॥ तस्य भीमो धनुश्छित्वा ध्वजं च दशभिः शरैः॥ विव्याध कौ
राजन् रवंत्या नतपर्वणां॥ ततो दुर्योधनः क्रुद्धो भीमसेनस्य मारिष। चिक्षेप सशरान्राजन्पश्यतां सर्वधन्विनां॥ तांश्चित्वा त्रिदशश्च
धन राज्ञो भीमो दुर्योधनं तु स्मृतान्। कौरव्यं पंचविंशत्या क्षुद्रकाणां समार्पयत्। दुर्योधनस्तु संक्रुद्धो भीमसेनस्य मारिष। क्षु
रप्रेण धनुश्छित्वा दशभिः प्रत्यविध्यत। अथान्यद्धनुरादाय भीमसेनो महाबलः। विव्याध नृपतिं संख्ये सप्तभिर्नि
शितैः शरैः॥ तदप्यस्य धनुः क्षिप्रं चिच्छेद लघुहस्तवत्। द्वितीयं च तृतीयं च चतुर्थं पंचमं तथा। आत्तमात्तं महारा
ज भीमस्य धनुराच्छिनत्। तव पुत्रो महाराज जितकाशी मदोत्कटः॥ स तथा छिद्यमानेषु कार्मुकेषु पुनः पुनः

स्मितिकाः सन्नाखुरख्याः॥ तेनोद्देशेन। महात्मनामतिघामाणानां॥

द्रोण ।शक्तिं चिच्छेद समरे सर्वपारशवीं शुभां। कृष्णोरिव स्वसारं दिदीप्तांकेतुशिखामिव। सामंतमिव चक्रं वर्तमानं तमोग्नि
शिखामिवाभ्रघातामवृतं। शक्तिं छिन्नां चिच्छेद कौरवः। पश्यत सर्वलोकस्य भीमस्य च महात्मनः। ततो भीमो महा
राज गदां गुर्वीं महाप्रभां। चिक्षेप विविध्य वेगान् युधि नरर्षभः। ततः सा सहसा वाहांस्तव पुत्रस्य संयुगे। सारथिं
च गदा गुर्वीम महेन्द्रतर्षभ। उवस्तु तव राजेंद्र रथाद्धेमपरिष्कृतात्। आप्लुत्य सहसा यानं नंदकस्य महात्मनः॥
ततो भीमो हतं मत्वा तव पुत्रं महाबलं। सिंहनादं महद्वक्रे तर्जयन्निशिकोरवान्। तावकाः सैनिकाश्चापि मेनिरे निह
तं नृपं। ततो विद्रुद्रुवुः सर्वे नहाहेति समंततः। तमार्त्तु तिन देशुवा नस्तानां सर्वयोधिनां। भीमसेनस्य नादं च
श्रुत्वा राजन्महात्मनः। ततो युधिष्ठिरो राजा हतं मत्वा सुयोधनं। अभ्यवर्त्तत वेगेन यत्र पार्थो वृकोदरः। पांचालाः
केकया मत्स्याः सृंजयाश्च विशांपते। सर्वोद्योगेनाभिजग्मुर्द्रोणमेव युयुत्सया। तत्रासीत्सुमहद्युद्धं द्रोणस्याथ परैः
सह। घोरे तमसि मग्नानां निघ्नतामितरेतरं॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥सहदेवं
मभ्यायांतं द्रोणप्रेप्सुं महारथं। कर्णो वैकर्तनो युद्धे वारयामास भारत। सहदेवस्तु राधेयं विद्ध्वा नवभिराशुगैः॥ २६३
पुनर्विव्याध दशभिर्विशिखैर्नतपर्वभिः। तं कर्णः प्रतिविव्याध शतेन नतपर्वणां। सज्यं चास्य धनुः शीघ्रं चिच्छेद

रज्ञांजहौ रणं हित्वा पयपयौ॥

लघुहस्तवत्। ततोन्यद्धनुरादाय माद्रीपुत्रः प्रतापवान्। कर्णं विव्याध विंशत्या तदद्भुतमिवाभवत्। तस्य कर्णो हयान्ह
त्वा शरैः सन्नतपर्वभिः। सारथिं चास्य त्वरितं निन्ये यमक्षयं। विरथः सहदेवस्तु खड्गचर्म समाददात्। तस्य कर्णो
हयान्हत्वा शरैः सन्नतपर्वभिः। सारथिं चास्य कर्णो व्यधमत्सहदेवानिवाच्य प्रयुक्तां महाघोरां हेमचित्रां महागदां।
प्रेषयामास समरे वैकर्तनरथं प्रति। तामापतंतीं सहसा सहदेवप्रवारितां। व्यष्टंभयच्छरैः कर्णो भूमौ चैनामपातय
त्। गदां विनिहतां दृष्ट्वा सहदेवस्तु भारत। शक्तिं चिक्षेप कर्णाय तामप्यस्याच्छिनच्छरैः। ससंभ्रमं ततस्तूर्णमवप्लुत्य र
थोत्तमात्। सहदेवो महाराज दृष्ट्वा कर्णं व्यवस्थितं। रथचक्रं प्रगृह्याजौ मुमोचाधिरथिं प्रति। तदापतद्वै सहसा कालचक्र
मिवोद्यतं। शरैरनेकसाहस्रैरच्छिनत्सूतनंदनः। तस्मिंस्तु विहते चक्रे सूतजेन महात्मना। वार्यमाणस्तु विशिखैः सह
देवो रणं जहौ। तमभिद्रुत्य राधेयो मुहूर्ताद्भरतर्षभ। अब्रवीत्प्रहसन्वाक्यं सहदेवं विशांपते। मा युध्यस्व रणे वीर वि
शिष्टै रथिभिः सह। सदृशैर्युध्य माद्रेय वचो मे मा विशंकिथाः। अथैनं धनुषोग्रेण तुदन्भूयो ब्रवीद्वचः। एषोर्जुनो र
णे पार्थो युध्यते कुरुभिः सह। अत्र त्वं गच्छ माद्रेय गृहं वा यदि मन्यसे। एवमुक्त्वा तु तं कर्णो रथेन रथिनां वरः। आयात्पांचाल

द्रो.प.

पांडूनां सैन्यानि प्रदद्रुवुः। वध्यमानं तु माद्रेयं नावधीत्समरे रिपुः॥ कुंत्याः स्मृत्वा वचो राजन्सत्यसंधो महारथः॥ स हदे
वस्तु तं राजन् विमनाः शरपीडितः॥ कर्णवाक्शरैस्तप्तो न्यतप्यत भृशं जीविताच्चिरविद्यत। आरुरोह रथं चापि पांचाल्यस्य
महात्मनः॥ जनमेजयस्य समरे त्वरायुक्तो महारथः॥ विराटं सहसेनं तु द्रोणार्थे द्रुतमागतं। मद्रराजः शरौघेण छाद
यामास धन्विनं। तयोः समभवद्युद्धं समरे दृढधन्विनोः॥ यादृशं ह्यभवद्राजन् जंभवासवयोः पुरा। मद्रराजो महारा
ज विराटं वाहिनीपतिं। आजघ्ने त्वरितो बाणैः शतेन नतपर्वणां। प्रतिविव्याध तं मत्स्यो नवभिर्निशितैः शरैः॥ पु
नश्चैव त्रिसप्तत्या भूयश्चैव शतेन तु। तस्य मद्राधिपो हत्वा चतुरो रथवाजिनः॥ सूतं ध्वजं च समरे रथोपस्थादपातय
त्। हताश्वात्तु रथात्तूर्णमवप्लुत्य महीपतिः॥ तस्थौ विस्फारयंश्चापं विमुंचंश्च शिलाशितान्। शतानीकस्ततो
दृष्ट्वा भ्रातरं हतवाहनं। रथेनाभ्ययात्तूर्णं सर्वलोकस्य पश्यतः। शतानीकमथायांतं मद्रराजो महामृधे। विशिखैर्बहु
भिर्विद्ध्वा ततो निन्ये यमक्षयं। तस्मिंस्तु निहते वीरे विराटो रथसत्तमः। आरुरोह रथं तस्य ध्वजमालिनं। ततो विस्फार्य
नयने क्रोधाद्द्विगुणविक्रमः। मद्रराजरथं तूर्णं छादयामास पत्रिभिः॥ ततो मद्राधिपः क्रुद्धः शतेन नतपर्वणां। आजघानोरसि दृढं २६४
विराटं वाहिनीपतिं। सोतिविद्धो महाराज रथोपस्थ उपाविशत्। कश्मलं चाविशत्तीव्रं विराटो भरतर्षभ। सारथिस्तमपोवा

ह समरे शरविक्षतं। ततः सा महती सेना प्राद्रवन्निशि भारत। वध्यमाना शरशतैः शल्येनाहवशोभिना। तां दृष्ट्वा विद्रुतां सेनां वासुदेवधनं
जयौ। प्रायातां तत्र राजेंद्र यत्र शल्यो व्यवस्थितः। तौ तु प्रत्युद्ययौ राजन् राक्षसेंद्रो ह्यलंबुसः। अष्टचक्रसमायुक्तमास्थाय प्रवरं रथं॥
तुरंगमुखैर्युक्तं पिशाचैर्घोरदर्शनैः॥ लोहितार्द्रपताकं तं रक्तमाल्यविभूषितं। कार्ष्णायसमयं घोरं ऋक्षचर्मसमावृतं। रौद्रेण
चित्रपक्षेण विवृताक्षेण कूजता। ध्वजेनोच्छ्रितदंडेन गृध्रराजेन राजता। स बभौ राक्षसो राजन्भिन्नांजनचयोपमः। रुरोधार्जुनमा
यांतं प्रभंजनमिवाद्रिराट्। किरन्बाणगणान्राजन् शतशोर्जुनमूर्धनि। अतितीव्रमभूद्युद्धं नरराक्षसयोस्तदा। द्रष्टॄणां प्रीतिजन
नं सर्वेषां भरतर्षभ। गृध्रकाकबलोलूककंकगोमायुहर्षणं। तमर्जुनः शतेनैव पत्रिणामभ्यताडयत्। नवभिर्निशितै
र्बाणैर्ध्वजं चिच्छेद भारत। सारथिं च त्रिभिर्बाणैस्त्रिभिरेव त्रिवेणुकं। धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान्। विरथस्यो
द्यतं खड्गं शरेणास्य द्विधाच्छिनत्। अथैनं निशितैर्बाणैश्चतुर्भिर्भरतर्षभ। पार्थोर्दयद्राक्षसेंद्रं स विद्धः प्राद्रवद्भयात्
। तं विजित्यार्जुनस्तूर्णं द्रोणांतिकमुपाययौ। किरंच्छरगणान् राजन् नरवारणवाजिषु। वध्यमाना महाराज पांडवेन य
शस्विना। सैनिका न्यपतन्नुर्व्यां वातनुन्ना इव द्रुमाः। तेषु त्वेवं वध्यमानेषु फाल्गुनेन महात्मना। संप्राद्रवद्बलं सर्वं पुत्राणां ते वि

ध्यायः ॥ ॥ इति द्रोणपर्वणि रात्रियुद्धे ॥ ॥संजय उवाच ॥ ॥शतानीकं शरैस्तूर्णं निर्दहंतं चमूं तव । चित्रसेनस्तव सुतो वा
रयामास भारत ॥ नाकुलिश्चित्रसेनं तु नाराचेनार्दयद्भृशं । स च तं प्रतिविव्याध दशभिर्निशितैः शरैः ॥ चित्रसेनो महाराज शतानीकं पुनर्यु
धि । नवभिर्निशितैर्बाणैराजघान स्तनांतरे ॥ नाकुलिस्तस्य विशिखैर्वर्म संनतपर्वभिः ॥ गात्रात्संच्यावयामास तदद्भुतमिवाभव
त् ॥ सोपेतवर्मा पुत्रस्ते विरराज भृशं तदा । उत्सृज्य काले राजेंद्र निर्मोकमिव पन्नगः ॥ ततोस्य निशितैर्बाणैर्ध्वजं चिच्छेद नाकुलिः ॥ ध
नुश्चैव महाराज यतमानस्य संयुगे ॥ स छिन्नधन्वा समरे विवर्मा च महारथः ॥ धनुरन्यन्महाराज जग्राहारिविदारणं ॥ ततस्तूर्णं चित्र
सेनो नाकुलिं नवभिः शरैः ॥ विव्याध समरे क्रुद्धो भरतानां महारथः ॥ शतानीकोथ संक्रुद्धश्चित्रसेनस्य मारिष ॥ जघान चतु
रो वाहान् सारथिं च नरोत्तमः ॥ अवप्लुत्य रथात्तस्माच्चित्रसेनो महारथः ॥ नाकुलिं पंचविंशत्या शराणामार्दयद्बली ॥ तस्य तत्कु
र्वतः कर्म नकुलस्य सुतो रणे ॥ अर्धचंद्रेण चिच्छेद चापं रत्नविभूषितं ॥ स छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ आरुरो
ह रथं तूर्णं हार्दिक्यस्य महात्मनः ॥ द्रुपदं तु सहानीकं द्रोणप्रेप्सुं महारथं ॥ वृषसेनोभ्ययात्तूर्णं किरंछरशतैस्तदा ॥ यज्ञसे २६५
नस्तु समरे कर्णपुत्रं महारथं ॥ षष्ट्या शराणां विव्याध बाह्वोरुरसि चानघ ॥ वृषसेनस्तु संक्रुद्धो यज्ञसेनं रथस्थितं ॥

बहुभिः सायकैस्तीक्ष्णैराजघान स्तनांतरे ॥ तावुभौ शरनुन्नांगौ शरकंटकिनौ रणे ॥ व्यभ्राजेतां महाराज श्वाविधौ शललैरि
व ॥ रुक्मपुंखैरजिह्माग्रैः शरैश्छिन्नतनुच्छदौ ॥ रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे ॥ तपनीयनिभौ चित्रौ कल्पवृक्षाविवाद्भुतौ
॥ किंशुकाविव चोत्फुल्लौ व्यकाशेतां रणाजिरे ॥ वृषसेनस्ततो राजन्द्रुपदं नवभिः शरैः ॥ विद्ध्वा विव्याध सप्तत्या पुनरन्यैस्त्रिभिः शरै
॥ ततः शरसहस्राणि विमुंचन्विबभौ तदा ॥ कर्णपुत्रो महाराज वर्षमाण इवांबुदः ॥ ततस्तु द्रुपदानीकं शरैश्छिन्नतनुच्छदं ॥ संप्राद्रवद्रणे ८
राजन्निशीथे भैरवे सति ॥ प्रदीपैर्हि परित्यक्तैर्ज्वलद्भिस्तैः समंततः ॥ व्यराजत मही राजन्वीताभ्रा द्यौरिव ग्रहैः ॥ तथांगदैर्निपति
तैर्व्यराजत वसुंधरा ॥ प्रावृट्काले महाराज विद्युद्भिरिव तोयदः ॥ ततः कर्णसुतत्रस्ताः सोमका विप्रदुद्रुवुः ॥ यथेंद्रभयवित्रस्ता
दानवास्तारकामये ॥ तेनार्द्यमानाः समरे द्रवमाणाश्च सोमकाः ॥ व्यराजंत महाराज प्रदीपैरवभासिताः ॥ तांस्तु निर्जित्य
समरे कर्णपुत्रो व्यरोचत ॥ मध्यंदिनमनुप्राप्तो घर्मांशुरिव भारत ॥ तेषु राजसहस्रेषु तावकेषु परेषु च ॥ एक एव ज्वलंस्तस्थौ
वृषसेनः प्रतापवान् ॥ स विजित्य रणे शूरान्सोमकानां महारथान् ॥ जगाम त्वरितस्तत्र यत्र राजा युधिष्ठिरः ॥ प्रतिविंध्यमथ क्रु
द्धं प्रदहंतं रणे रिपून् ॥ दुःशासनस्तव सुतः प्रत्युद्गच्छन्महारथः ॥ तयोः समागमो राजंश्चित्ररूपो बभूव ह ॥ व्यपेतजलदे व्योम्नि

कुध्यन्नाक्रस्योरिह्या प्रतिविव्याध समरे कर्णिकर्म दुष्करं। दुःशासनस्त्रिभिर्बाणैर्ललाटे समविध्यत। सोतिविद्धो बलवता व
बद्धवर्मा धृतिंना विरराज महाबाहुः सशृंग इव पर्वतः। दुःशासनं तु समरे प्रतिविव्याध महारथः। नवभिः सायकैर्विद्ध्वा पुनर्वि
व्याध सप्तभिः। तत्रेनारतपुत्रस्तु कृतवान्कर्म दुष्करं। प्रतिविव्याध द्याग्रेःपातयामास यद्वारे। सारथिं चास्य भल्लेन ध्वजं च स
मपातयत्। रथं च तिलशो राजन्व्यधमत्स धृतिंन। पताकाश्च सतूणीरा रश्मीन्योक्त्राणि वाजिनः। चिच्छेद तिलशः क्रुद्धः शरैः
सन्नतपर्वभिः। विरथः सह धर्मात्मा धनुष्पाणिरवस्थितः। अयोधयत्तव सुतं किरन्शरशतान्बहून्। क्षुरप्रेणाथ तस्यापि चिच्छेद तन
यस्तव। अथैनं दशभिर्बाणैश्छिन्नधन्वानमार्दयत्। तं दृष्ट्वा विरथं तत्र भ्रातरोस्य महारथाः। अन्ववर्त्तन्त वेगेन महत्या सेनया सह
। आप्लुतः स ततो यानं सुतसोमस्य भास्वरं। धनुर्गृह्य महाराज विव्याध तनयं तव। ततस्तु तावकाः सर्वे परिवार्य्य सुतं तव। अभ्य
द्रवन्त संग्रामे महत्या सेनया वृताः। ततः प्रववृते युद्धं तवतेषां च भारत। निशीथे दारुणे काले यमराष्ट्रविवर्द्धनं॥ ॥
द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥नकुलं रभसं युद्धे निघ्नन्तं वाहिनीं तव। अभ्ययात्सौबलः क्रुद्धस्ति
ष्ठ तिष्ठेति चाब्रवीत्॥ कृतवैरौ तु तौ वीरावन्योन्यवधकांक्षिणौ। याथैव नकुलो राजंश्चर वर्षाणि मुवत्॥

तिनोद्देशेन॥
तथैव सौबलो राजंश्छिक्षां संदर्शयन्युधि। तावुभौ समरे शूरौ शरकंटकिनौ तदा। व्यराजेतां महाराज कंटकैरिव शाल्म
लीश्च जिह्मप्रेक्षमाणौ च राजन्विवृत्तनयनौ तौ। क्रोधसंरक्तनयनौ निर्दहन्तौ परस्परं। श्यालस्तु तव संक्रुद्धो माद्रीपुत्रं
स्मितक्रर्णिनैकेन विव्याध हृदयं शितैः। नकुलस्तु भृशं विद्धः श्यालेन तव धन्विना। निषसाद रथोपस्थे कश्मलं
चैव समाविशत्। अत्यन्तवैरिणं दृष्ट्वा शत्रुं तथागतं। ननाद शकुनी राजन्तपान्ते जलदो यथा। प्रतिलभ्य ततः संज्ञां
नकुलः पाण्डुनन्दनः। अभ्ययात्सौबलं भूयो व्यात्ताननमिवान्तकः। संक्रुद्धः शकुनिं षष्ट्या विव्याध भरतर्षभ। पुनश्चैनं शता
निकनाराचानां स्तनान्तरे। ततोस्य सशरं चापं मुष्टिदेशे व्यकृन्तत। ध्वजं चास्य रथाच्छित्वा रथाद्भूमावपातयत्। सोतिविद्धो
महाराज रथोपस्थ उपाविशत्। तं विसंज्ञं निपतितं दृष्ट्वा श्यालं तवानघ। अपोवाह रथेनाशु सारथिर्ध्वजिनीमुखात्। त
तस्सचुक्रुशुः पार्थास्तत्र तेषां पदानुगाः। निर्जित्य ततः शत्रुन्नकुलः शत्रुतापनः। अब्रवीत्सारथिं क्रुद्धो द्रोणानीकाय
मां वह। तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य धीमतः। प्रायात्तेन रणे राजन्येन द्रोणो युयुधे ततः। शिखण्डिनं तु समरे द्रोणप्
प्रेप्सुं विशांपते। कृपः शारद्वतो यत्तः प्रत्युद्गच्छत्सुवेगितः। गौतमं द्रुतमायान्तं द्रोणस्याभ्यरिंदम। विव्याध नवभि
र्भल्लैः शिखण्डी प्रहसन्निव। तमाचार्य्यं महाराज विद्ध्वा पंचभिराशुगैः। पुनर्विव्याध विंशत्या पुत्राणां प्रियकृत्तव

ग्रवा।महद्युद्धं तयोरासीद्घोररूपं भयानकं।यथा देवासुरे युद्धे शंबरामरराजयोः॥ शरजालावृतं व्योम चकतुः सोमदा
रायो।मेघाविव तपापाये वीरौ समरदुर्गमौ।प्रकृत्या घोररूपं तदासीद्घोरतमं रणे।रात्रिश्च भरतश्रेष्ठ योधानां युद्ध
शालिनां।कालरात्रिनिभा ह्यासीद्घोररूपा भयानका॥ शिखंडी तु महाराज गौतमस्य महद्धनुः।अर्धचंद्रेण चिच्छेद सज्यं स
विशिखं तदा।तस्य क्रुद्धः कृपो राजन् शक्तिं चिक्षेप दारुणां।स्वर्णदंडामकुंठाग्रां कर्मारपरिमार्जितां।तामापतंतीं चि
शि च्छेद शिखंडी बहुभिः शरैः।सापतन्मेदिनीं दीप्ता भासयंती महाप्रभा।अथान्यद्धनुरादाय गौतमो रथिनां वरः।प्राछाद
यच्छितैर्बाणैर्महाराज शिखंडिनं।स बाध्यमानः समरे गौतमेन यशस्विना।न्यषीदत रथोपस्थे शिखंडी रथिनां व
रः।सीदंतं चैनमालोक्य कृपः शारद्वतो युधि।आजघ्ने बहुभिर्बाणैर्जिघांसुरिव भारत।विमुखं तु रणे दृष्ट्वा याज्ञसेनिं
महारथं।पांचालाः सोमकाश्चैव परिवव्रुः समंततः।तथैव तव पुत्राश्च परिवव्रुर्द्विजोत्तमं।महत्या सेनया सार्धं ततो
युद्धमवर्तत।रथिनां च रणे राजन्नन्योन्यमभिधावतां।बभूव तुमुलः शब्दो मेघानामिव नदतां।द्रवतां सादि
नां चैव गजानां च विशांपते।अन्योन्यमभितो राजन् क्रूरमायोधनं बभौ।पत्तीनां द्रवतां चैव पदशब्देन मेदि २६७
नी।अकंपत महाराज भयत्रस्तेवांगना॥ रथा रथान्समासाद्य प्रद्रुता वेगवत्तरं।न्यगृह्णन्बहवो राजन् ६

महात्मनामतिक्रमाणानां॥

ज्वलनार्चा यथा इव।तथा गजान्समासाद्य प्रतिनागा महागजाः।तस्मिन्नेव पदे यत्ता निरुध्यंते स्म भारत।सादी सा
दिनमासाद्य प्रासयष्टिपदातिनं।समासाद्य रणेऽन्योन्यं संरब्धा नातिचक्रमुः।धावतां द्रवतां चापि पुनरावर्ततामपि।बभूव
तत्र सैन्यानां शब्दः सुविपुलो निशि।दीप्यमानाः प्रदीपाश्च रथवारणवाजिषु।अदृश्यंत महाराज महोल्का इव खाच्च्युताः।सा निशा भरतश्रेष्ठ प्रदीपैरवभासिता।दिवसप्रतिमा राजन् बभूव रणमूर्धनि।आदित्येन
यथा व्याप्तं तमो लोके प्रणश्यति।तथा नष्टं तमो घोरं दीप्तैर्दीपैरितस्ततः।शस्त्राणां कवचानां च मणीनां च महा
त्मनां।अंतर्दधुः प्रभाः सर्वा दीपैस्तैरवभासिताः।तस्मिन्कोलाहले युद्धे वर्तमाने निशामुखे।न कश्चिद्विडगात्मा
नमयमस्मीति भारत।अवधीत्समरे पुत्रं पिता भरतसत्तम।पुत्रश्च पितरं मोहात्सखायं च सखा तदा।स्वस्रीयं च मातु
लश्चापि स्वस्रीयश्चापि मातुलं।स्वे स्वान्परे परांश्चापि निजघ्नुरितरेतरं।निर्मर्यादमभूद्युद्धं रात्रौ क्रूरं भयानक
॥ ॥द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥तस्मिंस्तु तुमुले युद्धे वर्तमाने भयावहे।धृष्टद्युम्नो महा
राज द्रोणमेवाभ्यवर्तत।संदधानो धनुः श्रेष्ठं ज्यां विकर्षन्पुनः पुनः।अभ्यद्रवत द्रोणस्य रथं रुक्मविभूषितं।धृष्टद्युम्न

का

मध्यायांतं द्रोणस्यांतं किरीटी दधिया। परिवव्रुर्महाराज पांचालाः पांडवैः सह। तस्यापरिवृतं दृष्ट्वा द्रोणमाचार्य्यसत्तमं। पु
त्रास्ते सर्वतो यत्नाद्रक्षुर्द्रोणमाहवे। बलाब्धी वात तस्तोत्र समेयातां निशामुखे। वाताहूतौ क्षुभितौ भैरवौ साग
राविव। ततो द्रोणं महाराज पांचाल्यः पंचभिः शरैः। विव्याध हृदये तूर्णं सिंहनादं ननाद च। तं द्रोणः पंचविंशत्या विध्वा ता
त संयुगे। चिच्छेदान्यतमं भल्लेन धनुरस्य महास्वनं। धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ। उत्ससर्ज धनुस्तूर्णं संद
श्य दशनच्छदं। ततः क्रुद्धो महाराज धृष्टद्युम्नः प्रतापवान्। आददेन्यद्धनुः श्रेष्ठं द्रोणस्यांतचिकीर्षया। स विकृष्य धनुश्चित्रमा
कर्णांतमरिंदमः। द्रोणस्यांतकरं घोरं व्यसृजन्मार्यकं ततः। स विसृष्टो बलवता शरो घोरो महामृधे। भासयामास तत्सै
न्यं दिवाकर इवोदितः। तं तु दृष्ट्वा शरं घोरं देवगंधर्वमानवाः। स्वस्त्यस्तु समरे राजन्द्रोणायेत्यब्रुवन्वचः। तं तु सायकमप्राप्तं
चार्य्यस्य रथं प्रति। कर्णो द्वादशधा राजंश्चिच्छेद कृतहस्तवत्। स छिन्नो बहुधा राजन्सूतपुत्रेण धन्विना। निपपात शरस्तूर्णं नि
र्विषो भुजगो यथा। निवार्य समरे बाणांशरैः सन्नतपर्वभिः। धृष्टद्युम्नं रणे कर्णो विव्याध दशभिः शरैः। पंचभिर्द्रोणपुत्रस्तु स्व
यं द्रोणश्च सप्तभिः। शल्यश्च नवभिर्बाणैस्त्रिभिर्दुःशासनस्तथा। दुर्योधनस्तु विंशत्या शकुनिश्चापि पंचभिः। पांचाल्यं च ２६८
रितो विध्यन्सर्व एव महारथाः। स विद्धः सप्तभिर्वीरैर्द्रोणत्राणार्थमाहवे। सर्वानसंभ्रमो राजन्प्रत्यविध्यत्त्रिभिस्त्रि

त्रिविध्यद्भिरिति सामान्योक्तिः। एकैकः पंचभिरिति विशेषोक्तिः॥

भिः। द्रोणं द्रौणिं च कर्णं च विव्याध तव चात्मज। ते विद्धा धन्विना तेन धृष्टद्युम्नं पुनर्मृधे। विव्यधुः पंचभिस्तूर्णमेकैको रथिनां व
र। द्रुमसेनस्तु संक्रुद्धो राजन्विव्याध पत्रिणा। त्रिभिश्चान्यैः शरैस्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत्। स तु तं प्रति विव्याध त्रिभिस्तीक्ष्णै र
जिह्मगैः। स्वर्णपुंखैः शिलाधौतैः प्राणांतकरणैर्युधि। भल्लेनाथान्येन पुनः सुवर्णोज्ज्वलकुंडले। निचकर्त शिरः कायाद्द्रुम
सेनस्य वीर्यवान्। तच्छिरो न्यपतद्भूमौ संदष्टौष्ठपुटं रणे। महावातसमुद्धूतं पक्वं तालफलं यथा। तांश्च विद्ध्वा पुनर्वीरान्वीरः सु
निशितैः शरैः। राधेयस्याच्छिनद्भल्लैः कार्मुकं चित्रयोधिनः। न तु तन्ममृषे कर्णो धनुषश्छेदनं तथा। निकर्तनमिवात्युग्रं लां
गूलस्येव केसरी। सोन्यद्धनुः समादाय क्रोधरक्तेक्षणः श्वसन्। अभ्यवर्षच्छरौघैस्तं धृष्टद्युम्नं महाबलं। दृष्ट्वा कर्णं तु संरब्धं
ते वीराः षड्रथर्षभाः। पांचाल्यपुत्रं त्वरिताः परिवव्रुर्जिघांसया। षण्णां योधप्रवीराणां तावकानां पुरस्कृतं। मृत्योरास्यमनुप्रा
प्तं धृष्टद्युम्नममंस्महि। एतस्मिन्नेव काले तु दाशार्होऽविकिरञ्छरान्। धृष्टद्युम्नं पराक्रांतं सात्यकिः प्रत्यपद्यत। तमायांतं म
हेष्वासं सात्यकिं युद्धदुर्मदं। राधेयो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः। तं सात्यकिर्महाराज विव्याध दशभिः शरैः। पश्यतां
सर्ववीराणां मा गास्तिष्ठेति चाब्रवीत्। सात्यकेस्तु बलिनः कर्णस्य च महात्मनः। आसीत्समागमो राजन्बलिवासव
योरिव। त्रासयंस्तलघोषेण क्षत्रियान्क्षत्रियर्षभः। राजीवलोचनं कर्णं सात्यकिः प्रत्यविध्यत। कंपयन्निव घोषेण धनु

षो वसुधां बली। सूतपुत्रो महाराज सात्यकिं प्रत्ययोधयत्। विपाठकर्णिनाराचैर्वत्सदंतैः क्षुरैरपि। कर्णः शरशतैश्चापि शै
नेयं समवाकिरत्। तथैव युयुधानोपि वृष्णीनां प्रवरो रथः। अभ्यवर्षच्छरैः कर्णं तद्युद्धमभवत्समं। तावकाश्च महाराज कर्ण
पुत्राश्च दंशिताः। सात्यकिं विव्यधुस्तूर्णं समंतान्निशितैः शरैः। अस्त्रैरस्त्राणि संवार्य्य तेषां कर्णस्य चाविभो। अविध्यत्सात्य
किः क्रुद्धो वृषसेनं स्तनांतरे। तेन बाणेन निर्विद्धो वृषसेनो विशांपते। अन्यपतत्स्वरथे मूढो धनुरुत्सृज्य वीर्यवान्। ततः कर्णो ह
तं मत्वा वृषसेनं महारथं। पुत्रशोकाभिसंतप्तः सात्यकिं प्रत्यपीडयत्। पीड्यमानस्तु कर्णेन युयुधानो महारथः। विव्याध
बहुभिः कर्णं त्वरमाणः पुनः पुनः। स कर्णं दशभिर्विद्ध्वा वृषसेनं च सप्तभिः। सहस्तावापधनुषी तयोश्छिद्दे समावृतः। ता
वन्ये धनुषी सज्ये कृत्वा शत्रुभयंकरे। युयुधानमविध्येतां समंतान्निशितैः शरैः। वर्त्तमाने तु संग्रामे तस्मिन्वीरवरक्षये॥
अतीव शुश्रुवे राजन्गांडीवस्य महास्वनः। श्रुत्वा तु रथनिर्घोषं गांडीवस्य च निःस्वनं। सूतपुत्रोब्रवीद्राजन्दुर्योधनमि
दं वचः। एष सर्वाञ्छिबीन्हत्वा मुख्यशश्च नरर्षभान्। पौरवांश्च महाद्यामा विक्षिपत्युत्तमं धनुः। पार्थस्यैव नि
यतं गांडीवनिनदो महान्। श्रूयते रथघोषश्च वासवस्येव नर्दतः। करोति पांडवो व्यक्तं कर्मौपयिकमात्मनः। ए २६७
षा विदीर्य्यते राजन्बहुधा भारतीचमूः। विप्रकीर्णान्यनीकानि न हि तिष्ठंति कर्हिचित्। वातेनेव समुद्धूतम

लक्ष्यं वेध्यं। लक्ष्यते वक्त्रा क्रियता। हन्याम हंतुं शक्रम॥

भ्रजालं विदीर्य्यते। सव्यसाचिनमासाद्य भिन्ना नौरिव सागरे। द्रवतां योधमुख्यानां गांडीवप्रेषितैः शरैः। विद्धानां श्रा
तशो राजन् श्रूयते निःस्वनो महान्। शृणु दुंदुभिनिर्घोषमर्जुनस्य रथं प्रति। निशीथे राजशार्दूल स्तनयित्नोरिवांब
रे। हाहाकाररवांश्चैव सिंहनादांश्च पुष्कलान्। शृणु चाष्टौ ध्वजविधानर्जुनस्य रथं प्रति। अयं मध्ये स्थितोस्माकं
ऽपतेत सात्यकिः सात्वतां वरः। इह चेल्लभ्यते लक्ष्यं कृत्स्नाञ्जेष्याम हि परान्। एष पांचालराजस्य पुत्रो द्रोणेन संगतः। सर्वतः संवृतो रा
जन्शूरैश्च महारथैः। सात्यकिं यदि हन्याम धृष्टद्युम्नं च पार्षतं। असंशयं महाराज ध्रुवो नो विजयो भवेत्। सौभद्रव
दिमौ वीरौ परिवार्य्य महारथौ। प्रयतामो महाराज निहंतुं वृष्णिपार्षतौ। सव्यसाचीं पुरोभ्येति द्रोणानीकाय भारत। संस
क्तं सात्यकिं ज्ञात्वा बहुभिः कुरुपुंगवैः। तत्र गच्छंतु बहवः प्रवरा रथसत्तमाः। यावत्पार्थो न जानाति सात्यकिं बहुभिर्वृतं। त
त्वरध्वं तथा शूराः शराणां मोक्षणे भृशं। यथा शरसंछन्नः परलोकाय माधवः। कर्णस्य मतमाज्ञाय पुत्रस्ते प्राह सौब
लं। यथेंद्रः समरे राजन्साह्यं विष्णोर्यशस्विनं। वृतः सहस्रैर्दशभिर्गजानामनिवर्त्तिनां। रथैश्च दशसाहस्रैर्वृतो याहि ध
नंजयं। दुःशासनो दुर्विषहः सुबाहुर्दुःप्रधर्षणः। एते त्वामनुयास्यंति पत्तिभिर्बहुभिर्वृताः। जहि कृष्णौ महाबाहो ध

द्रो०७०

मेराजं च मातुलं। नकुलं सहदेवं च तौ मामसनं तावेव चाद्रवानां समेविवादे वेंद्रनयाशामेवयेस्थिता। नहि मातुलकौ
तेमानेस्तु रामे पावकिः। एतस्तु कोपयोपायाद्धिस्ववणातवमोवलः। मदस्पामनयामा देमदस्वत्रेष्ठातविन्नौ। भि
मार्थेनदत्तवाणादिवस्तुपाहुनंदनात्। ततः प्रववृते युद्धं तावकानां परैः सह। प्रयातमोवले राजन्पांडवानां
मतां। किनोवलेन महता युक्तः पुनस्तु तं सोस्रवतं। अन्ययास्वरितो युद्धे किरेच रशानानवरूतानाथेव पार्थिवाः सात्वमा
त्वाकिं पर्यवारयत्। महद्युद्धं तदासीत्तु द्रोणस्य निशि भारत। धृष्टद्युम्नेन वीरेण पांचालेष्व महाद्भुतं॥ द्रोणपर्वणि
रात्रियुद्धे॥ ॥संजयउवाच॥ ॥ततस्ते पांडवन्यायेविरेनायुद्धदुर्मदाः। अहष्यमाणाः समस्यायुयुधानरथं प्रति। ते रथै
ःकल्पितै राजन्सहस्त्याक्ष्वेषिते। सादिभिश्च गजेश्चैव परिवव्रुःस्यसात्वतं। अथैनं कोष्ठकीकृत्य सर्वतस्ते महा
रथाः। सिंहनादांस्ततश्चक्रुस्तर्जयंतः परस्परं। तत्प्यवर्षञ्छरैस्तीक्ष्णैः सात्यकिं सत्यविक्रमं। त्वरमाणा महावीर्या माधवस्य
वधैषिणः। तां दृष्ट्वा पततस्तूर्णं शैनेयः परवीरहा। प्रत्यगृह्णान्महाबाहुः प्रमुंचन्विशिखान्बहून्। तत्र वीरो महेष्वासः सात्
यकिर्युद्धदुर्मदः। निचकर्त शिरांस्युग्रैः शरैः सन्नतपर्वभिः। हस्तिहस्तान्हयग्रीवान्बाहूनपि च सायुधान्। क्षुरप्रैः शात २७०
यामास तावकानां समाधवः। पतितैश्चामरैश्चैव श्वेतच्छत्रैश्च भारत। बभूव धरणी पूर्णा नक्षत्रैर्द्यौरिव प्रभो॥

तेषां तु युयुधानेन युध्यतां युधि भारत। बभूव तुमुलः शब्दः प्रेतानां क्रंदतामिव। तेन शब्देन महता पूरिताभूद्वसुंधरा। रात्रि
ः समपद्यत तीव्ररूपा भयावहा। दीर्यमाणं बलं दृष्ट्वा युयुधानशरार्दितं। श्रुत्वा च विपुलं नादं निशायां लोमहर्षणं।
सुतस्तवाब्रवीद्राजन्सारथिं रथिनां वरः। यत्रैष शब्दस्तत्राश्वांश्चोदयेति पुनः पुनः। तेन संचोद्यमानस्तु ततस्तांस्तुरगोत्त
मान्। सूतः संचोदयामास युयुधानरथं प्रति। ततो दुर्योधनः क्रुद्धो दृढधन्वा जितक्लमः। शीघ्रहस्तश्चित्रयोधी युयुधानमुपाद्रव
त्। ततः पूर्णायतोत्सृष्टैः शरैर्मांसशोणिताशनैः। दुर्योधनं द्वादशभिर्माधवः प्रत्यविध्यत। दुर्योधनस्तेन तथा पूर्वमेवार्दितः श
रैः। शैनेयं दशभिर्बाणैः प्रत्यविध्यदमर्षितः। ततः समभवद्युद्धमाकुलं भरतर्षभ। पांचालानां च सर्वेषां भारतानां च दारुणं।
शैनेयस्तु रणे क्रुद्धस्तव पुत्रं महारथं। सायकानामशीत्या तु विव्याधोरसि भारत। ततोस्य वाहान्समरे शरैर्निन्ये यमक्षयं
। सारथिं च रथात्तूर्णं पातयामास पत्रिणा। हताश्वे तु रथे तिष्ठन्पुत्रस्तव विशांपते। मुमोच निशितान्बाणाञ्छैनेयस्य
रथं प्रति। शरान्पंचाशतस्तांस्तु शैनेयः कृतहस्तवत्। चिच्छेद समरे राजन्प्रेषितांस्तनयेन ते। अथापरेण भल्लेन मु
द्रो ष्टिदेशे महद्धनुः। चिच्छेद तरसा युद्धे तव पुत्रस्य मारिष। विरथो विधनुष्कश्च सर्वलोकेश्वरः प्रभुः। आरुरोह रथं तूर्णं
२७१ भास्वरं कृतवर्मणः। दुर्योधने परावृत्ते शैनेयस्तव वाहिनीं। द्रावयामास विशिखैर्निशामध्ये विशांपते। शकुनिश्चा
७१

महारथाः ॥ त्र

द्रोण० र्जुनं राजन् परिवार्य समंततः ॥ रथैरनेकसाहस्रैर्गजैश्चापि सहस्रशः ॥ तथा दशसहस्रैश्च नानाशस्त्रैरवाकिरन् । ते महास्त्राणि
सर्वाणि विकिरंतोर्ज्जुनं युधि ॥ अयंतिस्म क्षत्रियाः कालचोदिताः ॥ तान्यर्जुनः सहस्राणि रथवारणवाजिनां । पर्यवारयत द्रा
यस्तः प्रकुर्वन्निव तुमुलं ह्ययं । ततस्तु समरश्लाघी श्रुतायुः शक्रनिः सोबलस्तथा । विव्याध निशितैर्बाणैरर्जुनं पृथक्पृथक् ॥ पुनश्चै स्त्रिः ति
वशाते नास्य संरुरोध महारथं । तमर्जुनस्तु विंशत्या विव्याध युधि भारत । अथ पत्रान्महाघासांस्त्रिभिरविध्यत । नि
वार्यता बाणगणो हि विराजन्नश्वतेजयः । अयान ताव कान्योधान् बहून्पालि रिवासुरान् । पुनश्चैव महापाणिरस्त्रिद
स्रायमेर्मृधे । समाकर्णमहीनां तिपुंचास्य रिपुप्रनगे ॥ शिरो । निःस किरीटेश्च सुतनसे श्चारुकुंडले ॥ संद
हेश्य घुटैः क्रो धत्वाघेवो हत्र लोचनेः ॥ निक्रूर दामलिधरैः क्षत्रियाणां प्रियंवदैः ॥ पंकजैरिव विन्यस्तैः पति
तैर्विबनौ मही ॥ कृत्वा तत्कर्म बीभत्सुरुग्रमुग्रपराक्रमः । विव्याध शकुनिं भूयः पंचभिर्नतपर्वभिः । उलूकं
च त्रिभिरत्युग्रैः । उलूकस्तु तथा विद्धो वासुदेवमताडयत् । ननाद च महानादं पूरयन्निव मेदिनीं । अर्जुनः २७१
शकुनेश्चापं सायकेनाछिनद्रणे । निन्ये च चतुरो वाहान्यमस्य सदनं प्रति । ततो रथाद्वप्लुत्य सौबलो भरतर्ष
भ । उलूकस्य रथं तूर्णमारुरोह विशांपते । तावेकरथमारूढौ पिता पुत्रौ महारथौ । पार्थं सिषिचतुर्बाणैर्गि

यमराड्भुवरं यमदेशराजबलंनी ॥

मेघाविवांबुभिः ॥ तौ तु विध्वा महाराज पांडवो निशितैः शरैः । विद्रावयेत्स च च शरशतैः शोभयद्मचरैः । अनिलेनयथा नानाविच्छिन्नानि
समंततः ॥ विच्छिन्नानि तथा राजन्बलान्यासन् विशांपते । तद्बलं भरतश्रेष्ठ वध्यमानं तदा निशि । प्रदुद्राव दिशः सर्वा वीक्ष्यमाणं भया
द्दितं । उत्सृज्य वाहान्समरे चोदयंतस्तथापरे । संभ्रांताः पर्यधावंत तस्मिन्स्तमसि दारुणे ॥ विजित्य समरे योधांस्तावकान्भरतर्षभ
। दध्मतुर्मुदितौ शंखौ वासुदेव धनंजयौ । धृष्टद्युम्नो महाराज द्रोणं विद्ध्वा त्रिभिः शरैः । चिच्छेद धनुस्तूर्णं ज्यां शरेण शितेन ह ।
तन्निधाय धनुर्भूमौ द्रोणः क्षत्रियमर्दनः । आददेऽन्यद्धनुर्वेगवत्सारवत्तरं । धृष्टद्युम्नस्ततो द्रोणं विद्ध्वा सप्तभिराशुगैः ॥ रा
सारथिं पंचभिर्बाणै राजन्विव्याध संयुगे । तान्निवार्य शरैस्तूर्णं धृष्टद्युम्नो महारथः । व्यधमत्कौरवीं सेनां मासुरीं मघवानिव ।
वध्यमाने बले तस्मिंस्तव पुत्रस्य मारिष । प्रावर्तत नदी घोरा शोणितोघतरंगिणी ॥ उभयोः सेनयोर्मध्ये नराश्वद्विपवाहि
नी । यथा वैतरणी राजन्यमराष्ट्रपुरं प्रति । द्रावयित्वा तु तत्सैन्यं धृष्टद्युम्नः प्रतापवान् । अत्यराजत तेजस्वी शक्रो देवगणे
ष्विव । अथ दध्मुर्महाशंखान्धृष्टद्युम्नशिखंडिनौ । यमौ च युयुधानश्च पांडवश्च वृकोदरः । जित्वा रथसहस्राणि ताव

द्द्राते॥तत्रसंतावकानां॥

द्रोण० कानांमहारथाः॥सिंहनादरवांश्चक्रुःपांडवाजितकाशिनः॥पश्यन्तस्तुवधंचस्यकस्मिंश्चरणेकृताः॥तथाद्रोणस्यशूरस्यद्रो
णस्येवविनिपाते॥ ॥इतिद्रोणपर्वणिद्रोणवधेऽध्यायः॥ ॥संजयउवाच॥ ॥विद्रुतेस्वबलेदृष्ट्वावध्यमानेमहात्मनि॥क्रोधेनम
हताविष्टःपुत्रस्तवविशांपते॥आमंत्र्यसहसामाकर्णद्रोणांचसेनयतांवरं॥ ॥अमर्षवशमापन्नोवाक्यज्ञोवाक्यमब्रवीत्॥तवस्था
मित्संग्रामःकुद्धाभ्यांसंप्रवर्त्तितः॥यादवेनिहतंदृष्ट्वाभिधवंसव्यसाचिना॥निहन्यमानांपांडूनांबलंनममवाहिनीं॥कृत्वा
तद्विजयेसक्तांविवपञ्चपथ्यः॥यदच्छेनबातास्मान्योनवाच्योस्मितदिवंटि॥आवांपरेषुतास्तेष्पांजष्पावस्तिमानदो॥तदिव
देवदाश्रुवानवध्यामतुसंमतं॥नाकविष्णमिदंपार्थोवरं याधक्षिनाशं॥नायदिनादेपरिल्पाद्या तवस्मोऽपृथपर्णो॥युध्येतामत्
रूपेणाविकामरणासुविक्रमौ॥वाकुबलादेततोवीरौवृणुतौतनयेनान॥प्रावर्त्ततांसंग्रामोघट्टिता विवपन्नगौ॥ततस्तौ
रथिनांश्रेष्ठौसर्वलोकधनुर्धरौ॥ज्ञानेयप्रभुस्वान्याधानभिद्धवत्तरणे॥तथ्येदसहिताःपार्थाःस्वतसोत्यनसर्वशः॥स्व
स्थवर्त्ततातोवाराेनदृष्टमानोमुकुर्वैकः॥अथद्रोणमहेषासोदशभिःशिनिपुंगवं॥आविध्यत्त्वरितेक्रुद्धःसर्वधास्त्वन
तांवरः॥कर्णस्त्वदशभिर्बाणैःपुत्रस्तवसप्तभिः॥दशभिर्वृषसेनश्चसौबलश्चापिसप्तभिः॥एतेकौरवसंक्रंदाशाते २७२

पपर्थिवारयन्॥दृष्ट्वाचसमारद्रोणंनिघ्नंतंपांडवीवरुं॥विव्यधुःसोमकास्तूर्णंसमंताद्वरवृष्टिभिः॥ततद्रोणोहरत्प्राणा
न्क्षत्रियाणांविशांपते॥रश्मिभिस्तिग्मरश्मिरराजेन्द्रमांसावप्समंततः॥द्रोणेनवध्यमानानांपंचालानांविशांपते॥शुश्रुवेतुमु
लः॥शब्दःक्रोशंसामितरेतरं॥पुत्रानन्येपितृनन्यैर्भ्रातृनन्येचमातुलान्॥नागिनयाश्वयस्यांश्चतथासंबंधिवांधवान्॥उत्सृज्यो
त्सृज्यलगच्छंस्त्वरितानामिविनेप्सवः॥अपरमोहितामाहात्म्येवाभिमुखायधुः॥पांडवानांरणेयाधाःपरलोकंतथाप
रे॥तथापांडवासेनापीड्यमानामहात्मनि॥निशीथेसंप्राद्रवद्राजनुत्सृज्योल्काःसहस्रशः॥पश्यतांभीमसेनस्यविजयस्या
फाल्गुनेःद्रोणाकर्णौसमिद्धेयाम्सौएतौपार्थसात्यकौ॥पांचालानांश्चैवसहितौजग्मतुस्तावकेर्नृशं॥एतयोःशरवर्षेणपुनः
महारथाः॥वार्यमाणोपिकौन्तेयहतनानाबलतिष्ठते॥एतावाचांसर्वसैन्येक्रूदेःसम्यग्राद्धयुधे॥द्रोणांचसहितपुत्रंचपृथ
तावःप्रबाधितुं॥एतौद्विबलिनौशूरौकृतास्त्रौजितकाशिनौ॥उपेक्षितंतवबलंनाशयेतांनिशामिमां॥तयोःसंदृष्टेतार
वंनामकम्पीमहाबलः॥आयाहुकोदरःशाघ्रंपुनरावृत्त्यवाहिनीं॥वृकोदरमथायांतंदृष्ट्वातत्रजनार्दनः॥पुनरर
वाववीराजन्हर्षयन्निवपांडवं॥एषत्वामारणश्लाघाहतःसोमकपांडवैः॥कृपितोन्येतिवेगेनद्रोणकर्णौमहारथौ
॥एतेनसहितोयुध्यपंचालैश्चमहारथैः॥आश्वासनार्थंसर्वेषांसैन्यानांपांडुनंदन॥ततस्तौपुरुषव्याघ्रौपुनोयांड

वमाधवौ। द्रोणकर्णौ समासाद्य विष्ठितौ रणमूर्द्धनि॥ ततस्तत्र तु नरा इत्र युधिष्ठिरबलं महत्। ततो द्रोणश्च कर्णश्च यु-
रान्सहस्रस्तु युद्धे समसंख्यास्तु कुलो निशि भयमेवन्महाद्भुतं यथा सागरा राजंश्चन्द्रस्योदये॥ ततउड्डपाणिस्यां
प्रदीपांस्तव वाहिनी। युयुधे पांडवी सार्द्धं तु न्मत्तवदसंकुलं। तस्मात् तमसा हि वसे हात महाद्भुता दारुणो॥ कर्वलं नामगो-
त्रणा प्रायुध्यंत तत्रावेधिरा॥ अश्रूयंत हि नामानि श्राध्यमानानि पार्थिवं। प्रदराक्षिर्महाराज स्वयंवर इवाह्वतो॥ निः-
शब्दमासीत्सहसा पुनः शब्दो महानभूत्। क्रुद्धानां युध्यमानानां जीयतां जयतामपि॥ यत्र यत्र स्म दृश्यंते प्रदीपाः कुरु-
सत्तम॥ तत्र तत्र स्म ते शूरा निपतंति पतंगवत्॥ तथा संयुध्यमानानां विगाढासीन्महानिशा॥ पांडवानां च राजेंद्र कौरवा-
णां च सर्वशः॥ ॥इति द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥ततः कर्णो रणे दृष्ट्वा पार्षतं परवीरहा॥
आजघानोरसि शरैर्दशभिर्मर्मभेदिभिः॥ प्रतिविव्याध तं कर्णं धृष्टद्युम्नो विशांपते। दशभिः सायकैर्हृष्टस्तिष्ठ
तिष्ठेति चाब्रवीत्॥ तावन्योन्यं शरैः संख्ये संछाद्य सुमहारथौ। पुनः पूर्णायतोत्सृष्टैर्विव्यधाते परस्परं॥ ततः पां-
चालमुख्यस्य धृष्टद्युम्नस्य संयुगे। सारथिं चतुरश्चाश्वान्कर्णो विव्याध सायकैः॥ कार्मुकप्रवरं चापि प्रचिच्छेद
शितैः शरैः॥ सारथिं चास्य भल्लेन रथनीडादपातयत्॥ धृष्टद्युम्नस्तु विरथो हताश्वो हतसारथिः॥ गृहीत्वा परिघं

घोरं कर्णस्याश्वानपीपिषत्॥ विद्रुत्य बहुधा तेन शरैराशीविषोपमैः॥ ततो युधिष्ठिरानीकं पद्भ्यामेवाभ्यपद्यत
॥ आरुरोह रथं चापि सहदेवस्य मारिष॥ कर्णस्यापि रथवाहानन्यान्सूतो न्ययोजयत्॥ शंखवर्णान्महावेगान्सैं-
धवान्साधुवाहिनः॥ लब्धलक्ष्यस्तु राधेयः पांचालानां महारथान्॥ अभ्यपीडयदायस्तः शरैर्मेघ इवाचला-
न्॥ सा पीड्यमाना कर्णेन पांडवानां महाचमूः॥ संप्राद्रवत्सुसंत्रस्ता सिंहेनेवार्दिता मृगी॥ पतितास्तु रथेभ्यश्च ग-
जेभ्यश्च महीतले॥ राजन्नश्वेभ्यश्च नराः संदृश्यंते ततस्ततः॥ धावमानस्य योधस्य क्षुरप्रैः सुमहामृधे॥ बाहू वि-
च्छेद वै कर्णः शिरश्चैव सकुंडलं॥ ऊरू चिच्छेद चान्यस्य गजस्थस्य विशांपते॥ वाजिपृष्ठगतस्यापि भूमिष्ठस्य च
मारिष॥ नाज्ञासिषुश्च धावमाना बहवश्च महारथाः॥ संछिन्नान्यात्मगात्राणि वाहनानि च संयुगे॥ ते वध्यमानाः समरे
पांचालाः सृंजयैः सह॥ तृणस्यापि स्वनाद्धापि सूतपुत्रं स्म मेनिरे॥ अपि स्वं समरे योधं धावमानं विचेतसः॥ क-
र्णमेवाभ्यमन्यंत त्रासात्तेनाद्रवंति ते॥ तान्यनीकानि भग्नानि द्रवमाणानि भारत॥ अभ्यद्रवत्ततः कर्णः पृष्ठतो
विकिरञ्छरान्॥ अवेक्षमाणास्त्वन्योन्यं सुसंमूढा विचेतसः॥ नाशक्नुवंस्तत्रावस्थातुं काल्यमाना महात्मना॥ कर्णे-
नाभ्याहता राजन्पांचालाः परमेषुभिः॥ द्रोणेन च दिशः सर्वा वीक्षमाणाः प्रदुद्रुवुः॥ ततो युधिष्ठिरो राजा स्वसैन्यं

समवाप्तवानघ नाब्रवं नवानिति पुरुषव्याघ्र स्यो वा ॥

द्रोण॰ प्रहृष्टं विकृतं। अपृच्छत् यान्मनाः कृष्णं फाल्गुनो वाक्यमब्रवीत्। परमकर्षिणि हेषामं धनुष्याणि मवस्थितं। तिग्रो। प्र
हारुरणे काले तत्पतमिवभास्कर। कर्णमायकनुन्नानां क्रोशतां मप निस्वनः। अतिशं अद्य तत्पार्थ चर्हिनाम
ना ष्ववत। प्रपा। विसृजतस्तस्य सदेवमनस्य चाशुगान्। पश्यामि नांतरं पार्थिदृश्य यथिप्य तिनो कृष्ण वृष्णि दवानंत
रंपार्थ हृदयं विष्य तिनाकृष्णो। यदन्नो नंतर कार्यं ग्रासकालं अपश्य मि। कर्णस्य वधमेवाशुकं तकुरु धनंजय। ए
वमुक्तो महाराज पार्थः कृष्णमथाब्रवीत्। नीतः कुंतीसुतो राजा राधेयस्याद्य विक्रमात्। एवंगतस्ता स्मे कालं कर्णा
नीकपुतः प्रवृत्तः। नवाद्य वस्य मुष्टिं कृष्ण द्वावतं दिवकृत्। द्रोणसायकनुन्नानां तन्नानां मधुसूदन। कर्णेन चास्य मा
नानां मद्भानं न विद्यते। पश्यामि च तथा कर्णं विचरंतमभीतवत्। द्रवमाणान् योधान् किरंतं विशिखैः
शितैः। नित वस्य रणे सहे सांदुरितरणमूर्द्धनि। प्रत्यक्षं वृष्णिशार्दूल पादस्पर्शमिवोरगः। संनवानन्त्रयावाप्य यत्र
त्वं कर्णो महारथः। अहं हनिष्यामि मधुविषम मधुसूदन॥ ॥वासुदेव उवाच॥ ॥पश्यामि कर्णं कौंतेय
स्वराजमिव देवे। चरंतं तत्र संग्रामे मतिमात्रपविक्रमं। नितस्यान्योस्ति संग्रामे प्रत्युद्याताधनंजयं। कृते त्वां पुरुषव्या
घ्रराक्षसाहयटोत्कचात्। नतु तावदहं मन्ये प्राप्तकालं तवानघ। समागमं महाबाहो सूतपुत्रेण संयुगे। दीप्यमानामहोल्के

२७४

यथा गाव न्कार्ल्यं तेन यथा काल्यमानं पश्येत्स्व भूयः॥

वतिष्ठत्यस्य दिवा वी॥ सहंधर्मे हिमहाबाहोस्तपुत्रेणासंयुगा रक्षितशक्ति। रक्षा हि तो दूरूपं विनर्हिचा। घटोत्कचस्तुरा
धेयं प्रत्युद्यातु महाबलः। सहि भीमेन बलिना जातः सुरपराक्रमः। तस्मिन्नस्त्राणि दिव्यानि राक्षसान्यासुराणि च। सततं
चानुरक्तो वो हितैषी च घटोत्कचः। विजेष्यति रणे कर्णमिति मे नात्र संशयः। एवमुक्त्वा महाबाहुः पार्थं पुष्करलो
चनः। आहुहावाथ तद्रक्षस्तच्चाविरासीत्। अग्रतः। कवची सशरः खड्गी सधन्वा च विशांपते। अभिवाद्य ततः कृष्णं पांडवं
च धनंजयं। अब्रवीत्तं मि कृष्णसः संयममस्मि का रा मिकिं। ततस्तं मेघसंकाशं दीप्तास्यं दीप्तकुंडलं। अभ्यभाषत दाशा
र्हः प्रहसन्निव॥ ॥वासुदेव उवाच॥ घटोत्कच विजानीहि यत्त्वां वक्ष्यामि पुत्रक। प्राप्तो विक्रमकालोयं तव
नान्यस्य कस्यचित्। सत्वं वान्धकमानानां बंधूनां प्लवो भव। विविधानि तवास्त्राणि संति माया च राक्षसी। पश्य कर्णे
न हिडिंबा पांडवानामनीकिनी। काल्यमाना यथा गावः पालेन रणमूर्द्धनि। एष कर्णो महेष्वासो मतिमान् दृढवि
क्रमः। पांडवानामनीकेषु निहंति क्षत्रियर्षभान्। किरतः शरवर्षाणि महांति दृढधन्विनः। न शक्नुवंत्यवस्थातुं पी
ड्यमानाः शराचिषा। निशीथे सूतपुत्रेण शरवर्षेण पीडिताः। एते द्रवंति पांचालाः सिंहस्येव भयान्मृगाः। एतस्ये
वं प्रवृद्धस्य सूतपुत्रस्य संयुगे। निषेद्धा विद्यते नान्यस्त्वामृते भीमविक्रम। सत्वं कुरु महाबाहो कर्म युक्तमिहात्मनः। मा

पारेस्त्रबलंबनं॥

द्रोण० ज्ञातीनांप्रियकाम्याचतेजसास्वबलस्यच।एतदर्थंहिहैडिंबेपुत्रानिच्छंतिमानवाः।कथंतुतारयेद्दुःखात्स्त्वंतारयबांधवा
न्।तवह्यस्त्रबलंभीममायाश्चतवदुस्तराः।संग्रामेयुध्यमानस्यसततंभीमनंदन।पांडवानांप्रमग्नानांकर्णेननिशिसाय
कैः।मज्जतांधार्तराष्ट्रेषुभवपारंपरंतप।रात्रौहिराक्षसामायेनभवंत्यमितविक्रमाः।बलवंतःसुदुर्धर्षाःशूराविक्रांत
चारिणः।जहिकर्णंमहेष्वासंनिशीथेमाययारणे।पार्थाद्रोणंवधिष्यंतिधृष्टद्युम्नपुरोगमाः॥ ॥संजयउवाच॥
केशवस्यवचःश्रुत्वाबीभत्सुरपिराक्षसं।अभ्यभाषतकौरव्योघटोत्कचमरिंदम।घटोत्कचभवांश्चैवदीर्घबाहुश्च
सात्यकिः।मतोमेसर्वसैन्येषुभीमसेनश्चपांडवः।सभवान्यातुकर्णेनद्वैरथंयुध्यतांनिशि।सात्यकिःपृष्ठगोपस्ते
न भविष्यतिमहारथः।जहिकर्णंरणेशूरंसात्वतेनसहायवान्।यथेंद्रस्तारकंपूर्वंस्कंदेनसहजघ्निवान्॥ घटोत्कचउ
वाच॥ ॥अलमेवास्मिकर्णायद्रोणायालंचसत्तम।अन्येषांक्षत्रियाणांचकृतास्त्राणांमहात्मनां।अद्यदास्या
मिसंग्रामंसूतपुत्रायतंनिशि।यंजनाःकथयिष्यंतियावद्भूमिर्धरिष्यति।नचात्रशूरान्मोक्ष्यामिनभीतान्नकृतांज
लीन्।सर्वानेववधिष्यामिराक्षसंधर्ममास्थितः॥ ॥संजयउवाच॥ ॥एवमुक्त्वामहाबाहुर्हैडिंबःपरवी २७५
रहा।अभ्ययात्तुमुलेकर्णंतवसैन्यंविभीषयन्।तमापतंतंसंक्रुद्धंदीप्तास्यमिवपन्नगं।अभ्यस्यत्परमेष्वासः

रा

रथमितिघटोत्कचविनाशपरं॥

प्रतिजग्राहसूतजः।तयोःसमभवद्युद्धंकर्णराक्षसयोर्महत्।गर्जतोराजशार्दूलशक्रप्रह्लादयोरिव॥ द्रोणपर्व
णि।रात्रियुद्धेघटोत्कचवधे॥ ॥संजयउवाच॥ ॥दृष्ट्वाघटोत्कचंराजन्सूतपुत्ररथंप्रति।युध्यंतंरथयांतंकर्णंजि
घांसुंकर्णमाहवे।अब्रवीत्तवपुत्रस्तुदुःशासनमिदंवचः।एतद्रक्षोरणेकर्णंदृष्ट्वाकर्णस्यविक्रमं।प्रतियातिद्रुतं
कर्णंतद्वारयमहारथं।वृतःसैन्येनमहतायाहियत्रमहाबलः।कर्णोवैकर्तनोयुद्धेराक्षसेनसुयुध्यति।रक्षकर्णंरणे
यत्तोवृतःसैन्येनमानद।एतस्मिन्नंतरेराजन्जटासुरसुतोबली।दुर्योधनमुपागम्यप्राहप्रहरतांवरः।दुर्योधनतवा
मित्रान्प्रख्यातान्युद्धदुर्मदान्।पांडवान्हंतुमिच्छामित्वयाज्ञप्तःसहानुगान्।जटासुरोममपितारक्षसांग्रामणीः
पुरा।प्रयुज्यकर्मरक्षोघ्नंक्षुद्रैःपार्थैर्निपातितः।तस्यापचितिमिच्छामित्वद्दिष्टोगंतुमीश्वर।तमब्रवीत्ततोराजाप्रीयमाण
:पुनःपुनः।द्रोणकर्णादिभिःसार्धंपर्याप्तोहंद्विषद्वधे।त्वंतुगच्छमयाज्ञप्तोजहियुद्धेघटोत्कचं।तथेत्युक्त्वामहाकायः
समाहूयघटोत्कचं।जटासुरिर्भीमसेनिंनानाशस्त्रैरवाकिरत्।हैडिंबिःप्रममाथैनंमहावातोंबुदानिव।ततो
मायाबलंदृष्ट्वारक्षस्तूर्णमलंबलः।घटोत्कचंशरव्रातैर्नानालिंगैःसमार्पयत्।विद्ध्वाचबहुभिर्बाणैर्भीमसेनिमलंबु
लः।द्रावयच्छरव्रातैःपांडवानामनीकिनीं।तेनविद्राव्यमाणानितानिसैन्यानिभारत।निशीथेविप्रकीर्यंतवातनु

\ मलंबलंचकर्णंचकुरुसैन्यंचदुस्तरं॥

प्रमथ्य किं चिरयसीय॥

द्रो॰प॰ त्वा घनाइव। घटोत्कचशरैर्भिन्नात्मेघकृष्णवाहिनी। निशाम्य पाडवा। द्रात्मसु स्वज्योत्का :मदस्वना:॥ अलंबलस्ततः क्रु-
द्धो भिन्नमर्मा सिंहमदाष्टदे। आजघ्ने दशभिर्बाणैस्त्रिभिरिव महाद्विपं। तिलशस्तस्य तद्यानं सूतं सर्वायुधानि च। घटोत्कचस्य
चिच्छेद बाणैर्दृष्ट्वा निदारुणां। ततः कार्ष्णायसं वाति: क्रुद्धःन्यो दस्वशं:॥ अलंबलं चाप्यवर्षन्मेघो मेरुमिवाचलं। ततः
संचुक्षुभे सैन्य कुरूणां राक्षसार्दितं। उपद्रुतपरिचारन्योन्यं च उरंगमम र्दितं। जाटासुरिर्महा राजविरथो हतसारथिः॥
घटोत्कचं रणे क्रुद्धो मुष्टिनाभ्यहनद्दृढं। मुष्टिनाभिहतास्तेन प्रचचाल घटोत्कचः। क्षितिकंपे यथा शैलः सवृक्षगणगु-
ल्मवान्। ततः स परिघाणोभिहिः संयाम नवा कुना। जातासुरिं निमाससिरव क्षोभ्य क्षिप्तान्वशं। ते पुन्मथ्य ततः क्रुद्ध
स्तूर्णं दैडिंबिराक्षिपत्। दोर्भ्यामिंद्रध्वजोपाभ्यां निष्पिपेष च भूतले। अलंबलोपि विक्षिप्य समुत्क्षिप्य च राक्षसं। घटोत्कचं बला
दाधाक्षिप्य पेषमहीतले॥ तयोः समभवद्युद्धं गर्जतो रतिकाययोः। घटोत्कचालंबलयोस्तुमुलं रोमहर्षणं॥ वि
शेषयंतावन्योन्यं मायाभिरतिमायिनौ॥ युयुधाते महावीर्यौ विडौजोनमुची यथा॥ पावकांबुनिधीभू-
त्वा पुनर्गरुडतक्षकौ। पुनर्मेघमहावातौ पुनर्वज्रमहाचलौ। पुनः कुंजरशार्दूलौ पुनः स्वर्भानुभास्क- २७६
रौ॥ एवं मायाशतसृजावन्योन्यवधकांक्षिणौ॥ भृशं चित्रमयुध्येतां

घटोत्कचबलंबलशालिनं घटोत्कचं। उद्यतं उद्यतं तं। निशांश्रवशं॥ ॥अलंबलवधः॥

मलंबु ल घटोत्कचौ। परिघैश्च गदाभिश्च प्रासमुद्गरपट्टिशैः॥ मुसलैः पर्वताग्रैश्च तावन्योन्यं निजघ्नतुः॥ हयाभ्यां च ग-
जाभ्यां च पदातिरथिनौ पुनः॥ युयुधाते महामायौ राक्षसप्रवरौ युधि। ततो घटोत्कचो राजन्नलंबलवधेप्सया। उत्पपात
भृशं क्रुद्धः श्येनवन्निपपात ह। गृहीत्वा च महाकायं राक्षसेंद्रमलंबलं। उद्यम्य न्यवधीद्भूमौ मयं विष्णुरिवाहवे। ततो घटो-
त्कचः खड्गमुद्गृह्याद्भुतदर्शनं। तोऽस्य कायाच्छिरो भीमं विकृतदर्शनं। स्फुरतस्तस्य समर(?)दत्तस्या विलिरवं। निचक-
र्त महाराज शत्रोरमितविक्रमः॥ शिरस्तच्चापि संगृह्य केशेषु रुधिरोक्षितं। ययौ घटोत्कचस्तूर्णं दुर्योधनरथं प्रति। अभ्येत्य
च महाबाहुः स्मयमानः स राक्षसः। रथेऽस्यातिक्षिपच्छिरो विकृताननमूर्धजं। प्राणदन्भैरवं नादं प्रावृषीव बलाहकः॥ अब्रवी-
च्च ततो राजन्दुर्योधनमिदं वचः। एष ते निहतो राजन्सहायस्ते स्वविक्रमः। पुनर्द्रष्टासि कर्णस्य निष्ठामेतां तथात्मनः॥ एवमुक्त्वा २
ततः प्रायात्कर्णं प्रति नराधिप। किरञ्छरशतांस्तीक्ष्णान्विमुंचन्कर्णमूर्धनि। ततः समभवद्युद्धं घोररूपं भयानकं। विस्माप-
नं मनुष्याणां नरराक्षसयोर्मृधे॥ ॥द्रोणपर्वणि अलंबुलवधः॥ ॥धृतराष्ट्र उवाच॥ ॥यत्र वैकर्तनः कर्णो राक्षसश्च घटोत्क-
चः। निशीथे समसज्जेतां तद्युद्धमभवत्कथं। कीदृशं चाभवद्रूपं तस्य घोरस्य रक्षसः। रथश्च कीदृशस्तस्य हयाः सर्वायुधानि

करालवान्भीषणो रथ्यविरहितः॥ शिथिलउपचयस्थौल्यं यस्य। वसुरूपे रंगेः शिखादिभिः शोभितं कामवर्णजवाः इच्छानुरूपो

द्रोण० वा। किंभूतमाणांदयास्तस्य रथ्यकेतुर्दैत्यस्तथा। कीदृशं वर्म चैवास्य शिरस्त्राणं च कीदृशं। दृष्टस्त्वमेतदाचक्ष्व कुशलो ह्यसि संजय
संजय उवाच॥ ॥लोहिताक्षो महाकायस्ताम्रास्यो निम्नतोदरः। ऊर्ध्वरोमा हरिश्मश्रुः शंकुकर्णो महाहनुः॥ आकर्णाद्दारिता-
स्यश्च तीक्ष्णदंष्ट्रः करालवान्। सुदीर्घताम्रजिह्वौष्ठो लंबभ्रूः स्थूलनासिकः॥ नीलांगो लोहितग्रीवो गिरिवर्ष्मा भयंकरः।
महाकायो महाबाहुर्महाशीर्षो महाबलः। विकृतः परुषस्पर्शो विकटोद्बद्धपिंडिकः। स्थूलस्फिग्गूढनाभिश्च शिथिलोप-
चयो महान्। तथैव हस्ताभरणी महामायोंगदी तथा॥ उरसा धारयन्निष्कमग्निमालां यथाचलः। तस्य हेममयं चित्रं बहुरूपांग-
शोभितं। तोरणप्रतिमं शुभ्रं किरीटं मूर्ध्न्यशोभत॥ कुंडले बालसूर्याभे मालां हेममयीं शुभां। धारयन्विपुलं कांस्यं कवचं च
महाप्रभं। किंकिणीशतनिर्घोषं रक्तध्वजपताकिनं। ऋक्षचर्मावनद्धांगं नल्वमात्रं महारथं। सर्वायुधवरोपेतमास्थितो ध्वजमालिनं।
अष्टचक्रसमायुक्तं मेघगंभीरनिस्वनं। तत्र मातंगसंकाशा लोहिताक्षा विभीषणाः। कामवर्णजवा युक्ता बलवंतः शतं हयाः॥ राक्षसो
स्य विरूपाक्षः सूतो दीप्तास्यकुंडलः। रश्मिभिः सूर्यरश्म्याभैः संजग्राह हयान्रणे। स तेन सहितस्तस्थौ वरुणेन यथा रविः। संसक्त इव २७७
चाभ्रेण यथाद्रिर्महता महान्। दिवस्पृक्सुमहान्केतुः स्यंदनेस्य समुच्छ्रितः। रक्तोत्तमांगः क्रव्यादो गृध्रः परमभीषणः॥ वासवाशनि
वर्मोजवस्त्रायुधां॥

निर्घोषं दृढज्यमपि विक्षिपन्। व्यक्तं किष्कुपरीणाहं द्वादशारत्निकार्मुकं। रथाक्षमात्रैरिषुभिः सर्वाः प्रच्छादयन्दि-
शः। तस्यां वीरापहारिण्यां निशायां कर्णमभ्ययात्। तस्य विक्षिपतश्चापं रथे विष्टभ्य तिष्ठतः। अश्रूयत धनुर्घोषो विस्फूर्जितमिवा-
शनेः। तेन वित्रास्यमानानि तव सैन्यानि भारत। समकंपंत सर्वाणि सिंधोरिव महोर्मयः। तमापतंतं संप्रेक्ष्य विरूपाक्षं विभीषणं। उ-
त्स्मयन्निव राधेयस्त्वरमाणोभ्यवारयत्। ततः कर्णोभ्ययादेनमस्यन्नस्यंतमंतिकात्। मातंग इव मातंगं यूथर्षभमिवर्षभः। सम-
न्निपातस्तुमुलस्तयोरासीद्विशांपते। कर्णराक्षसयो राजन्निंद्रशंबरयोरिव। तौ प्रगृह्य महावेगे धनुषी भीमनिस्वने। प्राच्छादयेता-
मन्योन्यं तक्षमाणौ महेषुभिः। ततः पूर्णायतोत्सृष्टैः शरैः संनतपर्वभिः। व्यदारयेतामन्योन्यं कांस्ये निर्भिद्य वर्मणी। तौ नखैरि-
व शार्दूलौ दंतैरिव महाद्विपौ। रथशक्तिभिरन्योन्यं विशिखैश्च ततक्षतुः। संछिंदंतौ च गात्राणि संदधानौ च सायकान्। दह-
तौ च शराल्काभिर्दुष्प्रेक्ष्यौ च बभूवतुः। तौ तु विक्षतसर्वांगौ रुधिरौघपरिप्लुतौ॥ तौ शराग्रविभिन्नांगौ निर्भिंदंतौ परस्परं। ना-
कंपयेतामन्योन्यं यतमानौ महाद्युती। तत्प्रवृत्तं निशायुद्धं चिरं समसमिवाभवत्। प्राणयोर्दीव्यतो राजन्कर्णराक्षसयोर्मृधे। तस्य
संदधतस्तीक्ष्णाञ्छरांश्चासक्तमस्यतः। धनुर्घोषेण वित्रस्ताः स्वे परे च तदाभवन्। घटोत्कचं यदा कर्णो विशेषयति नो नृप

ततः प्रादुष्करोदस्त्रं दिव्यमस्त्रविदां वरः। कर्णेन विहितं दृष्ट्वा दिव्यमस्त्रं घटोत्कचः। पाण्डवानां महामायां राक्षसः पांडुनंदनः।
शूलमुद्गरधारिण्या शैलपादपहस्तया। रक्षसां घोररूपाणां महत्या सेनया वृतः॥ समुद्यतमहाचापं दृष्ट्वा तं व्यथिता नृपाः॥ कृ-
तांतकमिवायांतं कालदंडायुधधारिणं। घटोत्कचप्रमुक्तेन सिंहनादेन भीषिताः॥ प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नरा भृशं। त-
तोश्मवृष्टिरत्युग्रा महत्यासीत्समंततः। अर्धरात्रेधिकबलैर्विमुक्ता रक्षसां बलैः॥ आयसानि च चक्राणि भुशुंड्यः शक्तितोमरा-
ः। पतंत्यविरलाः शूलाः शतघ्न्यः पट्टिशास्तथा॥ तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिप। पुत्रास्तव च योधाश्च व्यथिता विप्रदुद्रुवुः।
तत्रैकोस्त्रबलश्लाघी कर्णो मानी न विव्यथे। व्यधमच्च शरैर्मायां घटोत्कचविनिर्मितां। मायायां तु प्रहीणायाममर्षात्स घटोत्क-
चः। विससर्ज शरान्घोरान्सूतपुत्रं त आविशन्। ततस्ते रुधिराभ्यक्ता भित्त्वा कर्णं महाहवे। विविशुर्धरणीं बाणाः संक्रुद्धा इव
पन्नगाः॥ सूतपुत्रस्तु संक्रुद्धो लघुहस्तः प्रतापवान्। घटोत्कचमतिक्रम्य बिभेद दशभिः शरैः॥ घटोत्कचो विनिर्भिन्नः सूतपुत्रेण मर्म-
सु। चक्रं दिव्यं सहस्रारमगृह्णाद्व्यथितो भृशं। क्षुरांतं बालसूर्याभं मणिरत्नविभूषितं। चिक्षेपाधिरथेः क्रुद्धो भैमसेनिर्जिघांस- २७८
या। प्रविद्धमतिवेगेन विच्छिन्नं कर्णसायकैः। अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि। घटोत्कचस्तु संक्रुद्धो दृष्ट्वा चक्रं निपातितं।

कर्णं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करं। सूतपुत्रस्त्वसंभ्रांतो रुद्रोपेंद्रेंद्रविक्रमः। घटोत्कचरथं तूर्णं छादयामास पत्रिभि-
ः। घटोत्कचेन क्रुद्धेन गदा हेमांगदा तदा। क्षिप्ता भ्राम्य शरैः सापि कर्णेनाभ्याहतापतत्। ततोंतरिक्षमुत्पत्य कालमेघ इवोन्नदन्।
प्रववर्ष महाकायो द्रुमवर्षं नभस्तलात्। ततो मायाविनं कर्णो भीमसेनसुतं दिवि। मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः। त-
स्य सर्वान्हयान्हत्वा संछिद्य शतधा रथं। अभ्यवर्षच्छरैः कर्णः पर्जन्य इव वृष्टिमान्। न तस्यासीदनिर्भिन्नं गात्रे द्व्यंगुलमंत-
रं। सोदृश्यत मुहूर्तेन श्वाविच्छललितो यथा। न हयान्न रथं तस्य न ध्वजं न घटोत्कचं। दृष्टवंतः स्म समरे शरौघैरभिसंवृतं। स
तु कर्णस्य तद्दिव्यमस्त्रमस्त्रेण शातयन्। मायायुद्धेन मायावी सूतपुत्रमयोधयत्। सोयोधयत्तदा कर्णं मायया लाघवेन च॥
अलक्ष्यमाणो दिवि शरजालान्निचापतन्। भैमसेनिर्महामायो मायया कुरुसत्तम। विचचार महाकायो मोहयन्निव
भारत। स तु कृत्वा विरूपाणि वदनान्यशुभानि च। अग्रसत्सूतपुत्रस्य दिव्यान्यस्त्राणि मायया। पुनश्चापि महाकायः संछिन्-
नः शतधा रणे। गतसत्त्वो निरुत्साहः पतितः खाद्व्यदृश्यत। तं हतं मन्यमानाः स्म प्राणदन्कुरुपुंगवाः। अथ देहैर्नवैरन्यैर्दिक्षु
सर्वास्वदृश्यत। पुनश्चापि महाकायः शतशीर्षः शतोदरः। व्यदृश्यत महाबाहुर्मैनाक इव पर्वतः। अंगुष्ठमात्रो भूत्वा च पुन-

द्रोण०

रवसराक्षसः।मार्गणैर्गिरिवौघैस्तैस्तिर्यगूर्ध्वमवर्त्तत।अदृश्यत तदा तत्र सुतनुरुक्मकिंसनात्पतत्।।सा बलीयस्तु नस्त्रस्तौरथे
देमुपरिस्कृता।क्षितिं खं च दिशःसर्वा मायया व्याप्य दंशितः।गत्वा कर्णरथं तूर्णं विचलत्कुंडलाननः।।प्राहवाक्यमसंभ्रांतः
स्सूतपुत्रं विशांपते।।तिष्ठेदानीं क्व मे जीवन्सूतपुत्र गमिष्यसि।।युद्धश्रद्धामहं तेद्य विनेष्यामि रणाजिरे।।इत्युक्त्वा रोषताम्राक्षःक्रू
रःक्रूरपराक्रमं।उत्पपातांतरिक्षं च जहास च सुविस्वरं।कर्णमभ्यहनच्चैव गजेंद्रमिव केसरी।रथाक्षमात्रैरिषुभिरभ्यव
र्षद्घटोत्कचः।रथिनामृषभं कर्णं धाराभिरिव तोयदः।शरवृष्टिं च तां कर्णो दूरात्प्राप्तामशातयत्।।दृष्ट्वा च विहतां मायां कर्णो
न नरर्षभ।।घटोत्कचस्ततो मायां ससर्जांतर्हितः पुनः।सोभवद्गिरिरत्युच्चःशिखरैस्तरुसंकटैः।।शूलप्रासासिमुसलजल-
बीदय प्रस्रवणो महान्।तमंजनचयप्रख्यं कर्णो दृष्ट्वा महीधरं।प्रपातैरायुधान्युग्राण्युद्वहंतं न चुक्षुभे।।स्मयन्निव ततः कर्णो दिव्यमस्त्रमु
दीरयत्।ततः सोस्त्रेण शैलेंद्रो विक्षिप्तो व्यनशत्तदा।ततः स तोयदो भूत्वा नीलः सेंद्रायुधो दिवि।अश्मवृष्टिभिरत्युग्रः सूतपुत्र
मवाकिरत्।अथ संधाय वायव्यमस्त्रमस्त्रविदां वरः।व्यधमत्कालमेघं तं कर्णो वैकर्तनो वृषः।।समार्गणगणैः कर्णो दिशः प्रच्छा २७५
द्य सर्वशः।अभ्यहनस्त्रं महाराज घटोत्कचसमीरितं।।ततः प्रहस्य समरे भैमसेनिर्महाबलः।प्रादुश्चक्रे महामायां कर्णं प्रति

महारथं।स दृष्ट्वा सुमहायांतं रथेन रथिनां वरं।घटोत्कचमसंभ्रांतं राक्षसैर्बहुभिर्वृतं।।सिंहशार्दूलसदृशैर्मत्तमातंगविक्र
मैः।गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैस्तथा।नानाशस्त्रधरैर्घोरैर्नानाकवचभूषणैः।वृतं घटोत्कचं क्रूरैर्मरुद्भिरिव वा
सवं।दृष्ट्वा कर्णो महेष्वासो योधयामास राक्षसं।घटोत्कचस्ततः कर्णं विद्ध्वा पंचभिराशुगैः।ननाद सुमहानादं भीषयन्सर्वपा
र्थिवान्।भूयश्चांजलिकेनाथ समार्गणगणं महत्।कर्णहस्तस्थितं चापं चिच्छेदाशु घटोत्कचः।।अथान्यद्धनुरादाय दृढं भारसहं
महत्।विचकर्ष बलात्कर्ण इंद्रायुधमिवोच्छ्रितं।।ततः कर्णो महाराज प्रेषयामास सायकान्।सुवर्णपुंखाञ्छत्रुघ्नान्खचरान्राक्ष
सान्प्रति।तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसां।सिंहेनेवार्दितं वन्यं गजानामाकुलं कुलं।।विधम्य राक्षसान्बाणैः साश्वसूत
गजान्विभुः।ददाह भगवान्वह्निर्भूतानीव युगक्षये।।स हत्वा राक्षसीं सेनां शुशुभे सूतनंदनः।पुरेव त्रिपुरं दग्ध्वा दिवि देवो
महेश्वरः।।तेषु राजसहस्रेषु पांडवेयेषु मारिष।नैनं निरीक्षितुमपि कश्चिच्छक्नोति पार्थिव।।ऋते घटोत्कचाद्राजन्राक्ष
सेंद्रान्महाबलात्।स हि भीमबलावेगः क्रुद्धो वैवस्वतो यथा।तस्य क्रुद्धस्य नेत्राभ्यां पावकः समजायत।महोल्काभ्यां यथा
राजन्सार्चिषः स्नेहबिंदवः।तलं तलेन संहत्य संदश्य दशनच्छदं।रथमास्थाय च पुनर्मायया निर्मितं तदा।युक्तं गजनिभैर्वाहैः पि

द्रोण० ग्रावक्रवदनैः खरैः। स रुतमब्रवीत्क्रुद्धः सूतपुत्रो यमोपमः। स योधारस्पेणाराधनरथिनां वरः। हिरण्यं स्तनतुत्रैरग उन
रव विशां पते। स विद्धे पदुनाः कुद्धस्त सुत्रायरास्तसाः। श्रेष्ठचक्रो महाघोरामस्ताग्नी दिवनिर्मितो। दिव्या जनसप्तश्रेष्ठां यया ज
नायाम विस्तारं। आयसीनि चितोस्थूलैः कदंबमिव केसरैः। नामवह्नु दयजनादकर्णोन्यस्यमद्दचुः। विक्षेप विनांतस्यैव स्पंद
नामोवयुसुरं। मास्थस्तध्वडं यानेन सकृत्वा महावना। विवेश वसुधं निवाखुरास्तत्र विनिर्भिद्युः। कर्णस्य सर्वन्हुतानि हृजया
मासुरोजसा। यद्वत्तुल्पगशादेवसृष्टं महाशानी। एवं कृत्वा रणे कर्म द्रौणिकारादरयष्टुतः। ततो मुमोच नाराचान्स्फुरतः सुतुः प
रंतपः। कृत्वा कर्मे कर्तुमन्येन सर्वे न्हते सुमानवः। यदकार्षीत्तदा कर्णः संग्रामभीमदर्शने। स हन्यमानो नाराचैर्धाराभिरिव पर्व
तः। गंधर्वनगराकारः सुनरंतरधीयत। एवं स मानमहामायो मायया लाघवेन च। अस्त्राणि तानि दिव्यानि जघान रिपुसूदनः। नि
हन्यमानश्चास्त्रेषु मायया तेन रक्षसा। असंभ्रांतस्तदा कर्णस्तद्रक्षःप्रत्ययुध्यत। ततः क्रुद्धो महाराज भैमसेनिर्महाबलः॥
चकार बहुधात्मानं भीषयाणो महारथान्। ततो दिव्यः समापेदे सिंहव्याघ्रतरक्षवः। अग्निजिह्वाश्च भुजगा विहगाश्चाप्ययो २८०
मुखाः। स कीर्यमाणो विशिखैः कर्णचापच्युतैस्तदा। नगराडिव नष्टस्तत्रैवांतरधीयत। राक्षसाश्च पिशाचाश्च

यातुधानास्तथैव च। शालावृकाश्च बहवो वृकाश्च विकृताननाः। ते कर्णं भक्षयिष्यन्तः सर्वतः समुपाद्रवन्। अथैनं वाग्भि
रुग्राभिस्त्रासयांचक्रिरे तदा। उद्यतैर्बहुभिर्घोरैरायुधैः शोणितोक्षितैः। तेषामनेकैरेकैकं कर्णो विव्याध सायकैः। प्रतिह
त्य तु तां मायां दिव्येनास्त्रेण राक्षसीं। आजघान हयानस्य शरैः सन्नतपर्वभिः। ते भग्ना विकृतांगाश्च छिन्नपृष्ठाश्च सायकैः। व
सुधामन्वपद्यन्त पश्यतस्तस्य रक्षसः। स भग्नमायो हैडिंबः कर्णं वैकर्तनं तदा। एष ते विदधे मृत्युमित्युक्त्वांतरधीयत॥ ॥
द्रोणपर्वणि रात्रियुद्धे घटोत्कचयुद्धे॥ ॥संजय उवाच॥ ॥तस्मिंस्तथा वर्तमाने कर्णराक्षसयोर्मृधे। अलायुधो राक्षसे
न्द्रो वीर्यवानभ्यवर्तत। महत्या सेनया युक्तो दुर्योधनमुपागमत्। राक्षसानां विरूपाणां सहस्रैः परिवारितः। नानारूपधरैर्घोरै
ः पूर्ववैरमनुस्मरन्। तस्य ज्ञातिर्हि विक्रांतो ब्राह्मणादो बकोहतः। किर्मीरश्च महातेजा हिडिंबश्च सखा तदा। स दीर्घकाला
ध्युषितं ज्ञातिवैरमनुस्मरन्। विज्ञायैतन्निशायुद्धं जिघांसुर्भीममाहवे। स मत्त इव मातंगः संक्रुद्ध इव चोरगः। दुर्योधनमि
दं वाक्यमब्रवीद्युद्धलालसः। विदितं ते महाराज यथा भीमेन राक्षसाः। हिडिंबबककिर्मीरा निहता मम बांधवाः। परामर्शश्च क
न्यायाः हिडिंबायाः कृतः पुरा। किमन्यद्राक्षसानन्यानस्मांश्च परिभूय हि। तमहं सगणं राजन्सवाजिरथकुंजरं। हैडिंबं च सहामा

द्रोण० त्वंहंतुमभ्यागतःस्वयं।अहंकुंतीसुतान्सर्वान्वासुदेवपुरोगमान्।हत्वासंभक्षयिष्यामिसर्वैरनुचरैःसह।निवारयबलं
सर्वंवयंयोत्स्यामिपांडवान्।तस्यतद्वचनंश्रुत्वाहृष्टोदुर्योधनस्तदा।प्रतिगृह्याब्रवीद्वाक्यंभ्रातृभिःपरिवारितः।त्वांपुरस्कृत्य
सगणंवयंयोत्स्यामहेपरान्।नहिवैरांतमनसःस्थास्यंतिममसैनिकाः।एवमस्त्वितिराजानमुक्त्वाराक्षसपुंगवः।अभ्यया
त्त्वरितोभीमंसहितःपुरुषाशनैः।दीप्यमानेनवपुषारथेनादित्यवर्चसा।तादृशेनैवराजेंद्रयादृशेनघटोत्कचः।तस्याप्यतु
लनिर्घोषोबहुतोरणचित्रितः।ऋक्षचर्मावनद्धांगोनल्वमात्रोमहारथः।तस्यापितुरगाःशीघ्राहस्तिकायाःखरस्वनाः।शतंयुक्तामहा
कायाःमांसशोणितभोजनाः।तस्यापिरथनिर्घोषोमहामेघरवोपमः।तस्यापिसुमहच्चापंदृढज्यंकनकोज्ज्वलं।तस्याप्यक्षसमाबा
णारुक्मपुंखाःशिलाशिताः।सोपिवीरोमहाबाहुर्यथैवसघटोत्कचः।तस्यापिगोमायुबलाभिगुप्तोवह्न्यर्ककेतुर्ज्वलनार्कतु
ल्यः।सचापिरूपेणघटोत्कचस्यश्रीमत्तराव्याकुलदीपितास्यः।दीप्तांगदोदीप्तकिरीटमालीबद्धस्रगुष्णीषनिबद्धखड्गः।गदीभु
शुंडीमुसलीहलीचशरासनीवारणतुल्यवर्ष्मा।रथेनतेनानलवर्चसातंविद्रावयन्पांडववाहिनींतां।रराजसंख्येपरिवर्त
मानोविद्युन्मालीमेघइवांतरिक्षे।तेचापिसर्वेप्रवरानरेंद्रामहाबलावर्मिणश्चर्मिणश्च।हर्षान्वितायुयुधुस्तत्रराजन्समंततःपांडवयो २८१
व्याकुलंचेचलंदीप्तंसज्वालंचास्ययस्या॥ ॥

धवीराः॥ ॥द्रोणपर्वणिरात्रियुद्धे॥ ॥संजयउवाच॥ ॥तमागतमभिप्रेक्ष्यभीमकर्माणमाहवे।हर्षमाहारयां
चक्रुःकुरवःसर्वएवते।तथैवकुरवासर्वेदुर्योधनपुरोगमाः।अप्लवाःप्लवमासाद्यतर्तुकामाइवार्णवं।पुनर्जात
मिवात्मानंमन्वानाःपुरुषर्षभाः।अलायुधंराक्षसेंद्रंस्वागतेनाभ्यपूजयन्।तस्मिंस्त्वमानुषेयुद्धेवर्तमानेभया
वहे।कर्णराक्षसयोर्नक्तंदारुणप्रतिदर्शने।उपप्रैक्षंतपांचालाःस्मयमानाःसराजकाः।तथैवतावकाराज
न्वीक्षमाणास्ततस्ततः।चुक्रुशुर्नेदमस्तीतिद्रोणद्रौणिकृपादयः।तत्कर्मदृष्ट्वासंभ्रांतंहैडिंबस्यरणाजिरे।सर्वमाविग्नम
भवद्धाहाकारमचेतनं।तवसैन्यंमहाराजनिराशंकर्णजीविते।दुर्योधनस्तुसंप्रेक्ष्यकर्णमार्तिंपरांगतं।अलायुधंरा
क्षसेंद्रंसमाहूयेदमब्रवीत्।एषवैकर्तनःकर्णोहैडिंबेनसमागतः।कुरुतेकर्मसुमहद्यदस्यौपयिकंमृधे।पश्यैतान्
पार्थिवान्शूरान्निहतान्भैमसेनिना।नानाशस्त्रैरभिहतान्पादपानिवदंतिना।तवैषभागःसमरेराजमध्येमयाकृतः।त
वैवानुमतेवीरतंविक्रम्यनिबर्हय।पुराविकर्तनंकर्णमेषपापोघटोत्कचः।मायाबलंसमाश्रित्यकर्शयत्यरिकर्शन।
स एवमुक्तःसराज्ञातुराक्षसस्तीव्रविक्रमः।तथेत्युक्त्वामहाबाहुर्घटोत्कचमुपाद्रवत्।ततःकर्णंसमुत्सृज्यभैमसे
निरपिप्रभो।प्रत्यमित्रमुपायांतमर्दयामाससमार्गणैः।तयोःसमभवद्युद्धंक्रुद्धयोराक्षसेंद्रयोः।मत्तयोर्वासितेहेतो

खरयोनयस्तीक्ष्णाग्रकृतयः॥ विशिखांस्तु विशिखायाःस॥

द्रो० द्विपयोरिव कानने। रक्षसा विप्रमुक्तस्तु कर्णो विरथिनां वरः। अन्य इवङ्गीमासनं रथेनादित्यवर्चसा॥ तमायांतमनाहत्य
दृष्ट्वा युद्धं घटोत्कचं। अलायुधेन समारब्धं सिंहेन वागवापतिं। राक्षसेनादित्यवक्षुषा भीमः प्रवृत्तो वरः। किरन् रोघान्वयायाव
लायुधरथं प्रति। तमायांतमभिप्रेक्ष्य संततालायुधः शरैः। घटोत्कचं समुत्सृज्य भीमसेनं समाह्वयत्। भीमः सहसा त
भ्यत्य राक्षसांतकरः प्रभो। सगणं राक्षसेन्द्रं महारवर्षैरवाकिरत्। तथैवालायुधो राजन् शिलाधौतैरजिह्मगैः। अभ्यव
र्षत कौंतेयं पुनः पुनररिंदमः। तथा ते राक्षसाः सर्वे भीमसेनमुपाद्रवन्। नानाप्रहरणा भीमास्त्वत्सुतानां जयैषिणः।
पंचभिः सताड्यमानो बहुभिर्भीमसेनो महाबलः। पंचभिः सर्वांस्तान्विव्याध शितैः शरैः। तद्वध्यमाना भीमेन राक्षसाः खरयोनयः॥
विनेदुस्तुमुलान्नादान्दुद्रुवुश्च दिशो दश। तांस्त्रास्यमानान्भीमेन दृष्ट्वा रक्षो महाबलः। अभिदुद्राव वेगेन शरैरभ्य
नमवाकिरत्। तं भीमसेनः समरे तीक्ष्णाग्रैरर्दयच्छरैः। अलायुधस्तु तानस्त्रान्भीमेन विशिखान् रणे। चि
च्छेद कांश्चित्समरे त्वरया कांश्चिदग्रहीत्। स तं दृष्ट्वा राक्षसेन्द्रं भीमो भीमपराक्रमः। गदां चिक्षेप वेगेन वज्र २८२
पातोपमां तदा। तामापतंतीं वेगेन गदां ज्वालाकुलां तदा। गदयाताडयामास सा गदा भीममाव्रजत्। स राक्षसेन्द्रः कौंतेयं शर

पदंसाहाय्यकं॥

वर्षैरवाकिरत्। तामप्यस्याकरोन्मोघां त्वरमाणो निशितैः शरैः। ते चापि राक्षसाः सार्वरजन्यां भीमरूपिणः। शासना
द्राक्षसेन्द्रस्य निजघ्नुरथकुंजरान्। पांचालाः सृंजयाश्चैव वाजिनः परमद्विपाः। न शांतिं लेभिरे तत्र राक्षसैर्भृशपीडिताः॥
तं तु दृष्ट्वा महाघोरं वर्तमानं महाहवं। अब्रवीत्पुंडरीकाक्षो धनंजयमिदं वचः। पश्य भीमं महाबाहो राक्षसेन्द्रवशं गतं। प
दमस्यानुगच्छ त्वं मा विचारय पांडव। धृष्टद्युम्नः शिखंडी च युधामन्यूत्तमौजसौ। सहिता द्रौपदेयाश्च कर्णं यांतु महारथाः॥
नकुलः सहदेवश्च युयुधानश्च वीर्यवान्। इतरान् राक्षसान् घ्नंतु शासनात्तव पांडव। त्वमपीमां महाबाहो चमूं द्रोणपुरस्कृ
तां। वारयस्व नरव्याघ्र महद्धि नो भयमागतं। एवमुक्ते तु कृष्णेन पार्थोद्दिष्टा महारथाः। जग्मुर्वैकर्तनं कर्णं राक्षसांश्चेतरान् र
णे। अथ पूर्णायतोत्सृष्टैः शरैराशीविषोपमैः। धनुश्चिच्छेद भीमस्य राक्षसेन्द्रः प्रतापवान्। हयांश्चास्य शितैर्बाणैः स
रा रथिं च महाबलः। जघान मिषतः संख्ये भीमसेनस्य संयुगे। सोवतीर्य रथोपस्थाद्धताश्वो हतसारथिः। तस्मै गुर्वीं गदां घो ७
रां विनदन्सुमहत्क्रुद्धः। ततस्तां भीमनिर्घोषामापतंतीं महागदां। गदया राक्षसो घोरो निजघान ननाद च। तद्दृष्ट्वा राक्ष
सेन्द्रस्य घोरं कर्म भयावहं। भीमसेनः प्रहृष्टात्मा गदामाशु परामृशत्। तयोः समभवद्युद्धं तुमुलं नररक्षसोः। ग
दानिपातसंह्रादैर्भुवं कंपयतां भृशं। गदाविमुक्तौ तौ भूयः समासाद्येतरेतरं। मुष्टिभिर्वज्रसंह्रादैरन्योन्यमभिजघ्न

त्तः॥ रथचक्रैर्युगैरक्षैरधिष्ठानैरुपस्करैः॥ यथामनस्तथादाय निघ्नन्तु नरपुंगवाः॥ तौ विस्रवंतौ रुधिरं समासाद्येतरेतरं। म
त्ताविव महानागौ चकर्षाते पुनः पुनः॥ ततोपश्यद्धृषीकेशः पांडवानां हिते रतः। स भीमसेनरक्षार्थं हैडिंबं पर्य्यचोदयत्
॥ ॥द्रोणपर्व्वणि रात्रियुद्धे घटोत्कचवधे॥ ॥संजय उवाच॥ संप्रेक्ष्य समरे भीमं राक्षसग्रस्तमन्तिकात्। वासुदेवो
ऽब्रवीद्राजन् घटोत्कचमिदं वचः॥ पश्य भीमं महाबाहो रक्षसा ग्रस्तमाहवे। पश्यतां सर्व्वसैन्यानां तव चैव महाद्युत
।स कर्णं त्वं च संत्यज्य राक्षसेंद्रमलायुधं। जहि क्षिप्रं महाबाहो पश्चात्कर्णं वधिष्यसि। स वार्ष्णेयवचः श्रुत्वा कर्णमु
त्सृज्य वीर्य्यवान्। युयुधे राक्षसेंद्रेण बकभ्रात्रा घटोत्कचः। तयोः सुतुमुलं युद्धं बभूव निशि रक्षसोः। अलायुधस्य चैवा
ग्र्य हैडिंबस्य च भारत। अलायुधस्य योधांस्तु राक्षसान्भीमदर्शनान्। वेगेनापततः शूरान्प्रगृहीतशरासनान्॥ आ
त्तायुधः सुसंक्रुद्धो युयुधानो महारथः। नकुलश्च सहदेवश्च विव्यधुर्निशितैः शरैः। सर्व्वांश्च समरे राजन्किरीटी क्ष
त्रियर्षभान्। परिचिक्षेप बीभत्सुः सर्व्वतः प्राक्षिपद्रणात्। कर्णश्च समरे राजन्व्यद्रावयत पार्थिवान्। धृष्टद्युम्नशिखंड्यादी
न्पांचालानां महारथान्। तान्वध्यमानान्दृष्ट्वा तु भीमो भीमपराक्रमः। अभ्ययाद्वै रितः कर्णं विशिखान्प्रकिरन्रणे। त २८३
तस्त एवाययुर्हत्वा राक्षसान्यत्र सूतजः। नकुलः सहदेवश्च सात्यकिश्च महारथः। ते कर्णं योधयामासुः पांचाला द्रोण

पिनाकैश्च त्रिशूलैः करवालैः पृथुधारैः॥

मब्रवीत्। अलायुधस्तु संक्रुद्धो घटोत्कचमरिंदमं। परिघेण विकृष्याथ ताडयामास मूर्द्धनि। स तेन प्रहारेण भैमसेनिर्म
हाबलः। ईषन्मूर्च्छितमात्मानं संस्तंभयत वीर्य्यवान्। ततो दीप्ताग्निसंकाशां शतघंटामलंकृतां। चिक्षेप तां समरे गदां कां
चनभूषितां। सा हयांश्च रथं चास्य सारथिं च महास्वना। चूर्णयामास वेगेन विसृष्टा भीमकर्म्मणा। स हतं रथमुत्सृज्य चक्रा
द्भिर्बधिरावरात्। उत्पपात रथात्तूर्णं मायामास्थाय राक्षसीं। स समास्थाय मायां तु ववर्ष रुधिरं बहु। विद्युच्छिन्नाभ्रितं
चासीत्तिमिराकुलं नभः। ततो वज्रनिपाताश्च साशनिस्तनयित्नवः। महांश्चटचटाशब्दस्तत्रासीद्धि महाहवे। तां प्रेक्ष्य
महतीं मायां राक्षसो राक्षसं प्रति। ऊर्द्ध्वमुत्पत्य हैडिंबस्तां मायां मायया वधीत्। सोऽभिवीक्ष्य हतां मायां मायावी मायया च व
हि। अश्मवर्षं सुतुमुलं विससर्ज घटोत्कचे। अश्मवर्षं स तद्धोरं शरवर्षेण वीर्य्यवान्। दिशो विध्वंसयामास तदद्भुत
मिवाभवत्। ततो नानाप्रहरणैरन्योन्यमभिवर्षतां। आयसैः परिघैः शूलैर्गदामुसलमुद्गरैः। पिनाकैः करवालैश्च
तोमरप्रासकंपनैः। नाराचैर्निशितैर्भल्लैः शरैश्चक्रैः परश्वधैः। अयोगुडैर्भिंदिपालैर्गोशीर्षोलूखलैरपि। उत्पाटि
तैर्महाशाखैर्विविधैर्जगतीरुहैः। शमीपीलुकरीरैश्च शंपकैश्चैव भारत। इंगुदैर्बदरीभिश्च कोविदारैश्च पुष्पितैः॥

विक्षिरवः विशिखाग्रैः॥

द्रो० पल्लाशो रारिमेदिन्यास्तत्र सन्मयो धपिप्पलैः॥ स कृच्छ्रिः समरतस्मिन्नन्योन्यमभिजघ्नतुः॥ विचुलैः पर्वताग्रैश्च नानाधातुविराजितैः॥
तेषां शब्दो महानासीद्वज्राणामिव भिद्यतां॥ युद्धं तद्भवद्घोरं भीमालायुधयोर्नृप॥ हरीन्द्रयोर्यथा राजन्वालिसुग्रीवयोः पु
रा॥ तौ मुहूर्त्तं विविधैर्घोरैरायुधैर्विशिखैस्तथा॥ प्रगृह्य निशितौ खड्गावन्योन्यमभिपेततुः॥ तावन्योन्यमभिद्रुत्य केशेषु
सुमहाबलौ॥ भुजाभ्यां पर्यकर्षेतां महाकायौ महाबलौ॥ तौ स्विन्नगात्रौ प्रस्वेदं सुस्रुवाते जनाधिप॥ रुधिरं च महाका
यावभिवृष्टाविवाचलौ॥ अथाभिपत्य वेगेन समुद्भ्राम्य च राक्षसं॥ बलेनाक्षिप्य हैडिंबश्चकर्तास्य शिरो महत्॥ सोऽपकृत्य
शिरस्तस्य कुंडलाभ्यां विभूषितं॥ तदा सुतुमुलं नादं ननाद सुमहाबलः॥ हतं दृष्ट्वा महाकायं बकज्ञातिमरिंदमं॥ पांचाला
ः पांडवाश्चैव सिंहनादान्विनेदिरे॥ ततो भेरीसहस्राणि शंखानामयुतानि च॥ अवादयन्पांडवेयास्तस्मिन्निहते युधि॥
अतीव सा निशा तेषां बभूव विजयावहा॥ विद्योतमाना विबभौ समंताद्दीपमालिनी॥ अलायुधस्य तु शिरो भीमसेनिर्महा
बलः॥ दुर्योधनस्य प्रमुखे चिक्षेप गतचेतसः॥ अथ दुर्योधनो राजा दृष्ट्वा हतमलायुधं॥ बभूव परमोद्विग्नः सह सैन्येन भारत॥ तेन ह्यस्य २८४
प्रतिज्ञातं भीमसेनमहं युधि॥ हंतेति स्वयमागम्य स्मरता वैरमुत्तमं॥ ध्रुवं स तेन हंतव्य इत्यमन्यत पार्थिवः॥ जीवितं चिरकालाय

इति अलायुधवधः॥ ॥स्तनयित्नुस्तनितं धनुष्येव तडिन्मंडलं यत्र॥ केनवो धृजाख्यसंगानि कोटरो यत्र॥

भ्रातॄणां चाप्यमन्यत॥ स तं दृष्ट्वा विनिहतं भीमसेनात्मजेन वै॥ प्रतिज्ञां भीमसेनस्य पूर्णामेवाप्यमन्यत॥ द्रोणपर्वणि रात्रियु
द्धेऽलायुधवधः॥ ॥संजय उवाच॥ निहत्यालायुधं रक्षः प्रहृष्टात्मा घटोत्कचः॥ ननाद विविधान्नादान्वाहिन्याः प्रमुखे
तव॥ तस्य तं तुमुलं शब्दं श्रुत्वा कुंजरकंपनं॥ तावकानां महाराज भयमासीत्सुदारुणं॥ अलायुधं विसक्तं तु भीमसेनिं महाब
लं॥ दृष्ट्वा कर्णो महाबाहुः पांचालानभ्युपाद्रवत्॥ दशभिर्दशभिर्बाणैर्धृष्टद्युम्नशिखंडिनौ॥ दृढैः सुसायतैः क्रूरैर्बिभे
द नतपर्वभिः॥ ततः परमनाराचैर्युधामन्यूत्तमौजसौ॥ सात्यकिं च रथोदारं कंपयामास मार्गणैः॥ तेषामप्यस्यतां संख्ये स
र्वेषां सव्यदक्षिणं॥ मंडलान्येव चापानि व्यदृश्यंत नराधिप॥ तेषां ज्यातलनिर्घोषो रथनेमिस्वनैश्च ह॥ मेघानामिव घर्मांते बभू
व तुमुलो निशि॥ ज्यानेमिघोषस्तनयित्नुमान्वै धनुस्तडिन्मंडलकेतुशृंगः॥ शरौघवर्षाकुलवृष्टिमांश्च संग्राममेघः स
बभूव राजंस्तद्द्भुतं शैल इवाप्रकंप्यो वर्षं महाशैलसमानसारः॥ विध्वंसयामास रणे नरेंद्र वैकर्त्तनः शत्रुगणानमेयः॥ त
तोऽर्गलैर्वज्रनिपातकल्पैः शितैः शरैः कांचनचित्रपुंखैः॥ शत्रून्व्यपोहन्समरे महात्मा वैकर्त्तनः पुत्रहिते रतस्ते॥ संछि
न्नध्वजिनश्च केचित्केचिच्छरैः सव्यहितनिनादहताः॥ केचिद्विक्षिप्ता विद्ध्याश्च केचिद्वैकर्त्तनेनाशु कृता बभूवुः॥ अविंदमा

दंडासना दंडाकारफलकाः॥ विपाठश्रृंगे॥ विपाठेन्नामेः॥ विचेरुस्तुराद्यादितवंतो॥

द्रो० नास्त्रघ्नसर्मसि स्वेयो धिष्ठिरांतबलमन्वपद्यत॥ तान्मेद्यमानमालोक्य सुखीकृतांश्च घटोत्कचो॥ राक्षसतीव चक्रे॥ आस्थाय तं कांच
नरथं नादं विकर्त्तनं कर्णमुपेत्य संख्ये विव्याध वज्रप्रतिमैः पृषत्कैः॥ नो कर्णिनालीकशिलीमुखैश्च नाराचवरं डासनवत्स
दंतैः॥ वराहकर्णैर्मविपाठशृंगैः क्षुरप्रवर्षैश्च ववर्षत खं॥ तद्बाणधारावृतमंतरिक्षं तिर्यग्गतानिःसमरेराजत्सुव
र्णपुंखज्वलितप्रभाणि विविचित्र पुष्पाणि रिवस्रजानि॥ समं मंदिता वप्रतिमप्रभावावन्योन्यमाजघ्नतुरुत्तमास्त्रैः॥ तयो
र्हि वीरात्तमयोर्न कश्चिद्ददर्श तस्मिन्समरे विशेषं॥ अतीवतच्चित्रमतुल्यरूपं बभूव युद्धं रविनामसूनोः॥ समाकुलं
शस्त्रनिपातयोरं दिवीवराहुंश्चमतोः प्रसह्य॥ घटोत्कचं यदा कर्णो न विशेषयते रणे॥ ततः प्रादुश्चकारोग्रमस्त्रमस्त्र
विदांवरः॥ तेनास्त्रेणावधीत्तस्य रथं सहयसारथिं॥ विरथश्चापि हिडिंबः क्षिप्रमंतरधीयत॥ ॥धृतराष्ट्र उवाच॥ ॥त
स्मिंस्तर्हि तिरोभूते कूटयोधिनि राक्षसे॥ मामकैः प्रतिपन्नं यत्तन्ममाचक्ष्व संजय॥ ॥संजय उवाच॥ ॥अंतर्हितं राक्ष
सं दृष्ट्वा विदित्वा संप्राक्रोशन्कुरवः सर्व एव॥ कथं नायं राक्षसः कूटयोधी हन्यात्कर्णं समरे दृश्यमानः॥ ततः कर्णो लघु
चित्रास्त्रयोधी सर्वा दिशः प्रावृणोद्बाणजालैः॥ नाचैकिंचित्पापतत्तेन द्युतं तमोभूते सायकैरंतरिक्षे॥ नैवाददानं न च संदधा २८५

क्षुरानिरुक्तोभेदः॥

नो न चेषुधीस्पृशमानः कराग्रैः॥ नदृश्यपत्तलाघवात्सूतपुत्रः सर्वं बाणैः स्थादयानांतरिक्षं॥ ततो मायां दारुणामंतरिक्षे
घोरां भीमां विहितां राक्षसेन दृष्यतीमग्निशिखामिवोग्रां॥ ततोनास्त्रस्याविद्युतः प्रादुरास
न्नुल्काश्चापि ज्वलिताः कौरवेंद्र॥ घोषश्चान्यः प्रादुरासीत्सुघोरः सहस्रशो दुंदुभीनां नदतां॥ ततः शराः प्रापतन्रुक्मपुं
खाः शक्त्यृष्टिप्रासमुसलान्यायुधानि॥ परश्वधास्तैलधौताश्च खड्गाः प्रदीप्ताग्राः पट्टिशाः तोमराश्च॥ मयूखिनः परिघा लो
हबद्धा गदाश्चित्राः शितधाराश्च शूलाः॥ गुर्व्यो गदा हेमपट्टाववद्धाः शतघ्न्यश्च प्रादुरासन्समंतात्॥ महाशिलाश्चापतंस्तत्र
तत्र सहस्रशः साशनयश्च वज्राः॥ चक्राणि चानेकशतक्षुराणि प्रादुर्बभुर्ज्वलनप्रभाणि॥ तां शक्तिपाषाणपरश्वधानां
प्रासासिवज्राशनिमुद्गराणां॥ वृष्टिं विशालां ज्वलितां पतंतीं कर्णः शरौघैर्न शशाक हंतुं॥ शराहतानां पततां हयानां वज्राह
तानां च तदा गजानां॥ शिलाहतानां च महारथानां महान्निनादः पततां बभूव॥ सुभीमनानाविधशस्त्रपातैर्घटोत्कचेनाभिह
तं समंतात्॥ दौर्योधनं तद्बलमार्तरूपं मावर्तमानं ददृशे भ्रमंतं॥ हाहाकृतं संपरिवर्तमानं संलीयमानं च विषण्णरूपं॥ ते
त्वार्यभावात्पुरुषप्रवीराः पराङ्मुखा नाभवन्युद्धकाले॥ तां राक्षसीं घोरतमां सुभीमां वृष्टिं महाशस्त्रमयीं पतंतीं॥ दृष्ट्वा
बलौघांश्च निपात्यमानान्महद्भयं तव पुत्रानाविवेश॥ शिवाश्च वैश्वानरदीप्तजिह्वाः सुभीमनादाः शतशो नदंति॥ रक्षोगणाः

कदमलंबानसुकालास्पृष्टेदेवोपनीतः॥ विडवेनंग॥ नपष्टपंनाशिनवंतः॥ राक्षसस्येति कर्म्मणि षष्टी॥

द्रोण०
न ईतश्चापि वाह्यनारं ड्योधनम्पिनावन्नुवु॥ ततोसतिका ततनीहा दंष्ट्रा विन्नावणाः॥ शैलनिकाशकायाः॥ नन्नोगनाःश
क्तिविषक्तदस्नाम्मघाविद्धेच निवद्धश्चिमंगी॥ तेराहत्नास्त्वरारशक्तिस्त्रैगदा निरुग्यैः परिघैश्च दीप्तैः॥ वज्रैः पिनाकैरशनि
घहारेशतघ्निचक्रैमीथतास्त्रापतः॥ ङ्गला तुत्युपोममुराः॥ ग्रातम्प्यःस्तूणाश्चकास्यमपहनद्यः॥ अथाकिरंस्तवत्तरस्पमे
न्यंततोरोइंकदमलंषाउरामीत्॥ निक्रोसोत्रा विद्ततेरुनमांसोःसंमयास्त्रोःशिउषारतत्रस्पराः॥ छिन्नादेयाःकुंजराश्चापितत्राःस
न्नसिताश्चैवतथाशिलाभिः॥ एवंमहत्वयुष्वर्षम्नंनतस्पैयातुधनानीविघोररूपाः॥ मायास्त्रष्टास्त्रत्रघटोत्कचेनतास्तुचवेयाच
मानंनमात्॥ तस्मिन्घोरेकुरुवारचेमाहकालोऽस्पेद्स त्रियाणामनावा॥ ततिभिन्नाःस्महसामयद्वंतप्राक्रोशंतकुरवः सर्वएव॥
पलायध्वं कुरवोनेतदस्ति सैन्यद्राव्वाघ्नंति न पांडवाख्ये॥ तथा निपांमज्जतां तारवकानां तस्मिन्नापःस्वन्तउत्तोबभूव॥ तस्मिन्नां
कंदेउसुलेव्रमानाससैन्यमनेलायमानकरणाश्चनीकानांच विनासायकाबानज्ञाधृतकौरवोतेनाग्वा॥ निम्मा
यांदविडवेघोररूपेमवादिशःप्रेक्ष्यमाणाःस्मशून्याः॥ तेनाशास्तु वृष्टिस्तुरस्माणादमानंकर्णास्मिकंतत्रराजन्नपश्यत्॥ ततो
बाणौराहतोदंतरिन्संदिव्यांमायांप्राधंयत्रादसप्रक्रामात्सकवन्नस्करंचार्यकर्म्म निवाक्षुद्यस्त्रंक्षाराःस्तुवत्रः॥
ततोमीताःसमुदेक्षतकर्णराजन्सर्वेसिंधवाबाल्किकाश्च॥ २८६

विजयंतो विजयपताकोपमा॥

अथमामादृष्टजयंताःध्यपसंख्येना पश्यत्वै विजयंराक्षसस्य॥ ततोक्तष्वास्त्रकयुक्ताःशतघ्नीःसमसर्वांश्चतुरगाश्चाजघान॥
नेजानुभिर्क्षगतामथपश्यच्चघरागतास्सवोनिर्ईशानास्त्रिजिदाः॥ ततोहताश्चारदवमद्यगानादंनमेनाःकुरुषपांडवस्तु॥ हिव्येवा
स्त्रमायया वध्यमानानिवाप्तुध्यवितथन्यासकालं॥ ततोत्नुवरःकुरवःसर्वएवकर्णहष्ट्वा घोररूपांचमायां॥ शक्त्यारेसोऽहि
कर्णोद्यरुत्सैनष्पत्यात कुरवोध्ननेराष्ट्राः॥ करिष्यतःकिंचनापार्थोनमौनपंतम नंज हिपापविशीप्याप्यानःसंग्रामाकोर
रूपाहिमुच्येमनःपार्थान्मबलान्याधयेत॥ तस्माद्रनरक्षसंघोररूपंजहिशक्त्यादत्तयावामवेन॥ माकौरवाःसर्वएवेहक
ल्याराविमुद्धेकर्णोनस्तुःसयोधाः॥ सवध्यमानोरक्षसावेनिशीथेहष्ट्वा राजन्त्रास्यमानंवलंच॥ महत्सुत्स्वानिनदंकौरवाणां
मतिंदधेशक्तिमोक्षायकर्णः॥ सवैकुद्धःसिंहइवात्यमर्षीनामर्षयत्प्रतिघातंरणेन॥ शक्तिंश्रेष्ठांविजयंतीमसह्यांसमा
ददेतस्यवधंचिकीर्षन्॥ यासोराजन्निहितावर्षपूगाद्वधायाजौसत्कृतापाल्गुनस्य॥ यांवैप्रादात्सूतपुत्रायशक्रःश
क्तिंश्रेष्ठांकुंडलाभ्यांनिमाय॥ तांवैशक्तिंलेलिहानांप्रदीप्तांपाशैर्युक्तांमंतकस्येवरात्रिं॥ मृत्योःस्वसारं ज्वलि
ताभिवोल्कांवैकर्तनःप्राहिणोद्राक्षसाय॥ तामुत्तमांपरकायापहंतींहष्ट्वासौतबाहुसंस्थांज्वलंतीं॥ भीतंरक्षोवि
दुद्राव राजन्कृत्वात्मानं विंध्यतुल्यप्रमाणं॥ हष्ट्वाशक्तिंकर्णबाहांतरस्थानेदुर्भूतान्यंतरिक्षेनरेंद्र॥ ववुर्वाता

द्रोण°

तुमुलाश्चंडा॥गांत्वसिंच्यंतराणिलोकान्॥विस्मयंसमावर्नावीक्ष्याश्चर्यमनंतरमुत्तमंसर्वे॥विनिःक्रोनिर्गतजिष्णुः॥ इतिघटो
त्कचस्तुलाश्चापिराजन्ननिर्घातोवाशनिर्गांजगाम। साताम्मायांभस्मकृत्वाज्वलंतीभित्वागाढंहृदयंराक्षसस्य। ऊर्द्ध्वंययौदीप्य
मानानिशायांनक्षत्राणामंतराण्याविशंती। युद्ध्वाशस्त्रैर्विविधैरस्त्रसंघैर्वीरान्नागान्रथवाजिसंघान्। नदन्नादान्वि
विधान्भैरवांश्चप्राणानिष्टांस्त्याजितःशक्रशक्त्या। इदंचान्यच्चित्रमाश्चर्यरूपंचकाराशौकर्मशत्रुक्षयाय। तस्मि
न्कालेशक्तिनिर्भिन्नमर्माबभौराजन्मेघशैलप्रकाशः॥ ततोंतरिक्षादपतद्गतासुःसराक्षसेंद्रोभुविभिन्नदेहः। अवा
क्शिराःस्तब्धगात्रोविजिह्वोघटोत्कचोमहदास्थायरूपं। सतद्रूपंभैरवंभीमकर्माभीमंकृत्वाभैमसेनिःपपात। हतोप्ये
वंतवसैन्यैकदेशमपोथयत्स्वेनदेहेनराजन्। ततोमिश्राःप्राणदन्सिंहनादैर्भेर्यःशंखामुरजाश्चानकाश्च। दग्धांमायां
निहतंराक्षसंचदृष्ट्वाहृष्टाःप्राणदन्कौरवेयाः। ततःकर्णःकुरुभिःपूज्यमानोयथाशक्रोवृत्रवधेमरुद्भिः। अन्वारूढस्तवपुत्रं
रथस्थंरुधन्नापिप्राविशत्स्वंससैन्यं॥ ॥इतिमहाभारतेद्रोणपर्वणिघटोत्कचवधः॥ ॥संजयउवाच॥ ॥
हैडिंबंनिहतंदृष्ट्वाविशीर्णमिवपर्वतं। बभूवुःपांडवाःसर्वेशोकबाष्पाकुलेक्षणाः। वासुदेवस्तुहर्षेणमहताभिप
रिप्लुतः। ननादसिंहनादंवैपर्यष्वजतफाल्गुनं। सविनद्यमहानादमभीशून्संनियम्यच। ननर्त्तहर्षसंवीतोवातोद्धूत २८३
इवद्रुमः। ततोविनिर्गम्यपुनःपार्थ

कचवधविवरणं॥ ॥विनिर्गम्यपराहत्य॥

चास्फोट्यघट्टयित्वा। वैकृतंविकारकारणं॥ एतमिसान्निश्चितायोगेऽहितीयापत्स्यानिस्तरवरवःस्पर्धः। प्रतिसमासितुंप्रतिहस्तलतया

मास्फोट्यवासकृत्। रथोपस्थगतोधीमान्प्राणदत्पुनरच्युतः। प्रहृष्टमनसंज्ञात्वावासुदेवंमहाबलः। अब्रवीदर्जुनोराजन्नाति
हृष्टमनाइव। अतिहर्षोयमस्थानेतवाद्यमधुसूदन। शोकस्थानेतुसंप्राप्तेहैडिंबस्यवधेनवै। विमुखानीहसैन्यानिहतं
दृष्ट्वाघटोत्कचं। वयंचभृशमुद्विग्नाहैडिंबस्यनिपातनात्। नैतत्कारणमल्पंहिभविष्यतिजनार्दन। तदद्यशंसमेपृष्टःसत्यं
सत्यवतांवर। यद्येतन्नरहस्यंतेवक्तुमर्हस्यरिंदम। धैर्यस्यवैकृतंब्रूहित्वमद्यमधुसूदन। समुद्रस्येवसंक्षोभोमेरोरिववि
सर्पणं। तथैतद्धिमन्येहंतवकर्मजनार्दन॥ ॥वासुदेवउवाच॥ ॥अतिहर्षमिमंप्राप्तंशृणुमेत्वंधनंजय। अतीव
मनसःसद्यःप्रसादकरमुत्तमं। शक्तिंघटोत्कचेनेमांव्यंसयित्वामहाद्युते। कर्णंनिहतमेवाजौविद्धिसद्योधनंजय। कोहिशक्ति
हस्तंपुनःकर्णंकोलोकेस्तिपुमानिह। यएनमभितस्तिष्ठेत्कार्त्तिकेयमिवाहवे। दिष्ट्यापनीतकवचोदिष्ट्यापहृतकुंडलः।
दिष्ट्याचव्यंसिताशक्तिरमोघास्यघटोत्कचे। यदिहिस्यात्सकवचस्तथैवचसकुंडलः। सामरानपिलोकांस्त्रीनेकःकर्णो
जयेद्ध्रुवं। वासवोवाकुबेरोवावरुणोवाजलेश्वरः। यमोवानोत्सहेत्कर्णंरणेप्रतिसमासितुं। गांडीवमुद्यम्यभवा
ञ्चक्रंचाहंसुदर्शनं। नशक्तौस्वोरणेजेतुंतथायुक्तंनरर्षभं। त्वद्धितार्थंतुशक्रेणमायापहृतकुंडलः। विहीनकवचश्चा

मिगतंतथाकवचादिमत्वयायुक्तं॥

तेन कर्त्तनेन हत्वा कर्णो विकर्त्तनेस्त्वत्वय।जंनि।। स्वं मिलः। नाति घति नामि ते। संज्ञामिदानीं तनं संकृतं।।

द्रोण० त्रंकृतः परपुरंजयः।। अकृत्य कवचं यस्मात्कुंडले विमले च ते। प्रादाच्छक्राय कर्णो वै तस्माद्वैकर्त्तनः स्मृतः।। आशीविष इव क्रु
द्धो जंभितो मंत्रतेजसा।। तथाद्य भाति कर्णो मे शांतज्वाल इवानलः।। यदाप्रभृति कर्णस्य शक्तिर्दत्ता महात्मना।। वासवेन महाबाहो
प्राप्ता या सा घटोत्कचं। कुंडलाभ्यां निमायाथ दिव्येन कवचेन च। तां प्राप्यामन्यत वृषः सततं त्वां हतं रणे।। एवं गतेऽपि शक्यो यं हं
तुं नान्येन केनचित्। ऋते त्वां पुरुषव्याघ्र शपे सत्येन चानघ।। ब्रह्मण्यः सत्यवादी च तपस्वी नियतव्रतः। रिपुष्वपि दयावांश्च तस्मा
त्कर्णो वृषः स्मृतः। युद्धशौंडो महाबाहुर्नित्योद्यतशरासनः।। केसरीव वने नर्दन्मातंगान्यूथपान्। विमदान्नथ शा
र्दूलान्कुरुते रणमूर्द्धनि। मध्यं गत इवादित्यो यो न शक्यो निरीक्षितुं। त्वदीयैः पुरुषव्याघ्र योधमुख्यैर्महात्मभिः।। शरजा
लसहस्रांशुः शरदीव दिवाकरः।। तपांते तोयदो यद्वच्छरधाराः क्षरत्युत।। दिव्यास्त्रजलदः कर्णः पर्जन्य इव दृष्टिमा
न्। त्रिदशैरपि चाप्यस्य भिः शरवर्षसमंततः। अशक्यः सरुधिरा जेतुं स्ववद्भिर्मांसशोणितं। कवचेन विहीनस्तु
कुंडलाभ्यां च पांडव। सोऽद्य मानुषतां प्राप्तो विमुक्तः शक्रदत्तया।। एकाद्यवा गास्य भवेद्धस्य च छिद्रे हंतुं त्वत्कृते २८८
तः प्रमत्तः कृच्छ्रप्राप्ते रथे चक्रे निमग्ने स्याः सर्वतु संज्ञां विचार्य। न युध्यमानस्तु यथा हन्यादजय्यमप्येकवीरो बलजित्सवज्रः।। जं

सर्व्वशः स्वल्पीकृतः। एकैको ग्रहितायाः लोहितस्तु स्वाना मा। स्म त्वत्ते न वार्णीयां।।

जरासंधश्चेदिराजो महाबाहुश्च कलव्यो निषादः।। एकैकशो निहताः सर्व एते योगैस्तैस्तैस्त्वद्धितार्थं मया वै। अथाप
रे निहता राक्षसेंद्रा हिडिंब किर्मीर बकप्रधानाः। अलायुधः परसैन्यावमर्दी घटोत्कचश्चोग्रकर्म्मा तरस्वी।। ॥
द्रोणपर्वणि रात्रियुद्धे।। ।।अर्जुन उवाच।। ।।कथमस्मद्धितार्थं ते कैश्च योगैर्जनार्दन। जरासंधप्रभृतयो घा
तिताः पृथिवीश्वराः।। ।।वासुदेव उवाच।। ।।जरासंधश्चेदिराजो नैषादिश्च महाबलः। यदि स्युर्न हताः पूर्व्व
मिदानीं स्युर्भयंकराः। दुर्योधनस्तानवश्यं वृणुयाद्रथसत्तमान्। तस्मात्तु नित्यविद्विष्टाः संश्रयेयुर्हि कौरवान्।।
ते हि वीरा महेष्वासाः कृतास्त्रा दृढयोधिनः। धार्त्तराष्ट्रीं चमूं कृत्स्नां रक्षेयुरमरा इव।। सूतपुत्रो जरासंधश्चेदिरा
जो निषादजः। सुयोधनं समाश्रित्य जयेयुः पृथिवीमिमां।। योगैरपि हता यैस्ते तन्मे शृणु धनंजय। अजय्या हि वि
ना योगैर्मृधे ते दैवतैरपि। एकैको हि पृथक्तेषां समस्तां सुरवाहिनीं। योधयेत्समरे पार्थ लोकपालाभिरक्षितां।।
जरासंधो हि रुषितो रौहिणेयवधेप्सितः। अस्मद्वधार्थं चिक्षेप गदां वै लोहितामुखीं। सीमंतमिव कुर्वाणां न
भसः पावकप्रभां।। व्यदृश्यतापतंती सा शक्रमुक्ता यथाशनिः। तामापतंतीं दृष्ट्वैव गदां रोहिणिनंदनः। प्रतिघातार्थ
मस्त्रं वै स्थूणाकर्णमवासृजत्। अस्त्रवेगप्रतिहता सा गदा प्रापतद्भुवि। दारयंती धरित्रीं वै कंपयंतीव पर्वतान्। तत्र स्म

गस्यासहितार्थ एवार्थं। आचार्यकमाचार्यं दर्शितोपादरं॥

द्रो०
राक्षसी घोरा जरा नाम सुविक्रमा। संदधे सा ततं जातं जरा संधमरिंदमं। द्वाभ्यां जातो हि मातृभ्यामर्द्धदेहः पृथक् पृथक्।
तया स संधितो यस्मात् जरासंधस्ततोभवत्। सा तु स्त्रिगता पार्थ हता सपुत्रबांधवा। गदा पातेन चास्त्रेण रस्त्रणा कर्णेन निरा दृ
सौ। विना न्नूतः स गदया जरासंधो महामृधे। निहतो भीमसेनेन पश्यतस्ते धनंजय। यदि हि स्यात् गदापाणिर्जरासंध
ः प्रतापवान्। सेंद्रा देवा न तं हंतुं रणे शक्ता महामते। त्वद्धितार्थं हि नैषादिरंगुष्ठेन वियोजितः। द्रोणेनाचार्यकं कृ
त्वा छद्मना सत्यविक्रमः। स तु बद्धांगुलित्राणो नैषादिर्दृढविक्रमः। अस्यन्नेको वनचारी वै राम इवापरः। एकलव्यं हि
सांगुष्ठमशक्ता देवदानवाः। सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित्। किमु मानुषमात्रेण शक्यः स्यात् प्रतिवीक्षितुं। दृढ
मुष्टिः कृती नित्यमस्यमानो दिवानिशं। त्वद्धितार्थं तु स मया हतः संग्राममूर्द्धनि। चेदिराजश्च विक्रांतः प्रत्यक्षं निहतस्तव॥
स चाप्यशक्यः संग्रामे जेतुं सर्वैः सुरासुरैः। वधार्थं तस्य जातोहमन्येषां च सुरद्विषां। त्वत्सहायो नरव्याघ्र लोकानां हितका
म्यया। हिडिंबबककिर्म्मीरा भीमसेनेन घातिताः। रावणेन समप्राणा ब्रह्मयज्ञविनाशनाः। हतस्तथैव मायावी हैडिंबेना
प्यलायुधः। हैडिंबश्चाप्युपायेन शक्त्या कर्णेन घातितः। यदि ह्येनं नाहनिष्यत् कर्णः शक्त्या महामृधे। मया वध्योभविष्यत् २८८
भैमसेनिर्घटोत्कचः। मया न निहतः पूर्वमेष युष्मत्प्रियेप्सया। एष हि ब्राह्मणद्वेषी यज्ञद्वेषी च राक्षसः। धर्मस्य लोप्ता पापात्मा

च सत्यपि वेदब्राह्मणाश्रद्धी रथ्येस्य चपारापयोगसामर्थ्ये॥

तस्मादेष निपातितः। व्यंसिता चाप्युपायेन शक्रदत्ता मयानघ। ये हि धर्मस्य लोप्तारो वध्यास्ते मम पांडव। धर्मसं
स्थापनार्थं हि प्रतिज्ञैषा ममाव्यया। ब्रह्म सत्यं दमः शौचं धर्मो ह्रीः श्रीर्धृतिः क्षमा। यत्र तत्र रमे नित्यमहं सत्येन ते श
पे। न विषादस्त्वया कार्यः कर्णं वैकर्तनं प्रति। उपदेक्ष्याम्युपायं ते येन तं प्रसहिष्यसि। सुयोधनं चापि रणे हनिष्यति
वृकोदरः। तस्य चापि वधोपायं वक्ष्यामि तव पांडव। वर्द्धते तुमुलस्त्वेष शब्दः परचमूं प्रति। विद्रवंति च सैन्यानि त्वदी
यानि दिशो दश। लब्धलक्ष्या हि कौरव्या विधमंति चमूं तव। दहत्येष च वः संख्ये द्रोणः प्रहरतां वरः॥ द्रोणपर्वणि रा
त्रियुद्धे॥ ॥धृतराष्ट्र उवाच॥ ॥एकवीरवधे मोघा शक्तिः सूतात्मजे यदा। कस्मात्सर्वान् समुत्सृज्य स तां पार्थे न मुक्त
वान्। तस्मिन् हते हता हि स्युः सर्वे पांडवसृंजयाः। एकवीरवधे कस्माद्युद्धे न जयमादधे। आहूतो न निवर्त्तेयमिति तस्य म
हाव्रतं। स्वयमाह्वयितव्यः स सूतपुत्रेण फाल्गुनः। ततो द्वैरथमानीय फाल्गुनं शक्रदत्तया। न जघान वृषः कस्मात्
तन्ममाचक्ष्व संजय। नूनं बुद्धिविहीनश्चाप्यसहायश्च मे सुतः। शत्रुभिर्व्यंसितोपायः कथं नु स जयेदरीन्। या ह्यस्य पर
मा शक्तिर्जयस्य च परायणं। सा शक्तिर्वासुदेवेन व्यंसिता सा घटोत्कचे। कुणेर्यथा हस्तगतं ह्रियेद्बिल्वं बलीय
सा। तथा शक्तिरमोघा सा मोघीभूता घटोत्कचे। यथा वराहस्य शुनश्च युध्यतोस्तयोरभावे श्वपचस्य लाभः। मन्ये वि

समघ्नतासंख्यरणे॥

द्रो०
विद्ववासुदेवस्य तद्युद्धे लाभः कर्णादेडिवायार्वि। घटोत्कचो यदि हन्यात्कर्णं परो लाभः स्म नव त्पांडवानां॥ विक
र्तनो वा यदि तं निहन्यात्तथापि कृत्यं शक्तिनाशात्कृतं स्यात्। इति प्राज्ञः प्रज्ञया वै तदिचिंत्य घटोत्कचं सूतपुत्रेण युद्धे। अयोधया
तयद्वासुदेवो हि सिद्धः प्रियं कुर्वन्पांडवानां हितं च॥ संजय उवाच॥ ॥एतद्धि कार्षितं ज्ञात्वा कर्णस्य मधुसूद
दनः। नियोजयामास तदा द्वैरथे राक्षसेश्वरं। घटोत्कचं महावीर्यं महाबुद्धिर्जनार्दनः। अमोघाया विघातार्थं रा
जेन्द्र मे विनितव। न दिव कुंतकाप्यात् हिंव यंस्यानकुरुद्वद्धा नरश्रेष्ठ द्विरथ हरं पार्थं कर्णान्महारथात्। माथ्वजर
थः संख्ये धृतराष्ट्र पतस्तुवि। विना जनार्दनं पार्थो योगानामीश्वरं प्रभुं। तिस्रेरुपायैर्बहुभिरीरमाणः स पार्थिव। ज
यत्नलिप्सुवः शत्रून्पार्थः कृष्णेन पालितः। स विशेषेण वै मोघायाः कृष्णेन रक्षितः पांडवः। हन्यात्किं स्वाहिक्वां तयं शक्ति
हेतुमिवाशनिः॥ ॥धृतराष्ट्र उवाच॥ ॥विरोधी च कुमंत्री च प्राज्ञमानी ममात्मजः। यस्यैष समतिक्रांतो वधोपा
योर्जुनं प्रति। स च कर्णो महाबुद्धिः सर्वशस्त्रभृतां वरः। न प्रमुक्तवान्कथं स्ततताममोघां धनंजये। तवापि समतिक्रां
तामेतज्ञावल्गणे कथं। एतमर्थं महाबुद्धे यत्त्वया नाववोधितं॥ ॥संजय उवाच॥ ॥दुर्योधनस्य शकुनेर्म २५०
मम दुःशासनस्य च। रात्रौ रात्रौ भवत्येषा नित्यमेव समर्थना। श्वः सर्वसैन्यान्युत्सृज्य जहि कर्ण धनंजयं॥

परायणा सुपजीवनं सर्वे च कृत्स्नं। अल्पमनया या पार्थ वधं प्रव्यवध इति प्रत्ययो निश्चयः। वराहस्त्रे दर्थे॥
भेद्य वसां इ पुत्राणां सुपनो ह्या महेत्ततः। अथवा निहते पार्थे पांडुषु न्यते मंततः। स्थापये द्यदि वार्णेय स्तस्मा कृष्णो हि हन्यतां।
कृष्णो हि मूलं पांडूनां पार्थः स्कंध इवोद्गतः। शाखा इवेतरे पार्थाः पांचालाः पत्रसंज्ञिताः। कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च
पांडवाः। कृष्णः परायणं चैषां ज्योतिषामिव चंद्रमाः। तस्मात्पर्णानि शाखाश्च स्कंधं चोत्सृज्य सूतज। कृष्णं निकृंतयापूर्वं मूलं स
र्वत्र सर्वदा। हन्याद्यदि हि दाशार्हं कर्णो यादवनंदनं। कृत्स्ना वसुमती राजन्वशे ते स्यान्न संशयः। यदि हि स निहितः शयीत
मायदकुलपांडवनंदनो महात्मा। ननु तव वसुधा नरेंद्र सर्वा सगिरिसमुद्रवना वशं व्रजेत॥ सा तु बुद्धिः कृता ह्येवं जाग्रति
त्रिदशेश्वरं। अप्रमेये हृषीकेशे युद्धकाले व्यमुह्यत। अर्जुनं चापि राधेयात्सदा रक्षति केशवः। न ह्येनमैच्छत्प्रमुखे सौतकस्था
पयितुं रणे। अन्यांश्चास्मै रथोदारानुपस्थापयदच्युतः। अमोघां तां कथं शक्तिं मोघां कुर्यामिति प्रभो। यतश्चैवं रक्षते पार्थं कर्णात्कृ
ष्णो महामनाः। आत्मानं स कथं राजन्न रक्षेत्पुरुषोत्तमः। परिचिंत्य तु पश्यामि चक्रायुधमरिंदमं। न सोऽस्ति त्रिषु लोकेषु यो
जयेत जनार्दनं॥ ॥इति द्रोणपर्वणि रात्रियुद्धे॥ ॥संजय उवाच॥ ॥ततः कृष्णं महाबाहुं सात्यकिः सत्यविक्रमः।
पप्रच्छ रथशार्दूलं कर्णं प्रति महारथः। अयं च प्रत्ययः कर्णे शक्त्या चामितविक्रमे। किमर्थं सूतपुत्रेण न मुक्ता फाल्गुने तु सा॥ ॥

शक्त्यामंबंधीगतात्मानःगलितभयबंधनः।तंत्स्वत्तुशक्तिलक्ष्मणं॥

द्रोण० वासुदेवउवाच॥ दुःशासनस्यकर्णस्यशकुनेश्चससिंधवः।सततंमंत्रयंतिस्मदुर्योधनपुरोगमाः।कर्णकर्णमहेष्वासमरणे २४६३·१
जितपराक्रमा।नान्यस्यशक्तिरेषामोक्तव्याजयतांवर।ऋतेमहारथात्कर्णकौंतेयात्सुत्राह्नेजयात्।सहितेषामतियशादेवानामि
ववासवः।तस्मिन्विनिहतेपार्थेपांडवाःसृंजयैःसह।भविष्यंतिगतात्मानःसुराइवनिरग्नयः।तथेतिचप्रतिज्ञातंकर्णेनशिनि
पुंगव।हृदिनित्यंचकर्णस्यवधोगांडीवधन्वनः।अहमेवतुराधेयंमोहयामियुधांवरं।ततोनावासृजच्छक्तिंपांडवेश्वेतवाहने
फाल्गुनस्यहितंमृत्युमनिवार्यंतुयुध्यतः।ननिद्रानचहर्षोमेमनसोस्तियुधांवरं।घटोत्कचेव्यंसितांतांदृष्ट्वाशिनिपुंगव।
मृत्योरास्यांतरान्मुक्तंपश्याम्यद्यधनंजयं।नपितानचमेमातानयूयंभ्रातरस्तथा।नचप्राणास्तथारक्ष्यायथाबीभत्सु
राहवे।त्रैलोक्यराज्याद्यत्किंचिद्भवेदन्यत्सुदुर्लभं।नेछेयंसात्वताहंतद्विनापार्थंधनंजय।अतःप्रहर्षःसुमहान्युयुधानाद्य यु
मेभवत्।मृतंप्रत्यागतमिवदृष्ट्वापार्थंधनंजयं।अतश्चप्रहितोयुद्धेमयाकर्णायराक्षसः।नह्यन्यःसमरेरात्रौशक्तःकर्णंप्रबा
धितुं॥ ॥संजयउवाच॥ ॥इतिसात्यकयेप्राहतदादेवकिनंदनः।धनंजयहितेयुक्तस्तत्प्रियेसततंरतः॥ द्रोण २८१
पर्वणिरात्रियुद्धे॥ ॥धृतराष्ट्रउवाच॥ ॥कर्णदुर्योधनादीनांशकुनेःसौबलस्यच।अपनीतंमहत्ताततवचैवविशेष
तः।

यतिवाप्यनिपनीयाछायस्त्वंतुरक्षं॥
यदाजानीथतांशक्तिमकर्णोसततंरणे।अनिवार्यामिसंसह्यांदेवैरपिसवासवैः।मोकिमर्थंतुकर्णेनप्रवृत्तेसमरेपुरा।
नदेवकीसुतेमुक्ताफाल्गुनेवापिसंजय॥ ॥संजयउवाच॥ ॥संग्रामादिनिवृत्तानांसर्वेषांनोविशांपते।रात्रौकुरु
कुलश्रेष्ठमंत्रोयंसमवर्तत।प्रभातमात्रेश्वोभूतेकेशवायार्जुनायवा।शक्तिरेषाविमोक्तव्याकर्णकर्णेतिनित्यशः।तत
ःप्रभातसमयेराजन्कर्णस्यदैवतैः।अन्येषांचैवयोधानांसाबुद्धिर्नश्यतेपुनः।दैवमेवपरंमन्येयत्कर्णोविशुक्रवान्शक्र
स्त्रिवाद्देवकीपुत्रमोहितोदेवमायया।पार्थंवाशक्रकल्पंवैवधार्थंवासवींप्रभो॥ ॥धृतराष्ट्रउवाच॥ ॥दैवेनोपहतायू
यंस्वबुध्याकेशवस्यवा।गताहिवासवीहत्वातृणभूतंघटोत्कचं।कर्णश्चममपुत्राश्चसर्वेचान्येचपार्थिवाः।तेनवादुष्प्रणी
तेनगतावैवस्वतक्षयं।भूयएवतुमेशंसयथायुद्धमवर्तत।कुरूणांपांडवानांचहैडिंबेनिहतेतदा।येचतेभ्यद्रवन्द्रोणंव्यू
ढानीकाःप्रहारिणः।सृंजयाःसहपांचालैस्तेप्यकुर्वन्कथंरणं।सौमदत्तेर्वधाद्द्रोणमायस्तंसैंधवस्यच।अमर्षाज्जीवितं
त्यक्त्वागाहमानंवरूथिनीं।जृंभमाणमिवव्याघ्रंव्यात्ताननमिवांतकं।कथंप्रत्युद्ययुर्द्रोणमस्यंतंपांडुसृंजयाः।आचा
र्यरक्षिसंसंख्यया।नञयानरणेपार्थंकृष्णंवादेवकीसुतं।तस्यद्रस्त्रस्थितनाशक्तिःकालरात्रिरिवोच्छ्रिता।दैवोपहतबुद्धित्वान्नतां क४१८८०·४

द्रोण० येप्यन्येवरन्तुयेधितस्तुगमाः द्रोणिकर्णकृपास्त्रातेतेचाकुर्वन्किमाहवे।नारुत्तैजिघांसंतोसव्यसाचिवृकोदरौ।स्वमाछ
न्मामकायुद्धेकथंसंजयशंसमे।सिंधुराजवधेनेमघटोत्कचवधेनते।अमर्षिताःसुसंक्रुद्धारणायचक्रुःकथंनिशि॥ संजय उ०॥
हतं द्रोणेनापश्याम महाराज । नास्कंदं जलदो रुद्धं वर्षास्विव विशांपते । विधमन्ना बाणसंघान्पांचालानां महार
थः । ततः प्रादुष्करोद्द्रोणो ब्राह्ममस्त्रं परंतपः । वधाय तेषां शूराणां पांचालानाममर्षितः । ततो व्यराजत द्रोणो विनि
घ्नन्सर्वसोमकान् । शिरांस्यपातयच्चापि पांचालानां महामृधे । तथैव परिघाकारान्बाहून्कनकभूषणान् । ते वध्यमा
नाः समरे भारद्वाजेन पार्थिवाः । मेदिन्यामन्वकीर्यंत वातनुन्ना इव द्रुमाः । कुंजराणां च पततां योधसंघैश्च भारत । अ
गम्यरूपा पृथिवी मांसशोणितकर्दमा । हत्वा विंशतिसाहस्रान्पांचालानां रथव्रजान् । अतिष्ठदाहवे द्रोणो विधू
मोग्निरिवज्वलन् । तथैव च पुनः क्रुद्धो भारद्वाजः प्रतापवान् । वसुदानस्य भल्लेन शिरः कायादपाहरत् । पुनः पं
चशतान्मत्स्यान्षट्सहस्रांश्च सृंजयान् । हस्तिनामयुतं हत्वा जघानाश्वायुतं पुनः । क्षत्रियाणामभावाय दृष्ट्वा द्रो
णमवस्थितं । ऋषयोभ्यागमंस्तूर्णं हव्यवाहपुरोगमाः । विश्वामित्रो जमदग्निर्भरद्वाजोथ गौतमः । वसिष्ठः कश्यपो
त्रिश्च ब्रह्मलोकं निनीषवः । सिकताः पृश्नयो गर्गा वालखिल्या मरीचिपाः । भृगवोंगिरसश्चैव सूक्ष्माश्चान्ये महर्ष
यः । एनमब्रुवन्सर्वे द्रोणमाहवशोभिनं । अधर्मतः कृतं युद्धं समयो निधनस्य ते । न्यस्यायुधं रणे द्रोण समेत्यास्मा
नवस्थितान् । नातः क्रूरतरं कर्म पुनः कर्तुमिहार्हसि । वेदवेदांगविदुषः सत्यधर्मरतस्य ते । ब्राह्मणस्य विशेषेण

द्रो०

तदित्तन्नो एएद्यातस्य जाद्रुधममोघेषोति स्वर्ग्यो निशाम्यता। परिहरणं स्वकाम्यास्तु वस्तुलोके ध्रुमानुषे। अश्वत्थाम्नोणव या
दग्धमञ्जनस्त्वत्तान रात्तु वि। यदन तदोर्दृष्टं शिवकृतेक मनमाधु तत्। न्यस्यायुधं रणाद्विजं द्रोणमा विरं रूक्ष्याः। मा पापि
ष्ठतरं कर्म करिष्यसि गुरुर्हि ते। इति तस्य वचः श्रुत्वा भीमसेनवचस्तथा। धृष्टद्युम्नवचश्चैव सर्वेषां च रणे तथा सविमनाभवत्। स
दह्यमानो व्यथितः कुन्तीपुत्रो युधिष्ठिरः। अहतं वाहतं वापि पश्यन्सुतं महात्मनः। स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो व
क्ष्यतेऽनृतं। त्रयाणामपि लोकानामैश्वर्यार्थे कथंचन। तस्मात्तं परिपप्रच्छ नान्यं कंचिद्धि उर्षितः। तस्मिंस्तस्य हि स
त्याशा बाल्यात्प्रभृति पाण्डवे। ततो निष्पाण्डवामुर्वीं करिष्यन्तं युधांपतिं। द्रोणं ज्ञात्वा धर्मराजं गोविन्दो व्यथितोऽब्रवी
त्। यद्यर्द्धदिवसं द्रोणो युध्यते मन्युमास्थितः। सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति। स भवांस्त्रातु नो द्रोणात्स
त्याज्ज्यायोऽनृतं भवेत्। अनृतं जीवितस्यार्थे वदन्न स्पृश्यतेऽनृतैः। तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदं। श्रुत्वैव
तन्महाराज वधोपायं महात्मनः। गाहमानस्य ते सेनां मालवस्येन्द्रवर्मणः। अश्वत्थामेति विख्यातो गजः शक्रग
जोपमः। निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवं। अश्वत्थामा हतो ब्रह्मन्निवर्तस्वाहवादिति। नूनं नाश्रद्दधद्वाक्यमेष मे पुरुष ३०८
र्षभः। स त्वं गोविन्दवाक्यानि मानयस्व जयैषिणः। द्रोणाय निहतं शंस राजञ्छारद्वतीसुतं। त्वयोक्तो नैष युध्येत जातु राजन्द्विज
र्षभः।

कालपर्यायं युगसमयं॥
सत्यवाक्यं न तु विलोकेऽस्मिन्नवाप्स्यामो जनाधिप। तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः। भावित्वाच्च महाराज वक्तुं स
मुपचक्रमे। तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः। अव्यक्तमब्रवीद्राजन्हतः कुंजर इत्युत। तस्य पूर्वं रथः पृथ्व्याश्चतु
रंगुल उत्थितः। बभूवैवं तु तेनोक्ते तस्य वाहाः स्पृशन्महीं। युधिष्ठिरात्तु तद्वाक्यं श्रुत्वा द्रोणो महारथः। पुत्रव्यसन
संतप्तो निराशो जीवितेऽभवत्। आगस्कृतमिवात्मानं पाण्डवानां महात्मनां। ऋषिवाक्येन मन्वानः श्रुत्वा च निहतं सुतं॥
विचेताः परमोद्विग्नो धृष्टद्युम्नमवेक्ष्य च। योद्धुं नाशक्नुवद्राजन्यथापूर्वमरिंदम॥ ॥महाभारते द्रोणपर्वणि॥ सं
जय उवाच॥ ॥तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसं। पांचालराजस्य सुतो धृष्टद्युम्नः समाद्रवत्। य इष्ट्वा मनुजेन्द्रे
ण द्रुपदेन महामखे। लब्धो द्रोणविनाशाय समिद्धाद्धव्यवाहनात्। स धनुर्जैत्रमादाय घोरं जलदनिःस्वनं। दृढज्यमज
रं दिव्यं शरं चाशीविषोपमं। संदधे कार्मुके तस्मिंस्तं शरमनलोपमं। द्रोणं जिघांसुः पांचाल्यो महाज्वालमिवानलं। त
स्य रूपं शरस्यासीद्धनुर्ज्यामंडलांतरे। द्योततो भास्करस्येव घनांते परिवेषतः। पार्षतेन परामृष्टं ज्वलंतमिव तद्ध
नुः। अंतकालमनुप्राप्तं मेनिरे वीक्ष्य सैनिकाः। तमिषुं संधितं तेन भारद्वाजः प्रतापवान्। दृष्ट्वामन्यत देहस्य का
लपर्यायमागतं। ततः स यत्नमातिष्ठदाचार्यस्तस्य वारणे। न चास्यास्त्राणि राजेंद्र प्रादुरासन्महात्मनः। तस्य घ

तेजसा मन्युना। नामेत्य स्वरूपायां॥

द्रोण० दृष्ट्वा सविस्मया राजन्नन्तस्य स्यातागमत्। तस्य चाक्लिष्टमना गत्वा दयं जग्मुः पतत्रिणः॥ संचारं कृष्णमासाद्य युक्तश्चोके न चाहितः॥
निविध्यनाच दिव्यानामस्त्राणामप्रसादतः। हन्तुकामः शास्त्राणि ऋषिवाक्यप्रचोदितः॥ तेजसा दीप्यमानस्तु युयुधे न
यथा पुरा। ततो भीमो दृढक्रोधो द्रोणस्याश्लिष्य तं रथं। शनकैरिव राजेन्द्र द्रोणं वचनमब्रवीत्। यदि नाम न युध्येरन् शिक्षि
ता ब्रह्मबन्धवः॥ स्वकर्मभिरसंतुष्टा न स्म क्षत्रं क्षयं व्रजेत्। अहिंसा सर्वभूतेषु धर्मं ज्यायस्तरं विदुः। तस्य च ब्राह्मणो मू
लं भवांश्च ब्रह्मवित्तमः॥ श्वपाकवन्म्लेच्छगणान् हत्वा चान्यान्पृथग्विधान्। अज्ञानान्मूढवद्ब्रह्मन्पुत्रदारधनेप्सया। एकस्या
र्थे बहून्हत्वा पुत्रस्याधर्मविद्यथा। स्वकर्मस्थान्विकर्मस्थो न व्यपत्रपसे कथं। स चाद्य पतितः शेते पृष्ठेनावेदितस्तव। ध
र्मराजेन तद्वाक्यं नातिशङ्कितुमर्हसि। एवमुक्तस्ततो द्रोणो भीमेनोत्सृज्य तद्धनुः। सर्वाण्यस्त्राणि धर्मात्मा हातुकामोऽभ्यभा
षत। कर्ण कर्ण महेष्वास कृप दुर्योधनेति च। संग्रामे क्रियतां यत्नो ब्रवीम्येष पुनः पुनः। पाण्डवेभ्यः शिवं वोऽस्तु शस्त्रमभ्यु
त्सृजाम्यहं। इति तत्र महाराज प्राक्रोशद्द्रौणिमेव च। उत्सृज्य च रणे शस्त्रं रथोपस्थे निवेश्य च। अभयं सर्वभूतानां प्रददौ
योगयुक्तवान्। तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः प्रतापवान्। सशरं तद्धनुर्घोरं संन्यस्याथ रथे ततः। खड्गी रथादवप्लुत्य ३२०
सहसा द्रोणमभ्ययात्। हाहाकृतानि भूतानि मानुषाणीतराणि च। द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतं॥

शाम्यं शांतिं। योगं समाधिं। एकाग्रमकल्मषं॥

हाहाकारं ततश्चक्रुर्हो धिगिति चाब्रुवन्। द्रोणोऽपि शस्त्राण्युत्सृज्य परमं साम्यमास्थितः॥ तथोक्त्वा योगमास्थाय
ज्योतिर्भूतो महातपाः। दिवमाक्रमदाचार्यः सद्भिः सह दुराक्रमं॥ द्वौ सूर्याविति नो बुद्धिरासीत्तस्मिंस्तथागते। एकाग्रमि
व चाभूच्च ज्योतिर्भिः पूरितं नभः॥ समपद्यत चार्काभे भारद्वाजनिशाकरे। निमेषमात्रेण च तज्ज्योतिरन्तरधीयत॥ आ
सीत्किलकिलाशब्दः प्रहृष्टानां दिवौकसां। ब्रह्मलोकं गते द्रोणे धृष्टद्युम्ने च मोहिते॥ वयमेव तदाद्राक्ष्म पंच मा
नुषयोनयः। योगयुक्तं महात्मानं गच्छन्तं परमां गतिं॥ अहं धनंजयः पार्थः कृपः शारद्वतो द्विजः॥ वासुदेवश्च वार्ष्णेयो ध
र्मपुत्रश्च पाण्डवः। अन्ये तु सर्वे नापश्यन्भारद्वाजस्य धीमतः॥ महिमानं महाराज योगयुक्तस्य गच्छतः। ब्रह्मलोकं महाहि
व्यं देवगुह्यं हि तत्परं। गतिं परमिकां प्राप्तमजानन्तो नृयोनयः॥ नापश्यन्गच्छमानं हि तं सार्धमृषिपुंगवैः॥ आचार्यं योग
मास्थाय ब्रह्मलोकमरिंदमं। वितुन्नाङ्गं शरशतैर्न्यस्तायुधमसृक्क्षरं॥ धिक्कृतः पार्षतस्तं तु सर्वभूतैः परामृशत्। तस्य
मूर्धानमालम्ब्य गतसत्त्वस्य देहिनः॥ किंचिदब्रुवतः कायाद्विचकर्तासिना शिरः॥ हर्षेण महता युक्तो भारद्वाजे निपा
तिते। सिंहनादरवं चक्रे भ्रामयन्खड्गमाहवे॥ आकर्णपलितः श्यामो वयसाशीतिकोऽधिकः॥ त्वत्कृते व्यचरत्सं
ख्ये स तु षोडशवार्षिकः॥ उक्तवांश्च महाबाहुः कुन्तीपुत्रो धनंजयः॥

णो वंर्त्तमानेषु तिष्ठन्स्तु न्यासमादनंतरं उक्तमान्तणात्संर्वे वो द्वयं । वधस्तुक्रमणात्स्परनन्दस्य विशाधः ॥२ पृथक्त्वल्पे रथोपरिशाला हिंतो गो

द्रोण० णो वंर्त्तमानया चार्य्यमावधीर्दुपरात्मजः ॥ नदंतव्योनदंतव्यइनिन्तसेनिकाश्वदः उक्रोशान्नर्जुनस्त्वेवमात्तक्रोशस्तमात्रन
ता क्रोशमानस्तु नेच्चिवपार्थोवस्तुच सर्वशः ॥ धृष्टद्युम्नो वधीद्रोणं रथतल्पे नरर्षभं ॥ शोणितेन परिक्लिन्नो रथाद्भूमि
मरिंदमः ॥ लोहितांगइवादित्योदुर्दर्शसमपद्यत ॥ एवं तंनिहतं संख्ये दृष्ट्वा सैनिको जनः ॥ धृष्टद्युम्नस्तु तद्राजन्नारुद्य
तशिरो महारथात् ॥ तावकानांमहेष्वासः प्रमुखे तत्समाक्षिपत् ॥ ते तु दृष्ट्वा शिरो राजन्भारद्वाजस्य तावकाः ॥ पलायनकृतोत्सा
हाडुद्रुवुः सर्वतो दिशं ॥ द्रोणस्तु दिवमास्थाय नक्षत्रपथमाविशत् ॥ अहमेवतदाद्राक्षं द्रोणस्य निधनं नृप ॥ ऋषेः प्रसादा
त्कृष्णस्य सत्यवत्याः सुतस्य वा ॥ विधूमामिवसंयांतीमुल्कांप्रज्वलितामिव ॥ अपश्याम दिवं स्तब्धां गच्छंतंमहाद्युति ॥ ह
ते द्रोणे निरुत्साहान्कुरून्पांडवसृंजयाः ॥ अभ्यद्रवन्महावेगास्ततः सैन्यं व्यदीर्यत ॥ निहता हतभूयिष्ठाः संग्रामे निशि
तैः शरैः ॥ तावका निहते द्रोणे गतासव इवाभवन् ॥ पराजयमथावाप्य परत्र च महद्भयं ॥ उभयेनैव ते हीना नानाविंद
न्धृतिमात्मनः ॥ अन्विच्छंतः शरीरं तु भारद्वाजस्य पार्थिवाः ॥ नाध्यगच्छन्महाराज कबंधायुतसंकुले ॥ पांडवास्तु जयं
लब्ध्वा परत्र च महद्यशः ॥ बाणशब्दरवांश्चक्रुः सिंहनादांश्च पुष्कलान् ॥ भीमसेनस्ततो राजन्धृष्टद्युम्नश्च पार्षतः ॥ वरू ३११
थिन्यामनृत्येतां परिष्वज्य परस्परं ॥ अब्रवीच्च तदा भीमः पार्षतं शत्रुतापनं ॥ भूयोहं त्वां विजयिनं परिष्वक्ष्यामि पार्षत ॥

स्तानिस्तरस्य ॥ परत्र च महद्भयमिति पलायनस्य परलोकविरुद्धत्वात् । उभयेन लोकद्वयेन ॥

इति द्रोणवधविवरणं ॥ ॥ महात्मनानामस्यंतमभ्युदितं ॥
स्तुत पुत्रे हतेपापे धार्तराष्ट्रेच संयुगे ॥ एतावदुक्त्वा भीमस्तु हर्षेणमहता स्थितः ॥ बाहुशब्देन पृथिवीं कंपयामास पांडवः ॥ तस्य
शब्देन वित्रस्ताः प्राद्रवंस्तावका युधि ॥ क्षत्रधर्मं समुत्सृज्य पलायनपरायणाः ॥ पांडवास्तु जयं लब्ध्वा हृष्टा ह्यासन्विशांपते ॥ अ
रिक्षयं च संग्रामे तेन ते सुखमाप्नुवन् ॥ ॥ इति द्रोणपर्वणि द्रोणवधः ॥ ॥ संजय उवाच ॥ ॥ ततो द्रोणे हते राजन्कु
रवः शस्त्रपीडिताः ॥ हतप्रवीरा विध्वस्ता भृशं शोकपरायणाः ॥ उदासीना परान्दृष्ट्वा ह्यभ्यमानान्पुनः पुनः ॥ अश्रुपूर्णेक्ष
णास्त्रस्ता दीनास्त्वासन्विशांपते ॥ विचेतसो हतोत्साहाः कश्मलाभिहतौजसः ॥ आर्तस्वरेण महता पुत्रं ते पर्यवारयन्
रजस्वला वेपमाना वीक्ष्यमाणा दिशो दश ॥ अश्रुकंठाय थादैत्या हिरण्याक्षे पुरा हते ॥ स तैः परिवृतो राजा त्रस्तैः
क्षुद्रमृगैरिव ॥ अशक्नुवन्नवस्थातुमपायात्तनयस्तव ॥ क्षुत्पिपासापरिम्लानास्ते योधास्तव भारत ॥ आदित्येनै
व संतप्ता भृशं विमनसोभवन् ॥ भास्करस्येव पतनं समुद्रस्येव शोषणं ॥ विपर्यासं यथा मेरोर्वासवस्येव नि
र्जयं ॥ अमर्षणीयं तद्दृष्ट्वा भारद्वाजस्य पातनं ॥ त्रस्तरूपतरा राजन्कौरवाः प्राद्रवन्रणे ॥ गांधारराजः शकुनिस्त्रस्त
स्त्रस्ततरैः सह ॥ हतं रुक्मरथं श्रुत्वा प्राद्रवत्सहितोरथैः ॥ वरूथिनीं वेगवतीं विद्रुतां सपताकिनीं ॥ परिगृह्य महासे
नां सूतपुत्रोपयाद्भयात् ॥ रथनागाश्वकलिलां पुरस्कृत्य तु वाहिनीं ॥ मद्राणामीश्वरः शल्यो वीक्षमाणो ययाद्भयात् ॥ ह

द्रो। ण्यायोवराश्चेन कृतलक्षणो नि। विशितः नानाप्रधकृतघ्नः॥

द्रोण० तपवारिस्त्रं विष्टं दिपि वक्तिपतत्किमि॥ हतः शारद्वतो गत्वा कण्ठं कण्ठमिति ध्रुवं॥ नानानीकेन शि॥ लक्षेन कलिंगारहवाहि
कान्॥ कृतवर्मादितो राजन्प्रायाश्च वनिर्हयः॥ पदातिगणसंयुक्तस्त्वत्तो राजन्नयाहितः॥ बल्हकः पाण्डवान्वेद्दृष्ट्वा द्रोणं।
निपातितं। दर्शनीयात्मवाचि वशो यगाकृतलक्षणः॥ दुःशासनोऽन्द्रोणो हि मः पाण्डवजनसंहतः॥ रथानामयुतं स्य त्रि
साहस्रांश्च दंतिनः॥ हयाः सिनो य योऽरगाहे दृष्ट्वा द्रोणं निपातितं॥ गजाश्वरथसंयुक्तो हतश्च वपदातिभिः॥ दुर्योधनो महा
राजप्रायात्तं महारथः॥ संसप्तकगणाग्न्यहस्यदत्तशिपा किरातिना॥ सुशर्मा पाण्डवराज्ञां तं दृष्ट्वा द्रोणं निपातितं॥ गजा
न्वेधान्समारूढ्य परस्यापि दयाहजनाः॥ पाण्डवान्सर्वतः मार्ष्य हृष्टा कृत्वा रथंहता॥ वृ रथं ततः पिण्डिनान्यत्राहतनान्य थमा
तुलाराऽत्रु वानन्ये वयस्यांश्च पार्वेडवन्तक्तु रवस्त्र या। बोदयतस्त्वासेन्याति स्वस्त्रीयाश्च तथापरं। संवंधिनस्तथा चा
न्य पाण्डवेति दिशोदश। प्रकीर्णकेशो विध्वस्ता नानाविकवधम वत॥ नेदमस्तीति मन्वाना हतोत्साहा हतौजसः॥ उत्स
ज्य कवचान्ये ने पाण्डवस्तावका विभो॥ अन्योन्यात समाक्रोशन्नेनिका नरतर्षभ। तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थि
रे॥ धुर्यानुन्मुच्य च रथाद्धतसूतान्स्वलंकृतान्॥ आरुह्य हयान्योधाः क्षिप्रं पद्भिरचोदयन्॥ द्रवमाणे तथा सैन्ये त्रस्त ३२२
रूपे हतौजसि।

प्रतिस्रोतः स्रोतः प्रतिकूलः॥

प्रतिस्रोत इव ग्राहा द्रोणपुत्रः परान्ययात्॥ तस्यासीत्सुमहद्युद्धं शिखंडिप्रमुखैर्गणैः॥ प्रभद्रकैश्च पांचालैश्चेदिभिश्च
सकेकयैः॥ दृष्ट्वा तु कुरुविध्वस्तानां पांडूनां युद्धदुर्मदः॥ कथंचित्संकटान्मुक्तो मत्तद्विरदविक्रमः॥ द्रवमाणं बलं दृष्ट्वा
पलायनकृतेक्षणं॥ दुर्योधनं समासाद्य द्रोणपुत्रोऽब्रवीदिदं॥ किमियं द्रवते सेना त्रस्तरूपेव भारत॥ द्रवमाणां च रा
जेंद्र नावस्थापयसे रणे॥ त्वं चापि न यथापूर्वं प्रकृतिस्थो नराधिप॥ कर्णप्रभृतयश्चेमे नावतिष्ठंति पार्थिवाः॥ अन्येष्वपि च युद्धे
षु नैवं सेनाद्रवत्तदा॥ कच्चित्क्षेमं महाबाहो तव सैन्यस्य भारत॥ कस्मिन्निदं हते राजन्रथसिंहे बलं तव॥ एतामवस्थां सं
प्राप्तं तन्ममाचक्ष्व कौरव॥ तत्तु दुर्योधनः श्रुत्वा द्रोणपुत्रस्य भाषितं॥ घोरमप्रियमाख्यातुं नाशकत्पार्थिवर्षभ॥ दिन्ना
नौरिव ते पुत्रो मग्नः शोकमहार्णवे॥ बाष्पेणापिहितं दृष्ट्वा द्रोणपुत्रं रथस्थितं॥ ततः शारद्वतं राजा सव्रीडमिदमब्रवीत्
॥ शंसात्र भद्रं ते सर्वमेतद्यथातथा॥ अथ शारद्वतो राजन्नार्तिमार्छन्पुनः पुनः॥ शशंस द्रोणपुत्राय यथा द्रोणो निपा
तितः॥ ॥कृप उवाच॥ ॥ वयं द्रोणं पुरस्कृत्य पृथिव्यां प्रवरं रथं॥ प्रावर्तयाम संग्रामं पांचालैरेव केवलैः॥ ततः प्रवृत्ते
संग्रामे विमिश्राः कुरुसोमकाः॥ अन्योन्यमभिगर्जंतः शस्त्रैर्देहानपातयन्॥ वर्तमाने तथा युद्धे क्षीयमाणेषु संयुगे
॥ धार्तराष्ट्रेषु संक्रुद्धः पिता तव परंतप॥ ततो द्रोणो ब्राह्ममस्त्रं विकुर्वाणो नरर्षभः॥ व्यहनच्छात्रवान्भल्लैः शतशोऽथ स

हस्रशः॥ पांडवाः केकयामत्स्याः पांचालाश्च विशेषतः॥ संख्ये द्रोणरथं प्राप्य व्यनशन्कालचोदिताः॥ सहस्रं नरसिंहानां क्षिप्रा
हस्रं च दंतिनां॥ द्रोणो ब्रह्मास्त्रयोगेन प्रेषयामास मृत्यवे॥ आकर्णपलितः श्यामो वयसाशीतिकात्परः॥ रणे पर्यचरद्द्रोणो
वृद्धः षोडशवर्षवत्॥ क्लिश्यमानेषु सैन्येषु वध्यमानेषु राजसु॥ अमर्षवशमापन्नाः पांचाला विमुखाभवन्॥ तस्मिन्किंचि
त्प्रभग्नेषु विमुखेषु सपत्नजित्॥ दिव्यमस्त्रं विकुर्वाणो बभूवार्क इवोदितः॥ स मध्यं प्राप्य पांडूनां शररश्मिः प्रतापवान्॥
मध्यंगत इवादित्यो दुष्प्रेक्ष्यस्ते पिताभवत्॥ ते दह्यमाना द्रोणेन सूर्येणेव विराजता॥ दग्धवीर्या निरुत्साहा बभूवुर्गतचे
तसः॥ तान्दृष्ट्वा पीडितान्बाणैर्द्रोणेन मधुसूदनः॥ जयैषी पांडुपुत्राणामिदं वचनमब्रवीत्॥ नैष जातु नरैः शक्यो जेतुं शस्त्र
भृतां वरः॥ अपि वृत्रहणा संख्ये रथयूथपयूथपः॥ ते यूयं धर्ममुत्सृज्य जयं रक्षत पांडवाः॥ यथा वः संयुगे सर्वान्न हन्याद्रु
क्मवाहनः॥ अश्वत्थाम्नि हते नैष युध्येदिति मतिर्मम॥ हतं तं संयुगे कश्चिदाख्यात्वस्मै मृषा नरः॥ एतन्नारोचयद्वाक्यं कुंतीपु
त्रो धनंजयः॥ अरोचयंस्तु सर्वेन्ये कृच्छ्रेण तु युधिष्ठिरः॥ भीमसेनस्तु सव्रीडमब्रवीत्पितरं तव॥ अश्वत्थामा हत इति तन्नाबु १
ध्यत ते पिता॥ स शंकमानस्तन्मिथ्या धर्मराजमपृच्छत॥ हतं वाप्यहतं वाजौ त्वां पिता पुत्रवत्सलः॥ तमतथ्यभये मग्नो ज ३१२
ये सक्तो युधिष्ठिरः॥ अश्वत्थामानमायोधे हतं दृष्ट्वा महागजं॥ भीमेन गिरिवर्ष्माणं मालवस्येंद्रवर्मणः॥ उपसृत्य तदा

नियम्य निक्षिप्य॥

द्रोणमुच्चैरिदमुवाच ह॥ यस्यार्थे शस्त्रमाधत्से यमवेक्ष्य च जीवसि॥ पुत्रस्ते दयितो नित्यं सोश्वत्थामा निपातितः॥
विपतन्निहतो भूमौ नरसिंहशिशुर्यथा॥ जानन्नप्यनृतस्यास्य दोषान्स द्विजसत्तमं॥ अव्यक्तमब्रवीद्वाक्यं हतः कुंजर इत्युत
स त्वां निहतमाकर्ण्य दुःखितः संतापपीडितः॥ नियम्य दिव्याण्यस्त्राणि नायुध्यत यथा पुरा॥ तं दृष्ट्वा परमोद्विग्नं शोकातुरमचेतसं
॥ पांचालराजस्य सुतः क्रूरकर्मा समाद्रवत्॥ तं दृष्ट्वा विहितं मृत्युं लोकतत्त्वविचक्षणः॥ दिव्यान्यस्त्राण्यथोत्सृज्य रणे प्रायमु
पाविशत्॥ ततोस्य केशान्सव्येन गृहीत्वा पाणिना तदा॥ पार्षतः क्रोशमानानां वीराणामच्छिनच्छिरः॥ न हंतव्यो न हंतव्य
इति ते सर्वतोब्रुवन्॥ तथैव चार्जुनो वाहादवरुह्यैनमाद्रवत्॥ उद्यम्य च शिता बाहुर्ब्रुवाणश्च पुनः पुनः॥ जीवंतमानयाचार्यं
मा वधीरिति धर्मवित्॥ तथापि वार्यमाणेन कौरवैरर्जुनेन च॥ हत एव नृशंसेन पिता तव नरर्षभ॥ सैनिकाश्च ततः सर्वे वि
प्राद्रवंत भयार्दिताः॥ वयं चापि निरुत्साहा हते पितरि तेनघ॥ ॥संजय उवाच॥ ॥ एतच्छ्रुत्वा द्रोणपुत्रस्तु निधनं पि
तुराहवे॥ क्रोधमाहारयत्तीव्रं पदाहत इवोरगः॥ ततः क्रुद्धो रणे द्रौणिर्भृशं जज्वाल मारिष॥ यथेंधनं महत्प्राप्य
प्राज्वलद्धव्यवाहनः॥ तलं तलेन निष्पिष्य दंतैर्दंतानुपस्पृशन्॥ निःश्वसन्नुरगो यद्वल्लोहितायतलोचनः॥ ॥
महाभारते द्रोणपर्वणि॥ ॥धृतराष्ट्र उवाच॥ ॥अधर्मेण हतं श्रुत्वा धृष्टद्युम्नेन संजय॥ ब्राह्मणं पितरं वृद्ध

वेदस्नातो वेदपारगतः। व्रतस्नातो व्रतपारगतः। तेन द्रोणेन॥

द्रो० मश्वत्थामा किमब्रवीत्। मानुषं वारुणं आग्नेयं ब्राह्ममस्त्रं च वीर्यवान्। ऐन्द्रं नारायणं चैव यस्मिन्नित्यं प्रतिष्ठितं। तम
धर्मेण धर्मिष्ठं धृष्टद्युम्नेन संयुगे। श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्। येन रामादवाप्येह धनुर्वेदं महात्म
ना। प्रोक्तान्यस्त्राणि दिव्यानि पुत्राय गुणकांक्षिणा। एकमेव हि लोकेस्मिन्नात्मनो गुणवत्तरं। इच्छंति पुरुषाः पु
त्रं लोके नान्यं कथंचन। आचार्याणां भवंत्येव रहस्यानि महात्मनां। तानि पुत्राय वा दद्युः शिष्यायानुगताय वा। सशि
ष्यः प्राप्य तत्सर्वं विशेषं च स संयुगे। शूरः शारद्वतीपुत्रः संख्ये द्रोणादनंतरः। रामस्य तु समः शास्त्रे पुरंदरसमो युधि। मे
हीधरसमः स्थैर्ये तेजसाग्निसमो युवा। समुद्र इव गांभीर्ये क्रोधे चाशीविषोपमः। स रथी प्रथमो लोके दृढधन्वा
जितक्लमः। शीघ्रोऽनिल इवाक्रंदे चरन् क्रुद्ध इवांतकः। अस्यता येन संग्रामे धरण्यभिनिपीडिता। यो न व्यथति संग्राम
वीरः सत्यपराक्रमः। वेदस्नातो व्रतस्नातो धनुर्वेदस्य पारगः। महोदधिरिवाक्षोभ्यो रामो दाशरथिर्यथा। त
मधर्मेण धर्मिष्ठं धृष्टद्युम्नेन संयुगे। श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्। धृष्टद्युम्नस्य यो मृत्युः सृष्टस्त ३२४
तेन महात्मना। यथा द्रोणस्य पांचाल्यो यज्ञसेनसुतोऽभवत्। तं हत्वा सेनया पापेन क्रूरेणादीर्घदर्शिना॥

धर्मध्वजवता कपटधर्मवता। युधिष्ठिरस्य धर्मपुत्रस्य कर्मेति शेषः। पुत्रिणः इति न्यायविनीतो हन्ति माश्रित्य। वैधर्मिका

श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥छद्मना निहतं श्रु
त्वा पितरं पापकर्मणा। बाष्पेणापूर्यत द्रौणी रोषेण च नरर्षभ। तस्य क्रुद्धस्य राजेंद्र वपुर्दीप्तमदृश्यत। अंतकस्य
भूतानि जिहीर्षोः कालपर्यये॥ अश्रुपूर्णे ततो नेत्रे अपमृज्य पुनः पुनः। उवाच कोपान्निःश्वस्य दुर्योधनमि
दं वचः॥ पिता मम यथा क्षुद्रैर्न्यस्तशस्त्रो निपातितः। धर्मध्वजवता पापं कृतं तद्विदितं मम। अनार्यस्य नृशंसस्य ध
र्मपुत्रस्य मे श्रुतं। युद्धेष्वपि प्रवृत्तानां ध्रुवौ जयपराजयौ। द्वयमेतद्भवेद्राजन् वधस्तत्र प्रशस्यते। न्यायवृत्त्या वधो यस्तु
संग्रामे युध्यतो भवेत्। न स दुःखाय भवति तथा दृष्टो हि स द्विजैः। गतः स वीरलोकाय पिता मम न संशयः। न शोच्यः पु
रुषव्याघ्रस्तथा स निधनं गतः। यत्तु धर्मप्रवृत्तः सन् केशग्रहणमाप्तवान्। पश्यतां सर्वसैन्यानां तन्मे मर्माणि कृंत
तः ति। मयि जीवति यत्तातः केशग्रहणमाप्तवान्। कथमन्ये करिष्यंति पुत्रेभ्यः पुत्रिणः स्पृहां। कामात्क्रोधादवज्ञानाद्दर्पा
द्बाल्येन वा पुनः। वैधर्मिकाणि कुर्वंति तथा परिभवंति च। तदिदं पार्षतेनेह महदाधर्मिकं कृतं। अवज्ञाय च मां नृशं
सेन दुरात्मना। तस्यानुबंधं स द्रष्टा धृष्टद्युम्नः सुदारुणं। अकार्यं परमं कृत्वा मिथ्यावादी च पांडवः। यो ह्यसौ
छद्मनाचार्यं शास्त्रमत्याजयत्तदा। तस्याद्य धर्मराजस्य भूमिः पास्यति शोणितं। शापः सत्यनाको रव्यदृष्टा भू

ति। आधर्मिकमधर्म्मसंसृष्टं॥

द्रोण०

न्नि निवेदत्॥ अहत्वा सर्वपांचालान्यदि जीवेयमित्युत। सर्वोपायैर्यतिष्यामि पांचालानामहं वधे। धृष्टद्यु
म्नस्य समरे हंताहं पापकारिणः। कर्मणा येन तेनेह मृदुना दारुणेन वा। पांचालानां वधं कृत्वा शांतिं लब्धा
स्मि कौरव। यदर्थं पुरुषव्याघ्र पुत्रानिच्छंति मानवाः॥ प्रेत्य चेह च संप्राप्तास्त्रायंते महतो भयात्। पित्रा तु
मम सावस्था प्राप्ता निर्बंधुना यथा। मयि शैलप्रतीकाशे पुत्रे शिष्ये च जीवति। धिगस्तु मास्त्राणि दिव्यानि धि
ग्बाहू धिक्पराक्रमं। यन्मां द्रोणः सुतं प्राप्य कचग्रहमवाप्तवान्। स तथाहं करिष्यामि यथा भरतसत्तम
। परलोकगतस्यापि गमिष्याम्यनृणः पितुः। आर्येण हि न वक्तव्या कदा चित्स्तुतिरात्मनः। पितुर्वधममृ
ष्यंस्तु वक्ष्याम्यद्येह पौरुषं। अद्य पश्यंतु मे वीर्यं पांडवाः सजनार्दनाः। मृद्नतः सर्वसैन्यानि युगांतमिव कुर्व
तः। न हि देवा न गंधर्वा नासुरा न च राक्षसाः। अद्य शक्ता रणे जेतुं रथस्थं मां नरर्षभ। मदन्यो नास्ति लोकेस्मि
न्नर्जुनाद्वास्त्रवित्क्वचित्। अहं हि ज्वलतां मध्ये मयूखानामिवांशुमान्। प्रयोक्ता देवसृष्टानामस्त्राणां पृतनागतः
। कृता मयास्त्राण्यद्य मत्प्रयुक्ता महाहवे। दर्शयंतः [illegible] वीर्यं प्रमथिष्यंति पांडवान्। अद्य सर्वा दिशो राजन्धारा
भिरिव संकुलाः। आवृताः पत्रिभिस्तीक्ष्णैर्द्रष्टारो मामकैरिह। विकिरञ्शरजालानि सर्वतो भैरवस्वनान्। शरा
घैः पातयिष्यामि महावात इव द्रुमान्। न हि जानाति बीभत्सुस्तदस्त्रं न जनार्दनः। न भीमसेनो न यमौ न च

श्री॰

२२५

सकल्पं सविधानं। ब्रह्मरूपे ब्राह्मणस्वरूपे। भगवति। किं नु कारणं वध्येत्यघातायत्। तस्यावध्यस्य सर्वथापि

राजा युधिष्ठिरः। न पार्षतो दुरात्मासौ न शिखंडी न सात्यकिः। यदिदं मयि कौरव्य सकल्पं सनिवर्तनं। नारायणा
य मे पित्रा प्रणम्य विधिपूर्वकं। उपहारः पुरा दत्तो ब्रह्मरूप उपस्थिते। तं स्वयं प्रतिगृह्याथ भगवान्स वरं द
दौ। वव्रे पिता मे परमं अस्त्रं नारायणं ततः। अथैनमब्रवीद्राजन्भगवान्देवसत्तमः। भविता त्वत्समो ना
न्यः कश्चिद्युधि नरः क्वचित्। न त्विदं सहसा ब्रह्मन्प्रयोक्तव्यं कथंचन। न ह्येतदस्त्रमन्यत्र वधाच्छत्रोर्निवर्त
ते। न चैतच्छक्यते ज्ञातुं को न वध्येदिति प्रभो। अवध्यमपि हन्याद्धि तस्मान्नैतत्प्रयोजयेत्। वधः संख्ये द्र
वश्चैव शस्त्राणां च विसर्जनं। प्रयाचनं च शत्रूणां गमनं शरणस्य च। एते प्रशमने योगा महास्त्रस्य परंत
प। सर्वथा पीडितो हि स्यादवध्यान्पीडयन्रणे। तज्जग्राह पिता मह्यमब्रवीद्वै स प्रभुः। त्वं वर्षिष्यसि सर्वाणि
शस्त्रवर्षाण्यनेकशः। अनेनास्त्रेण संग्रामे तेजसा च ज्वलिष्यसि। एवमुक्त्वा स भगवान्दिवमाचक्राम प्रभुः। एत
न्नारायणादस्त्रं तत्प्राप्तं मम बंधुना। तेनाहं पांडवांश्चैव पांचालान्मत्स्यकेकयान्। विद्रावयिष्यामि रणे शचीपतिरि
वासुरान्। यथायथाहमिच्छेयं तथा भूत्वा शरा मम। निपतेयुः सपत्नेषु विक्रमत्स्वपि भारत। यथेष्टमश्मवर्षेण प्र
वर्षिष्ये रणे स्थितः। अयोमुखैश्च विहगैर्द्रावयिष्ये महारथान्। परश्वधांश्च निशितानुत्स्रक्ष्येहमसंशयं। सोह

इतः प्रयोक्ता तारत दित्यचपः॥

जाल्मिकाहरवैः॥ स च कीर्तयते व्यासानि मेन्यान्निर्यातिः॥ कथं कथामि दुःसंकथनं॥

द्रोण॰ नारायणास्त्रेण महता शत्रुतापन। शत्रून्विद्रावयिष्यामि करत्रीकृत्य पांडवान्॥ मित्रब्रह्मगुरुद्वेषी जाल्मिकः सुविगर्हितः। पांचाला

पसस्त्वा॥ ध्यनमेजीवन्विमोक्ष्यसे। एतच्छ्रुत्वा द्रोणपुत्रः पर्यवस्थत वाहिनीं॥ ततः सर्वे महाराज सैन्यं दध्मुः कुरूपसत्तमाः॥ नरास्त्रं समुद

त्तं दृष्ट्वा दिरिमान्सहस्रशः॥ तथा तन्नादवत्सुभ्रं सुरनेमिप्रपीडिता॥ महाशब्दस्तु तुमुलः खं च पृथिवीं चाव्यनादयत्॥ तं शब्दं पांड

वाः श्रुत्वा पर्जन्यनिनदोपमं॥ समेताः सर्वरथिनो ह्यष्टाः सहिताः शाप्यमंत्रयत्॥ तथोक्त्वा द्रोणपुत्रस्तु तापिवास्त्रं सप्तदस्य नारायणा

स्त्रं कारतदिव्यमस्त्रं नारायणं तदा॥ ॥इति महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥प्रादुर्भूते ततस्तस्मिन्नस्त्रे नारा

यणे प्रभो। प्रावात्सपृषतो वायुरनभ्रे स्तनयित्नुमान्॥ चचाल पृथिवी चापि चुक्षुभे च महोदधिः॥ प्रतिस्रोतः प्रवृत्तास्तु गंगेतत्र

सप्तसागाः॥ शिखराणि व्यशीर्यंत गिरीणां तत्र भारत॥ अपसव्यं मृगाश्चक्रे पांडुपुत्रान्प्रचक्रिरे॥ तमसा चावृतो ह्यकीर्यत सूर्य्य-

श्च कलुषोऽभवत्॥ संपेतुर्निश्च भूतानि क्रव्यादानि प्रहृष्टवत्॥ देवदानवगंधर्वास्त्रस्ता ह्यासन्विशांपते॥ कथं कथा भवत्तीव्रा

दृष्ट्वा तद्व्याकुलं महत्॥ व्यथिताः सर्वराजानस्त्रस्ता ह्यासन्विशांपते॥ तद्दृष्ट्वा घोररूपं वै द्रौणेरस्त्रं भयावहं॥ ॥धृतराष्ट्र उवा ३१६

च॥ ॥निवर्तितेषु सैन्येषु द्रोणपुत्रेण संयुगे भृशं शोकाभितप्तेन पितुर्वधममृष्यता॥ कुरून्नापततो दृष्ट्वा धृष्टद्युम्नस्य रक्ष

॥पृथिव्याः पाव॥

प्रागस्त्वमेत्सात्त्वमेव। अन्येरथेऽराद्र यात्यकृष्णं तरस्वहतो दमो विरूपसंधिः। आरुह्य निपीड्य कृष्णं ततितेवा। समारोप्य

णः कोऽमंत्रः पांडवेयाना तन्ममाचक्ष्व संजय॥ ॥संजय उवाच॥ ॥प्रागेव विद्रुतान्दृष्ट्वा धार्तराष्ट्रान्युधिष्ठिरः। पुनश्च तुमुलं

शब्दं श्रुत्वार्जुनमभ्यभाषत॥ ॥युधिष्ठिर उवाच॥ ॥आचार्ये निहते द्रोणे धृष्टद्युम्नेन संयुगे। निहते वज्रहस्तेन यथा

वृत्रे महासुरे। नाशंसंत जयं युद्धे दीनात्मानो धनंजय। आत्मत्राणे मतिं कृत्वा प्राद्रवन्कुरवो रणात्। केचिद्भ्रांतै रथैस्तूर्णं

निहतैः पार्ष्णिसारथिः। विपताकध्वजच्छत्रैः पार्थिवाः शीर्णकूबराः। भग्ननीडैराकुला अश्वैरारुह्यान्ये विचेतसः। भयाद्युग

य॰ चक्रैः स्वयं कृष्णं तसमंततः। रथा विशीर्णास्तु पद्भिः कविद्भिर्विद्रुताः। हयपृष्ठगताश्चान्ये कृष्यंते चच्युतासना। गजस्कं

धेषु संस्रस्तानाराचैश्चलितासनाः। शरार्ता विद्रुता नागैर्हताः केचिद्दिशो दश। विशस्त्रकवचाश्चान्ये वाहनेभ्यः क्षितिं गताः। सं

छिन्नानेमिभिश्चैव मृदिताश्च हयद्विपैः। क्रोशंतस्तात तातेति पलायंते परे भयात्। नाभिजानंति चान्योन्यं कश्मलाभिहतौजसः।

पुत्रानन्ये पितॄनन्ये सखीन्भ्रातॄन्समारोप्य हतसत्तमान्। जलेनाक्लेदयंत्यन्ये विमुच्य कवचान्यपि। अवस्थां तादृशीं प्राप्य हते द्रोणे द्रुतं ब

लं। पुनरावर्तितं केन यदि जानासि शंस मे। हयानां हेषतां शब्दः कुंजराणां च बृंहतां। रथनेमिस्वनैश्चात्र विमिश्रः श्रूयते

महान्। एते शब्दा भृशं तीव्राः प्रवृत्ताः कुरुसागरे। मुहुर्मुहुरुदीर्यंते कंपयंति मामकान्। य एष तुमुलः शब्दः श्रूयते

लोमहर्षणः। सेंद्रानप्येष लोकांस्त्रीन्ग्रसेदिति मतिर्मम। मन्ये वज्रधरस्यैष निनादो भैरवस्वनः। द्रोणे हते कौरवार्थं व्यक्त

श्री स्व

उपचीर्णो निवितः॥

द्रोण० मन्यतिवासव॥ एवमुक्ता राम ऋपाः समसंविग्ना रथपुंगवाः॥ धनंजयस्तु तच्छ्रुत्वा वानवनारं सुन्नाषणं॥ कएवकौरवाद्राणान
दुत्साप्यमहारथ॥ निवर्तयति दुर्धर्षस्तवे द्रवाभ्रातरथा॥ ॥ अर्जुन उवाच॥ उद्यम्यात्मानमुद्याय कर्मणो वीर्यमा
स्थिताः॥ धर्मं निकोरवाः शंखवान्यस्य वीर्यमपाश्रिताः॥ यत्र ते संशया राजन्स्यत्रैवा स्त्रद्वारी हताः। ध्वजैरिश्चान वस्थाप्य य
एषनदन्नाति दाश्री मंतंतं महाबाहुमनदिरदगामिनं॥ आख्यास्यामुग्रकर्माणि कुरूणामनयंकरं॥ यस्मिन्दातादद्दौ शे
णोगवां दशशतं धने। वासरांगोत्पोमहा। हिंस्यःसाक्षादेवामिपराक्रमः॥ तस्मात्मावरण वीरणाय नाहिंश्चवसायधा। हिषतो
कं पिताल्मिर्षीकाश्रसकलाः स्वयं॥ तच्छुत्वां तदहिं संचूतं नामतस्याकाराद्दा। अश्वत्थामेति सोऽचोपह्रारो। नदतिपांड
वायाहमनायद्वाकस्यपार्षनेनस्तस्त्वदा। कर्मणाम्तु हे शंसन तस्यानायोव्यवस्थितः॥ गुरुमयन्नपांचाल्यः केशपक्षप
रामृशात्। तन्नजातुक्षमे द्रौणिः क्रमनिराणेरुषमात्मनः॥ उपचीर्णो गुरुर्मिथ्या भवता राज्यकारणात्। धर्मज्ञेन सता राम साधर्म
स्तुमहान्क्रतः॥ चिरंस्थास्यति चाकीर्तिस्त्रैलोक्ये सचराचरे। रामेवालिवधाद्यदेवं द्रोणे निपातिते॥ सर्वधर्मोपपन्नो
यंममशिष्यश्च पांडवः॥ नायं वक्ष्यति मिथ्येति प्रत्ययं कृतवांस्त्वयि। स सत्यकं चुकं नाम प्रविष्टेन ततो हते। आचार्य
उक्तो भवता हतः कुंजर इत्युत। ततः शास्त्रं समुत्सृज्य निर्ममो गतचेतनः॥ आसीत्सुविह्वलो राजन्यथा दृष्टस्त्वया विभुः॥ २१७

तस्यांतिमस्य वयसः॥ अयं विकाराविशिष्टक्रिया॥ अहो बत नामं नाश्यं कष्टं॥
सतुशोकसमाविष्टो विमुखः पुत्रवत्सलः॥ शाश्वतं धर्ममुत्सृज्य गुरुः शिष्येण घातितः॥ न्यस्तशास्त्रमधर्मेण घातयित्वा
गुरुं भवान्। रक्षत्विदानीं सामात्या यदि शक्नोसि पार्षतं॥ ग्रस्तमाचार्यपुत्रेण क्रुद्धेन हतबंधुना। सर्वे वयं परित्रातुं
न शक्ष्यामोऽद्य पार्षतं॥ सौहार्दं सर्वभूतेषु यः करोत्यतिमानुषं॥ सोऽद्य केशग्रहं श्रुत्वा पितुर्धक्ष्यति नो रणे॥ विक्रोशमाने
हि मयि भृशमाचार्यगृद्धिनि॥ अपाकीर्य स्वकं धर्मं शिष्येण निहतो गुरुः॥ यदा गतं वयोभूयः शिष्टमल्पतरं च नः॥ तस्येदा
नीं विकारोऽयमधर्मोऽयं कृतो महान्॥ पितेव नित्यं सौहार्दात्पितेव हि च धर्मतः॥ सोऽल्पकालस्य राज्यस्य कारणान्निहतो
गुरुः॥ धृतराष्ट्रेण भीष्माय द्रोणाय च विशांपते। विसृष्टा पृथिवी सर्वा सह पुत्रैश्च तत्परैः॥ संप्राप्य तादृशीं वृत्तिं सत्कृतः सत
गुरुःपातः तं परैः॥ वृणीते सततं पुत्रान्मामेवाभ्यधिकं गुरुः॥ अवेक्षमाणस्त्वां मां च न्यस्तास्त्रस्त्वाहवे हतः॥ न त्वेनं युध्यमानं वै हन्यादपि श
तक्रतुः॥ तस्याचार्यस्य वृद्धस्य द्रोहो नित्योपकारिणः॥ कृतो ह्यनार्यैरस्माभी राज्यार्थे लघुबुद्धिभिः॥ अहो बत महत्पाप
कृतं कर्मसुदारुणं॥ यद्राज्यसुखलोभेन द्रोणोऽयं साधु घातितः॥ पुत्रान्भ्रातॄन्पितॄन्दारान्जीवितं चैव वासविः॥ त्य
जेत्सर्वं मम प्रेम्णा जानाति त्वं हि मे गुरुः॥ स मया राज्यकामेन हन्यमानो ह्युपेक्षितः॥ तस्माद्वाक्शिरा राजन्प्राप्तो
स्मि नरकं प्रभो॥ ब्राह्मणं वृद्धमाचार्यं न्यस्तशस्त्रं यथा मुनिं। घातयित्वाद्य राज्यार्थे मृतं श्रेयो न जीवितं॥ ॥

न्यस्तदंडो निहतो धर्मा। त्तत्त्वानापीडितरक्षकः॥ सतादरिव धमत् तं तामहन्॥ धर्मीमवतिमापालंनं। एवमुक्तस्त्वापि म
द्रोण० महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥अर्जुनस्य वचः श्रुत्वा नोचुस्तत्र महारथाः॥ अप्रियं वा प्रियं वा पि म
हाबाहुर्भीमसेनोभ्यभाषत। कुत्सयन्निव कौंतेयमर्जुनं नरर्षभ॥ मुनिर्यथारण्यगतो भाषसे धर्मसंहितं॥ न्य
स्तदंडो यथा पार्थ ब्राह्मणः संशितव्रतः॥ क्षतत्राता क्षताज्जीवन् क्षंता स्त्रीष्वपि साधुषु॥ क्षत्रियः क्षितिमाप्नोति क्षिप्रं
धर्मं यशः श्रियः॥ स भवान्क्षत्रियगुणैर्युक्तः सर्वैः कुलोद्वह॥ अविपश्चिद्यथा वाचं व्याहरन्नाद्य शोभसे॥ पराक्रम
स्ते कौंतेय शक्रस्येव शचीपतेः॥ न चातिवर्तसे धर्मं वेलामिव महोदधिः॥ न पूजयेत्त्वां को न्वद्य यत्त्रयोदश वार्षिकं॥
अमर्षं पृष्ठतः कृत्वा धर्ममेवाभिकांक्षसि॥ दिष्ट्या तात मनस्तेद्य स्वधर्ममनुवर्तते॥ आनृशंस्ये च ते दिष्ट्या बुद्धिः
सततमच्युत॥ यत्तु धर्मप्रवृत्तस्य हृतं राज्यमधर्मतः॥ द्रौपदी च परामृष्टा सभामानीय शत्रुभिः॥ वनं प्रव्राजिताश्चास्म व
ल्कलाजिनवाससः॥ अनर्हमाणास्तत्रान्वै त्रयोदश समाः परैः॥ एतान्यमर्षस्थानानि मर्षितानि मयानघ॥ क्षत्रधर्मप्रस
क्तेन सर्वमेतदनुष्ठितं॥ तमधर्ममपाकृष्टुमारब्धः सहितस्त्वया॥ सानुबंधान्हनिष्यामि क्षुद्रान्राज्यहरानहं॥ त्वया हि कथितं
पूर्वं युद्धायाभ्यागता वयं॥ घटामहे यथाशक्ति त्वं तु नाद्य जुगुप्ससि॥ स्वधर्मं नेच्छसे ज्ञातुं मिथ्यावचनमेव ते॥ भयार्दितानामस्माकं २१८
वमेतन्नवामादिकं॥ तमपि विषयुक्तं। कथितेस्त्रीरुता॥ तत्तव वचनं मे गाकारामिष्येवे सवयः॥ कौरव्यानिति काकादिवड
भयएवंसंबंधाना घातयिष्यति कौरव्यान्॥ तत्सर्वं च कौरव्यान्॥ अस्मान् परंतप रवानित्यघः॥

वाचा मर्माणि कृंतसि॥ वपन्व्रणे क्षारमिव क्षतानां शत्रुकर्शन॥ विदीर्यते मम हृदयं त्वया वाक्शल्यपीडितं॥ अधर्ममेनं वि
पुलं धार्मिकः सन्न बुध्यसे॥ यस्त्वमात्मानमस्मांश्च प्रशस्यान्न प्रशंससि॥ वासुदेवस्थितं नापि द्रोणपुत्रं प्रशंससि॥ यः
कलां षोडशीं प्राणाधिनंजय न तेर्हसि॥ स्वयमेवात्मनो दोषान्ब्रुवाणः किं न लज्जसे॥ दारयेयं महीं क्रोधाद्विकिरेयं च प
र्वतान्॥ आविध्येतां गदां गुर्वीं भीमां कांचनमालिनीं॥ गिरिप्रकाशान्क्षितिजान्भंजेयमनिलो यथा॥ द्रावयेयं वशात्सर्वानपि से
न्द्रान्देवान्समागतान्॥ सराक्षसगणान्पार्थ सासुरोरगमानुषान्॥ एवंविधमजानन्मां भ्रातरं नरपुंगव॥ द्रोणपुत्राद्भयं कर्तुं ना
र्हस्यमितविक्रम॥ अथवा तिष्ठ बीभत्सो सह सर्वैः सहोदरैः॥ अहमेनं गदापाणिर्जेष्याम्येको महाहवे॥ ततः पंचालराज
स्य सुतः पार्थमथाब्रवीत्॥ संक्रुद्धमिव नर्दंतं हिरण्यकशिपुं हरिः॥ ॥धृष्टद्युम्न उवाच॥ ॥बीभत्सो विप्रकर्माणि विदिता
नि मनीषिणां॥ याजनाध्यापने दानं तथा यज्ञप्रतिग्रहौ॥ षष्ठमध्ययनं नाम तेषां कस्मिन्प्रतिष्ठितः॥ हतो द्रोणो मया
हं किं मां पार्थ विगर्हसे॥ अपक्रांतः स्वधर्माच्च क्षत्रधर्ममुपाश्रितः॥ अमानुषेण हंत्यस्मानस्त्रेण क्षुद्रकर्मकृत्॥
तथा मायां प्रयुंजानमसह्यं ब्राह्मणब्रुवं॥ मायया व निहन्याद्यो न युक्तं पार्थ तत्र किं॥ तस्मिंस्तथा मया शास्ते यदि द्रौ
णायनी रुषा॥ कुरुते भैरवं नादं तत्र किं मम हीयते॥ न चाद्भुतमिदं मन्ये यद्द्रौणिः शुद्धगर्जया॥ घातयिष्यति कौरव्यान्प

विधर्मिणां विरुद्धधर्माचारं।।तेषां त्वविषां धर्मविदां विषापमं प्रोक्तं ज्ञानविस्मयः।।पापे प्रति कुलेयं स्वगात्रे निजहृज्जंयनकृ
ते।
 रिज्ञात्र मया कुर्वन्।।यद्यमां धार्मिकोऽब्रवीत्पितृघातिनां।।तदयं हतस्त्वत्तः पांचाल्यस्य सुतेन ले।।तायस्य कार्यमकार्यं
वा युध्यतस्या समरे।।तं कथं ब्राह्मणं हत्या धृतिर्यवा धनंजय।।योऽसन्नद्धो विदोद्धन्या द्रुह्यान्स्वक्रोधपूर्वितः।।सर्वोपा
येन मकर्थं वध्यः पुरुषसत्तम।।विधर्मिणो धर्मविदां प्रोक्तं तेषां विषोपमं।।जानन्धर्मार्थतत्वज्ञः किमामर्जुन गर्हसि।।
नृशंसः समयाक्रम्य रथ एव निपातितः।।तन्नाभिनंदसे बीभत्सो किमर्थं नाभिनंदसि।।कालानलसमं यापी ज्वलनार्कवि
षोपमं।।भीमं द्रोणं शिरश्छिन्नं न प्रशंससि मकथं।।यात्सौ मामेव नान्यस्य बांधवान्सधिजघ्निवान्।।छित्वापि तस्य मूर्द्धानं नैवा
स्मि विगतज्वरः।।तच्च मे कृंतति मर्माणि यन्न तस्य शिरो मया।।निष्पादविषये क्षिप्तं जयद्रथशिरो यथा।।अवध्ये च पि शत्रूणामधर्मः
श्रूयतेऽर्जुन।।क्षत्रियस्य हि धर्मोयं हन्याद्धन्यत वा पुनः।।स शत्रुर्निहतो मं ख्ये मया धर्मेण पांडव।।यथा त्वया हतः शूरो भगदत्तः
पितुः सखा।।पितामहं रणे हत्वा मन्यसे धर्ममात्मनः।।मया शत्रौ हते कस्मात्पापधर्मं न मन्यसे।।संबंधमवनतं पार्थं न मां त्वं व
क्तुमन्यासि।।स्वगात्रकृतसोपानं निषण्णमिव दंतिनं।।क्षमामि त्वसर्वंगमवाच्य तिक्रमर्जुन।।द्रौपद्या द्रौपदेयानां कृ
तेनान्येन हेतुना।।कुलक्रमागतं वैरं ममाचार्येण विश्रुतं।।तथा जानात्ययं लोको न हृत्स्यं पांडुनंदनाः।।नाहूती पांडवो ज्येष्ठो मादृं चाधर्मि ३१९
तंमोपानंयन।। कोऽर्जुन

धिगिति रिवैदेहिरुक्तिः।।पात्यसेत्र अधातीयसे।।

शिष्यद्रोही हतः पापो युध्यस्व विजयस्तव।। ।।महाभारते द्रोणपर्वणि।। ।।धृतराष्ट्र उवाच।। ।।सांगा वेदा यथान्या
यं येनाधीता महात्मना।।यस्मिन्साक्षाद्धनुर्वेदो ह्रीनिषेवे प्रतिष्ठितः।।तस्मिन्नाकृष्यति द्रोणे महर्षितनये तदा।।नीचात्मना
नृशंसेन क्षुद्रेणागुरुघातिना।।यस्य प्रसादात्कुर्वंति कर्माणि पुरुषर्षभाः।।अमानुषाणि संग्रामे देवैरसुकराणि च।।तस्मि
न्नाकृष्यति द्रोणे समक्षं पापकर्मणा।।नामर्षित्तंत्र कुर्वंति धिक्क्षात्रं धिगमर्षिता।।पार्थाः सर्वे च राजानः पृथिव्यां ये ध
नुर्धराः।।श्रुत्वा किमाहुः पांचाल्यं तन्ममाचक्ष्व संजय।। ।।संजय उवाच।। ।।श्रुत्वा द्रुपदपुत्रस्य ता वाचः क्रूरकर्मणः।
।तूष्णीं बभूवू राजानः सर्व एव विशांपते।।अर्जुनस्तु कटाक्षेण जिह्मं वीक्ष्य च पार्षतं।।सबाष्पमभिनिःश्वस्य धिग्धिगि
ति स वा ब्रवीत्।।युधिष्ठिरश्च भीमश्च यमौ कृष्णस्तथापरे।।आसन्सुव्रीडिता राजन्सात्यकिस्त्वब्रवीदिदं।।नेहास्ति पुरुष
ः कश्चिद्य इमं पापपूरुषं।।भाषमाणमकल्याणं शीघ्रं हन्यान्नराधमं।।एतत्वा पांडवाः सर्वे कुत्सयंति विकुत्सया।।कर्मणा
नेन पापेन श्वपाकमिव ब्राह्मणाः।।एतत्कृत्वा महत्पापं निंदितं सर्वसाधुभिः।।कथं न लज्जसे वक्तुं समितिं प्राप्य शोभनां।।क
थं च शतधा जिह्वा न ते मूर्द्धा च दीर्यते।।गुरुमाक्रोशतः क्षुद्र न चाधर्मेण पात्यसे।।वाच्यस्त्वमसि पार्थैश्च सर्वैश्चांधकवृष्णि
भिः।।यत्कर्मकलुषं कृत्वा श्लाघसे जनसंसदि।।अकार्यं तादृशं कृत्वा पुनरेव गुरुं क्षिपन्।।वध्यस्त्वं न त्वयार्थोस्ति मु

अशुभो धार्मिकः॥ अप्राङ्ः उ हउ मयत्र संबध्यते॥

शेण कृष्णामपि जीवितां कस्त्वेतद्व्यवसेदा यस्त्वदन्यः पुरुषाधमात् इह लोके शत्रुवधं यत्रो धर्मो मतः मनः॥ सत्तावरेतथा पूर्वैर्बां
धवाः ते निमर्जिताः॥ यशसा च परित्यक्तास्त्वां प्राप्य कुलपांसन॥ उक्तवांश्चापि यत्पार्थे भीष्मे इति निरर्थमं नथ्यां तो विदित
स्त्वेन स्वयमेव महात्मना॥ तस्यापि त्व वेमोदर्योनिहंता पापकृत्तमः॥ तान्यः पांचालपुत्रेभ्यो विद्यतेस्तु विपापकृता॥ स
चापि सृष्टः पित्राते भीष्मस्यांतकरः किल॥ शिखंडी रक्षितो नेतुं स च मत्तुर्महात्मनः॥ पांचालाश्चलिता धर्मात्क्षुद्रास्मि
त्रगुरुद्रुहः॥ त्वां प्राप्य सह सोदर्यान् धिक्कृतं सर्वसाधुभिः॥ पुनश्चेदीदृशीं वाचं मत्समीपे वदिष्यसि॥ शिरस्ते पातयिष्या
मि गदया वज्रकल्पया॥ त्वां च ब्रह्महणं दृष्ट्वा जनः सूर्यमवेक्षते॥ ब्रह्महत्या हि ते पाप प्रायश्चित्तार्थमात्मनः॥ पांचाल
केषु दुर्वृत्त मा स्म वगुरुमयतः॥ पुरो युद्धं तु बत्नयो पिद्धि पार्श्वे वृकलक्षणः॥ तिष्ठ तिष्ठ महाबाहो संक गदापातमिदं मम॥ तवपा
पि सहिष्येऽहं गदापातान् अनेकशः॥ सात्वतेन त्वमाक्षिप्तः पार्षतः परुषाक्षरं॥ सर्वे सात्यकिमाह संक्रुद्धः प्रहसन्नि
व॥ ॥धृष्टद्युम्न उवाच॥ ॥क्षम्यते क्षम्यते चेति क्षम्यते चेति माधव॥ महानायं अधमः साधुं पुरुषं क्षेप्तुमिच्छति॥ क्ष
मा प्रशस्यते लोके न तु पापोऽर्हति क्षमां॥ क्षमावंतं हि पापात्मा जितोयमिति मन्यते॥ स त्वं क्षुद्रसमाचारो नीचात्मा पा ३२०
पनिश्चयः॥ आकेशाग्रान्नखाग्राच्च वक्तव्यो वक्तुमिच्छसि॥ यस्य भूरिश्रवा छिन्नभुजः प्रायगतस्त्वया॥ वार्यमाणे

कूदमानो व्यायच्छमानः॥ निहत्य निपात्य॥ अधर्मेण त्वरं विपरीतां शक्यते जेतुमिति द्रोणः॥ इतः पांडवपक्षात् इतः पांडवे
नवहतस्ततः पापतरं नु किं॥ कूदमानो मया द्रोणो दिव्येनास्त्रेण संयुगे॥ विसृष्टशस्त्रो निहतस्तत्र किं क्रूर दुष्कृतं॥ अयु
ध्यमानं यस्त्वा जोत यथा प्रायगतं मुनिं॥ छिन्नबाहुं परैर्हत्वा सात्यके स कथं वदेत्॥ निहत्य त्वां पदा त्वं मे स विकर्षति
वीर्यवान्॥ किं तदा न निहंस्येनं भूत्वा पुरुषसत्तमः॥ त्वया पुनरनार्येण पूर्वं पार्थेन निर्जितः॥ यदा तदा हतः शूरः सौ
मदत्तिः प्रतापवान्॥ यत्र यत्र तु पांडूनां द्रोणो द्रावयते चमूं॥ किरन् शरसहस्राणि तत्र तत्र प्रयाम्यहं॥ स त्वमेवंविधं
कृत्वा कर्म चांडालवत्स्वयं॥ वक्तुमिच्छसि वक्तव्यः कस्मान्मां परुषाण्यथ॥ कर्ता त्वं कर्मणो यस्य नाहं वृष्णिकुला
धम॥ पापानां च त्वमावासः कर्मणां मा पुनर्वदीत्॥ जोषमास्स्व न मां भूयो वक्तुमर्हस्यतः परं॥ अधरोत्तरमेतद्धि य
न्मां त्वं वक्तुमर्हसि॥ अथ वक्ष्यसि मां मोहाद्भूयः परुषमीदृशं॥ गमयिष्यामि बाणैस्त्वां युधि वैवस्वतक्षयं॥ न
चैवं मूर्ख धर्मेण केवलेनैव शक्यते॥ तेषामपि ह्यधर्मेण चेष्टितं शृणु यादृशं॥ वंचितः पांडवः पूर्वमधर्मेण युधिष्ठिर
॥ द्रौपदी च परिक्लिष्टा तथाधर्मेण सात्यके॥ प्रव्राजिता वनं सर्वे पांडवाः सह कृष्णया॥ सर्वस्वमपकृष्टं च तथाधर्मेण
बालिशा॥ अधर्मेणापकृष्टश्च मद्रराजः परैरितः॥ अधर्मेण तथा बालः सौभद्रो विनिपातितः॥ इतोप्यधर्मेण हतो
भीष्मः परपुरंजयः॥ भूरिश्रवा ह्यधर्मेण त्वया धर्मविदा हतः॥ एवं परैराचरितं पांडवेयैश्च संयुगे॥ रक्षमाणैर्जयं

परमन्यपरमधिकं॥

वीरिह्मेजिरपि सात्वत। दुर्ज्ञेयः परमो धर्मस्तथाधर्मश्च दुर्विदः॥ युध्यस्व कौरवैः सार्द्धं मागाः पितृनिवेशनं॥
॥ ॥संजय उवाच॥ ॥एवमादीनि वाक्यानि क्रूराणि परुषाणि च। श्रावितः सात्यकिः श्रीमानाकंपित इवा
भवत्। तच्छ्रुत्वा क्रोधताम्राक्षः सात्यकिस्त्वाददे गदां। विनिःश्वस्य यथा सर्प्पः प्रणिधाय रथे धनुः। ततोभिपत्य
पांचाल्यं संरंभेणेदमब्रवीत्। न त्वां वक्ष्यामि परुषं हनिष्ये त्वां वधक्षमं। तमापतंतं सहसा महाबलममर्षितं
पांचाल्यायाभिसंक्रुद्धमंतकायांतकोपमं। चोदितो वासुदेवेन भीमसेनो महाबलः। अवप्लुत्य रथात्तूर्णं बा
हुभ्यां समवारयत्। द्रवमाणं तथा क्रुद्धं सात्यकिं पांडवो बली। प्रस्पंदमानमादाय जगाम बलिनं बलात्। स्थित्वा विष्ट
भ्य चरणौ भीमेन शिनिपुंगवः। निगृहीतः पदे षष्ठे बलेन बलिनां वरः। अवरुह्य रथात्तं तु ध्रियमाणं बलीयसा॥
उवाच श्लक्ष्णया वाचा सहदेवो विशांपते। अस्माकं पुरुषव्याघ्र मित्रमन्यन्न विद्यते। परमंधकवृष्णिभ्यः पांचा
लेभ्यश्च माधव। तथैवांधकवृष्णीनां तथैव च विशेषतः। कृष्णस्य च तथास्मत्तो मित्रमन्यन्न विद्यते। पांचालानां च वा
र्ष्णेय समुद्रांतां विचिन्वतां। नान्यदस्ति परं मित्रं यथा पांडववृष्णयः। स भवानीदृशं मित्रं मन्यसे च तथा तव। भवंतश्च त ३२१
थास्माकं भवंतो वै यथा वयं। स एवं सर्वधर्मज्ञ मित्रधर्ममनुस्मरन्। नियच्छ मन्युं पांचालात्प्रशाम्य शिनिपुंगवः॥

अचलं निष्कंपं। युयुत्सव इति भीमार्जुनादिभिः सह विशेषणं॥

पार्षतस्य च मत्तं वै शमतां पार्षतस्तथा। वयं शमयिता रस्व किमन्यत्र शमाद्भवेत्। प्रशाम्यमानो नेयः सहदेवेन मारिष। पांचा
लराजस्य सुतः प्रहसन्निदमब्रवीत्। मुंच मुंच तं शिनेः पौत्रं भीम युद्धमदान्वितं। आसादयतु मामेष धराधरमिवानिलः। यावदस्य
शितैर्बाणैः संरंभं विनयाम्यहं। युद्धश्रद्धां च कौंतेय जीवितं चास्य संयुगे। किं तु शक्यं मया कर्तुं कार्यं यदिदमुद्यतं। सुमहत्सा
डुपुत्राणामायात्येव हि कौरवाः। अथवा फाल्गुनः सर्वान्वारयिष्यति संयुगे। अहमप्यस्य मूर्धानं पातयिष्यामि सायकैः।
मन्यते छिन्नबाहुं मां भूरिश्रवसमाहवे। उत्सृजैनमहं वैनमहं वैनमथवा मां निहंतु सः। शृण्वन्पांचालवाक्यानि सात्यकिः
सर्पवच्छ्वसन्भीमबाहुवंतरसंक्रोवि स्फुरत्यनिशं वली। तौ वृषाविव नर्दंतौ बलिनौ बाहुशालिनौ। त्वरया वासुदेवश्च धर्म
राजश्च मारिष। यत्नेन महता वीरौ वारयामासतुस्ततः। निवार्य परमेष्वासौ क्रोधसंरक्तलोचनौ। युयुत्सवः परान्संख्ये प्रतीयु
: क्षत्रियर्षभाः॥ ॥महाभारते द्रोणपर्वणि॥ ॥संजय उवाच॥ ॥ततः स कदनं चक्रे रिपूणां द्रोणनंदनः। युगांते सर्वभूतानां का
लसृष्ट इवांतकः। ध्वजद्रुमं शस्त्रशृंगं हतनागमहाशिलं। अश्वकिंपुरुषाकीर्णं शरासनलतावृतं। क्रव्यादपक्षिसंघुष्टं भूतय
क्षगणाकुलं। निहत्य शात्रवान्भल्लैः सोचिनोद्देहपर्वतं। ततो वेगेन महता विनद्य स नरर्षभः। प्रतिज्ञां श्रावयामास पुनरेव
तवात्मजं। यस्माद्युध्यंतमाचार्यं धर्मकंचुकमास्थितः। मुंच शस्त्रमिति प्राह कुंतीपुत्रो युधिष्ठिरः। तस्मात्स पश्यतस्तस्य द्रावयि

गुडागुडकाः॥

ष्माभिवाहिनी। विद्राव्य सर्वा हत्वास्मिन्नालं पांचाल्यमवद्य॥ मदोन्नतान्दन्निष्मा मिथ्यादियोस्यं निमोरसा। सत्यंतवतिज्ञानामि
परिवर्वयिवाहिनी। तद्भुवी तवे युवस्तुवाहिनीपर्यवर्तयत्॥ सिंहनादेन महता व्यापाद्य सुमहद्भयं। ततः समागमाराजन्कु
रुपांडवसेनयोः॥ हुनरवानवन्नीः हूसीसागरमारिव। संरब्धाहिस्थिरीरवत्ता द्रोणपुत्राणां कौरवाः॥ उदयाः पांडुपांचाला
द्रोणस्य निधनेन च॥ तयोः परमसंहृष्टानां जयमात्मनि पश्यतां। संरब्धानां महावेगः प्रादुरासीद्विशांपते। यथा॥ शैवोद्भयाः शै
लाः सागरः सागरो यथा। प्रतिस्पंदगरा जन्नस्तथासत्कुरुपांडवाः॥ ततः शंखसहस्राणि भेरीणामयुतानि च। अवादयंत संहृ
ष्टाः कुरुपांडवसैनिकाः॥ ततो निर्मथ्यमानस्य सागरस्येव निस्वनः॥ अनवत्तवसैन्यस्य सुमहानद्भुतोपमः॥ प्रादुश्चके त
तो द्रोणिरस्त्रं नारायणं तदा। अभिसंधाय पांडूनां पांचालानां च पार्थिव। प्रादुरासंस्ततो बाणा दीप्ताग्राः खे सहस्रशः॥ पांडवा
न्हंतुमिच्छंतो दीप्तास्याः पन्नगा इव। ते दिशः खं च सैन्यं च समावृण्वन्महाहवे। मुहूर्ताद्भास्करस्येव लोके राजन्गभस्तयः॥
तथापरे द्योतमाना ज्योतींषीवामलेंबरे। प्रादुरासन्महाराज कार्ष्णायसमया गुडाः॥ चतुश्चक्रा द्विचक्राश्च शतघ्न्यो बहुला
गदाः॥ चक्राणि च क्षुरांतानि मंडलानीव भास्वतः॥ ॥ ३२२

शस्त्राकृतिभिः। रक्तप्रकारैः॥ असलिलनिर्मलेपि। विद्युवत्प्रविशंताना। विद्युवतेति पाठे विशेषेलक्ष्यं॥

शस्त्राकृतिभिराकीर्णमतीव नरतर्षभ। दृष्ट्वांतरिक्षमाविग्नाः पांडुपांचालसृंजयाः। यथा यथाह्ययुध्यंत पांडवानां महारथाः॥ त
था तथा तदस्त्रं वै व्यवर्धत जनाधिप। वध्यमानास्तदास्त्रेण तेन नारायणेन वै। दह्यमाना नलेनेव सर्वतोभ्यर्दिता रणे। यथा हि
शिशिरापाये दहेत्कक्षं हुताशनः। तथा तदस्त्रं पांडूनां ददाह ध्वजिनीं प्रभो। आपूर्यमाणेनास्त्रेण सैन्ये क्षीयति च प्रभो। जगा
म परमं त्रासं धर्मपुत्रो युधिष्ठिरः॥ द्रवमाणं तु तत्सैन्यं दृष्ट्वा विगतचेतनं। मध्यस्थतां च पार्थस्य धर्मपुत्रोब्रवीदिदं। धृष्टद्युम्न
पलायस्व सह पांचालसेनया। सात्यके त्वं च गच्छस्व वृष्ण्यंधकवृतो गृहान्। वासुदेवोपि धर्मात्मा करिष्यत्यात्मनः क्षमं। श्रेयो
ह्युपदिशते यश्च लोकस्य किमुतात्मनः॥ संग्रामस्तु न कर्तव्यः सर्वसैन्यान्ब्रवीमि वः॥ अहं हि सहसोदर्यैः प्रवेक्ष्ये हव्यवाहनं।
भीष्मद्रोणार्णवं तीर्त्वा संग्रामं भीरुदुस्तरं। अवमंस्याम्यसलिलं सगणो द्रौणिगोष्पदं। कामः संपद्यतामस्य बीभत्सोरा
शुमांद्भवति। कल्याणवृत्ताचार्यो मया युधि निपातितः॥ येन बालो न सामोन शेशुरनाम विशारदः॥ समाप्यं वेक्षिते कृ
विर्यातिता नावपालितः॥ येन विद्युत्सुतोत्तमं तथा कृष्णा सन्नं गता। उपस्थिता सभां दासीभावं ति यच्छती। त्रिघांस
मानराश्वश्च श्रांत वृष्टिरेफा ल्तुनकं वाचनं तथो गुप्तो स्ताद्यं सेधवस्यदां येन ब्रह्मास्त्रवि ष्णा पांचाल्याः सेन्यजिनाश्वाः॥ क
वीणामर्जुनस्य यत्नेन सहसा या विनिपातिता॥ येन बध्यमानाश्च राज्याद्यमधर्मतः॥ निवार्यमाणेनास्माभिरनुगंतुम

अस्माभिरस्मदीयैः विद्रुतादिनि ॥ निर्वार्यमाणा निषिध्यमानापि । तदलं युद्धेन तं प्राविष्टुं एषितास्त्वमतानतुप्रति पिशाइत्य

द्रोण० दृशिताः ॥ सो ऽसावत्यंतमस्मासु क्रुद्धः सौ ऽलं दर्पं दत्तरूढं दृष्ट्वा मरणं गमिष्यामि सबांधवः ॥ एवं ब्रुवति कौंतेये द्रोणा
द्रस्त्रेरितस्ततः । निवार्य सैन्यं वाक्येन इदं वचनमब्रवीत् । शीघ्रं न्यस्यत शस्त्राणि वाहनेभ्यश्चावरोहत । एष योगो ऽत्र विहि
तः प्रतिघातो महात्मना । द्विपाश्वस्यंदनेभ्यश्च क्षितिं सर्वे ऽवरोहत । एवमेतन्न वो ऽस्त्रं वै हनिष्यति निरायुधांश्च यथा
यथा हि युध्यंते योधा ह्यस्त्रमिदं प्रति । तथा तथा भवत्येतत्कौरवा बलवत्तरा । निक्षेप्स्यंति च शस्त्राणि वाहनेभ्यो
ऽवरुह्य ये । तानैतदस्त्रं संग्रामे निहनिष्यति मानवान् । ये त्वेतत्प्रतियोत्स्यंति मनसापीह केचन । निहनिष्यति तानस्य
ब्ध्वा रसातलगतानपि ॥ ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भारत । ईषुः सर्वे ऽस्त्रमुत्स्रष्टुं मनोभिः करणेन च ॥ ततउत्स्र
ष्टुकामांस्तानस्त्राण्यालक्ष्य पांडवः । भीमसेनो ऽब्रवीद्राजन्निदं संहर्षयन्वचः ॥ न कथंचन शस्त्राणि मोक्तव्यानीह केन
चित् । अहमावारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः ॥ अथ वाप्यनया गुर्व्या हेमविग्रहया रणे । कालवत्प्रचरिष्यामि
द्रौणेरस्त्रं विशातयन् ॥ न हि मे विक्रमे तुल्यः कश्चिदस्तीह मानवः । यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते ॥ प २२३
श्यतमे द्विपेबाहू नागराजकरोपमौ । समर्थौ पर्वतस्यापि शिशिरस्य निपातने ॥ नागायुतसमप्राणो ह्यहमेको नरेष्विह । शा

घः ॥ सा हृद्रक्रवरीण इति माञ्जरायं । करणेन वारयेन ॥

ज्वलंतमायांतं प्रति । प्रतिसमस्य तिष्ठति ह्यलं चष्टमान ॥
कोयधा प्रतिद्वंद्वो दिवि देवेषु विश्रुतः ॥ अपश्यतामवार्यं बाकोपीनां शायाद्धुधि ज्वलमानस्य दासस्य द्रोणेरस्त्रस्य
वारणं । यदि नारायणास्त्रस्य प्रतिघातो न विद्यते अद्य । तस्मानि यास्यामि पश्यत्सु कुरुकस्यां तुष्णु एवमुक्त्वा ततो भीमो
द्रोणपुत्रमरिंदमं । अभ्ययान्मेघघोषेण रथेनादित्यवर्चसा । स एनमिषुजालेन लघुत्वाच्छीघ्रविक्रमः ॥ निमेषमात्रेण ७
साद्य कौंतेयो ऽभ्यवाकिरत् । ततो द्रौणिः प्रहस्यैनं द्रवंतमभिभाष्य च । अवाकिरत्प्रदीप्ताग्रैः शरैस्तैरभिमंत्रितैः
पन्नगैरिव दीप्तास्यैर्वमद्भिरनलं रणे । अवकीर्णो ऽभवत्पार्थः स्फुलिंगैरिव कांचनैः ॥ तस्य रूपमभूद्राजन् भी
मसेनस्य संयुगे । खद्योतैरावृतस्येव पर्वतस्य दिनक्षये । तदस्त्रं द्रोणपुत्रस्य तस्मिन्प्रतिसमस्यति । अवर्धत
महाराज यथाग्निरनिलोद्धतः ॥ विवर्धमानमालक्ष्य तदस्त्रं भीमविक्रमं । पांडुसैन्यमृते भीमं सुमहद्भयमावि
वेश । ततः शस्त्राणि ते सर्वे समुत्सृज्य महीतले । अवारोहन्रथेभ्यश्च हस्त्यश्वेभ्यश्च सर्वतः ॥ तेषु निक्षिप्तशस्त्रे
षु वाहनेभ्यश्च्युतेषु च । तदस्त्रवीर्यं विपुलं भीममूर्द्धन्यथापतत् । हाहाकृतानि भूतानि पांडवाश्च विशेष
तः ॥ भीमसेनमपश्यंत तेजसा संवृतं तदा ॥ ॥ द्रोणपर्वणि नारायणास्त्रे ॥ ॥ संजय उवाच ॥ भीमसेनं
समाकीर्णं दृष्ट्वास्त्रेण धनंजयः ॥ तेजसः प्रतिघातार्थं वारुणेन समावृणोत् । नालक्षयत तत्कश्चिद्वारुणास्त्रेण

मायया निहते द्रोणे स्मार्य्यणा ॥

संहतं । अर्जुनस्य लघुता वसं हतवान् । इत्तेजसः । मायामुं रुते यो न मे मे द्रोणपुत्रास्त्रं संहृतं ॥ अग्नावग्निरिव न्यस्तो ज्वा
लामाली सुदुर्दृशः ॥ यथा राशिर्हि राजन् ज्योतीष्यस्तं गिरिं श्रिति । समाप्तं तत्र तथा बाणाना मासन् रथपदातिस
दिश्नी मोरथक्षास्य दृश्यास्तु नसूमारिष । संहृते द्रोणपुत्रेण पावकांतगीतानवत्सयं थाव्द्गधश्च अगच्छंनसम
येसच राचरं । गतेश्मिर्विनिर्दारसं तथास्त्रे नाममात्र ढोत । सूर्यमग्निः प्रविष्टः स्मादौ यावामि दिवाकरं ॥ तथाप्र
विष्टतानाज्ञानुपाज्ञायतपांडवः ॥ विकोषामस्त्रे तदृष्ट्वा तथा भीमरथं चतिरुदाय्यमाणं द्रोणिं चनिष्पतिं दृष्ट्वा सर्वे
